श्रीभगवदानन्दज्ञानाचार्यकृतसाहस्रीविवृतिसहिता
श्रीशङ्करभगवत्पादाचार्यविरचिता

उपदेशसाहस्री

कुलपतेः प्रो. राजेन्द्रमिश्रस्य प्रस्तावनया विभूषिता

सम्पादकः

प्रो. रामकिशोरत्रिपाठी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी

ISBN : 81-7270-117-9

श्रीमद् गुरुचरणकमलेषु

सादरं समर्पयति.

[illegible]

6-1-06

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

SARASVATĪBHAVANA-GRANTHAMĀLĀ
[Vol. 146]

UPADEŚASĀHASRĪ

OF

ŚRĪ ŚAṄKARABHAGAVATPĀDĀCĀRYA

With the commentary

SĀHASRĪVIVṚTI

By

ŚRĪ BHAGAVADĀNANDAJÑĀNĀCĀRYA

FOREWORD BY

PROF. RAJENDRA MISHRA
VICE-CHANCELLOR

EDITED BY

PROF. RAMA KIŚORA TRIPĀṬHĪ
Dean, Faculty of Darśana
Sampurnanand Sanskrit University
Varanasi

VARANASI
2003

Research Publication Supervisor—
Director, Research Institute
Sampurnanand Sanskrit University
Varanasi.

ISBN : 81-7270-117-9

❐

Published by—
Dr. Harish Chandra Mani Tripathi
Director, Publication Institute
Sampurnanand Sanskrit University
Varanasi-221 002.

❐

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

❐

First Edition, 500 Copies

Price : Rs. 280.00

❐

Printed by—
Shreejee Computer Printers
Nati Imli, Varanasi-221001

सरस्वतीभवन-ग्रन्थमाला

[१४६]

श्रीभगवदानन्दज्ञानाचार्यकृतसाहस्रीविवृतिसहिता

श्रीशङ्करभगवत्पादाचार्यविरचिता

उपदेशसाहस्री

दर्शनकेशरीणां पदवाक्यप्रमाणपारावारीणां परमपूज्यपादानां गुरुवर प्रो० वशिष्ठ त्रिपाठिनां करकमलयोः सादरं समर्पयामि

कुलपतेः प्रो. राजेन्द्रमिश्रस्य प्रस्तावनया विभूषिता

सम्पादकः

प्रो. रामकिशोरत्रिपाठी

दर्शन-सङ्कायाध्यक्षः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

वाराणस्याम्

२०६० तमे वैक्रमाब्दे   १९२५ तमे शकाब्दे   २००३ तमे खैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः —
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

ISBN : 81-7270-117-9

❐

प्रकाशकः—
डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशन-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी-२२१००२

❐

प्राप्ति-स्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१००२

❐

प्रथमं संस्करणम् – ५०० प्रतिरूपाणि
मूल्यम् – २८०.०० रूप्यकाणि

❐

मुद्रकः—
श्रीजी कम्प्यूटर प्रिण्टर्स
नाटी इमली, वाराणसी-२२१००१

नान्दीवाक्

तत्त्वसमीक्षार्थमेव प्रवर्तन्ते सर्वा अपि दर्शनसरणयः। तथापि तासां सर्वासां चिन्तनविधिर्भिन्नः, प्रतिपादनविधिर्भिन्नः, किञ्च तत्त्वाधिगमोऽपि भिन्न एव प्रतीयते। काचित् सरणिरीश्वरमङ्गीकरोति, काचिन्नाङ्गीकरोति, काचिदौदासीन्यं भजते। ईश्वरसिद्धावपि समेषां दर्शनानां भिन्ना एवोपपत्तयः। एवं सत्यपि, तत्तद्दर्शनग्रन्थपरिशीलनकाले जायते काऽपि विलक्षणैव श्रद्धा। नृत्यत्येव मनोमयूरस्तर्कपद्धतिमवेक्ष्य।

तत्रापि भारतीयदर्शनसमवाये मुकुटमणिपदवीमुपगच्छति ब्रह्माद्वैतसिद्धान्तो भगवत्पादादिशङ्कराचार्याभिमतः। स खलु **'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः'** इति साटोपमभिदधानो ब्रह्माद्वैततत्त्वं सम्यक्तया प्रतिपादयति, समर्थयते च स्वोपज्ञं मतं श्रुतिवाक्यैः। दृश्यमानं किञ्च निष्प्रत्यवायं हस्तामलकवत् प्रत्यक्षमक्षिलक्ष्यीक्रियमाणं जगदसौ ब्रह्मविवर्तरूपं स्वीकरोति। यथा भ्रमवशाद् रज्जौ सर्पविवर्तोऽवलोक्यते, यथा वा शुक्तौ रजतविवर्तोऽवलोक्यते, तथैव भ्रमात्मकमिदं जगत् सत्यं प्रतीयते। वस्तुतो ब्रह्मविवर्तमात्रमिदम्।

परवर्तिनि कालेऽद्वैतमतमिदमेव क्रमशः परिवर्तमानं परिलक्ष्यते। रामानुजाचार्यो विशिष्टाद्वैतं, मध्वाचार्यो द्वैतं, निम्बार्काचार्यो द्वैताऽद्वैतं, वल्लभाचार्यश्च शुद्धाद्वैतमतं प्रवर्तयाञ्चक्रुः। अचिन्त्यभेदाऽभेदमतं पुनर्गौराङ्गमहाप्रभुश्चैतन्यो वितेने। तत्सर्वमेव तत्तदाकरग्रन्थेषु यत्नतोऽनुशीलयितव्यम्। एकस्यैव वेदान्तदर्शनस्य तदेतत्पयोधिकल्पं गाम्भीर्यमाकाशकल्पश्च विस्तारः। किमुच्येत पुनर्दर्शनान्तरविषये यत्र मीमांसासांख्ययोगन्यायवैशेषिकादीनि गण्यन्ते। ततश्च वर्तते वेदप्रामाण्यमनङ्गीकुर्वाणं दर्शनत्रयम्—आर्हतं सौगतं लौकायतिकञ्च। एषां समेषामेव वर्तते पुष्कलं वाङ्मयम्।

केरलेषु पूर्णातटवर्तिन्यां कालट्यां धृतजनिर्भगवत्पादश्शङ्कराचार्यः षोडशवर्षदेशीय एव सर्वज्ञीभूय वैदिकधर्मरक्षायै बद्धपरिकरस्सञ्जातः। वादिभयङ्करस्सन्नसौ राष्ट्रव्यापिभिः शास्त्रार्थैः सौगतमतं विखण्ड्य वैदिकधर्मं वेदान्ताभिमतमद्वैतञ्च प्रतिष्ठापितवान्। अनीश्वरवादस्य कुज्झटिका सहसैव विनष्टा जाता ब्रह्माद्वैतबालमार्तण्डे समुदिते सति। श्रमणसंस्कृतिपरिणामभूतः पलायनवादोऽपि कर्मवादे प्रतिष्ठिते सति नामशेषतामुपगतः।

एवं हि प्रतिष्ठाप्य ब्रह्माद्वैतमतमादिशङ्कराचार्यश्चतसृषु दिक्षु पीठचतुष्टयं स्थापितवान्—बदरिकाश्रमे ज्योतिष्पीठं, वारुण्यां दिशि द्वारकायां शारदापीठं, प्राच्यां दिशि जगन्नाथपुर्यां गोवर्धनपीठं, शृङ्गगिरौ च शृङ्गेरीपीठम्। ततश्च प्रतिपीठमसौ स्वशिष्यमेकं पीठाधिपतिरूपेण नियुयोज वैदिकधर्मरक्षार्थम्। द्वात्रिंशद्वर्षदेशीय एव भगवत्पादश्शङ्कराचार्यः समग्रेऽपि भारतराष्ट्रे सनातनवैदिकधर्मविजयवैजयन्तीं संस्थाप्य तिरोदधे; परन्तु लोकानुग्रहधिया प्रणीतं तदुपज्ञं साहित्यमद्यापि पण्डितसमज्यामनुरञ्जयत्येव।

विविधं परिलक्ष्यते शाङ्करं वाङ्मयम्। उपनिषदां भाष्यमसौ प्रणिनाय। भाष्यमिदं दशोपनिषत्समवायमलङ्कुरुते। तद्यथा—

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरि।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।।

उपनिषदन्तरमसौ श्रीमद्भगवद्गीताया अपि भाष्यं लिलेख। ततश्च बादरायणसूत्राणां शारीरकभाष्यमरीरचत्; परन्तु एतदतिरिक्तमपि किञ्चिदसौ कृतवान् येन ब्रह्माद्वैतमतं सुप्रतिष्ठितं जातम्।

स्वाभिमतवेदान्तमतं प्रख्यापयितुकामो भगवत्पादः सरलसरलया शैल्या स्वतन्त्रग्रन्थान् प्रणीतवान्। तद्यथा—विवेकचूडामणिः, उपदेशसाहस्री, अपरोक्षानुभूतिः, आनन्दलहरी, सौन्दर्यलहरी। ततश्चासौ विपुलं प्रकीर्णञ्च विविधस्तोत्रकदम्बकं प्रणीतवान् शिवशक्तिनारायणलक्ष्मीगङ्गादिसम्बद्धम्। तत्प्रणीतवाङ्मयाऽनुशीलनेन स्फारीभवति तथ्यमिदं यत्कामं परमार्थदृष्ट्याऽसौ संसारं ब्रह्मविवर्तकल्पं मेने; परन्तु व्यवहारदृष्ट्या संसारसत्तामपि स्वीकृत्याऽसौ संसारिणां परलोकसिद्ध्यर्थं लौकिकमुपायमियेष। स उपाय एव तत्समर्थितपञ्चदेवोपासनापद्धतौ सन्दृश्यते। ब्रह्मसायुज्यमुपगतोऽप्यसौ भक्तिमार्गं दृढं समर्थयाञ्चक्रे। सौन्दर्यलहर्यां सन्दृश्यते तदीया चूडान्तपराम्बाभक्तिः।

एवं हि मुमुक्षून् विरक्तान् संन्यस्ताँश्च परितोषयति भगवत्पादो ब्रह्माद्वैतसिद्धान्तेन। सिद्धान्तोऽयं संसारं ब्रह्मविवर्तकल्पं ब्रवीति। संसारिणो गृहस्थान् मायाबन्धनिबद्धाँश्चासौ परितोषयति सगुणेश्वरभक्त्या तदुपासनापद्धत्या च। सगुणोपासनाद्वारैव साधकश्शनैः शनैर्निर्गुणब्रह्मस्वरूपं ज्ञातुं क्षमो भवतीति भगवत्पादानां गूढाभिप्रायः।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयो दर्शनसङ्कायाध्यक्षो विपश्चित्प्रवरो नास्तिकाऽऽस्तिकदर्शनसमुच्चयाऽधीतिबोधाचरणप्रचारणकुशलो **डॉ. रामकिशोरत्रिपाठि-** महोदयो महता श्रमेण सम्पादितवान् श्रीशङ्करभगवत्पादविरचिताम्

उपदेशसाहस्त्रीं श्रीभगवदानन्दज्ञानाचार्यप्रणीतया साहस्त्रीविवृतिसंज्ञया टीकया श्रीमण्डिताम्। स्वोपज्ञग्रन्थभूमिकायां त्रिपाठिवर्यो भगवत्पादवाङ्मयमभिलक्ष्य उपदेशसाहस्त्रीञ्चाधिकृत्य विद्वज्जनविनोदिनीमत्युपादेयां सामग्रीं प्रस्तौति। तदध्यवसायं समाद्रियमाणोऽहं वितरामि तेभ्यो हार्दमेदुरान् धन्यवादान्। वस्तुत एतादृशैरेव विद्याविनयपरायणैराचार्यैर्विश्वविद्यालयोऽयं महीयते।

ततश्चास्मत्प्रकाशनसंस्थाननिदेशकाः सततविद्याध्यवसायिनो नित्यस्मेरानना आद्यन्तमधुराः श्लक्ष्णमतयो **डॉ. हरिश्चन्द्रमणित्रिपाठि**महाभागा अपि मया सप्रणयमभिनन्द्यन्ते। तत्पुरुषार्थसमुज्जृम्भणमात्रमिदं विश्वविद्यालयस्य यशोवर्धनं प्रकाशनकार्यम्। कार्येऽस्मिन् प्रत्तसाहाय्याः सर्वेऽपि सुहृदो **डॉ. हरिवंशपाण्डेय**प्रभृतयो धन्यवादैर्जयजीववचनैश्च मयाऽभिनन्द्यन्ते।

मन्ये, पद्यगद्योभयोपबृंहिता एकोनविंशतिमितैः पद्यात्मकप्रकरणैस्त्रिभिश्च गद्यात्मकप्रकरणैर्मण्डितेयमुपदेशसाहस्त्री सर्वानेव बद्धानबद्धान् गृहस्थानगृहस्थान् भक्तान् मुमुक्षूँश्च तुल्यमारञ्जयिष्यति। वाङ्नैवेद्यमिदं विनिवेद्य कोविदपादेन्दीवरेषु विरमामि।

वाराणसी
माघपूर्णिमा, वि.सं. २०६०
(६ फरवरी, २००४ ई.)

विद्वद्वशंवदः
[signature]
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

भूमिका

आधाराश्रितवस्तुचित्रघटना लोके यतो दृश्यते
ग्रन्थालेखविचारसंसृतिविधौ भूमेर्महत्त्वं ततः।
यच्छास्त्रे प्रतिपाद्यते हि विषयस्तत्सारतत्त्वं सदा
सङ्क्षेपेण निरूप्य वादनिचयं सम्यक् समालोच्यते।।

वादजल्पवितण्डाभिः सिद्धान्तप्रतिपादनम्।
कुर्वते शास्त्रतत्त्वज्ञा घनध्वान्तनिवृत्तये।।
स्वपक्षस्थापनाहीना वितण्डा नाश्रिता बुधैः।
परपक्षदोषदानेन न स्वपक्षस्थितिः क्वचित्।।
विजिगीषुकथा जल्पः उभयपक्षसाधिका।
परपक्षस्य दोषेण स्वपक्षस्थापने रता।।
परदोषनिरासेन क्षीणसामर्थ्यवत्पदः।
न क्षमते पुनर्जल्पः सिद्धान्तप्रतिपादने।।
वादस्तत्त्वबुभुत्सूनां सम्यग् बोधोपकारकः।
सर्वैरनुमतः शास्त्रे ग्रन्थग्रन्थिविमोचकः।।

धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः, तत्र परमत्वञ्च जन्मस्थितिविकारराहित्यान्नित्यत्वादिना। तथा च श्रुतिः 'न स पुनरावर्तते' (छा. ८।१५।१) तदन्ये धर्मार्थकामादयो यज्ञादिकर्मणा निष्पन्नत्वात् कर्मक्षये च क्षयशीलत्वादनित्याः। 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा. ८।१।६) इति श्रुतेः। अथ च कर्मफलस्य बन्धहेतुत्वमपि परिकल्पयन्ति शास्त्रविदः—

'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः'।।

(महाभा. शान्ति. २४१।६)

न च कर्मणाऽऽत्यन्तिकदुःखनिवृत्तिरूपो मोक्षः साधयितुं शक्यते। 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः' (ना. ३-२।१२) मोक्षाख्यपरमपुरुषार्थस्य

कर्मणाऽसाध्यतया नित्यत्वमनादित्वञ्च सिद्ध्यतः। तत्प्रतिपादनपराणि हि दर्शनशास्त्राणि। तथ्यातथ्यविवेचनपुरःसरं परमपुरुषार्थं साधयन्ति दर्शनानि। दृश्यते साक्षात्क्रियते परमपुरुषार्थोऽनेन, यद्वा दृश्यते विविच्यते तथ्यातथ्यमनेनेति दर्शनशब्दस्य व्युत्पत्तेः। आस्तिकनास्तिकभेदेन द्विविधानि दर्शनशास्त्राणि। अस्ति परलोको वेदस्य प्रामाण्यश्चेत्येवं मतिर्यस्य स आस्तिकः। परलोक-सत्तावेदप्रमाणप्रतिपादकत्वेन न्यायः, वैशेषिकं, सांख्यं, योगः, पूर्वमीमांसा, उत्तरमीमांसेति शास्त्राण्यास्तिकत्वेन ख्यातानि। नास्ति परलोको न च वेदस्य प्रमाण्यमित्येवं मतिर्यस्य स नास्तिकः। नास्तिको वेदनिन्दकः। परलोकसत्तादूषकत्वेन वेदप्रामाण्यनिन्दकत्वेन च लौकायिका बौद्धा जैनाश्च नास्तिकत्वेन प्रसिद्धाः, तेषां दर्शनानि च नास्तिकदर्शनत्वेन प्रसिद्धानि।

अथ लौकायतिकवैशेषिकनैयायिकसांख्यपातञ्जलद्वैतिविशिष्टाद्वैत्यद्वैतिमतानां परस्पराविरोधेनैकत्र मते पर्यवसानमस्ति न वेति विषयमधिकृत्य किञ्चित् विमृश्यते।

(१) तत्र लौकायतिका मन्यन्ते—भूतचतुष्टयसङ्घातात्मकं चेतनं शरीरमेवात्मा। न तु शरीरातिरिक्ते आत्मनि किञ्चित्प्रमाणमुपलभ्यते। प्रत्यक्षमेकमेव हि प्रमाणम्। अनुमानाद्यधीनोत्पत्तिकं तु ज्ञानं पुनः पुनर्विभाव्यमानं प्रत्यक्षात्मकतां प्राप्नुवदेव प्रमाणं न तु स्वयमिति तत्रापि प्रत्यक्षप्रामाण्येनैव निर्वाह इत्यसन्निकृष्टं वस्त्वस्माकमपि परमार्थसदेवाभिमतमिति न कामप्यनुपपत्तिं पश्यामः। शरीरपोषणं तत्सुखसाधनार्थकामावेव पुरुषार्थौ न तु धर्मे मोक्षे वाऽतिरिक्ते पुरुषार्थे वयं प्रमाणमुपलभामहे। वेदस्तु पौरुषेयः केनापि प्रतारकेण प्रतारयितुं कल्पितो न प्रमाणतामर्हति। तथा चोक्तम्—

'अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनस्य जीविकेति बृहस्पतिः'।।

न हि लोकान्तरं जीवातिरिक्तमीश्वरं वा वयं स्वीकुर्मः, येनेश्वरप्रणीतत्वादिना वेदस्य प्रामांण्यं स्यात्। लौकायतिका हि भूतचतुष्टयसङ्घातेनोत्पन्नं शरीरमेव बन्धत्वेनाभ्युपगच्छन्ति। शरीरनाशश्च तेषां नये मोक्षः।

अङ्गनालिङ्गनाजन्यं सुखमेव पुमर्थता।
कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते।।

लोकसिद्धो भवेद् राजा परेशो नापरः स्मृतः।
देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते।।

(२) सौगताश्च चतुर्विधाः, सुगतो बुद्धो भगवानुपदेष्टा एक एव तस्य चत्वारः शिष्याः माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकाख्याः चतुर्णामपि 'यत्सत् तत्क्षणिकमित्यत्रैकमत्यम्'।

यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा अमी
सत्ता शक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा।
नाप्येकैव विधान् यथा परकृतेनापि क्रियादिर्भवेद्
द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति।।

तत्र सर्वशून्यवादिनो माध्यमिकाः परिकल्पयन्ति—

'परिव्राट् कामुकशुनामेकस्यां प्रमदातनौ।
कुपणः कामिनी भक्ष्य इति तिस्रो विकल्पनाः।।

तस्मात् सर्वं क्षणिकं क्षणिकं सर्वं दुःखं दुःखं सर्वं स्वलक्षणं स्वलक्षणं सर्वं शून्यं शून्यमिति भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ परनिर्वाणं शून्यपरं सेत्स्यतीति।

योगाचारस्तु विज्ञानस्वरूपत्वेन मोक्षमभिमन्यते। तच्च विज्ञानं द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानञ्च।

'तत्स्यादालयविज्ञानं यद् भवेदहमास्पदम्।
तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्।।

ततश्च भावनाचतुष्टयबलात् शुद्धक्षणिकविज्ञानोदयः स एव मोक्षः। सौत्रान्तिकस्तु—बाह्यं घटादिकमस्त्येव, तत्सर्वं न प्रत्यक्षं किन्त्वनुमेयम्। तथा च ज्ञानाकारानुमेयक्षणिकबाह्यार्थ एवात्मा, दुःखं दुःखायतनं दुःखसाधनं च निरुध्य विमलज्ञानोदयो मुक्तिरिति स्वीकरोति। वैभाषिकश्च पदार्थो द्विधा ग्राह्योऽध्यवसेयश्च। तत्र 'कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः' इति। तत्पदार्थतत्त्वज्ञानोतरं विमलज्ञानोदयो मोक्ष इत्यङ्गीकरोति।

दिगम्बरास्तु—देहेन्द्रियादिभ्यो व्यतिरिक्तादेहपरिणाम आत्मा, तद्यथा जलादिकं घटादिपात्रे निक्षिप्तं तदाकारतामेति, एवमात्माऽपि शरीरे तत्परिणामो भवति। यथा वा कञ्चुकादिषु शरीरं प्रविष्टं तथात्मा देहे प्रविष्टः तदाकारो भवति। एवं ह्रस्वतां दीर्घतां महत्त्वं वा प्रतिपद्यमानोऽपि नानित्यः परिणामभेदेऽपि द्रव्यस्यानाशात्। स चात्मा सततोर्ध्वगमनशीलकर्मपाशेन बद्धो न संसारकाले ऊर्ध्वं गच्छति। सम्यग् ज्ञानेन कर्मबन्धप्रहाणे सततोर्ध्वगतिं लभते। स एव मोक्षः।

आस्तिकेषु वैशेषिकतार्किकप्राभाकरा हि देहेन्द्रियाद्यतिरिक्तः कर्ता भोक्ता विभुः जड आत्मा। स च ज्ञानगुरुयोगाच्चेतनः सुखदुःखादिसमवायी ज्ञानाधिकरणमहं जानामील्पाद्यनुभवात्। विभुत्वञ्चात्र सर्वभूतसंयोगित्वरूपम्। तदभावे हि अणुपरिमाणत्वे देहव्याप्त्यभावात् युगपत्प्राप्तनानाऽवयवगतदुःखादिवेदनं न स्यात्। प्रत्यक्षता च तस्य न स्यात्। प्रत्यक्षं प्रति महत्त्वस्य कारणत्वात्। साधर्म्यवैधर्म्याभ्यां देहाद्यतिरिक्तत्वेन तज्ज्ञानाद् आत्यन्तिकसर्वदुःखोच्छेदो मोक्ष इति वदन्ति।

मोक्षविषये मीमांसकानां वेदान्तिनाञ्चेयान् भेदः, मीमांसकाः प्रपञ्चसम्बन्धस्य विलयो मोक्ष इति वदन्ति। वेदान्तिनस्तु प्रपञ्चविलयो मोक्ष इति स्वीकुर्वन्ति। तथा हि स्वप्नप्रपञ्चवदविद्यानिर्मितमिदं जगद् आत्मसाक्षात्कारे जातेऽविद्यानिवृत्तौ सत्यां कारणाभावे कार्यस्याप्यभावात् प्रपञ्चसत्तैव नास्तीति वेदान्तिनः। तत्र मीमांसका इत्थं सङ्गिरन्ते, अविद्यादशायामिव मुक्तावस्थामपि प्रपञ्चसत्ता तथैव राजते। केवलं बन्धनाशो भवति। तथा चोक्तं शास्त्रदिपिकायाम्—त्रेधा हि प्रपञ्चः पुरुषं बध्नाति—भोगायतनं शरीरम्, भोगसाधनानि इन्द्रियाणि, भोग्याः शब्दादयो विषयाः। भोग इति सुखदुःखविषयोऽपरोक्षानुभव उच्यते, तदस्य त्रिविधस्यापि बन्धस्य आत्यन्तिको विलयो मोक्षः (शास्त्रदीपिका, पृ. ३५८)

मीमांसकेषु प्रभाकरो नियोगसिद्धिरेव मोक्ष इति मनुते। बाह्यफलकामनाहीनेन कर्तव्यज्ञानेन नित्यकर्मणामनुष्ठानं मोक्षः। अतः क्रियासातत्यमेव मोक्षः। तत्र क्रियाव्यतिरिक्तं किञ्चिदपि फलं नापेक्षते।

सांख्याश्च दुःखत्रयस्यात्यन्तिकी निवृत्तिरेव मोक्ष इति स्वीकुर्वन्ति। तत्र यथा वेदान्तिनां मोक्षे आनन्दानुभूतिर्न तथा सांख्यानां मुक्तौ, सांख्या हि इत्थं सङ्गिरन्ते सुखदुःखे परस्परमापेक्षेते, दुःखाभावे सुखस्यापि सत्ता न सेत्स्यति। यथा नर्तकी रङ्गस्थलमास्थाय दर्शकेभ्यः स्वकलाकौशलं प्रदर्श्य पुनर्नृत्यव्यापारात् स्वतो निवर्तते, एवमतिसुकुमारतरा प्रकृतिः पुरुषेण सकृदनुभूता न पुनः पुरुषसमक्षमागच्छति। तत्त्वाभ्यासपरिणामेन पुरुषे कैवल्यज्ञानोदयो भवति।

पातञ्जलाश्च सांख्याभिमतपञ्चविंशतितत्त्वेभ्योऽतिरिक्तमीश्वरतत्त्वमनुमन्यन्ते। 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः, (योगसूत्र १।२४) यथा मुक्तस्य पूर्वाबन्धकोटिः सम्भाव्यते नैवमीश्वरस्य, स तु सदैव ईश्वरः।

रामानुजीयास्तु—सकलकल्याणगुणनिधेर्भगवतोऽनुग्रहेण विषयभूतसंसाराज्जीवस्य मुक्तिरिति कल्पयन्ति। तत्रये मुक्तिसंसिद्धये कर्मसमुचितज्ञानान्विता भक्तिरेव हेतुः। वेदविहितकर्मानुष्ठानेनान्तःकरणं परिशुध्यति, शुद्धेऽन्तःकरणे ब्रह्मविषयिणी जिज्ञासोदेति। अतो ज्ञानमीमांसां प्रति कर्ममीमांसाया हेतुत्वम्।

भक्तेरुद्भवे कर्मसमुचितज्ञानं हेतुः। मुक्तौ च प्राधान्येन भक्तिरेव निमित्तम्। तत्र भक्तिष्वपि पराप्रपत्तिरूपाऽनन्यशरणागतिस्वरूपैव जीवानां सर्वदुःखविभञ्जिका। अकिञ्चनः सन् भगवच्छरणमधिगतो जीवः सर्वदुःखेभ्यो विमुच्यते। तथा चोक्तं यामुनाचार्येण आलबन्दारस्तोत्रे—

'न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविन्दे।
अकिञ्चनोऽनन्यगतिः शरण्यं त्वत् पादमूलं शरणं प्रपद्ये।।

मुक्तो जीवः सर्वज्ञत्वसत्यसङ्कल्पकत्वगुणान्वितो भवति। परञ्च सर्वकर्तृत्वमीश्वर एव राजते।

एवं गुणाः समानाः स्युर्मुक्तानामीश्वरस्य च।
सर्वकर्तृत्वमेवैकं तेभ्यो देवे विशिष्यते।।

अद्वैतिनो ह्यविद्यानिवृत्तिर्मोक्ष इति मन्यन्ते। स चात्मसाक्षात्काररूपः, मोक्षस्यात्मरूपत्वन्नित्यत्वञ्चाङ्गीक्रियेते तैः। मोक्षस्याजन्यत्वान्न तत्र कर्मणो हेतुत्वम्। न च ज्ञानकर्मसमुच्चयो हेतुः ज्ञानकर्मणोः समुच्चयाभावात्। अन्यद्धि कर्मफलम्, अन्यच्च ज्ञानफलम्। कर्मणा ह्यप्राप्तं पुरुषेप्सितं साध्यते, ज्ञानेन तु प्राप्तमपि भ्रमवशादप्राप्तमिवावगतं यथा स्वग्रीवावनद्धं ग्रैवेयकम्, अवगम्यते। एवं जिहासिकमपि द्विविधं किञ्चिदहीनं जिहासति, यथा बलयितचरणं फणिनं किञ्चित् पुनर्हीनमेव जिहासति तथा चरणाभरणे नूपुरे फणिनमारोपितम् (भामती ब्र.सू. १।१४) ज्ञानकर्मणोः फलव्यतिरेकः स्वयमेव भगवता गीताशास्त्रे प्रोक्तः।

'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।। (गी. ३।३)
'न कर्मणा न प्रज्ञया धनेन त्यागेनैकेऽमृतत्वमानशुः'।
(ना.उ. २।१२)

एवं महाभारतेऽपि 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते' इति पूर्वमुक्तत्वाच्च। भगवत्पादेन गीताभाष्ये ज्ञानकर्मणोर्महान् प्रभेदः प्रदर्शितः। 'न हि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक् समुद्रं जिगमिषुणा समानमार्गत्वं सम्भवति। प्रत्यगात्मविषयप्रत्ययसत्तानकरणाभिनिवेशश्च ज्ञाननिष्ठा, सा च प्रत्यक् समुद्रगमनवत् कर्मणा सहभावित्वेन विरुध्यते। पर्वतसर्षपयोरिव अन्तरवान् विरोधः (गी.शा.भा. १८।५५)।

अथ च 'तरति शोकमात्मवित्' (छा.उ. ७।१।३) इति श्रुत्या ब्रह्मज्ञानेन शोकनिवृत्तिदर्शनाद् बन्धस्याविद्यात्मकत्वं निश्चीयते। तच्चाज्ञानं जीवात्म-

परमात्मनोर्भेदात्मकम्। एवं जीवब्रह्मणोरभेदे सति एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञोपपत्तिः। उभयोर्भेदनिन्दाऽपि तत्रैव श्रूयते। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति....यत्र वा यस्यात्मैवाभूत् केन कं विजानीयात्' (बृ.उ. १।४।१४)। अत्र इवशब्दप्रयोगाद् द्वैतस्यापारमार्थिकत्वं बोध्यते। केन कं विजानीयादिति क्रियाकर्मभावप्रतिषेधात् उभयोरेकत्वं बोध्यते। वाक्यान्वयाधिकरणे एव प्रतिज्ञोपपत्तये "अवस्थितेरिति काशकृत्स्नः" (ब्र.सू. १।४।२२) इति सूत्रे भगवत्पादैरुक्तम् 'अस्यैव परमात्मनोऽनेन विज्ञानात्मभावेनावस्थानाद् उपपन्नमिद-मभेदेनोपक्रमणमिति' (ब्र.सू.,पृ. ४१८) एवम् 'आत्मैवेदं सर्वम्' (छा.७।२५।२१) 'ब्रह्मैवेदं सर्वम्' (मु.२।२।११) नान्तोऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता (बृ. ३।७।२३) अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा. ६।३।२) तत्त्वमसि (छा.६।८।७) अहं ब्रह्मास्मि (वृ.१।४।७) इत्यादि—श्रुतिशतैः क्षेत्रज्ञं चापि मां विद्धि (गी.१३।२) वासुदेवः सर्वमिति (गी.७।१९) समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् (गी.१३।२७) इत्यादिस्मृतिभिश्च जीवात्मपरमात्मनोरेकत्वं बोध्यते। एवञ्च जीवात्मा वस्तुतो ब्रह्मैव पूर्वोक्तस्वरूपः। स एवात्मा द्रष्टव्योऽमृतत्वकामेन। स वा एष महानज आत्मा, इत्यादिश्रुतिभिश्च आत्मनः साक्षात् महत्त्वं बोध्यते। शुद्धबुद्धमुक्तसच्चिदानन्दनित्यस्वरूप आत्मैव द्रष्टव्यः साक्षात् कर्त्तव्यः। साक्षात्कारश्च श्रवणादिजन्या नीरन्ध्रमणि मयूखवदखण्डाकारा मनोवृत्तिरहं ब्रह्मास्मि इत्याकारा (तदित्थं समेऽपि दार्शनिकाः स्वस्वसिद्धान्तदिशा श्रेयोभूतमोक्षाख्यं परमपुरुषार्थं संसाधयन्ति।

वस्तुतस्तु संसारस्यैव बन्धभूतत्वात् सर्वदुःखनिमित्तत्वाच्च पूर्वं तदुत्पत्तिः प्रतिपाद्य व्यतिक्रमेण तल्लयं संसाधयन्ति। तत्र आस्तिका जगदुत्पत्तौ 'यतो वा इमानि भूतानि जायन्ते' (तै.३।१) तस्माद्वा एतस्मादाकाशः सम्भूतः (तै.२।१) तद् ऐक्षत बहुस्याम् (छा.६।२।३) तत् तेजोऽसृजत (छा.६।२।३) तत् सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् (तै.२।६) त्रयं वा इदं नामरूपं कर्म (बृ.१।६।१) अनेन जीवेन आत्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा.६।३।२) इत्यादिश्रुतीः प्रमाणत्वेनाभ्युपगच्छन्ति। नास्तिकास्तु वेदं प्रमाणत्वेनामन्यमाना प्रमाणान्तरेण स्वस्वसिद्धान्तदिशा प्रपञ्चोत्पत्तिं परिकल्पयन्ति।

यद्यपि चार्वाकादयो नास्तिका वेदस्य प्रामाण्यं न स्वीकुर्वन्ति, तथापि तेषां सिद्धान्तमूलं पूर्वपक्षत्वेन अस्थिरपक्षत्वेन वा वेदे यथाकथञ्चिन्निरूपितम्। तद्यथा लौकायतिकाः पृथिव्यादीनि चत्वारि महाभूतानि तत्त्वानि तेषां सङ्घातेन शरीरेन्द्रियादिरूपेण भौतिकप्रपञ्चस्योत्पत्तिः। जडभूतानां पृथिव्यादितत्त्वानां शरीरेन्द्रियादिरूपेण परिणामे सति चैतन्यमुपजायते। यथा सुराप्रकृतिभूते

किण्वौषधिविशेषेऽसत्यामपि मादकताशक्तौ तद्विकृतौ मदशक्तिरुपजायते। तथाऽजभूतेषु पृथिव्यादिषु तत्त्वेषु चैतन्यं नास्ति, विकृते सति चैतन्यमुपजायते।

'जयभूतविकारेषु चैतन्यं यत्तु दृश्यते।

ताम्बूलपूगचूर्णानां योगाद्राग इवोत्थितम्।। (सं.सि.सं.२।७)

चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते।

किण्वादिभ्यः समेतेभ्यो मदशक्तिवत्।।

मतमिदं वेदेनेत्थमनुमोदितम् 'इदं महद्भूतमनन्तमपारं विज्ञानघन एव। एतेभ्यो भूतेभ्य समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति।' (बृ.उ., २।४।१२)

सौगतेषु विज्ञानवादिनो योगाचाराः वायुवेगसमुद्दोलिता नृत्यमानाः समुद्रतरङ्गा इव आलयविज्ञानादिदं विषयप्रेरितं जगज्जायत इति मन्यन्ते। विज्ञानवादिनो जगतो बाह्यसत्तां न स्वीकुर्वन्ति। ज्ञानरूपेणान्तःस्थितमेव विषयवासनाऽऽसादितं वासनानुगतमिदं जगद्विवर्तते।

'तरङ्गा उदधेर्यद्वत् पवनप्रत्ययेरिताः।

नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न विद्यते।।

आलयौघस्तथा नित्यं विषयपवनेरितः।

चित्रैस्तरङ्गविज्ञानैर्नृत्यमानः प्रवर्तते।। (लङ्कावतारसूत्र २।९९-१००)

अत्रापि श्रुतिमानम्—'विज्ञानं यज्ञं तनुते' कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे। ब्रह्मज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। (तै.२।५) तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। (तै.२।५)

सर्वशून्यवादिनो माध्यमिकाः शून्यादेव क्षणिकमसद्रूपं जगद् जायते द्रष्टा दृश्यं दर्शनञ्च सर्वं स्वप्नवद् भ्रम एवेति वदन्ति। तन्मते नोपादानं समवायिकारणं विभिन्नकालिकक्षणिकविज्ञानव्यक्त्योः समवायिकारणत्वासम्भवात्, किन्तु असहकृतं कारणमुपादानमुत्तरव्यक्तौ पूर्वव्यक्तिमात्रस्यैव तैः कारणत्वाङ्गीकारात्। तच्च कारणत्वं शून्य एव सम्भवति। शून्यं चात्र न सद्रूपं नासद्रूपं न सदसद्रूपं न चासन्नासद्रूपं तद्विलक्षणमनिर्वचनीयम्। तथा चोक्तम्—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।

चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः।। (मा.का.१।६)

अत्रापि श्रुतिमानम् 'तद्ध्येक आहुरसदेवाग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत' (छा.६।२।१) 'असदेवेत्यत्र अ इति पृथक् पदम्' अमानोनाः प्रतिषेधे

इति वचनात्। अग्रे सृष्टेः पूर्वम् इदं सच्च नासीत्, किन्तु इदानीमेव इदम्बुद्धिविषयतया क्षणिकसत्पदार्थरूपतयाऽजायत। यत एवं तस्माद् असतः कारणात् कारणं विनैवेत्यर्थः जगदजायत।

दिगम्बराश्च वस्तूनां स्वरूपद्वयं स्वीकुर्वन्ति, शाश्वतांशात्मना समेऽपि पदार्था नित्याः अशाश्वतांशात्मना चोत्पत्तिरूपतां व्ययरूपतां च भजन्ते। जैनमते सर्वाण्यपि वस्तूनि उत्पादव्ययध्रौव्यरूपाणि। 'उत्पादव्ययध्रौव्ययुक्तं सत्' (तत्त्वार्थसूत्र ५।२९) ते अपरिवर्तमानस्वभावसिद्धस्य वस्तुनो नित्यत्वं कथयन्ति। परिवर्तमानमपि वस्तु स्वजात्यच्युतं नित्यम्। यथा सुवर्णस्य कटककुण्डलात्मना परिणतेऽपि सुवर्णत्वं न विहन्यते। उक्तञ्च तदपि नित्यं यस्मिन् तत्त्वं न विहन्यते। 'आकृतिरन्या चान्या भवति—द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते (म.भा.पस्पा.) इदमपि श्रुत्यानुमोदितम् 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा.६।७।४) मृत्पिण्ड एव नामरूपभाग् भवति न मृदो द्रव्यान्तरं घटादिरिति। मृत्तिकात्मनैव घटादिकं सत्यं न तु स्वरूपेणेत्यर्थः।

परमाणुपुञ्जैः कार्यद्रव्योत्पत्तिं मन्यमाना अवयवातिरिक्तावयविस्वरूपवादिनो नैयायिका अवयवाः परस्परं संयुज्य अवयविन आरम्भन्त इति कथयन्ति। ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते। ततश्च परमाणुसंयोगे सति द्व्यणुकमुत्पद्यते। ततस्त्रिभिर्द्व्यणुकैस्त्र्यणुकम्। एवं चतुरणुकादिक्रमेण महती पृथिवी महत्य आपो महत्तेजो, महान् वायुश्च जायन्ते।

ननु परमाणुपुञ्जैरेव घट इति व्यवहारोपपत्तौ अतिरिक्तावयविनोऽसत्त्वात् पृथिव्यादिचतुष्टयस्य नित्यत्वाऽनित्यत्वाभ्यां विभागकथनमनुपपन्नमिति चेत्, न, परमाणोरतीन्द्रियत्वेन तत्समुदायस्य घटत्वाभ्युपगमेऽप्रत्यक्षत्वप्रसङ्गात्। न च एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य घटस्य प्रत्यक्षत्वं स्यात्, दूरे एककेशस्याप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वादिति वाच्यम्, केशस्यातीन्द्रियत्वा-भावेन दूरत्वरूपदोषेण न प्रत्यक्षत्वं परमाणोस्त्वतीन्द्रियत्वेन प्रत्यक्षायोग्यत्वेन तत्समूहस्यापि प्रत्यक्षायोगात्, न चादृश्येन द्व्यणुकेन दृश्यत्रसरेणोरुत्पत्तिवद् अदृश्येन परमाणुपुञ्जेन दृश्यपरमाणुपुञ्जस्योत्पादात्, घटादेः प्रत्यक्षत्वसम्भव इति वाच्यम्, उद्भूतरूपमहत्त्वादिरूपकारणसमुदायवशात्प्रत्यक्षत्वं तदभावे चाप्रत्यक्षत्वं न तु कस्यचित् स्वाभाविकम्, एवं च अनेकद्रव्यसमवेतसमवेतत्व-रूपस्यानेकद्रव्यत्वस्य महत्त्वोपादकत्वेन परमाणुसमूहरूपे घटे महत्त्वाभावेनाप्रत्यक्षा-पत्तेरित्यतिरिक्तावयविसिद्धिः।

तार्किकरीत्या तु. प्रलये सदात्मकमपि जगत्कारणं यदासीत् तत्राद्वितीयं गुणादिरूपद्वितीयविशिष्टस्वभावत्वात्। तस्माद् अद्वितीयात् सतः जगत् नाजायत, अपि तु सद्वितीयादेव सतः जगद् जायतेत्यर्थः। 'कथं नु खलु सोम्यैवं स्यात् कथमसतः सञ्जायेतेत्युत्तरवाक्येनासतः कारणात् सतः कार्यस्य बौद्धस्वीकृतोत्पत्तेर्निराकरणादसदेवेत्यादिपूर्ववाक्येनासत्कारणात्मकतया प्रलये जगतः सत्त्वमुच्यते। कार्याणां हि ध्वंसरूपा सूक्ष्मावस्था प्रलयकालव्यापकत्वा-दक्षणिकत्वेनास्ति। सृष्ट्यारम्भसमये स्थूलकार्यरूपेण परिणमते। तेनासदात्मकं जगतो नानुपपन्नम्। भिन्नकालीनयोरपि तयोस्तादात्म्यं युक्त्याप्युक्तमेव। अत एव तस्मादसतः सञ्जायत इत्युत्तरवाक्यं तथैव बोधयति।

प्रकृतिपुरुषसंयोगाज्जगदुद्भवो भवतीति सांख्याः सङ्गिरन्ते, न जडभूतप्रकृतिमात्रान्न वा निष्क्रियस्वरूपात्सर्गः सम्भवति। जगत्सर्जनविधौ प्रकृतिः पुरुषमपेक्षते पुरुषश्च प्रकृतिमपेक्षते, उभयोरपेक्षा जिगमिष्वोरन्धपङ्गुपुरुषयोरिवास्ति। यथा कश्चिदन्धः पुरुषो गतिक्षमोऽपि मार्गालोकनेऽक्षमो न गन्तुं पारयति, एवमेव पद्भ्यां खञ्जः पुरुषो मार्गालोकने क्षमोऽपि पङ्गुदोषाद् गमने न प्रभवति, उभौ च सम्मिल्य गमने प्रभवतः। सृष्टौ हि चेतनत्वक्रियावत्त्वसम्पन्नयोर्निमित्तत्वं सम्भवति। प्रकृतेर्जडस्वभावत्वात्तत्र चेतनत्वं नास्ति, पुरुषस्य निष्क्रियत्वात् तत्र क्रियावत्त्वं नास्ति। उभयसंयोगे हि चेतनत्वक्रियावत्त्वसम्पन्नतया निमित्तत्वं सम्भवति। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वेता. ६।१०) 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' (गी. ९।१०)।

'अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे'। (गी. ८।१८)

रामानुजीयास्तु सर्वव्यापिनि परमेश्वरे चिदमिदंशौ विद्येते इति स्वीकुर्वन्ति, तत्र जडभूतमचित्तत्वं प्रकृतिरूपं गुणत्रयम्। अत्र नये कापिलाद्भिन्ना प्रकृतिः, कापिला हि जडस्वभावं गुणत्रयसाम्यावस्थाभूतं प्रधानमेव प्रकृतित्वेनाभ्युपगच्छन्ति, रामानुजीयास्तु निरवयवगुणत्रयमेव प्रकृतिरिति मन्यन्ते। गुणत्रयातिरिक्तायां प्रकृतौ मानाभावात्। सा च प्रकृतिः परमेश्वरांशभूता तेनैव चोदिता सूयते सचराचरम्। परमेश्वरेच्छया निरवयवाऽपि गुणत्रंयात्मिका प्रकृतिः स्वयमेव सूक्ष्मतेजोऽब्भूम्यादि-रूपेण विभज्यते, ततश्च त्रिवृतकरणप्रक्रियया स्थूलरूपतां भजते।

'शब्दस्पर्शविहीनं तद् रूपादिभिरसंयुतम्।
त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम्।। (विष्णुपुग. १।२।११)

ननु तस्माद्वा एतस्मादाकाशः सम्भूतः आकाशाद्वायुः, इति (तै.२।१) श्रुतौ सत्यामपि कथं तेजःप्रभृतिभूतत्रयस्यैव कार्यत्वमभिमन्यत इति चेन्न

गायत्रीविद्याप्रकरणे व्योम्नश्चैतन्यस्वरूपप्रतिपादनात्। तथा च श्रुतयः 'यो वै सोऽन्तः पुरुष आकाशो योऽयमन्तर्हृदय आकाशः, 'आकाशशरीरं ब्रह्म' (तै.१।६।२) आकाश आत्मा (तै.१।७।१) आकाशस्य ब्रह्मरूपत्वं प्रतिपादयन्ति। वायोरपि नोत्पत्तिः 'तत्तेजोऽसृजत' (छा.६।२।३) इति श्रुत्या तेजःप्रभृतिभूतानामेव सर्गविधानात् 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा.६।३।३) इति श्रुत्या त्रयाणामेव भूतानां स्थूलरूपत्वप्रतिपादनाच्च।

समेऽपि सृष्टिप्रतिपादकपक्षा अद्वैतिभिर्निराकृताः। पृथिव्यादिभूत-सङ्घाताच्चैतन्योत्पत्तिवादिनां मतं दूषयन्तोऽद्वैतिन आहुः, जडभूतद्रव्येभ्यो न चैतन्योद्भवः कारणगुणसमनियतकार्योत्पत्तेः। कारणगुणभिन्नकार्योत्पत्तिश्चेत्तदा पीततन्तुभ्यो रक्तपट उत्पद्येत। अतश्चार्वाकमतं न युक्तिसहम्। विज्ञानवादिनां मतं दूषयन्तोऽद्वैतिनो जल्पन्ति, नोपलभ्यमानबाह्यवस्तुनोऽभावमधिगन्तुं शक्येत कैश्चिदपि, येन तस्य विज्ञानजन्यत्वं स्यात्। न च माध्यमिकसम्मतं शून्यं जगदुत्पत्तौ कारणं सम्भवति, असतः कारणत्वासम्भवात्, 'कथमसतः सज्जायत' (छा.६।२।१) इति श्रुतेः। असत्पदार्थस्य कालसंख्यादिना सह सम्बन्धाभावात्। एकमेवाद्वितीयमित्युक्तेः। उक्तञ्च शाङ्करभाष्ये 'प्रागुत्पत्तेः सदभावस्य प्रमाणाभावात् प्रागुत्पत्तेरसदेवेति कल्पनानुपपत्तिः (शा.भा.छा.६।२।१)।

सांख्यसम्मतं प्रधानं न प्रपञ्चोत्पत्तौ हेतु गुणत्रयसाम्यावस्थातिरिक्तं प्रधानं किञ्चित् प्रवर्तकं निवर्तकं वा बाह्यमापेक्ष्यावतिष्ठते। प्रधानस्य चेतनत्वादिलक्षण-क्रियावत्त्वाभावान्न कारणत्वम्। 'तदैक्षत बहु स्याम' (छा.६।२।३) इति श्रुत्या कारणस्येक्षितृत्वश्रवणात्। पुरुषप्रधानसंयोगोऽप्यसम्भवः। उदासीनस्वभावः पुरुषो न प्रवर्तको न निवर्तकः, अतः प्रधानं नापेक्षते। अनपेक्षत्वाच्च कदाचित् प्रधानं महदाद्याकारेण परिणमते कदाचिन्न परिणत इत्येतदयुक्तम्।

वैशेषिकसम्मतं परमाणुकारणमपि न सम्भवति, अरूपवद्भ्यः परमाणुभ्यो रूपवत्कार्यानुप्पत्तेः। ते हि मन्यन्ते कारणद्रव्यरूपसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणान्तरं कार्यजातमारभन्ते, शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्योत्पत्तिदर्शनात्तद्विपरीतादर्शनाच्च। अतो रूपरहितेभ्यः परमाणुभ्यो रूपवत्कार्याणां प्रसवासम्भवः। परमाणूनां रूपवत्त्वं यदि स्वीक्रियेत तदा कार्यगतरूपवत्त्वस्य पार्थिवपरमाणुगतपाकजरूपाननुगतत्वात् परमाणूमनित्यत्वं प्रसज्येत। अथ च परमाणूनां रूपादिस्वीकारे अग्निसंयोगजन्या रूपादयः स्वोत्पत्तौ स्वाश्रयकारणगतपाकजरूपादिकमापेक्षन्ते पराभ्युपगतरीत्यैव जलपरमाणुगतरूपादीनां पार्थिवपरमाणुगतश्यामरूपस्य चोत्पत्तावपेक्षितानां रूपादीनामाश्रयत्वेन परमाणूनां कारणीभूता अवयवाः सिध्यन्तो न निवारयितुं शक्यन्ते। सावयवत्वे

चानित्यत्वमप्यनिवार्यम्। उक्तञ्च भगवत्पादेन 'यद्धि लोके रूपादिमद्वस्तु तत्स्वकारणापेक्षया स्थूलमनित्यं च दृष्टम्। तद्यथा पटस्तन्तूनपेक्ष्य स्थूलोऽनित्यश्च भवति, तन्तवश्चांशूनपेक्ष्य स्थूला अनित्याश्च भवन्ति। (शा.भा.ब्र.सू. २।२।१५) उपदेशसाहस्रीग्रन्थे हि—

'सांख्यकाणादबौद्धानां मीमांसार्हतकल्पनाः।
शास्त्रयुक्तिविहीनत्वान्नादर्तव्याः कदाचन'।।

(उपदेशसाहस्री, १६।६४)

अद्वैतिसम्मतकार्यकारणभावविचारः—अद्वैतिनो हीत्थं सङ्गिरन्ते, ब्रह्मण्यध्यस्ताविद्याया विकारोऽयं प्रपञ्चः, ब्रह्मणश्च विवर्त इति। 'यतो वा इमानि भूतानि जायन्ते (तै. ३।१) इति श्रुत्या ब्रह्मण एव समस्तस्य कार्यजातस्योत्पत्ति-प्रतिपादनात् कथमविद्यायाः कारणत्वमिति चेन्न शुद्धस्य ब्रह्मणः कारणत्वाभावेन मायोपहितस्य कारणत्वाभिधानात्—

'न तस्य कार्यं करणञ्च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च।। (श्वेता.६।८)

इत्यनया श्रुत्या ब्रह्मणः कार्यकरणनिषेधपुरःसरं ज्ञानबलात्मिकायाः शक्तेः कारणत्वप्रतिपादनाच्च। सा च शक्तिः मायाऽविद्यादिपदेन व्यपदिश्यते, 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वेता.४।१०) सर्वज्ञत्वादिविशिष्टं मायोपहितमीश्वरचैतन्यमुपादानम्। 'यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' (मुण्ड.१।१।९) इति श्रुतेः। तत्र केचन जन्मादिसूत्रतद्भाष्ययोरुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेः शुद्धमेवोपादानम्। अन्ये वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति। तत्र ईश्वर उपादानम्, तथाऽन्तःकरणादिजीवाश्रिताविद्यामात्रपरिणाम इति, तत्र जीव एव उपादानम्। मायाऽविद्यैक्यवादेऽपि वियदादिप्रपञ्चस्य ईश्वर उपादानम्, तथाऽप्यन्तःकरणादीनां जीवतादात्म्यप्रतीतेः जीव उपादानम्। वाचस्पतिमिश्राश्च ज़ीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानमिति माया सहकारिमात्रमिति वदन्ति।

'वाचाऽरम्भरणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति (६।१।४) श्रुत्या नामरूपात्मकविकारजातस्य कथनमात्राभिधानात्, वस्तुतः कारणातिरिक्तं किमपि कार्यजातं नास्त्येव, शुक्तौ प्रतिभासमानरजतमिव चैतन्याधिष्ठिताविद्यापरिणाम-

भूतमिदं जगत्। यदि प्रपञ्चजातमवैद्यिकं न स्यात्तदा ब्रह्मैव सदात्मनाऽवतिष्ठेत। अथ च ब्रह्मज्ञानेन निवृत्तायामप्यविद्यायां प्रपञ्चो न निवर्तेत। अविद्याजन्य-क्लेशभूतस्य जगतो निवृत्तिश्च। ब्रह्मज्ञानेन प्रतिपाद्यते।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।। (मुण्ड.२।२।२)

तरति शोकमात्मवित् (छा.७।१।३) इत्यादिश्रुतिवचनैरात्मज्ञानं भ्रमनिवृत्तौ शोकनिवृत्तौ च हेतुरुच्यते, ज्ञानं हि अज्ञाननाशकं नान्यस्मिन्नाशे निमित्तम्, यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव (गी.४।३५) ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः (गी.५।१६) शोकमोहभूतमिदं जगद् यदि अविद्याजन्यं न स्यात् तदा अविद्यानिवृत्तावपि न व्यपगच्छेत्। सत्यप्यात्मज्ञाने शोकमोहानुवृत्तावात्मज्ञानं निष्फलतां यायात्।

अभिन्ननिमित्तोपादानत्वविचारः

प्रपञ्चोत्पत्तिकार्यस्य कारणद्वयमुच्यते।
अविद्यापरिणामेन ब्रह्म विवर्तते सदा।।

अविद्योपहितं केचित् कारणमीक्षते हि तत्।
पञ्चम्यन्तो यतश्शब्दस्तदैक्षतेतिकर्तृता।।

उपादाननिमित्ते द्वे लोके भिन्ने हि कारणे।
वेदान्ते कर्तृरूपं यत्तदुपादानमुच्यते।।

'यतो वा इमानि भूतानि जायन्ते' (तै.३।१) 'तस्माद्वा एतस्मादाकाशः सम्भूतः' (तै.२।१) इति श्रुतिवचनाभ्यां यस्योपहितस्य ब्रह्मणो विवर्तोपादानतोक्ता तस्यैव च पुनः 'सोऽकामयत बहु स्याम' (तै.२।६) 'तदात्मानं स्वयमकुरुत' (तै.२।७) इति श्रुतिभ्यां कर्तृत्वरूप निमित्तत्वमुक्तम्। अथ च छान्दोग्ये 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.६।२) इति श्रुत्या यस्य ब्रह्मणः कार्यपूर्वभावित्वमुक्तं तस्यैवाग्रे कर्तृत्वरूपनिमित्तत्वमुक्तम्। अतो ब्रह्मणः प्रपञ्चरूपकार्यस्योपत्त्पत्तावभिन्ननिमित्तोपादानता। निमित्तं च तदुपादानं चेति निमित्तोपादानम्। अभिन्नं च तन्निमित्तोपादानं चेति अभिन्ननिमित्तोपादानम्। आद्यकर्मधारणादेव निमित्तोपादानयोरभेदे सिद्धे पुनरभिन्नपदं कर्मधारयावगताभेदः ऐक्यलक्षण एव न नीलोत्पलादौ गुणगुणिनोरिव तादात्म्यरूप इति बोधनार्थम्।

कार्यनियतपूर्ववृत्तिरूपं हि कारणं दर्शनान्तरेषु त्रिविधमुक्तम्। समवायि असमवायिनिमित्तभेदात्। यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। येषु तन्तुषु

समवायेन सद् घटात्मकं कार्यमुत्पद्यते ते तन्तवः समवायिकारणम्। यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनोत्पद्यते तद्धर्मावच्छिन्नं तद्धर्मावच्छिन्ने समवायिकारणमित्यर्थः। कार्येण कारणेन वा सहैकास्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणम्। कार्यकारणयोरधिकरणवृत्तित्वनियमः तत्र पटरूपकार्यस्य समवायेनाधिकरणे तन्तौ तन्तुसंयोगः समवायेन वर्तत इति भवति पटं प्रति तन्तुसंयोगोऽसमवायिकारणम्, एवं पटरूपस्य स्वसमवायिसमवायसम्बन्धेनाधिकरणे तन्तौ तन्तुरूपं समवायेन वर्तत इति पटरूपं प्रति तन्तुरूपमसमवायिकारणम्। तद्भिन्नं तुरीवेमादिकं निमित्तकारणम्।

शास्त्रान्तरेषु यत्समवायिकारणं तदेवात्र उपादानपदेनोच्यते। तच्च द्विविधं विवर्तोपादानं परिणामोपादानञ्चेति। वस्तुनस्तत्समसत्ताकोऽन्यथाभावः परिणामः, तदसमसत्ताको विवर्तः। तथा च उपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तत्परिणामत्वम्। उपादानत्वाभिमतवस्तुसत्ताविषमसत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तद्विवर्तत्वमिति। ज्ञाननिवर्त्यरूपाविद्यासत्तासमसत्ताकत्वेन जायमानतयाऽविद्यायाः परिणामोऽयं प्रपञ्चः। ब्रह्मज्ञानेन निवर्त्यतया यथाऽनित्येयमविद्या तथैव तज्जायमानं जगदप्यनित्यम्। ब्रह्म हि त्रिकालाबाध्यं पारमार्थिकं स्वसजातीयविजातीयस्वगतभेदशून्यञ्चास्ति। जगद्धि ब्रह्मप्रमाबाध्यं व्यावहारिकं सत् स्वसजातीयविजातीयस्वगतभेदवच्चास्तीति विषमसत्ताकत्वेन विवर्तते। अतो ब्रह्म विवर्तोपादानमिति।

कर्तृत्वरूपं निमित्तकारणमपि सोपाधिकमेव ब्रह्म। यतो हि यस्य ब्रह्मणो यतो वा इमानि इति श्रुत्या विवर्तोपादानता प्रतिपादिता तस्यैव कर्तृत्वप्रतिपादनात्। कर्तृत्वं नाम व्यापाराश्रयत्वं तच्च तदैक्षत सोऽकामयत, तदात्मानं स्वयमकुरुत, इत्यादिश्रुतिप्रतिपादितव्यापाराश्रयत्वेन कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वरूपम्। अत्र केचन चिकीर्षाकृतिकर्तृत्वनिर्वाहाय चिकीर्षाकृत्यन्तरापेक्षायामनवस्थाप्रसङ्गात् कार्यानुकूलज्ञानवत्त्वं ब्रह्मणः कर्तृत्वम्। न च ज्ञानेऽप्येष प्रसङ्गः, तस्य ब्रह्मस्वरूपत्वेनाकार्यत्वात्। नित्यज्ञानस्वरूपस्य ब्रह्मणस्तादृशज्ञानवत्त्वमौपाधिकभेदमादाय द्रष्टव्यम्। न चैवमपि सृष्टिकारणज्ञानस्य तदैक्षत इति श्रुत्या कादाचित्कत्वप्रतिपादनविरोध इति वाच्यम्, ब्रह्मस्वरूपतया नित्यस्यापि ज्ञानस्य प्राण्यदृष्टपरिपाकलक्षणो यः कादाचित्कस्सहायस्तद्विशिष्टतया कादाचित्कत्वमभिप्रेत्य तच्छ्रुत्युपपत्तेः।

ब्रह्मणः सर्वज्ञत्वविचारः

ज्ञानं विना न कर्तृत्वं कथञ्चिदपि सम्भवम्।
तस्मात् स्रष्टुः प्रपञ्चस्य श्रुतौ सर्वज्ञता स्मृता।।

श्रुतयः पौरुषेयाश्चेत् तासां कर्ताऽपि तादृशः।
ज्ञानरूपस्य वेदस्य जनको ज्ञानवान् सदा।।

सकलप्रपञ्चसर्जनकर्तृत्वेनार्थतो ब्रह्मणः सर्वज्ञत्वं सिद्धम्। कार्योपाधिरयं जीव इति पक्षे, अविद्याकार्यान्तःकरणे प्रतिबिम्बितं चैतन्यं जीवः। कार्यञ्चात्रान्तःकरणं तच्च द्रव्यरूपम्। तस्यापञ्चीकृतपञ्चमहाभूतानां सत्त्वांशाज्जन्यतया तदुपहितं चैतन्यं विज्ञम्, तच्चाल्पदेशप्रकाशकत्वेनाल्पज्ञमिति। सर्ववस्तुविषयसकलप्राणिधीवासनो-परक्ताज्ञानोपाधिक ईश्वरः सर्वज्ञः। 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' (मुण्ड.१।११९) एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः (प्र.५।९) इति श्रुतेः। क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत (गी.१३।२) इति स्मृतेः।

तथा हि कुत्रचित् कण्ठरवेण सोपाधिकस्य ब्रह्मणः सर्वज्ञत्वमुक्तम्, तद्यथा वाक्यवृत्तौ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः, क्वचिच्चार्थतः सिद्धम्, तद्यथा शास्त्रयोनित्वात् (ब्र.सू.१।१।३) यद्यच्छास्त्रं यस्मात्पुरुषविशेषात्सम्भवति स पुरुषविशेषस्तस्माच्छास्त्रादधिकरणज्ञानसम्पन्नः। यथा व्याकरणादीनि शास्त्राणि पाणिन्यादीनां ज्ञेयैकार्थानि सन्ति, ततोऽप्यधिकविज्ञानवन्तस्तत्कर्तारो भवन्ति। सकलज्ञानराशिसमन्वितस्य वेदस्य कर्ताऽपि वेदादधिकतरज्ञानान्वितः स्यादिति, कृत्वोच्यते भगवत्पादेन न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति (शा.भा.,ब्र.सू.१।१।३) ननु वेदस्यापौरुषेय-त्वान्नित्यत्वाच्च कथं कर्तृत्वमिति चेन्न बृहदारण्यके अस्य महतो भूतस्य निःस्वसितमेतद्यदृग्वेदो यजुर्वेद (बृ.३।५।५।१२) इत्युपक्रम्य 'यं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानीति, इत्युपसंहृत्य नामरूपात्मकस्य सर्वस्यापि प्रपञ्चस्य निःश्वसितवदप्रयत्नसाध्यब्रह्मकार्योक्तेः।

ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.२।१।१) प्रज्ञानं ब्रह्म (ऐ.३।३) इत्यादिश्रुतिवचनैर्ब्रह्मणो ज्ञानस्वरूपत्वसिद्धे ज्ञानाधिकरणत्वेन सर्वज्ञत्वं कथमुच्यत इति चेन्न निरुपहितस्य सच्चित्स्वरूपत्वेऽपि सोपहितस्य ज्ञानाश्रयत्वेन कर्तृत्वप्रतिपादनात्। तथा हि वृत्तिमदन्तःकरणोपहितत्वेनाऽऽत्मनो ज्ञातृत्वं न स्वतः। यत्तु परमते ज्ञानमित्यस्य अर्शाद्यजन्तत्वेन ज्ञानगुणकमित्यर्थ इति तन्न ज्ञानपदस्य नपुंसकस्य ज्ञाने रूढेः, अर्शादिकल्पनाया अनपेक्षणाद् ब्रह्मणः स्वसम्बद्धसर्वभासकत्वेन सर्वज्ञत्वसम्भवात्। न च सच्चिदानन्दस्वरूपत्वेन शुद्धस्यापि सौपाधिकत्वं सत्यं ज्ञानमनन्तमादिपदानां वितस्तपरिमितश्चन्द्र इतिवदन्यवस्तुव्यवच्छेदे प्रयोजकत्वात्। वस्तुतस्तु निरुपाधिकस्य ब्रह्मणो न किमपि लक्षणं सम्भवति येन ब्रह्मस्वरूपं प्रतिपादयेत, अतः शाखाचन्द्रन्यायेन यत्किञ्चिद

व्यावर्तकत्वेन स्वरूपं प्रतिपाद्यते। 'सत्यं ज्ञानम्' इत्यत्र ज्ञानपदलब्धं यज्ज्ञानं तत्सवित्रादेः प्रकाशादिकमिव ब्रह्मस्वरूपादात्मनोऽव्यतिरिक्तमात्मस्वरूपमेवास्ति। ननु ज्ञानस्य ब्रह्मस्वरूपत्वे सर्वज्ञत्वश्रुतिविरोधः, तस्याकार्यतया ब्रह्मणस्तत्र कर्तृत्वासम्भवादिति चेत्, न, ज्ञानस्वरूपस्य शुद्धस्य ब्रह्मणः सर्वसाक्षिभूतत्वेन सर्वज्ञत्वप्रतिपादनात्। वस्तुतस्तु जीवस्य बुद्ध्युपाधिवशान्मुख्यज्ञातृत्वादिवद् ब्रह्मणोऽपि मायोपाधिवशान्मुख्यमेव सर्वज्ञत्वं कामयितृत्वादिकं च सम्भवति।

आत्मतत्त्वविमर्शः

सत्यानृतसमासक्तं जगदेतत् प्रवर्तते।
आत्मतत्त्वं सदा सत्यं मिथ्याभूतमिदं जगत्॥
तथ्यातथ्यपरिज्ञानं दृक्छास्त्रैः क्रियते बुधैः।
तथ्यं सर्वज्ञचैतन्यमतथ्यं जगत् स्मृतम्॥
स्वसिद्धान्तदिशा सर्वैस्तत्त्वं सम्परिचीयते।
अतो दर्शनशास्त्रेषु प्राधान्येनैव चिन्तनम्॥

दर्शनशास्त्राणां तथ्यातथ्यविवेचनविधावुपयोगितया यन्नित्यं सत्यं परमतथ्यञ्चात्मतत्त्वं तत्प्रतिपादयन्ति लोकानुपकुर्वन्ति हि शास्त्राणि। आत्मतत्त्वञ्चास्तिकनास्तिकोभयविधशास्त्रेषु विविच्यते। तत्र कानिचित् साक्षादीश्वरवादीनि, कानिचिच्च परम्परया तत्त्वबोधकानि। तत्र नास्तिकेषु चार्वाकाः ब्राह्मणोऽहं गौरोऽहं स्थूलोऽहं जानामि गच्छामीत्यादिसामानाधिकरण्यप्रतीतेः ब्राह्मणत्वादिधर्मवति शरीर एव ज्ञानसुखाद्याश्रयत्वं सिद्ध्यतीति शरीरमेवात्मा, अत्र श्रुतिः स वा एष पुरुषोऽन्नरसमयः (तै.२।१) चार्वाकैकदेशिनो हि काणोऽहं बधिरोऽहमितीन्द्रियधर्मसामानाधिकरण्यदर्शनात् सुषुप्तिदशायां सत्यपि शरीरे चक्षुराद्युपरमे घटाद्यनुपलब्धेश्चेन्द्रियमेवात्मेत्याहुः। अपरे चार्वाकास्तु सुषुप्तिदशायां चक्षुरादीनामुपरमेऽपि मनसा सर्वव्यवहारदर्शनात् तस्य नित्यत्वाच्च मन एवात्मा। अत्र श्रुतिः 'अन्योऽन्तरात्मा मनोमयः (तै.२।३) प्राणैर्विना व्यवहारादर्शनात् पिपासावानहमित्याद्युपलब्धेश्च प्राण एवात्मा, अत्रापि श्रुतिः 'अन्योऽन्तरात्मा प्राणमयः' (तै.२।२)।

सौगतेषु शून्यवादिनो माध्यमिकाः सुषुप्त्यव्यवहितोत्तरक्षणमुत्थितस्य सुषुप्तावहं न किञ्चिदन्वभुवमित्यनुभवाच्छून्यमेवात्मेति सङ्गिरन्ते। तत्र श्रुतिः असदेवेदमग्र आसीदेकमेवाद्वितीयम् (छा.६।२।१) क्षणिकविज्ञानवादिनो योगाचार्यास्तु क्षणिकविज्ञानमेवात्मा तच्च द्विविधं प्रवृत्तिविज्ञानम्, आलय-विज्ञानञ्चेति। तत्रायं घट इत्यादौ घटादिविषयकप्रवृत्त्या प्रवृत्तं विज्ञानं

प्रवृत्तिविज्ञानमुच्यते। अत्रापि श्रुतिमानम् 'अन्योऽन्तरात्मा विज्ञानमयः' (तै.२।४) सौत्रान्तिकास्तु ज्ञानाकारानुमेयक्षणिकबाह्यार्थ एवात्मेतीच्छन्ति। वैभाषिकाश्च क्षणभङ्गुरवादिनः क्षणिकबाह्यार्थ एवात्मेतीच्छन्ति।

आस्तिकेषु सांख्या आत्ममूलप्रकृतिमहदहङ्कारपञ्चतन्मात्राषोडशविकारभेदात् पञ्चविंशतितत्त्वानीति कथयन्ति। तत्र शीकरनिर्लिप्ततामरसपलाशवत् कर्तृत्वभोक्तृत्वादिनिर्लिप्त आत्मा, स च न प्रकृतिर्न विकृतिर्न च कारणं न कार्यम्। पातञ्जला अपि सांख्यसम्मतं कर्तृत्वभोक्तृत्वादिविरहितं कार्यकारणहीनमेवात्मेति स्वीकुर्वन्ति। परञ्च तन्त्रये आत्मायोगगम्यः, योगश्चित्तवृत्तिनिरोधनम्, तच्च चित्तस्य बाह्यविषयनिवर्त्तनादन्तराभिनिवेशः। एवं प्राणान्निरूध्यात्मना सह शिवस्यैक्यभावनं समाधिः। अष्टाङ्गसमन्वितेन योगेन यच्छिवमयं ज्योतिरवलोक्यते तदेवात्मा।

मीमांसकास्तु कर्मैवेश्वरः स्वर्गादिकमेव पुरुषार्थः, मन्त्रमयी देवता अर्थवादवेदो न प्रमाणमिति गदन्ति। मीमांसकैकदेशिनस्तु परिचारककृतकर्मणः फलदाता यथा भूपालस्तथा वेदोक्तकर्मणः फलदातेश्वर एवेति जल्पन्ति।

रामानुजीयाश्च चिद्रूपा ज्ञानाश्रयोऽणुरनेक आत्मा। स च ब्रह्मशरीरमिति वदन्ति। सर्वदैव सविशिष्टोऽसौ निर्विशेषो न कदाचन। सृष्टौ स्थूलचिदचिद्विशिष्टोऽयं लये सूक्ष्मचिदचिद्विशिष्ट उच्यते। उभयोर्विशिष्टयोरैक्यमिति विशिष्टाद्वैतम्। तार्किकास्तु समवायेन ज्ञानाधिकरणमात्मेति सङ्गिरन्ते। स च जीवात्मपरमात्मभेदेन द्विविधः। परमत्वञ्चोत्कृष्टत्वं तच्च प्रकृते सृष्टिस्थितिप्रलयकर्तृत्वरूपम्। जीवात्मपरमात्मनोर्मध्ये परमात्मा ईश्रः सर्वज्ञश्चास्ति स त्वेक एव। नित्यज्ञानाधिकरणत्वं तस्य लक्षणमवगन्तव्यम्। तत्र नित्यज्ञानत्वञ्च सर्गाद्यवसरे परमाणुना द्व्यणुकं करिष्यामीति ज्ञानस्यावश्यकत्वेन तदुत्पादकशरीरादिकारणकलापस्य तदानीं व्यतिरेकेण तस्य नित्यत्वमिति। शैवा हि शेते जगद् यस्मिनिति व्युत्पत्त्या शिव एव सकलचराचरात्मसंसारस्योत्पत्तिस्थिति-लयादीनां हेतुः। शिव एव स्वशक्त्या रचयति, तथैव रक्षति संहरति च। अत शिव एवात्मा विष्णुब्रह्मादिदेवानामप्याश्रयभूत शिव एवमति। तदुक्तम्—

शुद्धस्फटिकसङ्काशं सर्वव्यापिनमीश्वरम्।
कलये जगदाधारं विष्णुब्रह्मादिसेवितम्।।

समेऽपि पक्षा अद्वैतिभिर्निराकृताः, चार्वाकैकदेशिसम्मतमिन्द्रियं नात्मा, चक्षुरादिनाशे योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यभेदप्रत्ययानुपपत्तेः। न चेन्द्रियान्तरेणानुसन्धीयत इति वाच्यम्, अन्यानुभूतेऽन्यानुसन्धानायोगाच्च। मनोऽपि नात्मा मनसोऽणुत्वेन सुखाद्यनुपलम्भप्रसङ्गात्। नापि शरीरमात्मा मृतकशरीरे

ज्ञानापत्तेः। माध्यमिकसम्मतं शून्यं नात्मा, सुषुप्तावहं नासमित्यनुभवस्या-प्रामाणिकत्वात्। प्रामाणिकत्वे त्वात्मनि तस्य ज्ञानाभावोपरक्तत्वात्। क्षणिक-विज्ञानमपि नात्मा पूर्वानुभूतपदार्थस्य स्मरणानुपपत्तेः। अनुभवितुरिदानीमभावाद् अन्यानुभूतेऽर्थेऽन्यस्यानुसन्धानायोगात्।

सांख्यसम्मतः कर्तृत्वभोक्तृत्वादिनिर्लिप्त आत्मा नेति, अहं कर्त्ताहं भोक्ताहं जानामीति कर्तृत्वभोक्तृत्वचैतन्यानां सामानाधिकरण्यप्रतीतेश्चेतनातिरिक्तप्रकृति-सद्भावे मानाभावात्। तार्किकसम्मतं ज्ञानाधिकरणं नात्मा प्रज्ञानं ब्रह्म, इत्यादिश्रुतिवचनेनात्मनो ज्ञानस्वरूपप्रतिपादनात्। रामानुजीयसम्मतचिदचिद्विशिष्टो नात्मा 'एकमेवाद्वितीयम्, नेह नानास्ति किञ्चन' इत्यादिश्रुतिभिर्ब्रह्मणः सर्वभेदराहित्येन प्रतिपादनात्। कस्तर्हि आत्मा यः श्रुतिविषयः तत्राहुरद्वैतिनः नित्यशुद्धबुद्धमुक्तस्वभावः सच्चिदानन्दरूपो विभुरात्मा। सर्वप्रपञ्चाधिष्ठानभूतः स्वसजातीयविजातीयस्वगतभेदशून्यः 'एकमेवाद्वितीयम्' (छा.६।२।१) इति श्रुतेः। सर्वविकारहीनः 'अविनाशी वा अरेऽयमात्मा नित्यज्ञानस्वरूपः सत्यो व्यापकश्चात्मा' सत्यं ज्ञानमनन्तं ब्रह्म (तै.शा.) इति श्रुतेः। यदिदं प्रपञ्चजातं दृश्यते तत्सर्वमात्मैव नान्यत् किमपि आत्मैवेदं सर्वम् (छा.६।२५।२) इदं सर्वं यदयमात्मा (बृ.उ.२।४।६) ब्रह्मैवेदं सर्वम् (मुण्ड.२।२।११) इति श्रुतयः 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते' (गी.१०।८) अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः (गी.१५।१८) इति स्मृती च प्रमाणानि। अयमेवात्मा औपनिषदः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ.उ.२।४।५) इति श्रुतिप्रतिपादित-दर्शनश्रवणमननादिविषयः। स च प्राधान्येन दर्शनशास्त्रप्रतिपाद्यश्चास्ति।

भूमिकार्थनिर्वचनम्

अथ प्रकृतविषयमभिलक्ष्योच्यते। यथा चित्रघटनावितानव्यासक्तौ चित्रपटभित्तिकाद्याधाराणां महत्त्वं वरीवर्ति, तथैव ग्रन्थाधारभूताया भूमिकायाः। ग्रन्थप्रतिपाद्यविषयप्रयोजनादीनां सारतत्त्वमाद्यौ प्रतिपाद्य वितन्वन्ति शास्त्राणि शास्त्रविदः। भुवनजनको ब्रह्मापि जगत्सर्जनविधावादौ पृथिवीमेवाधारयत् 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीम्' भूमिसर्जनमन्तराऽन्यवस्तूनां सर्जनानुत्पत्त्या पूर्वं भूमिसृष्टिवद् भूमिकानिर्वचनमन्तरा विषयनिर्वचनानुत्पत्त्याऽऽदौ भूमिकानिर्वचनमिति। भूमिरेव भूमिकेति व्युत्पत्तेः।

तत्र वादजल्पवितण्डादिरूपाणां कथाप्रकाराणामन्यतमामाश्रित्य प्रबन्धवितान-प्रतिपादनतया उभयपक्षनिरूपणपुरःसरं स्वाभिमतसिद्धान्तस्थापनकुशलो जल्परूपकथाप्रकारमाश्रितोऽयं श्रीमद्भगवत्पादशङ्कराचार्यविरचितेषु ग्रन्थे-

ष्वन्यतमोऽयं ग्रन्थ उपदेशसाहस्री नाम। ग्रन्थेऽस्मिन् भगवत्पादेन सर्वासामुपनिषदां प्रतिपाद्यमद्वैततत्त्वमतिरहस्यग्रन्थिसमन्वितं महताऽऽयासेन निःक्षिप्तमिति कृत्वा ग्रन्थोऽयमद्वैतसिद्धान्ते प्राधान्यं भजतेतमाम्। प्रकरणग्रन्थेऽस्मिन् अद्वैतनये प्रतिपाद्याः प्रसिद्धाश्च समेऽपि विषया यथाक्रममुद्भाविताः सन्ति। अतोऽद्वैतशास्त्रे प्रसिद्धा आचार्याः सुरेश्वराचार्यप्रभृतयस्तत्तत्प्रकरणेषु ग्रन्थस्यास्य भूयांसि पद्यानि समुद्धरन्ति। न केवलमद्वैतिनः विप्रतिपत्तिवादिनो भास्करादयोऽपि प्रकृतग्रन्थनाम उल्लिखन्ति। तथा हि शङ्करसमकालिको भास्करः स्वग्रन्थे उपदेशग्रन्थ इति नाम निर्दिशति, अतो ज्ञायते पूर्वमस्य नाम उपदेशसाहस्री न प्रसिद्धमासीत्। न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते, इति गीताश्लोकव्याख्याविधौ स्वमतं पूर्वं प्रस्तूय, पश्चाद् भगवत्पादीयमतविधौ तदीयेनैव सिद्धान्तेन विरोधमापादयन्नवोचत् 'अथ नैष्कर्म्यशब्देन ज्ञाननिष्ठतः कर्म कृत्वा ज्ञानोत्पत्त्यसम्भवादिति, तथाप्यविदुषां सर्वकर्मत्यागोपदेशो भवतो विरूद्ध्येत। तथा चोक्तमुपदेशग्रन्थे।

उपदेशसाहस्रीग्रन्थनामविचारः

एतन्नामविषये विप्रवदन्ति विपश्चितो विद्वांसः। तत्र साम्प्रतमधिगतेषु मुद्रितग्रन्थेषु हस्तलिखितग्रन्थेषु चोपदेशसाहस्री इति उपदेशसहस्री वा द्वैधा नामोपलभ्यते। शृङ्गेरिपीठाधिपरमेष्ठिश्रीसच्चिदानन्दशिवाभिनवभारतीस्वामिपादानामाज्ञानुग्रहेण १९०९ तमे खैस्ताब्दे श्रीवाणीविलासमुद्राणालये प्रकाशितायां शाङ्करग्रन्थावल्यामुपदेशसहस्री इत्येवास्ति। समतीर्थप्रणीतया पदयोजनिकाव्याख्यया सह १९३० खैस्ताब्दे निर्णयसांगरमुद्रणालयप्रकाशिते ग्रन्थे तु उपदेशसाहस्री इति नाम दृश्यते। तत्रत्यटीकाया आरम्भवाक्ये गद्यपद्योभयप्रबन्धे पुष्पिकाद्वये च उपदेशसाहस्री' इत्येव निर्देशः समुपलभ्यते। परञ्च तत्रैव टीकापरिसमाप्तौ, उपदेशसहस्री, इति ह्रस्वाकारसंयुक्तसकारात्मकः पाठः समुपलभ्यते। 'उपदेशसहस्रीयं विवृता हि महात्मभिः' तत्र छन्दोऽनुरोधाद्भिन्नः पाठ इति सम्भाव्यते। एवमेव प्रकाशतामधिगतस्यास्य सरस्वतीभवनपुस्तकालये समुपलब्धस्य श्रीभगवदानन्दज्ञानाचार्यकृतसहस्रीविवृत्तिसमन्वितस्य हस्तलिखितग्रन्थस्यापि द्वैधा नाम समुपलभ्यते, तत्र मूले उपदेशसाहस्री टीकायां तु सहस्रीविवृत्तिरिति। अत्रापि मन्ये छन्दोभङ्गभिया टीकाकारेण सहस्रीविवृत्तिरिति नामनिर्देशः कृतः। तथा हि टीकारम्भे मया सहस्रीविवृत्तिर्विधीयते कृताऽपि मन्दोपकृतिप्रसिद्धये, इदं हि उपेन्द्रवज्रा छन्दः, तत्र तृतीयेन लघुना भाव्यं साहस्रीपाठे तृतीयो गुरुः स्यात्तेन छन्दोभङ्गात्।

वस्तुतस्तु उपदेशसाहस्री इत्येव साधुः। सहस्राणामियं साहस्री उपदेशानां साहस्री उपदेशसाहस्री इति व्युत्पत्तेः, सहस्रशब्दोऽत्र विपुलार्थे प्रयुक्तः, नात्र ग्रन्थे

उपदेशाः सहस्रसंज्ञां भजन्ते। सङ्ग्रहग्रन्थोऽयं भगवत्पादैर्भाष्यादिग्रन्थवन्न निबद्धः। अपि तीर्थयात्राप्रसङ्गेषु विजययात्राप्रसङ्गेषु वा शिष्यानभिलक्ष्य सद्यः प्रतिभाप्रस्फुटिता ये उपदेशास्तानेव सङ्गृह्य पश्चात्तच्छिस्यैस्तदुपदेशसङ्ग्रहीतृभिर्वा ग्रन्थरूपतां नीतः। यदि एष ग्रन्थो भगवत्पादेन स्वयं निबद्धः स्यात्, तदा तेनैवास्य नामकरणमपि कृतं स्यात्। परन्तु भगवत्पादोक्तोपदेशा अन्यैः सङ्गृहीताः, तत्सङ्ग्रहरूपोऽयं ग्रन्थः पूर्वमुपदेशग्रन्थनाम्ना प्रसिद्धिं गतः। ततश्च गते बहुकाले कदाचित् ग्रन्थसंस्कर्तृभिस्तट्टीकाकृद्भिर्वास्य नामसंस्कारोऽप्यकारि तदा प्रभृत्येवास्य उपदेशसाहस्री, इति उपदेशसाहस्री इति वा नाम प्रसिद्धम्।

पद्यगद्यात्मकेऽस्मिन् ग्रन्थे पद्यभागे एकोनविंशतिप्रकरणानि गद्यभागे च त्रीणि प्रकरणानि विद्यन्ते। पद्यभागे एकसप्तत्युत्तरषट्शतम् ६७१ छन्दसां संख्या चकास्ति, तत्रार्थपूर्णतामभिलक्ष्य कुत्रचित् पद्यार्थभागस्यैव पृथक् संख्या निर्दिष्टा, क्वचिच्च सार्धश्लोकत्वेन संख्यातमिति पद्यसंख्याविषय ईषद्भेदोऽपि समायाति। संख्याविन्याससम्बन्धे संस्करणभेदेनापि पार्थक्यं दृश्यते। परन्तु उपदेशानां सहस्रसंख्या कदापि न पूर्यते। एवं यथाकालं यथाऽवसरञ्च शिष्योपकाराय क्वचित् पद्यात्मनोपदेशो विहितः क्वचिच्च गद्यात्मना, तेषां सङ्ग्रहोऽपि तदनुयायिभिर्यथाक्रमं कृतः। अतः कुत्रचित् संस्करणे गद्यभागस्य प्राक् प्रयोगः पश्चाच्च पद्यभागस्येति। अष्टसप्तत्युत्तरैकोनविंशतितमे १९७८ खैस्ताब्दे श्रीसुब्रह्मण्यशास्त्रिभिः सम्पादिते आनन्दगिरिकृतटीकायुते ग्रन्थे मङ्गलश्लोकानन्तरं सकलोपनिषदर्थसारसङ्ग्राहिकामुपदेशसहस्रीं गद्यपद्यात्मिकाम्, तत्रैव ग्रन्थोपसंहारपद्ये 'उपदेशसहस्रीयं गद्यपद्यमयी कृता।

परमकुशलैः सङ्ग्रहकर्तृभिरुपदेशानां तात्पर्यानुसारं क्रमनिर्देशः कृतः। तथा हि परमपुरुषार्थप्रयोजनीभूतमोक्षसाधनोपक्रमस्य प्राधान्यात् पूर्व श्रीमद्भगवत्पाद-शङ्कराचार्यमुखाम्बुजनिर्गतोपदेशेषु ज्ञानकर्मसमुच्चयस्य मोक्षसाधनत्वं सम्भवति, न वेति प्रस्तूय ज्ञानकर्मसमवायनिरासबोधका उपदेशाः पुरस्तान्निर्दिष्टाः।

ज्ञानकर्मसमुच्चयविचारः

क्रियाप्रवृत्तिहेतुर्या वासनावसनावृता।
याऽविद्या लोकमोहाय ततः कर्मसमुद्भवः।।

अज्ञानध्वान्तजन्यत्वान्न प्रकाशाय कर्मणः।
हेतुता प्रथिता शास्त्रे बन्ध एव फलं स्मृतम्।।

ब्रह्मज्ञानं विना मोहस्तमः प्रकाशमन्तरा।
नाशतां नोपगच्छन्ति व्याधिर्भैषजमन्तरा।।

तमःप्रकाशवद्भिन्ने ज्ञानकर्मण्युभे सदा।
तयोर्न मेलनं क्वापि न प्रकाशे तमःस्थितिः।।
अन्तःकरणसंशुद्धिः सत्कर्मणां फलं मतम्।
निर्मले हृदये सद्यो ब्रह्मज्ञानसमुद्भवः।।
नाशं याति ततोऽविद्या याऽनर्थायोपयुज्यते।
नष्टाज्ञानतो जीवो ब्रह्मत्वमुपगच्छति।।
उभयोः फलभिन्नत्वात् संसृतिं नोपगच्छतः।
पर्वताकम्पवन्नित्या ज्ञानकर्मविसङ्गतिः।।

तापत्रयनिवृत्तिः परमानन्दसम्प्राप्तिर्हि प्राणिमात्रस्य लक्ष्यम्। तयोश्च मानवदेहेनैव सम्भवान्मानवदेहोऽन्ययोनिविहितकर्मणां फलम्। परमपुरुषार्थ-प्रतिपादकानि च दर्शनशास्त्राणि दुःखनिवृत्तिस्वरूपं परमानन्दस्वरूपञ्च पार्थक्येनोपदिशन्ति। तत्र कानिचिद् दुःखनिवृत्तिः स्वर्गः स च परमानन्द-स्वरूपस्तत्साधनं हि यज्ञादिकर्मेति प्रतिपादयन्ति। तदन्यानि च प्रभुसायुज्यसम्प्राप्तिर्दुःखनिवृत्तिः परमानन्दश्च परमेशचरणाम्बुजसेवनं तत्र ज्ञानकर्मसमुच्चय एवास्तीति प्रतिपादयन्ति। अत्र ग्रन्थे उपोद्घातप्रकरणत्वेन ज्ञानकर्मसमुच्चयकारणताया निराशो विहितः।

ग्रन्थोपक्रम उपोद्घातोऽतिमहत्त्वं भजते। उपोद्घातो हि ग्रन्थप्रतिपाद्यविषय-सन्दर्भान् द्योतयति। तथा हि उप-समीपे हननं बोधनमिति उपोद्घातः। हनधातोर्गत्यर्थतया ज्ञानमर्थः, सर्वेषां गत्यर्थानां ज्ञानार्थोपचरात्। उपोद्घातप्रकरणे प्रतिपाद्यविषयतत्त्वं निश्चिनोति प्रतिपत्रा। अत्रोपोद्घाते ज्ञानकर्मसमुच्चयनिरासो विहित इति ज्ञानकर्मसमवायनिरासबोधने ग्रन्थसर्वस्वं तस्यैवात्र प्राधान्यात्। अतोऽत्र प्रकरणे ज्ञानमात्रस्य मोक्षसाधनत्वं प्रतिपादयद्भिराचार्यैः कर्मकाण्डभागेन सह वेदान्तस्य सम्बन्धो निरस्तः।

अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते।
ब्रह्मविद्याऽत आरब्धा ततो निःश्रेयसं भवेत्।। (उप.सा.१।५)
विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः।। (१।४)

फलव्यतिरेकात् स्वभावव्यतिरेकाच्च विद्याकर्मणोः सहभागित्वं व्यावर्तयति।

नैककारकसाध्यत्वात्फलान्यत्वाच्च कर्मणः।
विद्या तद्विपरीताऽतो दृष्टान्तो विषमो भवेत्।। (उप.सा.१।२२)
कृष्यादिवत्फलार्थत्वादन्यकर्मोपबृंहणम्।
अग्निष्टोमस्त्वपेक्षेत विद्यान्यत् किमपेक्षते।। (उप.सा.१।२३)

आत्मानात्मविवेकव्यतिरेकेणाहं कर्ताऽहं भोक्तेति बुद्धिरात्मन्यनुसज्जते। देहाध्यासो देहधर्माध्यासो वाऽहङ्काराध्यासेनानुज्जते। तन्नाशाय द्वितीये प्रतिषेधप्रकरणमातनुते।

अहंधीरिदमात्मोत्था वाचारम्भणगोचरा।
निषिद्धोद्भवत्वात्सा न पुनर्मानतां व्रजेत्।। (उप.सा.२।२)

द्वैतबुद्धिरेव विविक्तविज्ञानव्यतिरेकायालं तत्प्रहाणञ्च ब्रह्मात्मनोरविविक्त-विज्ञानेन सम्भवति। यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत (बृ.उ.२।४।१४) अद्वैतज्ञानञ्च तत्त्वमस्यादिमहा-वाक्यस्याखण्डार्थबोधेन जायत इति धिया तत्पदवाच्यसर्वज्ञत्वविशिष्टेश्वर-स्वरूपबोधाय तृतीये ईश्वरात्मप्रकरणमातनुते। अत्र प्रकरणे ईश्वर आत्मा अनात्मा वेति विचारणायामुक्तम्, यदीश्वरोऽप्यनात्मपदार्थः स्यात्तदाऽहमस्मीत्यवधारणा व्यपगच्छेत। ईश्वरस्यात्मत्वव्यवस्थिते विद्या ईश्वरातिरिक्तानात्मपदार्थव्यावर्तिका।

ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत्।
आत्मा चेदीश्वरोऽस्मीति विद्या साऽन्यनिवर्तिका।। (उप.सा.३।१)

सञ्चितकर्मणामवश्यं फलोन्मुखतया जीवात्मपरमात्मनोरभेदबोधेनाहं ब्रह्मास्मीति बोधे जातेऽपि कर्मारम्भः स्यादिति चेन्न अग्निना दग्धबीजवद् ज्ञानाग्निना क्षीणसामर्थ्यात्। तथा च स्मृतिः—'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा' (गी.४।३७) जाते हि तत्त्वबोधे न पुनः कर्मणामारम्भकता सम्भवति तत्त्वबोधस्य तादृशस्वभावसिद्धत्वात्। तदेव चतुर्थे तत्वज्ञानस्वभावप्रकरणे प्रतिपादितम्।

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम्।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते।। (उप.सा.४।५)

यस्य प्रमातुरहं ब्रह्मास्मीति विवेको जातस्तस्यात्मतत्त्वं पुनरनात्मपदार्थेन नान्वेति, अतः सर्वत्राप्यात्मतत्त्वं निर्विशेषमेवावतिष्ठते। तथा चानुमानं विमतमात्मविशेषणं न भवति विशेषणत्वाच्छिन्नहस्तवत्। यथा छिन्नेन हस्तेन शरीरं न विशिष्यते तद्वदेकमेवाद्वितीयमिति नेह नानास्ति किञ्चिदिति श्रुतिभ्यां स्वसजातीयविजातीयस्वगतभेदशून्यात्मतत्त्वे निश्चिते कस्मादिदमात्मतत्त्वं भिन्नमिति भेदज्ञानमपि न सम्भवति, येन द्वैतमापद्येत। इदमेव प्रपञ्चितमत्र षष्ठे विशेषापोहप्रकरणे।

तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम्।
अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वैर्विशेषणैः।। (उप.सा.६।२)

ननु कस्यचित् प्रमातुस्तत्त्वमसीति महावाक्यविवेकविज्ञानेन जातेऽप्यहं ब्रह्मास्मीत्यद्वैतज्ञाने पुरुषान्तरबुद्ध्यारूढप्रपञ्चविज्ञानेन द्वैतं स्यादिति चेन्न आत्मनः साक्षिरूपत्वात्। साक्षिस्वरूपञ्च—

विषयमासको नित्यमुदासीनश्च दर्शकः।
साक्षी ब्रह्मस्वरूपोऽयमविद्यापोहितः सदा।।
बोधेऽध्यक्षत्वमापन्नः कार्यकारणवर्जितः।
वृत्त्यारूढोऽपि चिद्रूपं न कदापि जिहासति।।
मणिबिम्बितचित्राणि भासन्ते सूर्यसन्निभौ।
बुद्ध्यारूढवस्तूनि दीप्यन्ते साक्षिसन्निभे।।
साक्षिचैतन्यहीनेयं वृत्तिर्न भासने क्षमा।
वृत्तिबिम्बितचैतन्यं विषयाणां प्रकाशकम्।।

साक्षाद् द्रष्टेति विग्रहे 'साक्षाद् द्रष्टरि संज्ञायामिति' (पा.५।२।९२) इति सूत्रेण साक्षादित्यव्ययात् संज्ञाविषयकद्रष्टृर्थे इनि प्रत्ययेन निष्पन्नोऽयं साक्षिशब्दः प्राधान्येनोपद्रष्टार्थमेव बोधयति। स चोपद्रष्टा साक्ष्येव नान्यः कश्चिद् उप समीपे पश्यतीति व्युत्पत्तेः। स च द्विविधः जीवसाक्षी ईश्वरसाक्षी च। अन्तःकरणस्योपाधिविशेषणाभ्यां साक्षिजीवयोर्भिदा। अविद्यायाश्चोपाधिविशेषणाभ्यामीश्वरसाक्षिणोर्भिदा। तथा हि यत्रान्तःकरणस्योपहितत्वं तत्र जीवसाक्षित्वम्, यत्र च विशेषणत्वं तत्र जीवस्वरूपम्। एवं यत्राविद्याया उपहितत्वं तत्रेश्वरसाक्षित्वं यत्र च विशेषणत्वं तत्रेश्वररूपम्। अन्तःकरणावच्छिन्नचैतन्यं जीवः, अन्तःकरणोपहितचैतन्यं च जीवसाक्षी। एवं मायाऽवच्छिन्नं चैतन्यमीश्वरसाक्षी, मायोपहितं चैतन्यमीश्वरः। कर्मफलाभिकाङ्क्षी जीवः, साक्षी तु सदा कर्मफलेषूदासीनः। तथा हि उदासीनत्वे सति द्रष्टृत्वं साक्षित्वम्, भोगाभिरन्तृत्वे सति द्रष्टृत्वं जीवत्वम्। एवमीश्वरसाक्षिविषयेऽपि बोध्यम्।

न च साक्षिर्जीवरूपेण चैतन्यस्य भेदाद् द्वैतमापद्यत उपाधिविशेषणाभ्यां धर्मभेदेऽपि चैतन्याभेदात्। जीवसाक्षिणोर्न वास्तविको भेदः। यथैक एव देवदत्तोऽध्ययनपचनादिक्रियाव्यापाराश्रयत्वेन पाठकपाचकादिसञ्ज्ञां भजते, तथैवैकमेव चैतन्यमन्तःकरणस्योपाधिविशेषणाभ्यां जीवत्वसाक्षित्वधर्मद्वयं धत्ते। तत्रापि स्वरूपतो निर्विशिष्टं सर्वविकल्पातीतमेवास्ते।

प्रमाणेन सिद्धं वस्तु इतरव्यावृत्तिपुरःसरं लक्षणेनानुगम्यते। प्रमाणैरसिद्धे साक्षिणि लक्षणेन कथमनुगमः प्रक्रमते। न तावत् प्रत्यक्षं प्रमाणमिन्द्रियागोचरत्वात्। नाप्यनुमानं साहचर्यनियमाभावाद् व्याप्त्यप्रसिद्धेः। अत्रोच्यते

विषयाभासकतया साक्षिचैतन्यं सिद्ध्यति साक्ष्यभावे जगदान्ध्यप्रसङ्गात्। वृत्त्यवच्छिन्नं चैतन्यं हि प्रमाणचैतन्यम्। न च प्रमाणचैतन्येनैव विषयावभासः स्यात्, चक्षुरादिकरणजन्यप्रमाणचैतन्यानां नानात्वेनाननुगततया सर्वविषयानुसन्धानानापत्तेः। अन्तःकरणपरिणामात्मिका वृत्तिरपि प्रकाशाय न क्षमते, तस्या अविद्याजन्यतया जडस्वभावात्।

अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। ननु प्रमातृचैतन्यमेवानुगतविषयाननुसन्दधीत् किं साक्षिणेति चेन्न प्रमातृचैतन्यस्याप्यनुसन्धानायान्यस्यानुसन्धातुः साक्षिण आवश्यकत्वात्। नहि स्वेनैव स्वस्यानुसन्धानं सम्भवति। एवं तर्हि साक्षिणोऽपि अनुसन्धानाय अन्यः साक्षी स्वीकर्तव्यः तस्य चान्य इत्यनवस्था स्यादिति चेन्न साक्षिणो ब्रह्माभिन्नतया स्वप्रकाशतया निरपेक्षस्यैव तस्य स्वपरविषयानुसन्धानोपपत्तेः। चैतन्यांशेन तस्य साक्षिणो ब्रह्माभेदेऽपि तत्तदन्तःकरणस्योपाधित्वाद् व्यतिरेकोऽपि वर्तते। तेन स्वगतविषयानुसन्धानं परगतविषयानुसन्धानञ्च सम्भवति। तदित्थमन्तःकरणानामनेकत्वाद् जीवसाक्षिणां नानात्वम्। मायारूपोपाधेरेकत्वादीश्वरसाक्षि एक एव। ईश्वरसाक्षी हि सर्वजीवगतभावाननुसन्धत्ते।

यथा स्फटिकमण्यादौ जपाकुसुमादिराग आदित्यप्रकाशेनैवाभिव्यज्यते, परञ्च सूर्यस्तत्रापि नोपरज्यते। एवं वासनावासितविषयाः साक्षिणा प्रकाश्यन्ते साक्षी तु निर्लिप्त एवावतिष्ठते। तदेवात्र सप्तमे बुद्ध्यारूढप्रकरणे प्रपञ्चितम्।

मणौ प्रकाश्यते यद्वद्रक्ताद्याकारताऽऽतपे।
मयि संदृश्यते सर्वमातपेनेव तन्मया।। (उप.सा.७।४)

ननु विषया बुद्धौ भासन्ते भासकश्च साक्षीति, भास्यभासकभेदेन द्वैतमापतितमिति चेन्न स्वापादौ सत्यामपि बुद्धौ विषयभासकत्वासम्भवात्। तथा हि जागरितस्वप्नयोरविद्याकल्पितविषया भासन्ते, ज्ञानञ्च चैतन्यरूपतया तत्राप्यस्त्येव। अतोऽविद्याकल्पितद्वैतं न तु वास्तविकमिति। तथा चोक्तमत्र प्रकरणे—

बुद्धौ दृश्यं भवेद्बुद्धौ सत्यां नास्ति विपर्यते।
द्रष्टा यस्मात्सदा द्रष्टा तस्माद् द्वैतं न विद्यते।। (उप.सा.७।५)

ननु जीवात्मपरमात्मनोरभेदेनैव मोक्षसम्भवात्, एकमेवाद्वितीयम्, नेह नानास्ति किञ्चनेति श्रुतिभ्यां ब्रह्मणः सर्वविकल्पातीते सिद्धे, न तस्य कार्यं करणञ्च विद्यते, इति श्रुत्या च सदा विमुक्तादिसिद्धावपि जीवात्मनो विशेषदर्शनाद्विमुक्तत्वाद्ययोगादभेदोऽसम्भव इति चेन्न, स्वतः सर्वविकल्पातीते जीवात्मन्यविद्यया विकल्पानामारोपात्। तथा हि ब्रह्मवदात्मापि सर्वविकल्पातीतः शुद्धश्चास्ति।

परञ्चात्राविद्याकल्पिता सकला विकल्पा अध्यस्यन्ते, तेन विशिष्ट इव प्रतिभाति। इदमेवात्र अष्टमे मतिविलापनप्रकरणे प्रतिपादितम्—

विमुच्य मायामयकार्यतामिह प्रशान्तिमायाह्यसदीहितात् सदा।
अहं परं ब्रह्म सदा विमुक्तवत् तथाऽजमेकं द्वयवर्जितं यतः।।
(उप.सा.८।२)

यज्जीवात्मपरमात्मनोरभेदज्ञानादविद्या निवर्तते, तच्चैतन्यस्य निरतिशय-सूक्ष्मत्वं व्यापित्वञ्चोक्तम्। तथा हि पृथिव्यादिप्रत्यगात्मपर्यन्तेषु पूर्वस्य पूर्वस्य त्यागेनोत्तरस्मिन्नुत्तरस्मिन् भागे सूक्ष्मत्वं व्यापित्वञ्च वर्तेते। एतेन प्रत्यगात्मनि सर्वनिरतिशयसूक्ष्मत्वं व्यापित्वञ्च सिद्ध्यतः। मृदि ग्रन्थतादात्म्येनेतरेभ्यः स्थूलत्वम्, अप्सु रसतादात्म्येन तेजःप्रभृतिभ्यः स्थूलत्वम्, तेजसि रूपतादात्म्येन वाय्वाकाशाभ्यां स्थूलत्वम्। वायौ स्पर्शतादात्म्येन आकाशात् स्थूलत्वम्। आकाशे हि गन्धरसरूपस्पर्शहीनत्वेन पूर्वेभ्यः सूक्ष्मत्वम्। ततोऽपि सूक्ष्मत्वमात्मनि सर्वविकल्पातीतत्वादजन्यत्वाच्च। इदमेवावधारितमत्र नवमे सूक्ष्मताव्यापिता-प्रकरणे—

सूक्ष्मताव्यापिते ज्ञेये गन्धादेरुत्तरोत्तरम्।
प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः।। (उप.सा.९।१)

अन्यच्चात्र प्रकरण आशङ्कितम्, यदि चैतन्यं सर्वविषयावभासकं तदा भास्यभासकयोर्भेदादद्वैतहानिः स्यात्तदुच्यते कार्यत्वाद् दृश्यत्वाच्च जागरितवस्तुजातं स्वप्नज्ञानज्ञेयवन्मिथ्या तेन वस्तुतोऽसत्त्वादात्मतत्त्वरूपं ज्ञानं विषयनिरपेक्षं कूटस्थमद्वितीयमिति। तथा चोक्तम्—

जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते।
नित्यं निर्विषयं ज्ञानं तस्माद् द्वैतं न विद्यते।। (उप.सा.९।७)

अद्वैततत्त्वसमीक्षा

तापत्रयविनाशाय दर्शनानां समुद्भवः।
दुःखहेतुरविद्येयं भेदबुद्धिप्रवर्तिका।।

द्वैतज्ञाननिभं नास्ति दुःखद्वन्द्वादिकारणम्।
भेदज्ञानप्रहाणेन चैतन्यमवशिष्यते।।

तावत्संसारबन्धोऽयं यावद्द्वैतस्य भानता।
द्वैतनाशेन तापस्य न क्वचिदप्यवस्थितिः।।

द्वैतस्याज्ञानजन्यत्वादविद्यानाशमपेक्षते।
कारणाभावमापेत्य समूलं कार्यनाशता।।

अद्वैतबुद्धिरेव सर्वानर्थप्रशमनाय सम्भवति। तदर्थमेव भगवत्पादेनाद्वैतमतं प्रवर्तितम्। अद्वैतं नाम भेदरहितं ज्ञानम्, तद्रूपमेव ब्रह्म यज्ज्ञानेन सर्वतापोपशम:। तथा हि व्युत्पत्ति: द्वाभ्यां प्रकराभ्यामितं ज्ञातं द्वीतं, द्वीतमेव द्वैतम्, न विद्यते द्वैतं यत्र तदद्वैतं स्वसजातीयविजातीयस्वगतभेदशून्यं ब्रह्म अद्वैतपदवाच्यम्। तत्प्रतिपादकतया शास्त्रमप्यद्वैतपदेन बोध्यते। अविद्याविहितविवेकविज्ञान: सत्यप्यद्वैते नानेव पश्यति, सा च भेदबुद्धि: सर्वानर्थायोपयुज्यते। तथा हि श्रुति: 'मृत्यो: स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ.उ.४।४।१९) भेदबुद्ध्या प्रवर्तितानि हि कामक्रोधभयादीनि। इतरज्ञानसंसक्तानां भयादीनामद्वैतज्ञानेन सर्वतो नाश इति न संशय:। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत (बृ.उ.२।४।१४) भेदबुद्धिनाशोत्तरं शोकमोहादीनां संश्लेषोऽपि न सम्भवति।

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानत:।
तत्र को मोह: क: शोक एकत्वमनुपश्यत:।। (ई.३४।६)

अविद्या हि कामसङ्कल्पादिजनने हेतु:, उदितेषु कामसङ्कल्पादिषु भेद उपजायते परम्। भेद एव हि मृत्युकारणं कर्मप्रवृत्तिप्रयोजकत्वाच्च भेदस्येति।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता:।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।। (कठो.२।३।१४)

अत्र दृशिस्वरूपपरमार्थदर्शनप्रकरणेऽद्वयरूपस्य ब्रह्मण: सर्वतोभावेन स्वरूपप्रतिपादनमकारि भगवत्पादेन। यद् ब्रह्मस्वरूपपरिज्ञानेनामृतत्वमधिगच्छन्ति, मुमुक्षवस्तत्स्वरूपं गगनवद् व्यापकं जन्मादिविकारशून्यं प्रकाशस्वरूपं सर्वसंसृष्टमपि निविष्टमद्वयरूपञ्चास्ति।

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं पदद्वयं तदेव चाहं सततं विमुक्तम्।।

दृशिपदेनात्र परमात्मतत्त्वमवगम्यते। तेन सह जीवात्मनोऽभेदबोधद्वारा मोक्षसंसृति:। अविद्ययाऽध्यस्ता: सकला: क्रियारूपा व्यापारा सकलाश्च भावात्मकविकारा: शुद्ध आत्मनि विकृतिं समुत्पादयन्ति, जीवात्म-परमात्मनोरभेदज्ञानेनाविद्यायां निवृत्तौ ब्रह्मण्यध्यस्ता अपायमायान्ति। तेषामापायेन च शाश्वतसुखोदय:। तच्च दृशिस्वरूपं ब्रह्म जाग्रत्स्वप्नसुषुप्तीत्यवस्थात्रय-साक्षिभूतं तदाश्रयरूपञ्चास्ति। उभयविधप्रपञ्चानां शुक्तिरजतादिवच्चैतन्याध्यस्त-

तयाऽधिष्ठानभूतं ब्रह्म ततोऽपि परम्। यद्यपि सुषुप्तौ सकलप्रपञ्चस्य लयदर्शनान्न दु:खाद्यनुभवस्तथापि तत्राविद्याया भूयस्त्वान्न चैतन्यरूपता।

ननु शरीरेन्द्रियबुद्धिसंसर्गस्य प्रत्यक्षसिद्धतया कथमद्वितीयत्वं चैतन्यस्येति चेन्न देहादिना सहाध्यासिकसम्बन्धे सत्यपि स्वतो नि:स्वभावत्वान्निर्धर्मकत्वाच्च ब्रह्मण:। स्वप्नावस्थायां दृश्यमानशरीरवज्जाग्रच्छरीरादेस्तत्सन्ततेश्च मिथ्यात्वम्। ननु जीवात्मपरमात्मनोरभेदपक्षे कर्मादिसंसर्गसम्भवान्नाद्वयरूपतेति चेन्न सर्वावयवहीनत्वेन कर्मसंसर्गासम्भवात्। संसारिभ्योऽविद्याकल्पितेभ्यो विलक्षणत्वात्तस्य परमत्वमपि सिद्धम्। ननु तव मायाप्रत्युपस्थापितेषु देहेष्वन्तरनुप्रविष्टस्य तद्दोषैर्दूषितत्व-सम्भवात्कुत: संसारिभ्यो वैलक्षण्यं तत्राह—

यथा नभ: सर्वगतं न लिप्यते तथा ह्यहं देहगतोऽपि सूक्ष्मत:।।

(उप.सा.१०।६)

आत्मनोऽद्वयरूपं प्रतिपाद्य तज्ज्ञानस्य मोक्षरूपत्वात् तज्ज्ञानफलं तनुते। ब्रह्मज्ञानमेव संसारशोकतरणे क्षमम्। 'तरति शोकमात्मवित्' (छा.७।१।३) आत्मसाक्षात्कारं यावद् भेदसम्भवाद् ब्रह्माभिन्नत्वमनुभवति आत्मवित्। ब्रह्मवेद ब्रह्मैव भवति' (छा.२।२।९) तावन्न ब्रह्मसाक्षात्कारो यावदभेदो न भासते। यद्रूपं ब्रह्म तद्रूपतामधिगतश्चैतन्यस्वरूपमधिगच्छति। 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उ.४।४।६)

सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वयत्वत:।
तथा च कुर्वन्नपि निष्क्रियश्च य: स आत्मविन्नान्य इतीह निश्चय:।।

(उप.सा.१०।१३)

ब्रह्मात्मनोरेक्यबोधान्मोक्ष इत्यद्वैतवेदान्तस्याभिमति:, तत्र जीवात्मनोरल्पज्ञत्व-सर्वज्ञत्वादिना विरुद्धस्वभावत्वादैक्यानापत्त्या न मोक्षसिद्धि:। अत: स्वर्गादिसाधनभूतज्योतिष्टोमयज्ञादिना श्रौतस्मार्तकर्मसहिताद् ज्ञानाद्वा मोक्ष इति केचिदाकलयन्ति। अत्रोच्यते न स्वर्गादिसाधनभूतं ज्योतिष्टोमादिकर्म मोक्षसाधनम्, कर्मफलस्योत्पाद्यविनाशिशालित्वात्, न वा श्रौतस्मार्तकर्म मोक्षसाधनं तस्यापि वासनाजन्यत्वात्, वासना चाविद्यारूपा, तम:प्रकाशवद्विरुद्धस्वभावत्वान्न तयो: समुच्चय:। अतोऽन्त:करणसंशुद्धिद्वारा वृत्तिरूपज्ञानंप्रकाशने हेतुरपि, उपासनादिरूपं कर्म स्वप्रकाशात्मबोधे न समन्वयमेति। सर्वेषां प्राणिनां चिद्रूपत्वं स्वत: सिद्धम्, चिद्रूपादन्यत् सर्वं कर्तृत्वादिलक्षणमज्ञानकृतमिति। अतस्तत्त्वमसिवाक्यार्थ-ज्ञानादज्ञाननिवृत्त्या कर्तृत्त्वादिनिवृत्तितो मोक्ष:। ज्ञानमात्रान्मोक्षवादिनोऽद्वैतिन: सलिङ्गस्य कर्मणो ज्ञानोदये बाधमाकलयन्ति।

तदेवात्रैकादश ईक्षितृत्वप्रकरणे प्रतिपादितम्। सत्स्वरूपे प्रकाशे तमोरूपमज्ञानं न समवतिष्ठते, अतस्तत्कार्यं जाग्रत्स्वप्नकालिकोभयविध-प्रपञ्चोऽद्वैतबोधे निवर्तते। अद्वैतबोधकमिदं प्रकरणम्, ईक्षितृत्वशब्दस्य प्राग् निर्देशात् ईक्षितृत्वप्रकरणाभिधानेन ख्यातम्। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति' (छा.६।२।१) श्रुत्या यस्य सतोऽद्वयस्वरूपमुक्तं तस्यैव 'तदैक्षत बहुस्यां प्रजायेय' (छा.६।२।३) इत्यादिना चेतनत्वं सर्वज्ञत्वञ्चोक्तं। अतो यत्र कुत्रापि सत्त्वं चेतनत्वं वा परिलक्ष्यते, तत्सद्रूपम्, तदन्यत् यत्कर्तृत्वादिकमनुभूयते, तदहन्त्वसंश्लेषाभिजन्यतयाऽविद्याकार्यम्। अद्वैत-बोधेऽविद्यानिवृत्तौ सत्स्वरूपातिरिक्तं सर्वं निवर्तते।

ईक्षितृत्वं स्वतः सिद्धं जन्तूनां च ततोऽन्यथा।
अज्ञानादित्यतोऽन्यत्वं सदसीति निवर्त्यते।। (उप.सा.११।१)

एतावद्ध्यमृतत्वं न किञ्चिदन्यत्सहायकम्।
ज्ञानस्येति ब्रुवच्छास्त्रं सलिङ्गं कर्म बाधते।। (उप.सा.११।२)

द्वैतप्रवर्तकाविद्यानिवृत्तौ बाधिते सकलप्रपञ्चे किमपि भानं न स्यात्, तथा च श्रुतिः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् (बृहदा.२।४।१४) अत्रोच्यते प्रपञ्चबाधे केवलं ब्रह्मानुभूयते।

नामरूपक्रियाभ्योऽन्यो नित्यमुक्तस्वरूपवान्।
अहमात्मा परं ब्रह्म चिन्मात्रोऽहं सदाऽद्वयः।। (उप.सा.११।६)

अज्ञानहेतुकेन कर्मणा न कथञ्चिदपि शक्यतेऽमृतत्वमभिगन्तुम्, अमृतत्वस्य ज्ञानहेतुत्वात् प्रकाशरूपत्वाच्च।

न ततोऽमृतताऽऽशास्ति कर्मणोऽज्ञानहेतुतः।
मोक्षस्य ज्ञानहेतुत्वान्न तदन्यदपेक्षते।। (उप.सा.११।१५)

अध्यासस्वरूपविमर्शः

स्वयं प्रकाशरूपोऽयं निर्विशेषो विभुश्च यः।
देहाद्यध्यासयोगात्स नात्मा गोचरतां व्रजेत्।।

चैतन्येऽध्यस्यतेऽज्ञानं ततो विवेकविभ्रमः।
विवेकभ्रंसनात्तत्त्वेऽविद्ययाऽध्यस्यते जगत्।।

अहन्त्वेन चितो भासः प्रथमाध्यासजं पलम्।
तत्रेन्द्रियाणि तद्धर्मा अध्यस्यन्तेऽविवेचनात्।।

गोधर्माध्यासजं ज्ञानं काणोऽहं बधिरस्तथा।
देहाध्यासेन गौरोऽहं स्थूलोऽहं पुरुषस्तथा।।
एवं परम्पराध्यस्तं जगदेतद्विवर्तते।
अध्यासकारणोद्भूतं चराचरात्मकं हि तत्।।

सकलदुःखहेतुरिदं तन्निवृत्तिमन्तरा न सम्भवाऽऽत्यन्तिकदुःखनिवृत्तिः। यदर्थं हि दर्शनमुद्भवः प्रपञ्चमिथ्यात्वबोधनेन जगन्निवृत्तेः सम्भवाद् भगवत्पादेन शारीरकभाष्ये वेदान्तशास्त्रप्रयोजनभूतत्वेनादौ जगन्मिथ्यात्वमेव प्रतिपादितम्। सत्यानृतमिथुनीकृताध्यासरूपो जागतिकोऽयं व्यवहारः। आत्मतत्त्वं हि सद् वस्तु तत्र मानम्, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.६।२।१) अनृतञ्चेदं पुरोदृश्यमानं नामरूपात्मकं जगत्। तस्यानृतत्वे मानम्, वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा.६।१।४) न तु तद् द्वितीयमस्ति ततोऽन्यद्-विभक्तम् (छा.४।३।२३) नेह नानास्ति किञ्चन (बृह.४।४।१९) इति श्रुतयः।

स चाध्यासोऽविद्यादुष्टेन्द्रियसम्प्रयोगादिकारणजन्यः परत्र पूर्वदृष्टावभासः असन्निहितविषयत्वात्स्मृतिसदृशः, परत्र शुक्तिकाद्यधिष्ठानेषु पूर्वं हाटकादौ दृष्टरजतादीनामवभासः प्रतीतिरत्राध्यासपदेन व्यपदिश्यते। स चाध्यासः सत्यानृतमिथुनीभूत इव प्रतीयते। तथा हि सत्याधिष्ठानभूतशुक्तिकादावनृतस्य मिथ्याभूतस्य रूप्यादेर्मिथुनीभूतत्वेन तादात्म्येन प्रत्ययरूपोऽयमध्यासः। स्वकारणभूताविद्यादेरनादित्वादनादिश्चास्ति। तस्य कारणात्मना स्वभावसिद्ध-त्वान्नैसर्गिकत्वमविद्यारूपकारणस्यानादित्वात्। कार्यरूपेण तस्य नैमित्तिकत्वमपि, अविद्याजन्यत्वाच्चाध्यासस्य। भामतीकारस्तु अवसन्नोऽवमतो वा भासोऽवभासः, अध्यास इत्याचक्षते। अधिष्ठानतत्त्वसाक्षात्कारेण निवृत्तिरवसादः, यौक्तिकज्ञानेन तिरस्कारोऽवमान इत्यवसादावमानयोर्भेदः। शुक्तिकाद्यधिष्ठानज्ञानेन आरोप्यरजतादेर्बाध एवात्रावसादपदेन अवमानपदेन वावगम्यते। अतो ज्ञाननिवर्त्यत्वरूपं मिथ्यात्वमप्यध्यासस्य संसिद्धम्। उत्तरोत्तरज्ञानेन पूर्वपूर्वाध्यस्तविषयस्य निवृत्तिरत्राभिमता। तथा हि व्यावहारिकसत्ताक-शुक्त्यादिविषयकज्ञानेन प्रातिभासिकरजतादीनां निवृत्तिः। परमार्थतत्त्वसाक्षात्कारेण च व्यावहारिकाणां निवृत्तिः। तत्र क्रमेणाहङ्कारादीनामात्मन्यध्यासः। अविद्योपहिते चैतन्येऽहङ्काराध्यासेनात्मनोऽहन्त्वेन प्रत्ययः। अन्तःकरणोपहिते च चैतन्य इन्द्रियाणां तद्धर्मकाणत्वबधिरत्वादीनामध्यासेन काणोऽहं बधिरोऽहमिति प्रत्ययः। तत्रैव देहाध्यासेन गौरोऽहं स्थूलोऽहमिति प्रत्ययः। जाते चात्मनिश्चये शुक्त्याद्यधिष्ठानज्ञानेन रूप्यादिज्ञानवत् समस्तोऽप्यध्यस्तः प्रपञ्चो निवर्तते।

तदेवास्मिन् द्वादशे प्रकाशप्रकरणे सम्यग् विवेचितम्। तथा हि आत्मनः साभासान्तःकरणाविवेकद्वारा देहपर्यन्तमविवेकतां प्रतिपद्यते।

प्रकाशस्थं यथा देहं सालोकमभिमन्यते।
द्रष्टाभासं तथा चित्तं द्रष्टाऽहमिति मन्यते।। (उप.सा.१२।१)

यदेव दृश्यते लोके तेनाभिन्नत्वमात्मनः।
प्रपद्यते ततो मूढस्तेनात्मानं न विन्दति।। (उप.सा.१२।२)

श्रवणमननाभ्यां गुरुप्रसादाल्लब्धात्मसाक्षात्कारस्य न पुनर्भेदमारोहति कृतात्मनिश्चया बुद्धिः।

एवं शास्त्रानुमानाभ्यां स्वरूपेऽवगते सति।
नियोज्योऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत्।। (उप.सा.१२।८)

शुद्धचैतन्यस्वरूपविमर्शः

इन्द्रियादिविहीनत्वान्न श्रृणोति न पश्यति।
अप्राणत्वान्न कर्ताऽसौ ज्ञानाभावे न वेदिता।।

कूटस्थत्वेन देहो न देहाभावे विकारता।
व्योमवन्नास्ति नित्यस्य सच्चिदानन्दरूपिणः।।

अवेद्योऽयमचिन्त्योऽयमविकार्यश्च सर्वदा।
सर्वतन्त्रस्वतन्त्रोऽसौ परमात्मा स्वयं प्रभा।।

दुष्टेन्द्रियसम्प्रयोगेणाविद्यावशादात्मानात्मनोरविवेकेन चैतन्येऽनात्मवस्तुनोऽध्यासः। स्वतः सर्वविकल्पातीतमविषयमवेद्यमपि चैतन्यमनात्मवस्त्वध्यासेन कर्तृत्वभोक्तृत्वादिभावेनावगम्यते। यद्यपि चैतन्यमिन्द्रियादिसंश्लेषाभावाद् ज्ञातृत्वहीनम्, क्रियाश्रयाभावेन च कर्तृभावशून्यम्। तथापि तत्राहङ्काराध्यासेनाहन्त्वेन इन्द्रियाद्यध्यासेन ज्ञातृत्वेन चैतन्यप्रत्ययः। इदं चैतन्यमिन्द्रियहीनमपि सर्ववेत्तृ, अशरीरञ्च सर्वभोग्यफलसाक्षि, पद्भ्यां विना सर्वत्र गन्तृ। तथा हि श्रुतिः—

अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्।।

(श्वेता.३।१९)

'अप्राणो ह्यमनाः शुभ्रः' (मुण्ड.२।१।२) चैतन्ये प्राणादिकरणानां सम्बन्धः कथं नास्ति अत्रोच्यते यतश्चैतस्मादेव पुरुषान्नामरूपबीजोपाधिलक्षितात् प्राणादयो जायन्ते। चैतन्यं हि सर्वस्य प्रपञ्चजातस्य विवर्तोपादानतयाऽधिष्ठानम्। 'यतो वा

इमानि भूतानि जायन्ते (तै.३।१) इति श्रुतेः। प्रपञ्चोत्पत्तेः प्राक् स्वसजातीयविजातीयस्वगतभेदशून्यमेवासीत्। तथा हि श्रुतिः 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.६।२।१) 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वेता.६।१९) तदेव शुद्धं सर्वविकल्पातीतं ब्रह्म सङ्कल्पमात्रेण सर्वमसृजत। 'तदैक्षत बहुस्यां प्रजायेयेति' (छा.६।२।३) इति श्रुतेः। यदुपादानं तदेव कर्तृत्वेन निमित्तम्, अतोऽभिन्ननिमित्तविवर्तोपादानता शुद्धस्य ब्रह्मणः।

तदेव प्रपञ्चितमत्र त्रयोदशे अचक्षुष्ट्वप्रकरणे। यद्यपि चैतन्यस्वरूप-प्रतिपादकमिदं प्रकरणम्, तथापि प्रथमतः अचक्षुष्ट्वात्र दृष्टियें इति श्लोकस्य पाठवशाद् अचक्षुष्ट्वप्रकरणमस्य नाम निर्दिष्टम्।

अचक्षुष्ट्वान्न दृष्टिर्मे तथाऽश्रोत्रस्य का श्रुतिः।
अवाक्त्वान्न तु वक्ति स्यादमनस्त्वान्मतिः कुतः।। (उप.सा.१३।१)

निरिन्द्रियमपि ब्रह्म साक्षित्वेन सर्वविषयप्रकाशकं सर्ववेदकञ्चास्ति। मूर्तं हि पृथिव्यादिभूतत्रयम्, अमूर्तञ्च वाय्वाकाशभूतद्वयं चैतन्यञ्च मूर्तामूर्तहीनं कालापरिच्छिन्नञ्चास्ति।

मदन्यः सर्वभूतेषु बोद्धा कश्चिन्न विद्यते।
कर्माध्यक्षश्च साक्षी च चेता नित्योऽगुणोऽद्वयः।। (उप.सा.१३।१९)

न सच्चाहं न चासच्च नोभयं केवलः शिवः।
न मे सन्ध्या न रात्रिर्वा नाहर्वा सर्वदा दृशेः।। (उप.सा.१३।२०)

स्वतःशुद्धेऽपि चैतन्ये बुद्ध्यविवेकात्संसारप्रतीतिः, निवृत्तिश्च शास्त्र-प्रामाण्यादहं ब्रह्मास्मीति ज्ञानेन। ननु अहं सुखी दुःखीति प्रत्ययस्यापरोक्ष-त्वादविद्याकल्पितो बुद्धेरविवेकनिबन्धनः संसारः कथमुदेति, बुद्धेरप्रत्यक्षत्वादिति चेन्न अहमित्यनुभवगोचरत्वाज्ज्ञानस्य। तदुच्यते ज्ञानस्याहन्त्वेन गोचरत्वेऽपि बुद्ध्यात्मनोरविवेकनिबन्धनोऽहं सुखी दुःखीति प्रत्ययः। बुद्ध्यात्मनोरविविक्तत्वे बुद्धेः प्रत्यक्षत्वं भवत्येव अन्यथा स्वप्ने स्मृतौ वा घटादेर्विषयजातस्याकारभेदो न स्यात्। अतो जाग्रद्दशायामनुभवावस्थायां वा तत्तदाकारा बुद्धिरेव दृष्टेति कल्प्यते।

प्रपञ्चविवेकः

जाग्रत्काले यथा सर्वं जगदेतत् प्रवर्तते।
स्वप्नकाले तथैवेदं सुखदुःखादिहेतुकम्।।
जागरितप्रपञ्चस्य निवृत्तिरात्मनिश्चयात्।
स्वाप्निकस्य प्रबोधेन सुषुप्तौ वा मनोलयात्।।

अध्यास्योभयत्रापि आत्माधिष्ठानमुच्यते।
अविद्यावासनानिन्द्राः कारणानि पृथक् पृथक्।।

चतुर्विधा अवस्था जीवानां जाग्रत्स्वप्नसुषुप्तिसमाधिभेदेन। तत्र जाग्रत्स्वप्नावस्थयोः प्रपञ्चप्रतीतिर्भवति। सुषुप्तावन्तःकरणस्य लयात् समाधावविद्यादोषराहित्याच्च न जगदधिगमः। यथा हि जाग्रत्काले आत्मानात्मनोरविवेकेन चैतन्येऽविद्यादिकारणं समधिगम्य वासनामया विषया अवभासन्ते। तथैव स्वप्नावस्थायामविद्यानिद्रादिकारणमुपेत्य निद्रादोषवशादन्तःकरणे सङ्कारात्मना स्थिता विषया अवभासन्ते। सुषुप्तौ चान्तःकरणस्य लयान्न प्रपञ्चप्रत्ययः। समाधौ चाविद्याहानान्न जगदभिगमः। ज्ञानसामग्र्यां सत्यामेव प्रत्ययोत्पत्तिः।

अत्रेदमाशङ्क्यते यदि आत्मानात्मनोरविवेकेन जगदुत्पत्तौ ज्ञानस्य विषयेभ्यः पार्थक्येन प्रतीतिर्नास्ति, तदा विषयाणां विविक्तत्वाप्रतीत्या विविक्तसंस्कारोऽपि न स्यात्, संस्कारवासनामन्तरा स्वप्ने विषयावभासोऽपि न स्यात्, तथा च संस्कारमात्रजन्यत्वात् स्मृतेः स्मरणात्मकविषयाणां प्रत्ययो न स्यात्। अत्रोच्यते आत्मानात्मनोरविवेकेन यथा चैतन्ये प्रपञ्चाध्यासस्तद्वदेव प्रपञ्चज्ञानस्य ज्ञानज्ञेययोर्भेदस्याध्यासः। घटादिविषयकज्ञानस्य स्वविषयेभ्यो भेदेन प्रतीत्या संस्कारः सञ्जायते। तेन च स्वाप्निकप्रपञ्चस्य स्मरणात्मकविषयस्य च प्रत्ययः। इदमेव प्रपञ्चितमत्र चतुर्दशे स्वप्नस्मृतिप्रकरणे।

स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते।
पुरा नूनं तदाकारा धीर्दृष्टेत्यनुमीयते।। (उप.सा.१४।१)

अत्र ज्ञानमन्तःकरणवृत्त्यात्मकं ग्राह्यम्। बाह्यानपि विषयान् अन्तःकरणं स्ववृत्त्या व्याप्नोति। विषयाकारेण परिणतान्तःकरणवृत्तिश्च संस्कारात्मना परिणमते।

मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम्।। (उप.सा.१४।३)

अध्यस्यमानान्तःकरणादिभिश्चैतन्यं न किञ्चिदपि विचाल्यते, प्रपञ्चजातस्याध्यासेऽपि ब्रह्मतत्त्वमाकाशवन्निर्मलमेवास्ते। अध्यस्यमानविषयैराध्यासात्मना तत्सम्बद्धं साक्षिभूतं चैतन्यं न विषयदोषैर्दुष्यते।

यथा विशुद्धं गगनं निरन्तरं न सज्जते नापि च लिप्यते तथा।
समस्तभूतेषु सदैव तेष्वयं समः सदात्मा ह्यजरोऽमरोऽभयः।।
(उप.सा.१४।४७)

शोकनिवृत्तिः सुखाधिगमश्च प्राणिमात्रस्य प्रयोजनम्। सा च शोकनिवृत्तिरात्मज्ञानेनैव भवतीति धिया आत्मज्ञाने प्रवर्तन्ते मानवाः। तथा हि श्रुतिः

'तरति शोकमात्मवित्' (छा.७।१।३) तच्च जीवात्मपरमात्मनोरभेदरूपमात्मज्ञानं तत्त्वमसीति महावाक्यस्याखण्डार्थबोधद्वारा सम्भवति। जाते च तत्त्वसाक्षात्कारे जीवोऽहमित्यज्ञाननिवृत्त्या ब्रह्मास्मीत्यनुभवः सम्पद्यते। 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड.३।२।९) इति श्रुतेः।

तत्र केचन आक्षिपन्ति ब्रह्मवज्जीवः स्वतः शुद्धो नास्ति, स कथं ब्रह्माभेदमाप्नुयात्, किन्तु अविद्यादोषान्मलिनसत्त्वः, अतो ज्ञानध्यानादिसाधनेन ब्रह्मभावमेति। तन्निराक्रियते अस्मिन् पञ्चदशे नान्यदन्यत्प्रकरणे। ब्रह्मात्मनोर्नास्ति कश्चिद् भेदः, अविद्यावशाद् भेदोऽभिगमः, अविद्यायां निवृत्तौ जीवात्मनोरभेदः प्राप्तोऽपि भ्रमवशादप्राप्त इवावगतो भवति। यथा स्वग्रीवावनद्धं ग्रैवेयकम्। उक्तञ्च भामतीकारेण प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोकदुःखाद्यत्यक्तमिव त्यक्तं भवति। तदेतत् सर्वं प्रपञ्चितमत्र प्रकरणे। नान्यदन्यत् शब्दस्यादौ प्रयोगादस्य नाम नान्यदन्यत् प्रकरणमस्ति।

'न तस्यैवान्यतोऽपेक्षा स्वरूपं यस्य यद्भवेत्।
प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन।। (उप.सा.१५।४२)

पूर्वप्रकरणेषु पक्षप्रतिपक्षमुखेन सत्स्वरूपमात्मतत्त्वं जीवात्मपरमात्मनोरैक्यरूपं मोक्षश्च प्रतिपाद्य पार्थिवनामके षोडशे प्रकरणे स्वसिद्धान्तदिशा ब्रह्मस्वविषये लोकायतमतमारभ्य सर्वेषां तार्किकमतानामप्रामाणिकत्वं निरूप्य स्वमतं प्रतिपादयति। प्रपञ्चस्वरूपप्रतिपादकेऽत्र प्रकरणे पार्थिवः कश्चिद् धातुः, इति पाठमहिम्नाऽस्य प्रकरणस्य नाम पार्थिवप्रकरणम्।

पञ्चीकरणप्रक्रिया

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी (तै.२।१) यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति (तै.३।१) इति श्रुतिद्वयेन परब्रह्मणः पञ्चभूतानां सर्गः प्रतिपादितः। तत्रापञ्चीकृतभूतानां सत्त्वांशेभ्यो ज्ञानेन्द्रियाणि जातानि। तेषामेव रजोभागेभ्यः कर्मेन्द्रियाणि जायन्ते। तानि च पञ्चमहाभूतानि पञ्चीकरणेन स्थूलत्वमापद्यन्ते। तत्र पञ्चीकरणे वियदादिकमेकैकं द्विधा विधाय पुनश्च प्रथमं भागं चतुर्धा विभज्य स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरेषां चतुर्णां चतुर्णां भूतानां यो यो द्वितीयः स्थूलो भागस्तेन तेन सह प्रथमप्रथमभागांशानां चतुर्णां चतुर्णां मध्ये एकैकस्य योजनात् ते वियदादयः प्रत्येकं पञ्च-पञ्चात्मका भवन्ति। इदमेव भूतानां पञ्चीकरणम्।

महाभूतानां स्थूलस्वरूपप्रतिपादनाय पञ्चीकरणप्रक्रियेयं तैत्तिरीयश्रुत्यनुगामिभिः पञ्चदशीकारादिरभिमता। तदन्ये छान्दोग्योपनिषदनुयायिनस्त्रिवृतकरणेन महाभूतानां स्थूलत्वमामनन्ति।

त्रिवृतकरणप्रक्रिया

छान्दोग्योपनिषद्दिशा तेजोऽबन्नानां त्रयाणामेवोत्पत्तिः प्रतिपादिता। वियन्मरुतोश्च स्थूलत्वाभावादुत्पत्तिरपि नोक्ता। भूतानां स्थूलत्वं घातप्रतिघातादिना प्रतीयते, तच्च न सम्भवति वाय्वाकाशयोः। तथा हि 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.६।२।१) इत्यत्र एकमेवाद्वितीयं स्वसजातीय-विजातीयस्वगतभेदशून्यं सज्जगदुपादानत्वेनाभिमतम्। तदेव 'तदैक्षत बहुस्याम् प्रजायेयेति' (छा.६।२।३) इत्यत्र कर्तृत्वेनोरीकृतम्। तच्च सत् तेजोऽसृजत, तत्तेज ऐक्षत बहुस्यां प्रजायेयेति तदपोऽसृजत, आप ऐक्षन्त बहुत्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त, इति श्रुतिवचनैस्त्रयाणां सृष्टिः प्रतिपाद्यते। त्रयाणामेव नामरूपात्मकव्यवहारो लोके दृश्यते। तथा हि—

तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो।
देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्।।

(छा.उ.६।३।३)

एकैकां देवतां द्विधा द्विधा कृत्वा एकैकमर्धं पुनर्द्विधा कृत्वा तयोरंशयोः इतरयोर्देवतार्धयोः प्रक्षेपे स्वकीयो भागोऽर्धमिति इतरयोः पादमात्रं पादमात्रमिति एकस्याः प्राधान्यमितरयोस्तु स्वल्पत्वाद् गुणभावः, इदमेव त्रिवृतकरणं भूतानाम्।

यद्यपि सकलमपि जगत् परमात्मनो जातं, तत्रैव स्थितं तस्मिन्नेव च लीयते, तथापि चैतन्यं सर्वविकल्पातीतमेवास्ति। कल्पनाया हेतुरज्ञानं तच्च प्रपञ्चमेव नियन्त्रयति न चैतन्यम्। अतोऽविद्यायां निवृत्तौ ब्रह्मैवावशिष्यते। तथा चोक्तम्—

'अज्ञानं कल्पनामूलं संसारस्य नियामकम्।
हित्वाऽऽत्मानं परं ब्रह्म विद्यान्मुक्तं सदाऽभयम्।।

(उप.सा.१६।१७)

तमःप्रकाशवद्विरुद्धस्वभावान्नात्मन्यज्ञानस्यावस्थितिः। विकल्पकारणभूतस्या-ज्ञानस्याभावात् कर्मभूतविकल्पस्याभावः स्वतः सिद्ध्यति।

अप्रकाशो यथाऽऽदित्ये नास्ति ज्योतिःस्वभावतः।
नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि।। (उप.सा.१६।३६)

अत्र पार्थिवप्रकरणे सांख्यसम्मतं वैशेषिकसम्मतञ्च मोक्षस्वरूपं निराकृतम्। तथा हि सांख्याः त्रिगुणं प्रधानं पुरुषस्य भोगापवगार्थं महदादिरूपेण परिणमते। तदविवेकादस्य संसारो, मोक्षश्च तद्विवेकान्न ब्रह्मात्मज्ञानादिति मन्यन्ते। तत्रोच्यते गुणसाम्यावस्थाभूतस्य प्रधानस्य परिणाम एव न सम्भवति। तस्यामवस्थामविद्यादे-र्धर्मादेश्च लीनत्वादीश्वरस्य चानभ्युपगमादभ्युपगमेऽपि तस्य पुरुषत्वेनोदा-सीनत्वादन्यस्य सर्वस्य प्रधानकार्यत्वाच्च। तथा चोक्तम्—

गुणानां समभावस्य भ्रंशो न ह्युपपद्यते।
अविद्यादेः प्रसुप्तत्वान्न चान्यो हेतुरुच्यते।। (उप.सा.१६।४५)

अपवर्गश्चात्र शास्त्रे प्रकृतिपुरुषयोर्वियोगः। तथा च सूत्रम् 'द्वयोरेकतरस्य औदासीन्यमपवर्गः' (सा.सू.३।६५) सांख्यभाष्येऽपि यः पुरुषस्यापवर्ग उक्तः स प्रतिबिम्बरूपस्य मिथ्यादुःखस्य वियोग एव। वियोगस्य क्रियात्मकत्वात् पुरुषे न सम्भवति। यदि पुरुषे काचित्क्रियोत्पद्येत तदा तस्य सक्रियत्वाद्विनाशित्वं क्षीरादिवदापद्येत। नित्यश्च पुरुषोऽभ्युपगतः। तेन तस्य निर्विकारत्वमित्यर्थः। ननु देहादिवत्पुरुषस्यापरा क्रिया न स्वीक्रियते; किन्तु ज्ञानलक्षणैव क्रियाऽभ्युपगम्यते। तत्र यदि जन्यज्ञानत्वं पुरुषस्येष्टं तदा पूर्ववद्विनाशित्वम्। अजन्यज्ञानत्वे च न तादर्थ्यं प्रकृतेः सिद्ध्येत्। यदि पुरुषशेषत्वं विनापि प्रधानप्रवृत्तिरिष्येत तदा निर्निमित्ते प्रधानव्यापारे सत्यनिर्मोक्षः प्रसज्येत।

क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रे च पूर्ववत्।
निर्निमित्ते त्वनिर्मोक्षः प्रधानस्य प्रसज्यते।। (उप.सा.१६।५०)

सांख्यमतं निरस्य कणादमतं निराकुर्वन्नाह। एकविंशतिदुःखध्वंसो हि मोक्षः कणादमते, तन्न सम्भवति। यथोष्णत्वमग्निनिष्ठमग्निनिष्ठेन प्रकाशेन न प्रकाशते, एकाश्रयत्वेन ग्राह्यग्राहकत्वायोगात्। तथाऽऽत्मगताः सुखदुःखादयो न तद्गतेन ज्ञानेन ग्राह्या भवितुमर्हन्ति, एकाश्रयत्वादेव ग्राह्यग्राहकत्वस्य तेषु दुर्ग्रहत्वात्। तस्मात्काणादादिमतानुसारिणां मतेऽपि न सम्भवति बन्धमोक्षव्यवस्था।

न प्रकाश्यं यथोष्णत्वं ज्ञानेनैवं सुखादयः।
एकनीडत्वतोऽग्राह्याः स्युः कणादादिवर्त्मनाम्।। (उप.सा.१६।५१)

परमपुरुषार्थो मोक्षः स च जीवात्मनोरैक्यबोधरूपः। द्वैतमेव सर्वानर्थहेतुः, तदेव च बन्धकारणं तस्याविद्याजन्यतयाऽविद्यानाशोत्तरं द्वैतस्य समूलनाशः। कार्य-विनाशो हि द्विधा निवृत्तिरूपो बाधरूपश्च, तत्र निवृत्तिः विरोधिवृत्त्युत्पत्तिदोष-निवृत्तिरूपा। तद्यथा मुसलप्रहारेण घटादेः कम्बुग्रीवादिमत्त्वरूपविरोधिवृत्त्यन्तरोदयः। यथा च स्वप्नजनकीभूतनिद्रादिदोषनाशेन गजादिनिवृत्तिः। बाधश्चोपादानेन सहैव

निवृत्तिरूपः। तत्र कारणमधिष्ठानतत्त्वसाक्षात्कारस्तेन. विनोपादानरूपाया अविद्याया अनिवृत्तिः। अधिष्ठानतत्त्वञ्च ब्रह्मैव, अतस्तज्ज्ञानमविद्यानिवृत्तये परमावश्यकम्। तथा च श्रुतयः 'तरति शोकमात्मविद्' (छा.७।१।३) ब्रह्मविदाप्नोति परम् (तै.२।१) ब्रह्मसंस्थोऽमृतत्वमेति (छा.२।२३।१)

अतोऽत्र सप्तदशे सम्यङ्मतिप्रकरणे परपक्षप्रतिक्षेपमुखेनोक्तं ज्ञानं मोक्षसाधनं स्वपक्षसाधनेन व्यक्तीकर्तुं प्रकरणान्तरमारभमाणो देवताभक्तेर्ज्ञानप्राप्तावन्तरङ्गसाधनं व्यक्तीकर्तुं प्रकरणान्तरं सूचयति। वेदविहितं कर्म भक्तिरुपासना वा अन्तःकरणमलापहारायोपयुज्यन्ते। कर्मोपासनादिना शुद्धीकृतान्तःकरणे प्रकाशितं ज्ञानतत्त्वमात्मसाक्षात्कारायोपयुज्यते। 'नान्यः पन्था विद्यते अयनाय' (तै.३।१३) तमःप्रकाशवद्विरुद्धस्वभावयोर्ज्ञानकर्मणोः समुच्चयोऽपि न सम्भवति। अविद्याजन्यत्वात्कर्मणः, ज्ञाननिवर्त्यत्वाच्चाविद्यायाः।

'अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते।
ज्ञानेनैव तु सोऽपि स्याद्विरोधित्वान्न कर्मणा'।। (उप.सा.१७।७)

ज्ञानस्वरूपत्वादात्मनः न तत्र ज्ञानज्ञेययोर्वास्तविको भेदः। तथापि नीलपीताद्युपाधिभेदान्नीलपीतात्मना स्फटिकादेरिव वेदादिरूपेणानेकधा भिद्यते।

कल्प्योपाधिभिरेवैतद्भिन्नं ज्ञानमनेकधा।
आदिभेदाद्यथा भेदो मणेरेकस्य जायते।। (उप.सा.१७।१६)

जीवात्मपरमात्मनोरभेदज्ञानेन न पुनर्मोहमुपैति तच्चात्मज्ञानम्—

अहमेव च भूतेषु सर्वेष्वेको नभो यथा।
मयि सर्वाणि भूतानि पश्यन्नेव न जायते।। (उप.सा.१७।६९)

अविद्या हि जीवात्मनोर्भेदबुद्धौ हेतुः। तस्याः प्रहाणमन्तरा भेदबुद्धेर्नाशो न सम्भवति। भेदबुद्धिनाशं विना जीवात्मनोरभेदबोधोऽसम्भवः। अविद्यायां निवृत्तौ हि—

निर्गुणं निष्क्रियं नित्यं निर्द्वन्द्वं यन्निरामयम्।
शुद्धं बुद्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत्।। (उप.सा.१७।८१)

सर्ववेदान्तानामखण्डे ब्रह्मणि तात्पर्यम्। तच्च न सम्भवति तत्त्वमस्यादिमहावाक्यानां तात्पर्यबोधमन्तरा। तत्त्वमसीति महावाक्ये तत्त्वम्पदयोः समानविभक्तिकत्वेन सामानाधिकरण्यतयाऽभेदान्वयः प्रतिपाद्यः, स च न सम्भवति सर्वज्ञत्वाल्पज्ञत्वविशिष्टार्थप्रतिपादकतत्त्वम्पदयोर्वैयधिकरण्यात्। चैतन्यमात्रतात्पर्येणोच्चरितयोस्तत्त्वम्पदयोस्तदर्थानुपपत्त्या तात्पर्यानुपपत्तिप्रतिसन्धानरूप-

लक्षणाबीजस्योद्भूततया तत्त्वम्पदयोर्जहदजहल्लक्षणावृत्त्या चैतन्यमात्रार्थ-बोधादभेदान्वयः सुलभः। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, तदैक्षत बहुस्यां प्रजायेयेति श्रुतिभ्यां तत्पदस्य सर्वज्ञत्वादिविशिष्टार्थबोधकतया, जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि इति श्रुत्याऽन्तःकरणावच्छिन्नचिद्रूपत्वाल्पज्ञत्वादिरूपार्थबोधकतया, 'तत्त्वमसि' इत्यत्र चैतन्यमात्रतात्पर्येणोच्चरितयोरतत्त्वम्पदयोस्तात्पर्यानुपपत्तिप्रतिसन्धानविधिना लक्षणाबीजसमवधाने विशेषणांशपरित्यागेन तत्त्वं पदयोश्चैतन्यमात्रमर्थोऽवगम्यते। ततश्च विशेष्यद्वयाभेदगोचरशाब्दबोधः।

सन्ति केचन सम्बन्धविशेषा यैरखण्डार्थलक्ष्योऽवगम्यते। तत्र पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यत्वं लक्ष्यलक्षणभावश्च। उक्तञ्च—

पदयोस्तु समानाधिकरणत्वं पदार्थयोः।
विशेषणविशेष्यत्वं लक्ष्यलक्षणताऽपि च।।
सम्बन्धः सोऽयमित्यादाविव तस्माद्विरुद्धकम्।
त्यक्त्वा विरुद्धं तत्रैव विशिष्टपरमात्मनोः।
स्वरूपं लक्षयत्येकं तत्त्वमस्यादिका श्रुतिः।।

पदयोर्भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्नर्थे प्रवृत्तिरूपं सामानाधिकरण्यम्, पदार्थयोः परस्परोद्देश्यविधेयभावेन परस्परभेदव्यावर्तकत्वाद् व्यावर्त्यव्यावर्तकभावरूपो विशेषणविशेष्यभावः, पदयोः पदार्थयोश्च विरुद्धविशिष्टत्वांशपरित्यागेनाविरुद्धनिष्कृष्टधर्मिमात्रेण सह लक्ष्यलक्षणभावः, प्रत्यगात्मनोः प्रतिपाद्यप्रतिपादकभावरूपः, पदार्थप्रत्यगात्मनोश्च उपपाद्योपपादकभावरूपश्चेति, सम्बन्धत्रयस्य सोऽयं देवदत्त इत्यादिवाक्येष्विव तत्त्वमस्यादिवाक्येष्वपि सद्भावात्। तेन श्रुतिरपि निष्कृष्टयोरैक्यरूपं शुद्धं स्वरूपं बोधयति।

तदेवात्र प्रतिपादितमष्टादशे तत्त्वमसिप्रकरणे। अविद्यया प्रथिताध्यास एवात्मनात्मनोरविवेकग्रहे हेतुः। तस्य प्रहाणञ्च भवति तत्त्वमसिमहावाक्यतात्पर्यबोधोद्भूतब्रह्मज्ञानद्वारा। अतोऽत्र प्रकरणे पूर्वमध्यासस्वरूपमेवोपवर्ण्यते। यद्यपि पूर्वप्रकरणेष्वपि अध्यासस्वरूपमुपवर्णितं तथापि अध्यास एव द्वैतभावनाप्रर्वतक इति दृढीकरणाय पुनश्चोद्भावितः। तदध्यासनिषेधेनैव द्वैतनिषेधः। स च निषेधप्राप्ताध्यासस्य अप्राप्ताध्यासस्य वा, यदि प्राप्तस्य निषेध उच्येत, तदा मोक्षस्यानित्यता स्यात्, अतोऽप्राप्तस्यैवायं निषेधः।

'सोऽध्यास नेति नेतीति प्राप्तवत्प्रतिषिध्यते।
भूयोऽध्यासविधिः कश्चित् कुतश्चिन्नोपपद्यते।। (उप.सा.१८।२१)

आत्मनीह यथाऽध्यासः प्रतिषेधस्तथैव च।
मलाध्यासनिषेधौ खे क्रियेते च यथाऽबुधैः।। (उप.सा.१८।२२)
प्राप्तश्चेत्प्रतिषिध्येत मोक्षोऽनित्यो भवेद्ध्रुवम्।
अतोऽप्राप्तनिषेधोऽयं दिव्याग्निचयनादिवत्।। (उप.सा.१८।२३)

स चाध्यास: सकलानर्थकारणभूत: कथं नश्येदिति धिया तत्त्वंपदयोर्वाच्यार्थं विहाय भागत्यागलक्षणावृत्त्या चैतन्यमात्रस्य बोधाद् द्वैतबुद्धिनाशः ततश्चाध्यासनिवृत्ति:। स च प्रकार:—

'त्वं सतोस्तुल्यनीडत्वान्नीलाश्ववदिदं भवेत्'।। (उप.सा.१८।१७०)
निर्दुःखवाचिना योगात् त्वंशब्दस्य तदर्थता।
प्रत्यगात्माभिधानेन तच्छब्दस्य युतेस्तथा।। (उप.सा.१८।१७१)
दशमस्त्वमसीत्येवं वाक्यं स्यात्प्रत्यगात्मनि।। (उप.सा.१८।१७२)

तत्त्वंपदयोरखण्डार्थबोधाय साधनचतुष्टयसम्पत्तिरावश्यकी। साधनचतुष्टयसम्पन्नो मुमुक्षुरेव तत्त्वमसीति महावाक्यस्याखण्डार्थबोधाय क्षमते।

'त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम्।
साधनत्वं व्रजत्येव शान्तो दान्तानुशासनात्।। (उप.सा.१८।२२२)

तत्त्वमसिमहावाक्यादेवाखण्डापरोक्षमद्वितीयं ब्रह्माहमस्मीति सांक्षादवगमान्निवृत्तज्ञानतत्कार्य:, स्वतो मुक्त एव विमुच्यते। विमुक्तस्यैव सकलकामनाबीजभूतायास्तृष्णाया निवृत्ति:। अतस्तत्त्वमसिप्रकरणानन्तरं तृष्णा ज्वरनाशकमेकोनविंशं प्रकरणमारभते। यथा शरीरसम्बन्धिवित्तज्वरनाशाय वैद्यकशास्त्रोक्तभैषजमुपयुज्यते। तथैव तृष्णाज्वरापनयाय ज्ञानविरागरूपं भैषजमुपयुज्यते। आत्मज्ञानेन भोगविरागस्ततस्तृष्णाज्वरनाश: सम्भवति नान्यथा। अत्र प्रकरणे आत्ममन:संवादरूपेण तृष्णाज्वरनाशोपाय: प्रदर्शित:। तद्यथा आत्मा मन: कथयति, तव जडस्वभावेन बोधाभावात् आत्मनश्चोदासीनत्वेनार्थिताऽभावान्न फलायोपयुज्यते। अत: शम एवाश्रयणीय:—

अहं ममेति त्वमनर्थमीदृसे परार्थमिच्छन्ति तवान्य ईहितम्।
न तेऽर्थबोधो न हि मेऽस्ति चार्थिता ततश्च युक्तः शम एव ते मनः।।
(उप.सा.१९।२)

उत्तरोत्तरभोगेच्छाया जननी तृष्णा मनोविकारादुत्पद्यते। अतो मनोविकारनाशोपाय: कर्तव्य:, मनोविकारापगते स्वत एव तृष्णा परिनश्यति,

कारणाभावे कार्यानवस्थितेः। मनोविकार एव द्वैतबुद्धौ हेतुः, येन जगन्मोहमेति, अतो मनसः शान्तोपायश्चिन्तनीयो मुमुक्षुभिः।

'त्वयि प्रशान्ते नहि चास्ति भेदधीर्यतो जगन्मोहमुपैति मायया।
ग्रहो हि मायाप्रभवस्य कारणं ग्रहाद्विमोके नहि साऽस्ति कस्यचित्।।

(उप.सा. १९।५)

त्रिविधो हि भ्रमात्मकः प्रपञ्चः, द्रष्टृरूपः, दृश्यरूपः, दर्शनरूपश्चेति। स च मनोविकारकल्पित एवास्ति। सर्वोऽपि भ्रान्तिसिद्धो मिथ्यैव नात्मन्यद्वितीये कश्चिद्विरोधोऽस्ति। किञ्च यथा स्वपन् पुरुषो दृशेर्भिन्न दृश्यं नैवेक्षते तथा प्रबोधेऽपि सतो भिन्नं दृश्यं न प्रतीयते, भेदग्राहिप्रमाणस्य दुष्प्रतिपादत्वात् तेन प्रतीतिमात्रं द्वैतमित्याह—

'द्रष्टा च दृश्यं च तथा च दर्शनं भ्रमस्तु सर्वस्तव कल्पितो हि सः।
दृशेश्च भिन्नं न हि दृश्यमीक्ष्यते स्वपन् प्रबोधेन तथा न भिद्यते।।

(उप.सा. १९।९)

सत्यज्ञानादिवाक्येन सर्वकल्पनातीतं निर्विशेषं ब्रह्म लक्ष्यते। तत्र शुद्धे ब्रह्मणि मनोमायाप्रभवा जन्मस्थित्यादिषड्विकारा अध्यस्यन्ति। जीवात्मपरमात्मनोरभेदज्ञानेन हि निवृत्त्यामविद्यायामात्ममात्रमवशिष्यते।

अकल्पितेऽप्येवमजेऽद्वयेऽक्षरे विकल्पयन्त सदसच्च जन्मभिः।
स्वचित्तमायाप्रभवं च ते भवं जरां च मृत्युं च नियान्ति सन्ततम्।।

(उप.सा. १९।९)

युक्तिर्मननं, श्रुतिः श्रवणं ताभ्यां निदिध्यासनसहिताभ्यामात्मानं निरीक्ष्य बुद्धिर्निःशेषाज्ञानतत्कार्यनिवृत्त्या स्वरूपेणावशिष्यते। यथा दीपस्तैलादिनिवृत्तौ तेजोमात्ररूपेण तिष्ठति।

समं तु तस्मात् सततं विभातवदद्वयाद्विमुक्तं सदसद्विकल्पिताात्।
निरीक्ष्य युक्त्या श्रुतितस्तु बुद्धिमानशेषनिर्वाणमुपैति दीपवत्।।

(उप.सा. १९।१९)

सर्वोपनिषदर्थसारसङ्ग्राहिका वेदान्ततत्त्ववेदिका गद्यपद्यात्मिका हीयमुपदेशसाहस्री। तत्र एकोनविंशतिप्रकरणात्मके पद्यभागे वेदान्तप्रतिपाद्या विषयाः प्रकरणत्वेनोपस्थाप्य व्याख्याताः। किञ्च पद्यभागोऽयं छन्दोऽनुबद्धतया विषयावगतौ काठिन्यमवगाहते। गद्यभागश्चातिसरलया, सरसया भाषयाऽनुबद्धोऽतो विषयावबोध आसुरेव जायते। तत्र प्रथमं मुमुक्षूणां श्रद्धधानामर्थिनां च हितेषणया

शिष्यानुशासननामकं प्रकरणमारभते। मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रूयात्। तैश्च शिष्यैः कीदृशैर्भाव्यमित्यत्र प्रकरणे सम्यगालोचितम्। तथा च श्रुतिः परीक्ष्य लोकान् तत्त्वतो ब्रह्मविद्यां दृढेन गृहीता हि विद्याऽऽत्मनः श्रयसे सन्तत्यै च भवति। सन्ततिश्च शिष्यप्रष्यादिपरम्पराविच्छत्तिहानिः। यथा नद्यां निमग्नस्य नदीं तितीर्षोश्च निस्तारहेतुः नौकेष्टा। तथा दुःखसमुद्रे निमग्नस्य प्राणिनः शिष्यप्रशिष्यादिलक्षणा विद्यासन्ततिरनुग्रहाय भवति। सर्वधनप्रधानं वै विद्या। तथा चोक्तं विद्यागुरवे विद्यानिष्क्रयार्थमिमां पृथिवीं समुद्रवेष्टितां वित्तपूर्णामेव दद्यात्तथाप्येतद् विद्यादानं ततोऽधिकम्। यथा व्याघ्रीदुग्धं सुवर्णपात्रमेवाधितिष्ठति। तथैवाचार्यसम्पन्नाय सच्छिष्याय प्रदत्ता विद्या फलायोपयुज्यते। तथा च श्रुतयः 'आचार्यवान् पुरुषो वेद, आचार्याद् विद्या विदिता, आचार्यः प्लावयिता तस्य सम्यग्ज्ञानं प्लव इहोच्यते।

आचार्यश्चोहापोहग्रहणधारणशमदमदयानुग्रहादिसम्पन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तस्त्यक्तसर्वकर्मसाधनो ब्रह्मविद् ब्रह्मणि स्थितोऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहङ्कारममत्वादिदोषविवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी स्यात्। उपदेशविधौ चोक्तम् आचार्यः प्रथमं सर्वलक्षणसम्पन्नं सच्छिष्यं सर्वविकल्पातीतं निर्गुणमद्वयं शुद्धं ब्रह्मस्वरूपमुपदिशेत्। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, यत्र नान्यत्पश्यति, आत्मैवेदं सर्वम्, ब्रह्मैवेदं सर्वम्, आत्मा वा इदमेव एवाग्र आसीत्, सर्वं खल्विदं ब्रह्म इति। उपदिष्टः सन्नपि यदि न बुध्येत्तदा प्रश्नप्रतिप्रश्नेनोपदिशेत्। तद्यथा आचार्यो पृच्छेत् कस्त्वमसि सोम्य? यदि स ब्रूयाद् ब्राह्मणपुत्रोऽन्वयो ब्रह्मचार्यासम्—गृहस्थो वा इदानीमस्ति तदा तमाचार्य उपदिशेत् शरीरान्वितस्य ब्राह्मणपुत्रादिव्यवहार उपयुज्यते, आत्मा तु शरीरादिव्यतिरिक्तः, शरीरन्तु नाशमेति, आत्मा हि अजोऽविनाशी नित्यश्चास्ति। तथा च श्रुतयः 'स वा एष महानज आत्मा' अप्राणो ह्यमनाः, सबाह्याभ्यन्तरो ह्यजः।

यदि शिष्यो ब्रूयात् अन्योऽहं शरीरात्। शरीरं तु जायते म्रियते वयोभिरद्यते, मृद्भावमापद्यते, शस्त्राग्न्यादिभिश्च विनाश्यते, व्याधिभिश्च युज्यते। तस्मिन्नहं स्वकृतधर्माधर्मवशात् पक्षी नीडमिव प्रविष्टः। पुनश्च शरीरविनाशे धर्माधर्मवशाच्छरीरान्तरं यास्यामि, पूर्वनीडविनाशे पक्षीव नीडान्तरम्। तस्मान्नित्य एवाहं शरीरादन्यः शरीराण्यागच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति। तदा आचार्यो ब्रूयात्, साध्ववादीः इदानीं सम्यक् पश्यति, कथं पूर्वं मृषाऽवादीः ब्राह्मणपुत्रोऽदोऽन्वयो ब्रह्मचार्यासम् - इत्यादि। जात्यादिवर्जितस्यात्मनो जात्यादिप्रतिज्ञानान्मृषावादिता। स यदि पृच्छेत् कथं भिन्नजात्यन्वयसंस्कारं शरीरं कथं वा

अहं जात्यन्वयसंस्कारवर्जित इति। तदा आचार्यो ब्रूयात् शृणु सोम्य, यथेदं शरीरं त्वत्तो भिन्न भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जितः। एतावताऽपि यदि न प्रतिबुध्येत् तदा आत्मस्वरूपबोधकानि श्रुतिवाक्यानि स्मारयेत्। इत्थं लब्धपरमात्मलक्षणस्मृतये शिष्यायोपदिशेत् योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतोऽशरीरोऽस्थूलादिलक्षणोऽपहतपाप्मत्वादिलक्षणश्च सर्वैः संसारधर्मैरनागन्धितो, यत्साक्षादपरोक्षाद् ब्रह्म एष त आत्मा सर्वान्तर, अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नित्यविज्ञानस्वरूपः, अनन्तरोऽबाह्यः विज्ञानघन एव परिपूर्णः आकाशवत्।

यदि शिष्य आशङ्क्येत अस्तु परमात्मा सर्वव्यापको नित्यः सर्वभेदशून्यः, अन्य एवाहमज्ञः सुखी दुःखी बद्धः संसारी, अन्योऽसौ मद्विलक्षणोऽसंसारी देवः, तमहं बल्युपहारनमस्कारादिभिर्वर्ण्याश्रमकर्मभिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि। तदा आचार्यः जीवात्मनोरभेदबोधकश्रुतिवाक्यैः शिष्यमुद्बोधयेत्। अन्योऽसावन्योऽहमस्मीति न स वेद, ब्रह्म तं परादाद्योऽन्यत्रात्मतो ब्रह्म वेद, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, स आत्मा तत्त्वमसि, इति। इत्थं शिष्याचार्योपदेशविधिनाऽत्मतत्त्वं सम्यक् प्रतिपादितमत्र शिष्यानुशासननामके प्रथमे गद्यसमवाये।

द्वितीयं हि कूटस्थाद्वयात्मबोधप्रकरणम्। अत्र प्रकरणे गुरुशिष्ययोः प्रश्नप्रतिप्रश्नाभ्यां मोक्षोपायस्तस्वरूपञ्च प्रतिपादिते। जीवात्मपरमात्मनोरभेदबोध एवाद्वैतनये मोक्षः। अस्य प्रकरणस्य नामसङ्कीर्तनमात्रेण विषयोऽप्यवगम्यते। तथा हि कूटे समुदाये व्यापकत्वेन तिष्ठति इति कूटस्थं व्यापकं ब्रह्म, यद्वा कूटमयोघनमिव निश्चलं तिष्ठति यत् तन्निश्चलं ध्रुवं ब्रह्म। यत्र संस्थाप्य लौहं मुद्गरैर्लौहकारेण ताड्यते स लौहकारोपकरणविशेषोऽयोघनः स च प्रचलत्स्वपि विनश्यत्स्वपि च लौहमुद्गरादिषु निश्चल एव तिष्ठति, तद्वज्जायमाने विनश्यति वा प्रपञ्चे कूटस्थमेव ब्रह्म वर्तते। तस्याद्वयबोधो निरूपितो यत्र तत् प्रकरणं कूटस्थाद्वयबोधप्रकरणम्। कूटस्थाद्वयबोध एव मोक्षः। तदुपायश्च जीवात्मपरमात्मनोर्भेदबुद्धिनाशः।

दैहिकदैविकभौतिकतापत्रयेणाभिपीडितोऽऽत्यन्तिकीं निवृत्तिं कामयमानो मुमुक्षुः संसारसंस्पर्शहीनं नित्यमुक्तं ब्रह्मनिष्ठं गुरुमुपगतः पृष्टवान् कथं संसारसागरात् पारं गमिष्यामीति।

शरीरेन्द्रियविषयवेदनावान् अहं जागरिते दुःखमनुभवामि, स्वप्ने तु लीनेष्वपीन्द्रियेषु जागरितविषयवत् स्वप्नगजादयः साक्षात्सक्षिण्यध्यस्ततया प्रतिभासन्ते। अतः स्वप्नेऽपि प्रियवियोगनिष्ठागमरूपं दुःखमनुभूयत एव।

सुषुप्तिप्रतिपत्त्याऽधिगतविशान्तिरपि पुनर्जाग्रत्स्वप्नयोरवस्थामधिगतो दुःखभाग् भवति। तद्विषये पृच्छति किमयं मम जीवात्मनः स्वभाव एवाहोश्वित् नैमित्तिकः। तत्रायं विशेषः, यदि अयमेव स्वभाव न मे मोक्षाशाः स्वभावस्यानिवर्जनीयत्वात्। अथ नैमित्तिकः निमित्तपरिहारे स्यान्मोक्षोपपत्तिः।

शिष्यमुपदिशन्नाह गुरुः, नित्यशुद्धबुद्धमुक्तस्वभावो जीवः अविद्यानिमित्तमभिप्रेत्य दुःखादीननुभवति, व्यपगते च निमित्ते नैमित्तिकदुःखादयो निवर्तन्ते। व्यपगतप्रपञ्चश्च रोगनिमित्तनिवृत्तौ रोगीव स्वभावं प्रतिपद्यते। यन्निमित्तवशान्मोहमुपगतस्तन्निमित्तं पृच्छति शिष्यः, का नाम अविद्येति। तत्राविद्यास्वरूपं गुरूपदेशरूपेणाचार्यो वक्ति। त्वं परमात्मानं सन्तमसंसारिणं संसार्यहमस्तीति विपरीतं प्रतिपद्यसे, अकर्त्तारं सन्तं कर्तेति, अभोक्तारं सन्तं भोक्तेति, विद्यमानं चाविद्यमानमिति इयमविद्या।

अविद्यानिमित्तकः सर्वो हि कर्तृत्वभोक्तृत्वादिव्यवहारो न जीवात्मा कर्तृत्वभोक्तृत्वस्वभाव इति श्रुत्वा शिष्यः सन्देहमुपसन्नो ब्रूते। दृष्टमविद्यासामर्थ्यमन्यस्मिन्नन्यधर्मारोपरूपम्, यथा प्रसिद्धं रजतं प्रसिद्धाया शुक्तिकायाम्, यथा प्रसिद्धं पुरुषं स्थाणावध्यारोपयति, प्रसिद्धं वा स्थाणुं पुरुषे, नाप्रसिद्धं प्रसिद्धे, प्रसिद्धं वा अप्रसिद्धे। न चात्मन्यनात्मानमध्यारोपयति, आत्मनोऽप्रसिद्धत्वात्, तथाऽऽत्मानमनात्मनि, आत्मनोऽप्रसिद्धत्वादेव।

इदानीमाचार्यो गुरूपदेशदिशाऽऽत्मनि देहधर्माध्यासं ब्रूते। 'नहि वत्स प्रसिद्धं प्रसिद्ध एवाध्यारोपयतीति नियन्तुं शक्यम्। आत्मन्यध्यारोपणदर्शनात्। गौरोऽहमिति देहधर्मस्याहंप्रत्ययविषये आत्मनि, अहंप्रत्ययविषयस्य च आत्मनः देहेऽयमहमस्मीति।

ततश्शिष्य आशंसति प्रसिद्धस्तर्ह्यात्माऽहंप्रत्ययविषयतया देहश्च प्रसिद्धोऽयंप्रत्ययविषयतया इत्थं प्रसिद्धयोरेव देहात्मनोरितरेतराध्यासः, स्थाणुपुरुषयोः शुक्तिरजतयोरिव। निराकरोत्याचार्यो गुरूपदेशमाध्यमेन सत्यं प्रसिद्धौ देहात्मानौ, न तु स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ। कथं तर्हि? नित्यमेव निरन्तराविविक्तप्रत्ययविषयतया प्रसिद्धौ। न हि अयं देहः अयमात्मा इति विविक्ताभ्यां प्रत्ययाभ्यां देहात्यानौ गृह्णाति यतः कश्चित्। अत एव हि मोमुह्यते लोक आत्मानात्मविषये—

तत्राशङ्क्यते—अविद्याध्यारोपितं सर्वमसदेव दृष्टम्, यथा रजतं शुक्तिकायां स्थाणौ पुरुषः रज्ज्वां सर्पः 'यथा शुक्तिकादिष्वविद्याध्यारोपितानां रजतादीनां नित्यमेवात्यन्तासत्त्वम् तद्विपरीतानां च विपरीतेषु, तद्वद्देहात्मनोरविद्ययैवेतरेतराध्यारोपणा कृता स्यात्, तत्रैवं सति देहात्मनोरसत्त्वं प्रसज्येत

तच्चानिष्टं वैनाशिकपक्षत्वात्। अथ तद्विपर्येण देह आत्मन्यविद्ययाध्यारोपित: देहस्यात्मनि सति असत्त्वं प्रसज्येत। तच्चानिष्टं प्रत्यक्षादिविरोधात्। तस्माद्देहात्मानौ नाविद्ययेतरेतरस्मिन्नध्यारोपितौ कथं तर्हि वंशस्तम्भवन्नित्यसंयुक्तौ।

देहात्मसङ्घातपक्षं निराकुर्वन्नाह 'देहात्मानौ न संहतौ तथा सति अनित्यत्वमात्मन: प्रसज्येत। तथा चानुमानमसंहतपदार्थोऽनित्य: संहतत्वात् वंशस्तम्भादिवत्। परैर्देहेन संहत आत्मा कल्पित स नास्माभिर्नित्यात्म-वादिभिरभिमत:। स्वत एवात्मन आकाशस्येवासंहतत्वाभ्युपगमात्। न चात्मनोऽसंहतत्वे निरात्मको देह इति वैनाशिकपक्षप्राप्ति:, परमार्थतोऽसंहतस्यापि देहादौ संसर्गाध्यासाभ्युपगमात्। यथा चाकाशं सर्वेणासंहतमिति सर्वं न निराकाशं भवति। एवमेव सर्वेणासंहतेऽप्यात्मनि न निरात्मको देहादि:।

देहादेरात्मन्यध्यस्तत्वेन तत्रासत्त्वे प्रमाणविरोध: स्यादिति परोदीरितपक्षं निराकुर्वन्नाह नहि आत्मनि कुण्डे बदरं, क्षीरे सर्पि:, तिले तैलं, भित्तौ चित्रमिव च प्रत्यक्षादिभिर्देह उपलभ्यते। तस्मान्न प्रत्यक्षादिविरोध:। अत्रापर: प्रश्न उदेति, आत्मा प्रमितो न वा, प्रमितत्वे नाधिष्ठानत्वम्, आरोप्यत्वं वा प्रमितिविरोधात्, अप्रमितत्वेऽपि नाधिष्ठानत्वादिकं सिद्ध्यति। अप्रतिपन्नस्य तदयोगात्, सामान्येन ज्ञातस्य, विशेषेणाज्ञातस्यैवाधिष्ठानत्वाच्च। कथं तर्हि प्रत्यक्षाद्यप्रमित आत्मनि देहाध्यारोपणा देहे चात्माध्यारोपणा। इदं पक्षं निराकुर्वन्नाह—आत्माऽपरोक्ष: सन्नपि प्रमितो नास्ति। अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वादात्मन:। तस्यापरोक्षत्वं यत्साक्षादपरोक्षाद् ब्रह्म इति श्रुतिर्बोधयति। अवेद्यत्वञ्च इन्द्रियाद्यसन्निकृष्टतया वृत्त्यव्याप्यत्वात् फलाव्याप्यत्वाच्चात्मन:। कथमधिष्ठानमिति चेन्नाप्रत्यक्षस्या-काशस्याधिष्ठानत्वदर्शनात्।

इत्थं सकारणमध्यासस्वरूपमत्र प्रकरणे प्रश्नप्रतिप्रश्नाभ्यां विवेचितम्। तत्र हेतुरविद्यैवेति पूर्वं प्रपञ्चितम्। सा चाविद्या ब्रह्मविषया, अतो ब्रह्मज्ञानेन निवर्तते। अविद्यारूपाध्यासकारणापगतेऽध्यासरूपं कार्यमपि व्यपगच्छति, कारणनाशे कार्यविनाश इति नियमात्। यद्विषयकाज्ञानेन भ्रमोदयस्तद्विषयकज्ञानेनैव निवर्तते। यथा शुक्तिकाविषयकाज्ञानेन रजतज्ञानं शुक्तिकेति ज्ञानेन निवर्तते। तद्वद् ब्रह्मविषयकाज्ञानेन जायमान: सकलोऽपि प्रपञ्चो ब्रह्मज्ञानेन निवर्तते। तच्च ज्ञानं जीवात्मपरमात्मनोरभेदरूपम्, अहं ब्रह्मास्मीत्यनुभवरूपम्। कृतात्मसाक्षात्कार आह भगवन् अपगतस्त्वत्प्रसादाद् व्यामोह:।

अत: परं ब्रह्मण: कूटस्थत्वमस्ति नवेति जिज्ञासते। यथा शब्दादिविषयाणां तत्प्रत्ययानाञ्च भेद: सिद्ध: तद्वत् ज्ञानाश्रयतयोपलब्धेति विक्रियावानेवात्मा कथं कूटस्थ:। तं संशयं गुरूपदेशरूपेणापाकरोत्याचार्य: न युक्तस्तव संशय:, यतस्तेषां

प्रत्ययानां नियमेनाशेषत उपलब्धेरेवापरिणामित्वात् कूटस्थत्वसिद्धौ निश्चयहेतुमेवाशेषचित्तप्रचारोपलब्धिं संशयहेतुमात्थ। यदि हि तव परिणामित्वं स्यात्, अशेषस्वविषयचित्तप्रचारोपलब्धिर्न स्यात्। चित्तस्य स्वविषये, यथा चेन्द्रियाणां स्वविषयेषु न च तथाऽऽत्मनस्तव स्वविषयैकदेशोपलब्धिः। अतः कूटस्थतैव तवेति।

अद्वितीयस्य प्रत्यगात्मनः सच्चिदानन्दैकतानस्य परमार्थत्वम्, द्वैतप्रपञ्चस्य च मिथ्यात्वमित्येवं शिष्येणोक्तम्। गुरुणा चाभ्यनुज्ञाते विपरीतप्रमा कथमित्याशङ्क्याह–एषाऽविद्या यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणः। तस्या अविद्याया विद्या निवर्तिका। इत्येवं त्वमभयं प्राप्तोऽसि। नातः परं जाग्रत्स्वप्नदुःखमनुभविष्यति। संसारदुःखान्मुक्तोऽसीति। अतोऽत्र प्रकरणे अद्वैतराद्धान्तस्तत्फलञ्च सम्यग् विवेचिते।

अत उत्तरे परिसंख्याननामके प्रकरणे कृतात्मसाक्षात्काराणामनुचिन्तन-फलमुच्यते। मुमुक्षूणामुपात्तपुण्यापुण्यक्षपणपराणामपूर्वानुपचयार्थिनां परिसंख्यान-मिदमुच्यते। विज्ञानवतामपि केषाञ्चिद् भेददर्शनवासनाप्राबल्यात् शब्दादिभि-रुपलभ्यमानैः पीड्यमानानामुक्तपीडानिवृत्तये कर्तव्यं चिन्तनं विविच्यात्र प्रकरणे उपदिश्यते आचार्यपादैः। परिसंख्यानं च कुर्वता प्रथममात्मानात्मविवेचनं कर्तव्यमित्याह—तत्र शब्दस्पर्शरूपरसगन्धानां विषयाणां श्रोत्रादिग्राह्यत्वात्स्वात्मनि परेषु वा विज्ञानाभावः तेषामेव परिणतानां यथा लोष्टादीनाम्। श्रोत्रादिद्वारैश्च ज्ञायन्ते। येन च ज्ञायन्ते स ज्ञातृत्वादतज्जातीयः। यथा बाह्यानां शब्दादीनां लोष्ठादिसदृशानां ज्ञानाभावो दृष्टस्तथा तेषामेव शब्दादीनां देहाकारपरिणतानां स्वपरविषयविज्ञानाभावो विज्ञायते। दैहिकाशब्दादयः स्वपरज्ञानशून्याः शब्दादित्वाद् बाह्यशब्दादिवदित्यर्थः।

तदित्थमाचार्यपादैः स्वोपदेशसाहस्रीग्रन्थे समग्रोऽप्यद्वैतसिद्धान्तस्तथ्या-तथ्यविवेचनपूर्वकं पक्षप्रतिपक्षोपस्थापननिराकरणपुरःसरञ्च निरूपितः। विषय-गाम्भीर्यात् प्रकरणगतविषयतत्त्वमवगन्तुमक्षममिति कृत्वा प्रतिप्रकरणं विषया भूमिकाविधौ प्रतिपादिताः। सर्वोपनिषदामद्वये निर्विशेषे ब्रह्मणि तात्पर्यमित्यपि भगवत्पादैरेतद्ग्रन्थदिशा प्रतिपादितम्। अनात्मवस्तुनश्चाऽसत्वं परमो हेतुः आत्मनश्चाद्वयत्वे, द्वयस्यासत्त्वात्, यानि सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितानीति।

कृतज्ञताज्ञापनम्

कृतज्ञताज्ञापनविधौ प्रथमं मातुः स्वर्गीयायाः श्रीमत्या **रामावतारीति** धेयायाः पितुश्च **श्रीरामरुचित्रिपाठीति** धेयस्य चरणकमलेषु मे शिरोनतयो विलसन्तुतमाम्।

ततश्चाभिनवपाणिनीत्युपाधिभाजां देशे विदेशे च प्रसरत्कीर्तीनां शिष्यप्रशिष्यैरनुगतशास्त्रवैदुष्याणां **पण्डितश्रीरामप्रसादत्रिपाठि**गुरुचरणानामाधमर्ण्यमावहामि। यैर्व्याकरणशास्त्रस्यातिगभीरतत्त्वमध्याप्योपकृतोऽस्मि। तदनु सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदान्तविभागाध्याक्षाणां व्याकरणवेदान्ताद्यनेकशास्त्रतत्त्वोद्भावनकुशलानामाचार्य**श्रीपारसनाथद्विवेदि**गुरुचरणानां पादपद्मेषु शिरसा नतिमाभजे। यैर्व्याकरणवेदान्तादिशास्त्राणि अतिसरलया पद्धत्या बालमिव पाठयित्वोपकृतोऽस्मि। अथ च ग्रन्थलेखनरीतिं बोधयित्वा, शोधप्रबन्धादिलेखने प्रोत्साहितोऽस्मि। अथ च अधिसम्पूर्णानन्दविश्वविद्यालयं न्यायविभागाध्यक्षचराणां न्यायादिदर्शनशास्त्रेष्वव्याहतगतीनां छात्राणामध्यापने यापितकालानामाचार्य**श्रीवशिष्ठत्रिपाठि**गुरुचरणानां पादपद्मेषु मे प्रणामाञ्जलयो विलसन्तुतराम्। यैर्न्यायशास्त्राध्यापनेनोपकृतोऽयं जनः।

एतद्ग्रन्थसम्पादने यैरुपकृतस्तेषु प्रथमं मनीषिधौरेयाणां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचराणां **प्रो. राममूर्तिशर्म**महोदयानां कार्तज्ञ्यमावहे। यैः सरस्वतीभवनपुस्तकालये लब्धहस्तलिखितोपदेशसाहस्रीग्रन्थः प्रकाशनायानुमतः। अथ वर्तमानकुलपतिमहोदयानां महामान्यानां समधिगतानेकोपाधीनां कविचक्रचूडामणीनां सरलहृदयानाम**भिराजराजेन्द्रमिश्रमहाशयानां** चरणकमलेषु प्रणतयः संलसन्तु। येषां कुलपतित्वेऽयं ग्रन्थः प्रकाशतां नीतः।

ततश्च बुधवराणां महामान्यानां नैकविधमहत्त्वशालिग्रन्थसम्पादनतत्पराणां परमयशास्विनां संस्कृतग्रन्थप्रकाशनेन विश्वविद्यालयस्यास्य गौरवं समेधयतां प्रकाशननिर्देशकानां **डॉ. हरिश्चन्द्रमणित्रिपाठिमहाशयानां** भूयो भूयः कृतज्ञतामावहे, येषां सत्प्रेरणयाऽयं ग्रन्थः प्रकाशत्वमधिगतः।

अतः परं सहायकसम्पादकपदमाजां पण्डितवराणां सरलहृदयानां साहित्यादिशास्त्रेषु निष्णातमतीनां **डॉ. ददन-उपाध्यायानां** कृतज्ञतामावहामि। तैरेतद्ग्रन्थसम्पादने महत्साहय्यं कृतं, तान् पुनः पुनः प्रणमामि। अन्येऽपि ये ग्रन्थसम्पादने सहयोगिनः तान् साधुवादैः सभाजयामि। ग्रन्थलेखेषु त्रुटिक्षमार्थं सर्वान् अभ्यर्थमानो विरमामि।

वाराणसी
गुरुपूर्णिमा
२०६० वैक्रमाब्दः

विदुषां वशंवदः
रामकिशोरत्रिपाठी
दर्शन-सङ्कायाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

विषयानुक्रमणिका

पद्यभागः

पृष्ठ-संख्या

१. **उपोद्घातप्रकरणम्** १-८
अत्र वेदान्तानां कर्मकाण्डेन सह सम्बन्धोऽस्ति न वेति विचारः, वेदान्तविद्याप्रवृत्तस्य मुमुक्षोः कर्मसंन्यासश्च

२. **प्रतिषेधप्रकरणम्** ९-१०
अत्र नेति नेतीत्यादिना आत्मनि सर्वप्रपञ्चनिषेधेऽपि नात्मनो निषेधत्वप्रतिपादनम्

३. **ईश्वरात्मप्रकरणम्** ११-१२
ईश्वरस्वरूपविवेचनम्

४. **तत्त्वज्ञानस्वभावप्रकरणम्** १३-१४
कर्मफलस्य बन्धरूपता, तत्त्वज्ञाने नाविद्यायां निवृत्तौ सर्वकर्मक्षयस्य निरूपणम्।

५. **बुद्ध्यपराधप्रकरणम्** १५-१६
यदि ब्रह्मात्मज्ञानं मोक्षसाधनं तर्हि सर्वेषां मोक्षसाधनभूते ब्रह्मात्मज्ञाने कथं न प्रवृत्तिर्भवतीत्याशङ्क्य अहं कर्ता भोक्तेति भ्रमात्मकं ज्ञानं तत्र हेतुः, अहंत्वनिवृत्तौ साक्षिरूपचैतन्यमेवावशिष्यते।

६. **विशेषापोहप्रकरणम्** १७-१८
पदार्थविवेकवतो वाक्यादहं ब्रह्मेति ज्ञानं जायते। अतो पदार्थविवेकविधौ अहंपदार्थे यद्विशेषणमहङ्कारादि तत्सर्वं छिन्नहस्तवत् परित्याज्यमिति प्रतिपादनम्

७. **बुद्ध्यारूढप्रकरणम्** १९-२०
अन्वयव्यतिरेकाभ्यां त्वंपदार्थविवेको विधेयस्ततोऽहं ब्रह्मास्मीति ज्ञानमुदेति। स चात्र प्रकरणे स्वानुभवारूढतया प्रतिपादितः

८. **मतिविलापप्रकरणम्** २१-२२
ब्रह्मवज्जीवात्मापि सर्वविकल्पातीतः शुद्धबुद्धमुक्तस्वभावश्चास्ति

परञ्चाविद्याकल्पिताङ्करादीनामध्यासाद् बद्धोऽल्पज्ञश्चास्मीत्यनुभवति। तदर्थं शास्त्रसंवादो विहितः। संवादद्वारा भ्रमनिवृत्तौ भवति स्वरूपावबोधः

९. सूक्ष्मताव्यापिताप्रकरणम् २३-२५

अत्र प्रकरणे ब्रह्मणः सूक्ष्मत्वं व्यापित्वं च प्रतिपादिते। पृथिव्यादेरुत्तरोत्तरं सूक्ष्मत्वव्यापित्वातिशयदर्शनाद् ब्रह्मणि ते निरतिशये भवत इति निरूपणम्

१०. दृशिस्वरूपपरमार्थदर्शनम् २६-२८

अत्र दृशिस्वरूपपरमार्थदर्शनप्रकरणोऽद्वयरूपस्य ब्रह्मणः सर्वतो भावेन स्वरूपप्रतिपादनमकारि भगवत्पादेन। यस्य ब्रह्मणः स्वरूपज्ञानेनामृतत्वमधिगच्छन्ति मुमुक्षवस्तत्स्वरूपं गगनवद् व्यापकं जन्मादिविकारशून्यं प्रकाशस्वरूपं सर्वसंसृष्टमपि निर्लिप्तमद्वयञ्चास्ति।

११. ईक्षितृत्वप्रकरणम् २९-३२

तमःप्रकाशवद्विरुद्धस्वभावयोर्जीवात्मपरमात्मनोरैक्यायोगात्, कथं सम्भवति, अभेदज्ञानेन मोक्षः। अतः कर्मणो मोक्षस्तत्समुचिताज्ज्ञानाद्वा न च तत्समुचितज्ञानात्। इदमेवात्र प्रकरणे विवेचितम्।

१२. प्रकाशप्रकरणम् ३३-३७

शुद्धबुद्धमुक्तस्वभावं निर्विशेषमप्यात्मतत्त्वमन्तःवारणाध्यासमहिम्नाऽहंत्वेन वेत्ति लोकः। इतरेतराध्यासेनाविविक्ततया स्वतः सिद्धस्वप्रकाशस्वरूपमवगन्तुं न शक्यते। अहं प्रत्ययस्य विवेचनेनात्मानं पृथक्कृत्य जानीयादित्यत्र प्रतिपादितम्।

१३. अचक्षुष्ट्वप्रकरणम् ३८-४३

पूर्वप्रकरणे प्रत्यगात्मनो यच्छुद्धत्वमचलत्वञ्चोक्तम्। तदेवात्र प्रकरणे स्पष्टीकृतम्।

१४. स्वप्नस्मृतिप्रकरणम् ४४-५५

प्रत्यगात्मन्यध्यस्यमाने प्रपञ्चे ज्ञातृज्ञानज्ञेयानामविवेकात्तेषां भेदप्रतीतिर्न स्यात्। अथ च विषयाणां पार्थक्येन बोधाभावात्तत्संस्कारोऽपि न स्यात्। संस्कारमन्तरा स्वप्ने विषयावभासः स्मृतिश्च न स्याताम्। अतः प्रपञ्चाध्यासवत् प्रपञ्चज्ञानस्य ज्ञानज्ञेयभेदस्याप्यध्यासो भवति।

इदमेवात्र प्रपञ्चितम्।

१५. नान्यदन्यत्प्रकरणम् ५६-६७

केचन आक्षिपन्ति ब्रह्मवज्जीवः स्वतः शुद्धो नास्ति, स कथं ब्रह्मणः स्वरूपमियात्, किन्तु अविद्यावशान्मलिनसत्त्वः, अतो ज्ञानध्यानादिसाधनेन ब्रह्मभावमेति। तन्निराक्रियतेऽत्र पञ्चदशे प्रकरणे। ब्रह्मात्मनोर्नास्ति कश्चिद् भेदः, अविद्यया भेदोऽभिगमः, निवृत्तावविद्यायां जीवात्मनोरभेदः प्राप्तोऽपि भ्रमवशादप्राप्त इवावगतो भवति। नान्यदन्यत् शब्दस्यादौ प्रयोगादस्य नात्र नान्यदन्यत् प्रकरणमस्ति।

१६. पार्थिवप्रकरणम् ६८-८५

पूर्वप्रकरणेषु पक्षप्रतिपक्षमुखेन सत्स्वरूपमात्मतत्त्वं जीवात्म-परमात्मनोरैक्यरूपं मोक्षं च प्रतिपाद्य, पार्थिवनामके षोडशे प्रकरणे ब्रह्मविषये लोकायतमतमारभ्य सर्वेषां दार्शनिकानां सिद्धान्तान् निराकृत्य स्वसिद्धान्तं द्रढयति। पार्थिवः कश्चिद् धातुः इति पाठमहिम्नाऽस्य प्रकरणस्य नाम पार्थिवप्रकरणम्

१७. सम्यङ्मतिप्रकरणम् ८६-१०४

धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः, तस्य नित्यत्वात् कर्मणाऽजन्यत्वाच्च। स च मोक्षो जीवात्मनोरैक्यज्ञान-रूप आत्मसाक्षात्कारः। यज्ज्ञानेनाविद्यायां निवृत्तौ सकलं जगन्नि-वर्तते। तत्प्रतिपादिका मतिः सम्यङ्मतिरित्युच्यते। सा च मतिः अहं ब्रह्मास्मीति बोधरूपा। तदेवात्र सप्तदशे प्रकरणे प्रपञ्चितम्।

१८. तत्त्वमसिप्रकरणम् १०५-१५४

अत्र प्रकरणे तत्त्वमसीति महावाक्यस्याखण्डार्थबोधविधौ उपायः प्रदर्शितः। तत्त्वंपदयोः सामानाधिकरण्यादभेदबोधे प्राप्तेऽपि उभयो-र्भिन्नार्थतया न सम्भवतीति कृत्वा भागत्यागलक्षणावृत्त्या चैतन्यमात्रं लक्ष्यते। तत्र ब्रह्मात्मनोरभेदबोधबाधकमध्यासस्वरूपमेव पूर्वमाह।

१९. तृष्णाज्वरप्रकरणम् १५५-१६३

उत्तरोत्तराभिलाषाया निमित्तं तृष्णा, सा च मनोविकाररूपा। तृष्णानाशाय मनोविकारनाशोपायः कर्तव्यः। मनोविकारापगते स्वत एव परिनश्यति कारणाभावे कार्यानवस्थितीति नियमात्। मनोविकार एव द्वैतबुद्धौ हेतुः। येन जगन्मोहमुपैति, अतो मनसः शान्तोपायश्चिन्तनीयो मुमुक्षुभिः। अत्र प्रकरणे आत्ममनःसंवादरूपेण तृष्णाज्वरनाशोपायः प्रदर्शितः।

गद्यभागः

१. **शिष्यानुशासनम्** १६४-१८७

मुमुक्षूणां श्रद्दधानामर्थिनां च हितेषणया शिष्यानुशासननामकं प्रकरणमारभते। मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रूयात्। तैश्च शिष्यैः कीदृशैर्भाव्यमित्यत्र प्रकरणे सम्यगालोचितम्।

२. **कूटस्थाद्वयात्मबोधनामकमवगतिप्रकरणम्** १८८-२१६

अस्य प्रकरणस्य नामसङ्कीर्तनमात्रेण विषयोऽवगम्यते। अत्र हि गुरुशिष्ययोः प्रश्नप्रतिप्रश्नाभ्यां मोक्षोपायस्तत्स्वरूपञ्च प्रतिपादिते।

३. **परिसङ्ख्यानप्रकरणम्** २१६-२२२

अत्र परिसंख्याननामके प्रकरणे कृतात्मसाक्षात्काराणामनुचिन्तन-फलमुच्यते। परिसंख्यानं च कुर्वता प्रथममात्मानात्मविवेककर्तव्यः। स च विवेकप्रकाशोऽपि प्रदर्शितः।

श्रीशङ्करभगवत्पादाचार्यविरचिता

उपदेशसाहस्त्री[1]

अथ प्रथममुपोद्घातप्रकरणम्

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम्[2]।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः॥१॥

श्रीभगवदानन्दज्ञानाचार्यकृता सहस्त्रीविवृतिः

॥श्रीगणेशाय नमः॥

प्रणम्य कृष्णं प्रणतार्त्तिहारिणं गुरूनपि स्वान् परमार्थरूपिणः।
मया सहस्त्रीविवृतिर्विधीयते कृतापि मन्दोपकृतिप्रसिद्धये॥

सकलोपनिषदर्थसारसङ्ग्राहिकामुपदेशसाहस्त्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारश्चिकीर्षितस्य ग्रन्थस्याविघ्नेन समाप्तिप्रचयगमनाभ्यां शिष्टाचार-परिपालनपरिलब्ध्यै दृष्टसिद्धये च विशिष्टेष्टदेवतातत्त्वानुस्मरणपूर्वकं तन्नमस्काररूपं मङ्गलाचरणं मुखतः सम्पादयन्नस्य शारीरकप्रकरणस्य तदीयमेवानुबन्धजातं[3] सूचयति—**चैतन्यमिति।**

'यः सर्वज्ञः सर्वविदि'ति[4] श्रुतेः सर्वं वेत्तीति व्युत्पत्त्या सर्वविदे तस्मै परस्मै नमो वाङ्मनोदेहानां प्रह्वीभावो भूयादित्युक्ते वैशेषिकादिदर्शनानुरोधेन ताटस्थ्ये परस्य शङ्किते चेतनमेव चैतन्यं कूटस्थज्ञप्तिरूपमिति ताटस्थ्यनिरासायोक्तम्। चेतनस्यापि मध्यमपरिमाणत्वमणुपरिमाणत्वं चेति दिगम्बराः स्वयूथ्याश्च निश्चिन्वन्ति

१. उपदेशसाहस्त्री उपदेशसहस्त्री इति पाठद्वयं तत्तत्पुस्तकेषूपलभ्यते। पाठद्वयस्यापि साधुताविषये भूमिकाऽवलोकनीया।

२. 'अहमात्मा गुडाकेश! सर्वभूताशयस्थितः' इति गीतावचनात्। (गीता-१०.२०)। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'ति श्रुतिवचनात् (श्वेता. ३.६.११)।

३. ब्रह्मतत्त्वं हि वेदान्तशास्त्रस्य मुख्यप्रयोजनं तच्च चिद्रूपम्।

४. समष्टिरूपेण मायोपहितं ब्रह्म व्यष्टिरूपेणान्तःकरणावच्छिन्नं चैतन्यं जीवो वा सम्यग् वेत्ति।

समापय्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे।।२।।
कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये।
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः।।३।।

तान् प्रत्युक्तम्—**सर्वगमिति।** चेतनस्य सर्वगतस्यापि भिन्नत्वं सांख्याः मन्यन्ते, तत्राह—**सर्वमिति।** सर्वात्मकस्यापि परस्यांशांशिभावादिना जीवात्मनोऽभेदोऽस्तीत्येकदेशीयः। तत्रोक्तम्—**सर्वभूतगुहाशयमिति।** सर्वेषां भूतानां गुहासु बुद्धिषु साक्षित्वेन तिष्ठति, ब्रह्म, न तत्रांशांशिभावादिकं न्यूनं वस्तुतोऽस्तीत्यर्थः। तर्हि सर्वभूतगुहाशयत्वेन सर्वमिति विशेषणेन च मनोवेद्यत्वं सप्रपञ्चत्वं च परस्याशङ्क्यते। नेत्याह—**यदिति।** सर्वमविद्यातत्कार्यात्मकं विषयमतीत्य व्यवस्थितं यद् ब्रह्म तस्य कुतो मनोवेद्यत्वमविषयत्वात्। कुतश्च सप्रपञ्चत्वं कार्यकारणास्पृष्टत्वादित्यर्थः।

चैतन्यमित्यादिविशेषणत्रयं तत्त्वंपदार्थसाधारणम्। सर्वभूतगुहाशयमिति सर्वबुद्ध्यादिसाक्षी त्वंपदलक्ष्योऽर्थो[१] वेद्यते। सर्वविदित्यनेन तत्पदार्थः वाच्यं ब्रह्मोच्यते नैव लक्ष्यम्। लक्ष्यं वस्तु सर्वविषयातीतमित्यत्र विवक्षितम्। सर्वभूतगुहाशयं सर्वविषयातीतमिति सामानाधिकरण्याल्लक्षितयोस्तत्त्वमर्थयोरैक्यं सूच्यते। तस्मिन् विषये निर्दिष्टे तेन (सह) प्रकरणस्य विषयविषयिभावः सम्बन्धो ध्वनितः। चैतन्यं सर्वविषयातीतमित्युक्त्या चिदात्मनः सर्वानर्थशून्यतोक्तिद्वारा निःशेषानर्थनिवृत्त्युपलक्षितं निरतिशयानन्दाविर्भावात्मकं प्रयोजनमुक्तम्। तस्मिन्नुक्ते तत्कामोऽधिकारी मुमुक्षुः सिद्ध्यतीत्यवधेयम्।।१।।

एवं देवताप्रणामरूपमङ्गलाचरणव्याजेन वेदान्तप्रतिपाद्यं देवतातत्त्वं सङ्क्षेपादुपक्षिप्तम्। इदानीं वेदान्तानां तत्परत्वं वक्तुं कर्म्मकाण्डसिद्धमर्थमनूद्य तेन ज्ञानकाण्डस्य सङ्गतिं सङ्गिरमाणस्तेषामगतार्थत्वमाह—**समापय्येत्यादि।।२।।**

कर्मकाण्डसिद्धनानाविधकर्मानुष्ठानलब्धबुद्धिशुद्धेरनन्तरं ब्रह्म जिज्ञासवे ब्रह्मविद्यां वक्तुं वेदान्तप्रवृत्तिरित्युक्तं[२] कर्मभिरेव मुमुक्षोरपेक्षितमोक्षसिद्धौ ब्रह्मविद्यायास्तादर्थ्यायोगात् तच्छेषत्वेन वेदान्तप्रवृत्तेरनुपपत्तेरित्याङ्क्याह—**कर्माणीत्यादि।** अज्ञस्य कर्माण्यनुतिष्ठतः कर्मभ्यः शरीरादिपरम्परया भूयो भूयः संसारानर्थप्राप्तेरवश्यंभावित्वान्न तेषां मोक्षहेतुत्वोपपत्तिरित्यर्थः।।३।।

---

१. सर्वोपाधिहीनं ब्रह्म न त्वंपदवाच्यत्वमर्हति अत एवाह लक्ष्योऽर्थः।
२. शुद्धदर्पणे प्रतिबिम्बप्रकाश इव कर्मणा शुद्धान्तःकरण एव ब्रह्मात्मको ज्ञानप्रकाशः।

धर्माधर्मौ ततोऽज्ञस्य देहयोगस्तथा पुनः।
एवं नित्यप्रवृत्तोऽयं संसारश्चक्रवद्भृशम्॥४॥
अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते।
ब्रह्मविद्याऽत आरब्धा ततो निःश्रेयसं भवेत्॥५॥
विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः।
नाज्ञानस्याप्रहाणे हि रागद्वेषक्षयो भवेत्॥६॥
रागद्वेषक्षयाभावे कर्म दोषोद्भवं ध्रुवम्।
तस्मान्निःश्रेयसार्थाय विद्यैवात्र विधीयते॥७॥

धर्माधर्मौ। संसारानर्थप्राप्तेः अत्यर्थं भृशमित्युच्यते[1]॥४॥

कर्मणां संसारहेतुतायां मोक्षहेतुत्वमपि भवति भोगनिवृत्त्या नैमित्तिक-संसारनिवृत्तौ कृतं ब्रह्मविद्ययेत्याशङ्क्याह—**अज्ञानमिति**। तस्य संसारवृक्षस्याज्ञानं मूलकारणम्। कर्मणामपि तत्कृतत्वादतः संसारहानार्थमज्ञानहानं प्रयत्नादपेक्षते। न चाज्ञानहानं ब्रह्मविद्यामन्तरेण घटते। ततश्च ब्रह्मविद्यातोऽज्ञाननिवृत्त्या संसार-निवृत्त्युपलक्षितं निरतिशयानन्दाविर्भावलक्षणं[2] कैवल्यं सिद्ध्यतीत्यर्थः॥५॥

कर्मणां विचित्रशक्तितया कर्मैवाज्ञाननिवृत्तिमपि करिष्यति नार्थो विद्ययेत्या-शङ्क्याह—**विद्यैवेति**। प्रकाशरूपत्वाद् विद्यैवाप्रकाशरूपामविद्यां निवर्तयति। कर्मत्व-प्रकाशात्मकत्वाद्[3] अविरोधान्नाज्ञानं निवर्तयितुमर्हतीत्यर्थः। मा भूदज्ञानप्रहाणम्, तथापि नित्यनैमित्तिककर्मानुष्ठानसामर्थ्येन पुरुषार्थो भविष्यतीत्याशङ्क्याह—**नाज्ञानस्येति**॥६॥

रागद्वेषयोरक्षयेऽपि का क्षतिरित्याशङ्क्य तदक्षये तस्मादेव रागादिदोषादुक्तरीत्या कर्मोत्पत्तेरावश्यकत्वात् तदधीनः संसारोऽपि दुर्वारः स्यादित्याह—**रागद्वेषेति**। कर्मभिर्मोक्षासिद्धौ फलितमाह—**तस्मादिति**। अत्रेति वेदान्तोक्तिः। विधानं प्रकाशनम्॥७॥

---

१. संसारो सर्वदुःखमूलं तच्छेदनोपायो वेदान्तशास्त्रम्।

२. निरतिशयानन्दश्च ब्रह्मसाक्षात्कारः।

३. वासनावशीभूतः कश्चित् कर्मणि प्रवर्तते, वासना चाविद्यात्मिका अतः कर्मणोऽप्रकाशकत्वम्।

ननु कर्म तथा नित्यं कर्तव्यं जीवने सति।
विद्याया सह[1]कारित्वं मोक्षं प्रति हि तद् व्रजेत्॥८॥

यथा विद्या तथा कर्म चोदितत्वाविशेषतः।
प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः॥९॥

ननु ध्रुव[2]फला विद्या नान्यत् किंचिदपेक्षते।
नाग्निष्टोमो यथैवान्यद् ध्रुवकार्योऽप्यपेक्षते॥१०॥

तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते।
इत्येवं केचिदिच्छन्ति न कर्म प्रतिकूलतः॥११॥

विद्यायाः प्रतिकूलं हि कर्म स्यात्साभिमानतः।
निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्तिता॥१२॥

जीवने सति यावज्जीवश्रुतिविहितत्वान्नित्यं कर्म विद्यावत्कर्तव्यमेव। अतो विद्यैव मोक्षहेतुत्वेन वेदान्तेषु प्रकाश्यत इत्ययुक्तमिति समुच्चयवादी शङ्कते—**नन्विति**। उपयोगाभावान्नित्यं कर्म न कर्तव्यमित्याशङ्क्याह—**विद्याया इति**॥८॥

यस्मान्मोक्षलक्षणं फलं प्रति विद्यायाः सहकारित्वं कर्म प्राप्नोति ततः कर्तव्यं कर्मेत्येतदुपपादयति—**यथेति**।

'अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।
प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति' इति।

स्मृतेश्च कर्तव्यं नित्यं कर्म मोक्षार्थिभिरित्याह—**प्रत्यवायेति**॥९॥

ब्रह्मविद्या ध्रुवफलत्वाद् घटादिज्ञानवत्सहकारिनिरपेक्षेति सिद्धान्ती शङ्कते—**नन्वित्यादि**। यथोद्गीथज्ञानादिसहकारिसाक्षेपत्वमवश्यंभाविफलस्यापि ज्योतिष्टोमस्य दृष्टम्, तथाऽऽत्मज्ञानस्यापीति। व्यभिचारेण परिहरति—**नेत्यादिना**। पूर्वपक्षमुपसंहरति—**इत्येवमिति**। सिद्धान्तमाह—**न कर्मेति**॥११॥

विद्याया च युक्ता कर्मापेक्षा कर्मणो विद्याप्रतिकूलत्वादित्येतदेव साधयति—**विद्याया इति**। कर्मणो ब्राह्मण्याद्यभिमानपूर्वकत्वाद्विद्यायाश्च कूटस्थात्माकारत्वादस्ति मिथो विरुद्धतेत्यर्थः[3]। इहेति वेदान्तग्रहणम्॥१२॥

---

१. साक्षाद्विद्यायाः सहकारिकर्म परम्परया मोक्षं प्रति हेतुः। कर्मणैव हि संसिद्धिमास्थिता जनकादयः। (गीता ३.२०)

२. ध्रुवमविचालि नित्यं वा फलं यस्याः सा। कर्माभिजन्यं स्वर्गादिरूपफलमनित्यम् 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते, (छा. ८.१.६) इति श्रुतेः। विद्यासाध्यं मोक्षरूपं फलं नित्यम्, 'न स पुनरावर्तते' (छा. ८.१५.१) इति श्रुतिवचनात्।

३. नित्यानित्यफलतोऽपि मिथो विरोधः।

अहं कर्ता ममेदं स्यादिति कर्म प्रवर्तते।
वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः॥१३॥
कारकाण्युपमृद्नाति विद्या बुद्धिमिवोषरे।
इति तत्सत्यमादाय कर्म कर्तुं व्यवस्यति॥१४॥
विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया।
सहैव विदुषा तस्मात्कर्म हेयं मुमुक्षुणा॥१५॥
देहाद्यैरविशेषेण देहिनो ग्रहणं निजम्।
प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत्॥१६॥
नेति नेतीति देहादीनपोह्यात्माऽवशेषितः।
अविशेषात्मबोधार्थं तेनाऽविद्या निवर्तिता॥१७॥

विरोधमेव साधयति—**अहमिति**। कर्तृत्वभोक्तृत्वपूर्वकं कर्म तन्निवृत्या विद्योत्पद्यते। तेन तयोरुत्पत्तौ मिथो विरुद्धतेत्यर्थः। प्रमाणवस्त्वधीना विद्या। कर्म तु कारकाधीनमित्युत्पत्तावेव विधान्तरेण विरोधमाह—**वस्त्वधीनेति**। विध्यधीनं कर्मेत्यर्थः॥१३॥

ज्ञानकर्मणोर्मिथो विरुद्धत्वेन सहकारित्वासम्भवे हेत्वन्तरमाह—**कारकाणीति**[1]॥१४॥

विरुद्धत्वकृतं समुच्चयासम्भवं फलितमाह—**विरुद्धत्वादिति**। एवं विदुषा मिथो विरुद्धत्वं जानतेत्यर्थः। समुच्चयासम्भवे फलितमाह—**तस्मादिति**॥१५॥

स्वर्गकामादिविध्यन्यथानुपपत्त्या 'ज्ञात्वा कर्म समाचरेत्' इत्यादिवचनाद्वा देहादिव्यतिरिक्तात्मज्ञानवतः कर्माधिकाराङ्गीकारात् ज्ञानकर्मणोर्विरोधे तदयोगादधिकार्यभावे कर्मकाण्डस्याप्रामाण्यं प्राप्तमित्याशङ्क्याह—**देहाद्यैरिति**। आत्मनो देहिनो देहातिरिक्तस्य देहादिभिरविद्याकृतैरविशेषेण अविविक्तत्वेन ब्राह्मणोऽहं गृहस्थोऽहमित्यादिग्रहणं मिथ्याभिमानात्मकं स्वाभाविकं प्राणिनां प्रत्यात्ममविद्याकृतमनुभूयते। तद्यावदनुवर्तते तावत्कर्मकाण्डे प्रवर्तते। तथा च देहादिव्यतिरिक्तात्मज्ञानवत्त्वेऽपि ब्रह्मज्ञानाभावान्मूलाज्ञानस्य सत्त्वात्तज्जन्याभिमानपूर्वकं कर्मप्रवृत्तेस्तद्विज्ञानोदयात्पूर्वं[2] कर्मकाण्डप्रवृत्तिरविरुद्धेत्यर्थः॥१६॥

तर्हि ब्रह्मज्ञानादूर्ध्वं कुतस्तदप्रामाण्यमित्याशङ्क्याह—**नेति नेतीति**। आत्मा यैर्देहादिभिर्विशिष्टः सन् कर्मस्वधिक्रियते तान् देहादीन् नेति नेतीति वीप्सया

---

१. विद्याप्राप्तौ सत्यां वन्ध्याभूमौ वृष्टिरिव कर्माणि निष्फलानि भवन्ति।
२. यावदविद्यावशादात्मन्यनात्मविषयदेहादेरध्यासस्तावत् कर्म प्रवर्तते।

निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः।
असत्येवाविशेषेऽपि प्रत्यगात्मनि केवले॥१८॥

न चेद्भूयः प्रसूयेत कर्ता भोक्तेति धीः कथम्।
सदस्मीति च विज्ञाने तस्माद्विद्याऽसहायिका॥१९॥

अत्यरेचयदित्युक्तो न्यासः श्रुत्याऽत एव हि।
कर्मभ्यो मानसान्तेभ्य एतावदिति वाजिनाम्॥२०॥

निराकृत्य निर्विशेषे ब्रह्मात्मन्यहमस्मीति[१] ज्ञानार्थं वेदान्तेषु सोऽवशेषितः। तेन च निर्विशेषात्मज्ञानेनाविद्या सपरिकरा निवारिता। तस्मात्तज्ज्ञानादूर्ध्वं मूलाज्ञानाभावात्तदुत्थाभिमानासिद्ध्या कर्मकाण्डाप्रवृत्तेस्तदप्रामाण्यमिष्टमेवेत्यर्थः॥१७॥

ननु प्रमाणोत्थसम्यग्ज्ञानान्निवृत्तमेवाज्ञानं पुनरुत्पद्य कार्यं करिष्यति। मैवम्। अविद्या हि प्रमाणतो निवृत्ता कथं भूयोऽभिजायेत[२]। आत्मनोऽन्यस्माद्वा तदुत्पत्तिः। नाद्यः। अद्वितीये निर्विशेषे तस्मिन्नविद्योत्पत्तेरयोगात्। न द्वितीयः। अन्यस्याविद्यात्मकत्वेन[३] तदुत्पादकत्वानुपपत्तेरित्याह—**निवृत्तेति**॥१८॥

अविद्या आत्मनोऽन्यस्माद्वा नोत्पद्यते चेत्तर्हि कर्ता भोक्तेति धीपूर्वकं कर्माधिकारित्वं विदुषो न युक्तमित्याह—**न चेदिति प्रसूयेत**। किं चाहं ब्रह्मेति ज्ञाने सति कर्मप्रवृत्तेरनवकाशत्वान्न कर्माधिकारो विदुषोऽस्तीत्याह—**सदिति**। यस्माद् विद्यायामुत्पन्नायां कर्मणो निरवकाशत्वं तस्मात्केवलैव विद्या कैवल्यहेतुरिति फलितार्थमाह—**तस्मादिति**॥१९॥

विद्यायाः सहकारिनिरपेक्षत्वेन मोक्षहेतुत्वे श्रौतं लिङ्गं दर्शयति—**अत्यरेचयदिति**। ज्ञानस्य कर्मनिरपेक्षत्वमतः शब्दस्यार्थः। सत्यादीनि मानसान्तानि[४] कर्माण्युक्त्वा 'तानि वा एतान्यवराणि तपांसि' इति निन्दित्वा संन्यासोपायं ज्ञानं 'न्यास एवात्यरेचयत्'[५] इति यतः श्रुतिः स्तौति तस्मात्तदेव मोक्षसाधनम्। वाजिनामपि शाखायां 'एतावदरे खल्वमृतत्व'[६] इति ज्ञानमेव स्वतन्त्रममृतत्वसाधनं श्रुतं तस्मान्मोक्षापेक्षायां कर्मसंन्यासपूर्वकं ज्ञाननिष्ठेन भवितव्यमित्यर्थः॥२०॥

---

१. तत्त्वमसि महावाक्यस्याखण्डार्थबोधेन भेदबुद्धिनाशादहं ब्रह्मास्मि इति बोध उदेति।

२. तमःप्रकाशवद्विरुद्धस्वभावादुदिते ज्ञानेऽज्ञानस्यासम्भवात्।

३. आत्मातिरिक्तस्य सर्वस्याप्यविद्याकार्यत्वात्।

४. सत्यं दमः शमः दानं प्रजननं यज्ञा दानं अग्न्याधानम् अग्निहोत्रम् इत्यादीनि।

५. तै. २.२।

६. बृहदा. २.४.१।

अमृतत्वं श्रुतं यस्मात्[1]त्याज्यं कर्म मुमुक्षुभिः।
अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते॥२१॥
नैककारकसाध्यात्वात्फलान्यत्वाच्च कर्मणः।
विद्या तद्विपरीताऽतो दृष्टान्तो विषमो भवेत्॥२२॥
कृष्यादिवत्फलार्थत्वादन्यकर्मोपबृंहणम्।
अग्निष्टोमस्त्वपेक्षेत[2] विद्यान्यत् किमपेक्षते॥२३॥
प्रत्यवायस्तु तस्यैव यस्याहङ्कार इष्यते।
अहङ्कारफलार्थित्वे विद्येते नात्म[3]वेदिनः॥२४॥
तस्मादज्ञानहा[4]नाय संसारविनिवृत्तये।
ब्रह्म[5]विद्याविधानाय प्रारब्धोपनिषत्त्वियम्॥२५॥

अग्निष्टोमस्य ध्रुवफलस्यापि सापेक्षत्ववदैक्यज्ञानस्यापि सापेक्षत्वमित्युक्तमनूद्योत्तरमाह—**अग्निष्टोमेति**॥२१॥

कर्मणोऽनेककारकसाध्यत्वाद्विद्याद्वारा वीर्यवत्तरफलभेदसम्भवाच्च युक्ता सहकार्यपेक्षा। विद्यायान्तु प्रमाणवस्तुतन्त्रत्वान्नानेककारकसाध्यत्वम्, नापि विद्याफले मोक्षेऽतिशयोऽस्ति। तेन दृष्टान्तः समो न भवतीत्युत्तरमेव स्फोरयति—**नैकेति**॥२२॥

वैषम्यमेव प्रकटयति—**कृष्यादिवदिति**। यथा कृषिर्वाणिज्यमित्यादौ सामग्रीबाहुल्यात्फलबाहुल्याच्च सहकार्यपेक्षा दृष्टा। तथा ज्योतिष्टोमोऽपि कारकभूयस्त्वाद्वीर्यवत्तरफलातिशयसापेक्षात्वाच्चान्येनोद्गीथाद्युपासनाकर्मणा स्वस्योपबृंहणं फलबाहुल्यार्थमपेक्षेत। विद्या तु निरतिशयफलत्वान्नान्यत्किञ्चिदपेक्षितुं क्षमते। तेन वैषम्यमित्यर्थः॥२३॥

प्रत्यवायस्मृतेश्चेत्युक्तम्। तत्रोत्तरमाह—**प्रत्यवायेति**। आत्मविदोऽपि नित्याकरणे प्रत्यवायः स्यादहङ्कारादेस्तुल्यत्वादित्यत आह—**अहङ्कारेति**॥२४॥

ब्रह्मविद्यायाः स्वतन्त्रायाः सकार्याज्ञाननिवर्त्तकत्वसिद्धौ फलितमुपसंहरति—**तस्मादिति**॥२५॥

---

१. तस्मादिति पुस्तकान्तरे।

२. यथा कृष्यादिकार्याणि कारणमन्तरेण न सम्भवन्ति तद्वदग्निष्टोमकार्यमपि सहकारिकारणमपेक्षते। अतो युक्ता सहकार्यपेक्षेति।

३. आत्मसाक्षात्कारेण विद्यानाशात्तत्कार्याण्यपि नश्यन्ति।

४. अज्ञानहानस्य विशेषणं संसारस्य विनिवृत्तिर्यस्मादिति विग्रहः।

५. ब्रह्मैव विद्या ब्रह्मविद्या न तु षष्ठीसमासो ज्ञानस्य ब्रह्मणोऽभिन्नत्वात्।

सदेरुपनिपूर्वस्य क्विपि चोपनिषद्भवेत्।
मन्दीकरणभावाच्च गर्भादेः शातनात्तथा॥२६॥

उपनिषन्नामनिर्वचनेनापि स्वतन्त्रैव ब्रह्मात्मविद्या मोक्षहेतुरित्याह—**सदेरिति।** सदेर्धातोर्विशरणगत्यवसादनार्थस्य सामीप्यार्थोपपूर्वस्य निश्चयार्थनपूर्वस्य च कर्त्रर्थे क्विप्प्रत्यये परतो भवत्युपनिषत्पदम्। 'षद्लृविशरणगत्यवसादनेषु' इति धात्वर्थत्रयस्य ब्रह्मविद्यायां सम्भवादसावेव मुख्यवृत्त्योपनिषदुच्यते। ग्रन्थोऽपि तादर्थ्यात्तथा व्यपदिश्यते। ये मन्दब्रह्मविदस्तेषां गर्भजरादिकमुपनिषच्छब्दिता ब्रह्मविद्या शिथिलीकरोति। जिज्ञासूंश्चोप सामीप्येन निश्चयेन ब्रह्म गमयति। साक्षात्कृतब्रह्मसतत्त्वानां तु सबीजं गर्भादि नाशयति। तस्माद् ब्रह्मविद्याया उपनिषन्नामप्रसिद्ध्या वेदान्तानां मोक्षहेतुः स्वतन्त्रब्रह्मात्मविद्यार्थत्वं सिद्ध्यतीत्यर्थः॥२६॥

॥ इति विवृतं प्रथमं चैतन्य[१]प्रकरणम्॥१॥

---

१. उपोद्घातप्रकरणे चैतन्यस्वरूपप्रतिपादनाच्चैतन्यप्रकरणमस्यापरं नाम।

अथ द्वितीयं प्रतिषेधप्रकरणम्

प्रतिषेद्धुमशक्यत्वान्नेति नेतीति शेषितम्।
इदं नाहमिदं नाहमित्यद्धा प्रतिपद्यते॥१॥
अहंधीरिदमात्मोत्था वाचारम्भणगोचरा।
निषिद्धात्मोद्भवत्वात्सा न पुनर्मानतां व्रजेत्॥२॥
पूर्वबुद्धिमबाधित्वा नोत्तरा जायते मतिः।
दृशिरेकः स्वयं सिद्धः फलत्वात्स न बाध्यते॥३॥

प्रतिषेधप्रकरणम्

आत्मनि संसारित्वग्राहकप्रत्यक्षादिप्रमाणविरोधाद् ब्रह्मात्मैकत्वविद्यैव नोपपद्यते। प्रमाणसिद्धस्यापि संसारित्वस्य प्रतिषेधे प्रत्यगात्मनोऽपि प्रतिषेधप्रसङ्गादित्याशङ्क्य वेदान्तानामेकत्वज्ञानोत्पादनेन सकार्याज्ञाननिवृत्त्यर्थानामर्थं सङ्क्षेपतो वक्तुं प्रकरणानन्तरं प्रस्तौति—**प्रतिषेद्धुमिति**। नेति नेतीति वीप्सया समारोपितसमस्तप्रतिषेधेऽपि प्रत्यगात्मनो न प्रतिषेद्धुं योग्यत्वमस्ति तस्यात्मत्वात्, निषेधस्यापि साक्षित्वेनावशेषस्यावश्यंभावित्वादतोऽवशेषितं तत्त्वम्। इदं स्थूलशरीरम्, इदञ्च सूक्ष्मशरीरं नाहमिति प्रतिषिध्य 'अहं ब्रह्मास्मि' इति साक्षान्निश्चिनोति। तस्मान्न प्रत्यगात्मनि प्रतिषेधावधित्वेन तत्साक्षित्वेन च प्रतिषेधप्रसक्तिरित्यर्थः॥१॥

देहेन्द्रियाद्यभिमानस्यानवरतमनुवृत्तेः 'अहं ब्रह्म' इति ज्ञानमप्रतिष्ठितमित्याशङ्क्य देहाद्यात्माभिमानस्य बाधितानुवृत्त्या प्रतिपक्षत्वाभावान्नैवमित्याह—**अहंधीरिति**। देहादावनात्मन्यात्मबुद्धिः अहं कर्तुरिदमंशाद्बाधितरूपादुत्पद्यते। वाचारम्भणं[२] च मिथ्याध्यस्तं देहाद्यात्मत्वं गोचरयति। नेति नेतीति शास्त्रेण निषिद्धश्चात्मा स्वभावः समुद्भवश्च कारणं यस्याः सा तथोच्यते। तस्मान्निषिद्धस्वरूपत्वान्निषिद्धकारणत्वाच्च सति ब्रह्मात्मज्ञाने न सा पुनर्मानतां गच्छतीत्यर्थः॥२॥

'कर्ता भोक्ता अह'मिति विज्ञाने जाग्रति कथमकर्तृभोक्तृब्रह्माहमिति ज्ञानं सिद्ध्येदित्याशङ्क्याह—**पूर्वबुद्धिमिति**। न हि शुक्त्यज्ञानजन्यां रजतत्वबुद्धि-

---

१. नेति नेति शास्त्रेण बाधात्। २. छान्दो. (६.१.४) श्रुतिसिद्धम्।

इदं वनमतिक्रम्य शोकमोहादिदूषितम्।
वनाद्गान्धारको यद्वत्स्वात्मानं प्रतिपद्यते।।४।।

मबाधित्वा शक्तिधीरुत्तरोत्पद्यते। तथा ब्रह्मात्मबुद्ध्या कर्त्रादिबुद्धिर्बाध्येत्यर्थः। किमिति कर्त्रादिबुद्ध्या ब्रह्मात्मबुद्धिरेव न बाध्येत्याशङ्क्याह—**दृशिरिति।** ब्रह्मात्मा ज्ञप्तिस्वरूपो[1] दृशिरुच्यते। स चैको द्वितीयाभावेनोपलक्ष्यते। परनिरपेक्षसत्तास्फूर्तिकश्च निश्चीयते। स तावन्न बाध्यते, बाधकाभावात्। तज्ज्ञानं चाबाध्यं परमार्थविषयत्वात्। तत्फलं च न बाध्यम्। ब्रह्मात्मतत्त्वस्यैव ज्ञानाभिव्यक्तस्य बाधवियुक्तस्य फलत्वोपचारात्। अतो वस्तुनस्तज्ज्ञानस्य तत्फलस्य च बाधाभावात् कर्त्रादिबुद्धिरेव बाध्येत्यर्थः।।३।।

कथं पदार्थविवेकद्वारा ब्रह्मात्मज्ञानमित्याशङ्क्य श्रौतेन दृष्टान्तेनोत्तरमाह—**इदं वनमिति।** देहेन्द्रियादिलक्षणमिदमनात्मभूतं वनमिव वनमनेकानर्थकलुषितं शोकमोहादिभिर्व्याघ्रतस्करस्थानीयैर्दूषितमन्वयव्यतिरेकाभ्यामतिक्रम्य पदार्थविवेकं कृत्वा स्वमात्मानमहं ब्रह्मास्मीत्यौपनिषदं पुरुषमधिगच्छति। यथा गन्धारदेशोद्भवश्चोरैरानीतो वने विसृष्टो बहुविधमार्त्तस्वरं कुर्वन् कारुणिकेन केनचिन्मोचितस्तेनोद्दिष्टमार्गेण स्वं देशं प्राप्य स्वस्थो भवति तथाऽयमात्मा स्वमात्मानमुक्तप्रकारेण प्रतिपद्य[3] कृतकृत्यो निर्वृणोतीत्यर्थः।।४।।

।। इति विवृतं द्वितीयं प्रतिषेधप्रकरणम्।।२।।

●

---

१. सत्यं ज्ञानमनन्तमिति (तै. २.१.१) श्रुतिवचनात्।

२. एकमेवाद्वितीयमिति (छा. ६.२.१) श्रुतिसिद्धम्।

३. अहं ब्रह्मास्मीति ज्ञानेन।

अथ तृतीयमीश्वरात्मप्रकरणम्

ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत्।
आत्मा चेदीश्वरोऽस्मीति विद्या साऽन्यनिवर्तिका॥१॥

आत्मनोऽन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः।
अज्ञेयत्वेऽस्य किं तैः स्यादात्मत्वे त्वन्यधीह्नुतिः[१]॥२॥

मिथ्याध्यासनिषेधार्थं ततोऽस्थूलादि गृह्यताम्।
परत्र चेन्निषेधार्थं शून्यतावर्णनं हि तत्॥३॥

यस्मिन्नीश्वरे सति अज्ञानादि लक्षणमुमुक्षोः 'अहमस्मि ब्रह्म' इति मोक्षसाधनज्ञानमुक्तं स किमीश्वरो मेर्वादिवदनात्मा स्यादात्मा वेति जिज्ञासायामाद्यं दूषयति—**ईश्वर इति**। नहि मेर्वादावहमस्मीति मतिः क्रियते तथेश्वरस्यानात्मत्वे तस्मिन्नसौ मुमुक्षुरीश्वरोऽस्मीति न जानीयात्। ततस्तत्त्वमस्यादिवचनविरोधः[२] स्यादित्यर्थः। द्वितीयं प्रत्याह—**आत्मेति**। ईश्वरो मुमुक्षोः स्वरूपभूतश्चेत्तर्हि तस्मिन्नस्मीति तस्य विद्योपपद्यते। सा चान्यस्याः संसारहेतुभूताया अविद्याया निवर्त्तकत्वात्पुरुषार्थपरिसमाप्तिहेतुस्ततः शास्त्रमविरुद्धं सिद्ध्यतीत्यर्थः॥१॥

अस्थूलादिवाक्यपर्यालोचनायामपीश्वरस्यात्मत्वमेवाश्रयितव्यमित्याह—**आत्मन इति**। प्रतीचो व्यतिरिक्तस्य चेदीश्वरस्यास्थूलत्वमनणुत्वमित्यादयो धर्माः श्रुत्या विवक्षितास्तदाऽस्येश्वरस्यानात्मत्वेनाज्ञेयत्वे सति मुमुक्षोरस्थूलादिभिः श्रुतैर्धर्मैर्न किञ्चित्फलं स्यात्। यदि त्वस्थूलादिधर्मकस्येश्वरस्य प्रत्यक्त्वेन ज्ञेयत्वं तदा कृशस्थूललक्षणाया धियो मोहमूलाया मिथ्याबुद्धेर्निवृत्तिसिद्धेरात्मत्वमेव तस्याऽऽस्थातुमुचितमित्यर्थः॥२॥[३]

यस्मादीश्वरस्यात्मत्वे फलमुपलभ्यते तस्मान्मिथ्याध्यासस्याज्ञानमूलस्य कृशस्थूलाद्यभिमानस्य निवृत्त्यर्थमस्थूलादि प्रत्यगात्मविशेषणत्वेनेश्वरस्यात्मत्वप्रतिपत्त्या स्वीकर्तव्यमित्याह—**मिथ्येति**। यदि पुनरिदं नाभ्युपगम्यते तदा

---

१. आत्मसाक्षात्कारे सति विपरीतबुद्धेर्नाशः। २. तत्त्वंपदयोरभेदात्मकबोधविरोधः।

३. अस्थूलादिरूपेशस्यात्मत्वेन ज्ञाते स्वात्मनिगृहीतायाः कृशस्थूलादिधियो बाधः फलं स्यादित्यर्थः।

बुभुत्सोर्यदि चान्यत्र प्रत्यगात्मन इष्यते।
अप्राणो ह्यमनाः शुभ्र इति चानर्थकं वचः॥४॥

शून्यत्वमीश्वरस्यापि स्यादित्याह—**परत्रेति।** अनात्मरूपे कुत्रचिदीश्वरे स्थूलादिनिवृत्त्यर्थमस्थूलादिकमिष्यते चेत् तदेश्वरस्य शून्यतावर्णनमेव स्यात्। ईश्वरस्य पराग्रूपत्वयोगात्तथात्वे घटादिवदनीश्वरत्वप्रसङ्गात्। तस्मादनात्मत्वायोगादीश्वरमभ्युपगच्छता आत्मैव सोऽभ्युपगम्यत[1] इत्यर्थः॥३॥

प्रत्यगात्मनोऽन्यत्र स्थूलादिप्रतिषेधे चाप्राप्तप्रतिषेधः स्यादिति दोषान्तरमाह—**बुभुत्सोरिति।** प्रत्यगात्मनो बुभुत्सोः संसारित्वेनाभिमतादन्यत्र स्थूलादिप्रतिषेधे तत्राप्त्यभावादप्राप्तप्रतिषेधो निष्फलः स्यादित्यर्थः। इतश्चात्मैवेश्वरोऽभ्युपगन्तव्यः अनात्मनि प्राणसम्बन्धस्य मनः सम्बन्धस्य चाप्राप्तत्वादप्राणादिवाक्यस्यानर्थक्यप्रसङ्गादित्याह—**अप्राणो हीति**॥४॥

॥ इति विवृतं तृतीयमीश्वरप्रकरणम्॥३॥

●

---

१. आत्मन्यारोपितप्रपञ्चस्य मिथ्यात्वे निश्चितेऽधिष्ठानमात्रमवशिष्यते।

अथ चतुर्थं तत्त्वज्ञानस्वभावप्रकरणम्

अहंप्रत्ययबीजं यदहंप्रत्ययवत्स्थितम्।
नाहंप्रत्ययवह्न्युष्ट कथं कर्म प्ररोहति॥१॥
दृष्टवच्चेत्प्ररोहः स्यान्नान्यकर्मा स इष्यते।
तन्निरोधे कथं तत्स्यात्पृच्छामो वस्तदुच्यताम्॥२॥
देहाद्यारम्भासामर्थ्याज्ज्ञानं सद्विषयं त्वयि।
अभिभूय फलं कुर्यात् कर्मान्ते ज्ञानमुद्भवेत्॥३॥

तत्त्वज्ञानस्वभावप्रकरणम्

यद्ब्रह्मात्मज्ञानमहं ब्रह्मास्मीति मोक्षसाधनमुक्तं तन्न फलवद्भवितुमलम्। सञ्चितकर्मविरोधादित्याशङ्क्याह—**अहमिति**। अहमिति प्रतीयते यस्मिन्नहङ्कारे स साभासोऽहंप्रत्ययो बीजमुपादानं यस्य कर्मणस्तत्तथा व्यपदिश्यते। तस्मिन्नेवाहं-प्रत्ययवत्यहङ्कारे मूलाज्ञानकार्ये तिष्ठतीति तदेव कर्म तथोच्यते, उपादानादन्यत्र कार्यस्थित्यनुपपत्तेः। नाहं कर्ता भोक्ता वा किन्तु ब्रह्मैवास्मीति प्रत्ययो वाक्यीयो, नाहं प्रत्ययः स च योग्ये विषये दग्धुं प्रवृतो वह्निवद् व्यपदिश्यते। तेनोष्टं दग्धं यदेवंविधं कर्म तन्न कथञ्चिदपि ब्रह्मात्मज्ञानानन्तरं कार्याय पर्याप्नोति। तस्मान्न सञ्चितकर्मप्रतिबन्धाद्यथोक्तस्य ज्ञानस्य विफलत्वाशङ्केत्यर्थः॥१॥

यथा ज्ञानवतोऽपि भिक्षाटनादि सफलं दृष्टं तथाऽग्निहोत्राद्यपि फलारम्भकं स्यादिति शङ्कते—**दृष्टवदिति**। न तस्याग्निहोत्रादेः फलारम्भकत्वं ज्ञानविरुद्धत्वात्। दृष्टस्य तु भिक्षाटनादेरारब्धकर्मनिबन्धनत्वेनाविरुद्धत्वादिति परिहरति—**नान्य-कर्मेति**। ज्ञानादज्ञाननिवृत्त्या तन्मूलाहङ्कारनिवृत्तिद्वारेण तदाश्रयकर्मनिवृत्तौ कथमारब्ध-मपि कर्म सिद्ध्येदिति वो युष्मान् पृच्छामस्तत्रोत्तरं वाच्यमिति पुनः शङ्कते—**तन्निरोध इति**॥२॥

परिहरति—**देहादीति**। प्रारब्धं कर्म देहाद्यारम्भद्वारा प्रवृत्तवेगवशाद् ब्रह्मात्मज्ञानं परमार्थवस्तुविषयं प्रमाणप्रसूतं प्रबलमपि स्वफलाद्विदेहकैवल्यादभिभूय प्रच्याव्य

---

१. 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' (गी. ४.३६) इति वचनात् दग्धबीजवत् कर्म न पुनः फलोन्मुखं भवति।

आरब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः।
अविरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु॥४॥

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम्।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते।[1]
ततः सर्वमिदं सिद्धं प्रयोगोऽस्माभिरीरितः॥५॥

स्वकीयं फलं देहाभासजगदाभासलक्षणं कुर्यादेव। तस्य चारब्धस्य कर्मणोऽन्ते फलोपभोगेनावसाने सति प्रागुक्तं ज्ञानं प्रतिबन्धमुद्भूतमविद्यालेशमपनुद्य विद्वांसं स्वाराज्येऽभिषेचयतीत्यर्थः[2]॥३॥

ननु प्रारब्धकर्मवशाद् ब्रह्मविदो देहादिप्रतिभासश्चेदनारब्धकर्मवशादपि पौनःपुन्येन देहादिप्रतिभाससम्भवादनिर्मोक्षः स्यादविशेषादित्याशङ्क्याह—**आरब्धस्येति।** भोगज्ञानयोरारब्धकर्मकार्यत्वेन मिथो विरोधाभावादारब्धकर्मणो देहादिप्रतिभासेऽपीतरस्यानारब्धकर्मणस्तत्फलस्य च ज्ञानेन विरुद्धत्वान्न ज्ञाने सति फलारम्भकत्वं तस्य सिध्यति। प्रवृत्ताप्रवृत्तफलत्वविशेषोपपत्तेरित्यर्थः॥४॥

तर्हि कदाचिदात्मनो देहात्मत्वाभिमानसमुद्भूतदुरितप्रतिबन्धान्मोक्षानुपपत्तिरिति चेन्नेत्याह—**देहात्मेति।** यथा विवेकविकलस्य देहे मनुष्योऽहमित्यात्मज्ञानं निःसन्दिग्धमुपलब्धं तथा मुख्यात्मन्येव देहाद्यहङ्कारपर्यन्तसाक्षिणि यस्य ज्ञानं वाक्यादुपजायमानमसन्दिग्धं देहात्मज्ञानस्य रज्जुज्ञानमिव सर्पज्ञानस्य बाधकं सम्पद्यते। स यथोक्तज्ञानबलादनर्थराशेरपनीतत्वाद् बलादेव मुच्यते। तमेव विदित्वाऽतिमृत्युमेतीत्यादिदर्शनादित्यर्थः॥५॥

॥ इति विवृतं चतुर्थं तत्त्वज्ञानस्वभावप्रकरणम्॥४॥

●

---

१. यथाऽनिच्छताऽपि स्पृष्टोऽग्निस्तं दहत्येव, तथानिच्छन्नपि कृतात्मसाक्षात्कारः कर्मबन्धाद्विमुच्यते।

२. स्वस्वरूपं बोधयति।

अथ पञ्चमं बुद्ध्यपराधप्रकरणम्

मूत्राशङ्को यथोदङ्को नाग्रहीदमृतं यथा।
कर्मनाशभयाज्जन्तोरात्मज्ञानाग्रहस्तथा॥१॥

बुद्धिस्थश्चलतीवात्मा 'ध्यायतीव' च दृश्यते।
नौगतस्य यथा वृक्षास्तद्वत्संसारविभ्रमः॥२॥

नौस्थस्य प्रातिलोम्येन नगानां गमनं यथा।
आत्मनः संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः॥३॥

बुद्ध्यपराधप्रकरणम्

यदि प्रदर्शितप्रक्रियया ब्रह्मात्मज्ञानममृतत्वसाधनं किमिति तर्हि सर्वैरहं ब्रह्मास्मीत्यात्मरूपं न गृह्यते। तत्राह—**मूत्राशङ्केति**। यथोदङ्को[1]नामा कश्चिद् ऋषिरमृतकलशं भगवदाज्ञया देवेन्द्रोपहृतं बस्तिदेशस्थमुपलभ्य मूत्राशङ्कः सन् यथाश्रुतमप्यमृतं मिथ्याज्ञानान्न गृहीतवान्। तथा वर्णाश्रमोपाधिविहित-कर्मनाशभयादात्मज्ञानाग्रहो जन्तोरुत्पद्यते। तेन पदार्थविवेकवता मुमुक्षुणा भवितव्यमित्यर्थः[2]॥१॥

ननु दृष्टान्ते देवेन्द्रस्य वेषान्यत्वममृतकुम्भस्य च वस्तिस्थानस्थापनं मूत्रभ्रमोत्पत्तौ कारणम्। न तथाऽऽत्मनो ब्रह्मभूतस्य भ्रमकारणमस्तीत्याशङ्क्य पदार्थविवेकात्पूर्वमविद्याकल्पितान्तःकरणाविवेकादात्मनि संसारित्वभ्रान्तिरित्याह—**बुद्धीति**। तदेव दृष्टान्तेन स्पष्टयति—**नौगतस्येति**॥२॥

उक्तमेवार्थं प्रपञ्चयति—**नौस्थस्येति**। आत्मनः संसृतिरहितस्य बुद्ध्यविवेका-त्संसृतिरित्यत्र प्रमाणमाह[3]—**ध्यायतीति**॥३॥

ननु शुक्त्यादौ सादृश्यादिसम्भवादन्यत्रान्यधर्माध्याससम्भवः स्यान्न विषय-

---

१. मुद्रितभारते उत्तङ्क इति तस्य नाम निर्दिष्टम्।

२. वस्तुविवेकमन्तरेण स्वलक्ष्यं साधयितुं न शक्यते मुमुक्षुणा।

३. शुद्धबुद्धमुक्तस्वभावस्य संसरणासम्भवाद् इवपदनिर्देशः।

चैतन्यप्रतिबिम्बेन व्याप्तो बोधो हि जायते।
बुद्धेः शब्दादिभिर्भासस्तेन मोमुह्यते जगत्॥४॥
चैतन्यभास्यताहमस्तादर्थ्यं च तदस्य यत्।
इदमंशप्रहाणे न परः सोऽनुभवो भवेत्॥५॥

विषयिणोर्बुद्ध्यात्मनोरत्यन्तवैलक्षण्यादन्योन्यधर्माध्याससिद्धिरित्याशङ्क्य, चिदाभासद्वारा सादृश्यादिसम्भवान्नैवमित्याह—**चैतन्येति**। चिदाभासस्य विषया-कारस्य च बुद्धौ सङ्क्रमेण विषयधर्मान्कृशस्थूलादीनात्मन्यध्यस्यात्म-धर्मानानन्दादीन् बुद्धावारोप्य 'अहं कर्ता भोक्ते'ति लोकः संसरतीति फलितमाह[१]—**तेनेति**॥४॥

अविवेकाधीने संसाराध्यासे विविक्तपदार्थस्य वाक्यादहं ब्रह्मेति प्रतिपत्त्या मुक्तिर्युक्तेत्याह—**चैतन्याभासेति**। अहङ्कारस्य चैतन्याकारता या मोहात्प्राप्ता यच्चाहङ्कारस्य चेतनशेषत्वं मोहादेव सिद्धम्, तदुभयमहमित्यत्रेदमंशस्य विवेकेन परित्यागे सति न भवति। यस्तु तत्रानिदमंशोऽनुभवः साक्षी परिशिष्यते स परमात्मैव भवेत्। तस्मात् परिशोधितपदार्थो[२] वाक्यादहं ब्रह्मेति ज्ञानान्मुक्तो भवतीत्यर्थः॥५॥

॥इति पञ्चमं मूत्राशङ्क[३]प्रकरणं विवृतम्॥५॥

●

---

१. अध्यास एव मोहस्य कारणम्।

२. परिशोधश्च तत्त्वमस्यादिमहावाक्यद्वारा जीवात्मनोरभेदज्ञानेन।

३. प्रकरणस्यादौ मूत्राशङ्कर्षेर्दृष्टान्तत्वेन प्रतिपादनात्, अस्य प्रकरणस्य मूत्राशङ्क इत्यपरं नाम।

अथ षष्ठं विशेषापोहप्रकरणम्

छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते।
तथा शिष्टेन सर्वेण येन येन विशेष्यते ॥१॥
तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम्।
अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वैर्विशेषणैः॥२॥
विशेषणमिदं सर्वं साध्वलङ्करणं यथा।
अविद्याध्यस्त[1]मतः सर्वं ज्ञात आत्मन्यसद्भवेत्॥३॥
ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः।
अहमित्यपि यद्ग्राह्यं व्यपेताङ्गसमं हि तत्॥४॥

विशेषापोहप्रकरणम्

पदार्थविवेकवतो वाक्यादहं ब्रह्मेति ज्ञानं भवतीत्युक्तम्। इदानीं पदार्थविवेके पुनरपरमुपायमुपदिशति—**छित्वेति**। विमतमात्मविशेषणं न भवति विशेषणत्वात् छिन्नहस्तवदित्यर्थः[2]॥१॥

श्रोत्रादेः स्थूलदेहाश्रयत्वेन दृष्टस्यात्मविशेषणत्वाभावेऽपि सुखदुःखादेस्तद्विषेषणत्वं[3] दुष्परिहरमित्याशङ्क्याह—**तस्मादिति**। सुखादेरपि व्यभिचारस्य स्वानुभवगम्यत्वादित्यर्थः। देहद्वयसमवायिनः सर्वस्यात्मनि व्यभिचारे फलितमाह—**तस्माज्ज्ञ इति**॥२॥

विशेषणस्यानात्मत्त्वेऽपि नात्मनस्तद्वियोगोऽस्ति। आगमोपायाभ्यां सम्बन्धनैरन्तर्यादित्याशङ्क्याह—**विशेषणमिति**। विशेषणस्य सर्वस्यात्मन्यविद्याध्यारोपितत्वे फलितमाह—**अत इति**। न ज्ञायमानत्वादनात्मत्वमात्मनि व्यभिचारादि-

---

१. अविद्याध्यासतः, इति पाठान्तरम्, स एव साधु पाठः, अन्यथा छन्दोभङ्गः स्यात्।

२. छिन्नहस्त इत्यत्र छिन्नपदं शरीरविशेषणं न हस्तस्य।

३. येन येन मनुष्यत्वादिना विशेष्यते तेन सर्वेण छिन्नहस्तातिरिक्तेन पादादिनापि आत्मा न विशेषणीयः।

यावान् स्यादिदमंशो यः स स्वतोऽन्यो विशेषणम्।
विशेषप्रक्षयो यत्र सिद्धो ज्ञश्चित्रगुर्यथा ।।५।।
इदमंशोऽहमित्यत्र त्याज्यो नात्मेति पण्डितैः।
अहं ब्रह्मेति शिष्टांशो भूतपूर्वगतेर्भवेत्।।६।।

त्याशङ्क्याह—**ज्ञातेति।** आत्मनः सर्वैरहमिति ज्ञायमानत्वादज्ञेयत्वमसिद्ध-मित्याशङ्क्याह—**अहमिति।** तस्यापि स्वापादौ व्यभिचाराद् दृश्यत्वाच्च सिद्धमनात्मत्वमित्यर्थः।।३-४।।

आत्मनोऽहंप्रत्ययग्राह्यत्वाभावे कुतः सिद्धिरित्याशङ्क्याह—**यावानिति।** अहमित्यत्र चिदचिदात्मके यावानिदमंशोऽहङ्कारादिरचिदात्मको यो यत्र प्रत्यगात्मनि विशेषणं स्यात् स प्रत्यगात्मा। तस्माद्विशेषणत्वेनाभिमताहङ्कारादेर्व्यतिरिक्तः सर्वेषां विशेषणानां प्रक्षयो व्यावृत्तिरस्मिन्निति व्युत्पत्त्या निर्विशेषः स्वतोऽन्यापेक्षामन्तरेण लब्धसत्ताकः[१] स्फुरद्रूपः सिद्ध्यति। यथा देवदत्तश्चित्रगोः सम्बन्धात्प्रागेव सिद्धो न चित्रगोः सम्बन्धं स्वसिद्धिं प्रत्यपेक्षते तथाऽहङ्कारादेरात्मा प्रागेव सिद्धो नाहङ्कारादिकं स्वसिद्धावपेक्षते। विमतं विशेषणं स्वविलणविशेष्यनिष्ठं विशेषण-त्वाच्चित्रगुत्ववदित्यर्थः।।५।।

अहमोऽनात्मत्वे कथमहं ब्रह्मेति श्रुतिरविरुद्धा सिद्ध्येदित्याशङ्क्याध्यस्ता-हङ्कारस्य मूलनिवृत्त्या निवृत्त्यर्था श्रुतिर्नात्मत्वप्रतिपत्त्यर्थेत्याह—**इदमिति।** अहमित्यत्रेदमनिदमात्मके योऽयमिदमंशोऽहङ्कारस्तस्य त्यागेऽपि यः शिष्टोऽनिदमात्मकोंऽशः सोऽहंशब्दलक्ष्यो ब्रह्मेत्यवगम्यो भवेदित्यर्थः। अहङ्कारे त्यक्ते कथमहमुल्लेखो वाक्यार्थबुद्धौ सिद्ध्येत्तत्राह—**भूतेति।** भूता सञ्जाता पूर्वमविद्यावस्थायामहमात्मेति या बुद्धिस्तदपेक्षया वाक्यार्थज्ञानेऽहमुल्लेखः स्यादित्यर्थः[२]।।६।।

।।इति व्याकृतं षष्ठं [३]छित्वाप्रकरणम्।।६।।

●

---

१. स्वतः स्वप्रकाशरूपत्वादात्मनः।

२. यावद् वृत्तिलयो न भवति तावदहमिति प्रत्ययः।

३. प्रकरणादौ छित्वा इति पदप्रतिपादनादस्य नाम छित्वाप्रकरणम्।

अथ सप्तमं बुद्ध्यारूढप्रकरणम्

बुद्ध्यारूढं सदा सर्वं दृश्यते यत्र तत्र वा।
मया तस्मात्परं ब्रह्म सर्वज्ञश्चास्मि सर्वगः॥१॥
यथात्मबुद्धिचाराणां साक्षी तद्वत् परेष्वपि।
नैवापोढुं न चाऽऽदातुं शक्यस्तस्मात्परो ह्यहम्॥२॥
विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः।
अशेषबुद्धिसाक्षित्वाद् बुद्धिवच्चाल्पवेदना॥३॥

बुद्ध्यारूढप्रकरणम्

कृतान्वयव्यतिरेकस्य परिशोधितपदार्थस्य वाक्यादेव वाक्यार्थज्ञानमहं ब्रह्मास्मीत्युपपत्तितः सिद्धमपि स्वानुभवावष्टम्भेन स्पष्टीकर्तुं प्रकरणं प्रस्तौति—**बुद्ध्यारूढमिति**। बुद्धिस्थं विषयजातं सर्वदोपलब्धिकाले यस्मान्निर्विकारेणाध्यक्षेणोपलभ्यते। तस्मादहमुपलब्धा निर्विशेषत्वान्निर्विकारत्वाच्च परमेव ब्रह्मास्मि। यस्माच्चाहं सर्वमुपलभे[1] तस्मादस्मि सर्वज्ञः सर्वोपलब्धृत्वात्। यस्माच्च यत्र तत्र वा सर्वत्रैव व्यवस्थितमपर्यायेण पश्यामि तस्मादस्मि सर्वगोऽहमित्यर्थः॥१॥

पुरुषान्तरबुद्ध्यारूढे वस्तुनि पुरुषान्तरस्योपलब्धिस्मरणयोरभावान्नैकस्यात्मनः सर्वबुद्ध्यध्यक्षत्वसिद्धिरित्याशङ्क्याह—**यथेति**। आत्मीयत्वेन कल्पिते सङ्घाते बुद्धितद्वृत्तीनां यथाहं साक्षी विवक्षितस्तथा परकीयत्वेन परिकल्पितेष्वपि सङ्घातेषु तद्वृत्तीनामहमेव[2] साक्षी साक्षिभेदे प्रमाणाभावात्। न च तस्मिन्नात्मत्वादेव हानोपादाने युक्ते। यस्मादहं हानोपादानाद्यशेषसंसारव्यवहारातीतस्तस्मात्परमात्मैवाहं भेदस्य शास्त्रनिन्दितत्वादित्यर्थः॥२॥

बुद्ध्यारूढं दृश्यते मयेत्युक्तत्वात् दर्शनक्रियाकर्तृत्वादात्मनो विकारित्वं सगुणत्वं भौतिकत्वं बुद्धिवदल्पद्रष्टृत्वं च प्राप्नोतीत्याशङ्क्याह—**विकारित्वमिति**। अशेषविकारसाक्षित्वान्न विकारित्वमशेषाशुद्धिसाक्षित्वान्नाशुद्धत्वम्। सगुणत्वं

---

१. ब्रह्मैवेदं सर्वम् (मुण्ड. २.२.११) इति मानम्।

२. ज्ञाततया अज्ञाततया वा सर्वं वस्तुजातं साक्षिभास्यमिति स्वीकारात्।

मणौ प्रकाश्यते यद्वद्रक्ताद्याकारताऽऽतपे।
मयि संदृश्यते सर्वमातपेनेव तन्मया॥४॥

बुद्धौ दृश्यं भवेद्बुद्धौ सत्यां नास्ति विपर्यये।
द्रष्टा यस्मात्सदा द्रष्टा तस्माद् द्वैतं न विद्यते॥५॥

अविवेकात् पराभावं यथा बुद्धिरवैत्तथा।
विवेकात्तु परादन्यः स्वयं चापि न विद्यते॥६॥

सदोषत्वं च नास्ति। नापि भौतिकत्वम्, तत्साक्षित्वात्। न च बुद्धिवदल्पवेदना सिद्ध्यति सर्वबुद्धिसाक्षित्वादित्यर्थः॥३॥

बुद्धिवदल्पवेदना क्षेत्रज्ञस्य नास्तीत्ययुक्तम्। बुद्धीनामशेषविषयग्राहकत्वे क्षेत्रज्ञस्य कृत्याभावात्तस्य च द्रष्टृत्वे विकारित्वस्य दुर्वारत्वादित्याशङ्क्याह—**मणाविति।** यथा स्फटिकादिमणौ जपाकुसुमादिरूपा रक्ताद्याकारताऽसत्येवादित्यप्रकाशेऽभिव्यज्यते। तथा सत्येवादित्यस्थानीये क्षेत्रज्ञे स्फटिकमणिस्थानीयायां बुद्धौ जपाकुसुमस्थानीयः सर्वो विषयो गृह्यते। तथा चादित्यप्रकाशेन रक्ताद्याकारताप्रतीतिवद्बुद्धिस्थं विषयजातं क्षेत्रज्ञेनैव प्रकाश्यमिति न क्षेत्रज्ञस्य किञ्चित्करत्वम्, न च तस्य द्रष्टृत्वे विकारित्वमादित्यस्येव स्वगतव्यापारमन्तरेण[१] स्वसन्निधिमात्रेण सर्वविषयप्रकाशकत्वोपपत्तेरित्यर्थः॥४॥

प्रकृतस्य प्रत्यगात्मनोऽद्वितीयत्वं स्फुटयति—**बुद्धाविति।** जागरितादौ सत्यां बुद्धावविद्याकल्पितायां तस्यां बुद्धौ समारूढं द्वैतमुपलभ्यते। स्वापादौ[२] पुनरसत्यां बुद्धौ न द्वैतं दृश्यमस्ति। तेन व्यभिचारित्वाच्च द्वैतं नैव परमार्थतो विद्यते। द्रष्टा तु साक्षी सर्वास्ववस्थासु द्रष्टैव[३] न साक्षितां व्यभिचरति। तस्मादद्वितीयमेव प्रत्यक्चैतन्यमित्यर्थः॥५॥

अविद्यया द्वैतं भाति विद्यया च न भातीत्युक्तं ते च विद्याविद्ये कस्येत्यपेक्षायां साभासाया बुद्धेरेवेत्याह—**अविवेकादिति।** अनात्मन्यात्माभिमानश्चादेहे देहाभिमानश्चाविवेकः तस्मान्मिथ्याज्ञानात्परस्यासंसारिणोऽसत्त्वं रजस्तमोभूयस्त्वाद्यथाबुद्धिर्विदितवती तथाविवेकात्सत्त्वोद्रेकद्वारेण श्रवणाद्यनुष्ठानपूर्वकाद् ब्रह्मात्मैकत्वविषयाद्वेदान्तवाक्योत्थात्परमात्मनोऽन्यं नैव पश्यति। स्वयमपि बुद्धिर्यथोक्तविद्यादशायां प्रत्यग्भूतब्रह्मव्यतिरेकेण न तिष्ठतीत्यर्थः॥६॥

॥इति विवृत्तं सप्तमं बुद्ध्यारूढं प्रकरणम्॥७॥

१. साक्षिभास्यत्वे प्रभाभित्तिसंयोगवद् व्यापारापेक्षा नास्ति।
२. सुषुप्तिदशायामन्तःकरणवृत्तिलयात्र प्रपञ्चप्रत्ययः।
३. जाग्रतस्वप्नकालिकप्रपञ्चमनुभासयन् सुषुप्तावज्ञानवृत्तिमपि भासयति।

अथाष्टमं मतिविलापनप्रकरणम्

चितिस्वरूपे स्वत एव मे मते रसादियोगस्तव मोहकारितः।
अतो न किञ्चित्तव चेष्टितेन मे फलं भवेत्सर्वविशेषहानतः॥१॥
विमुच्य मायामयकार्यतामिह प्रशान्तिमायाह्यसदीहितात् सदा।
अहं परं ब्रह्म सदा विमुक्तवत् तथाऽजमेकं द्वयवर्जितं यतः॥२॥
सदा च भूतेषु समोऽस्मि केवलो यथा च खं सर्वगमक्षरं शिवम्।
निरन्तरं निष्कलमक्रियं परं ततो न मेऽस्तीह फलं तवेहितैः॥३॥
अहं ममैको न मदन्यदिष्यते तथा न कस्याप्यहमस्म्यसङ्गतः।
असङ्गरूपोऽहमतो न मे त्वया कृतेन कार्यं तव चाद्वयत्वतः॥४॥

मतिविलापनप्रकरणम्

स्वानुभवानुरोधेन साधितमेव ब्रह्मात्मज्ञानमात्मनः संवादेनापि द्रढयितुं प्रकरणान्तरमवतारयति—**चितीति**॥१॥

निर्विशेषस्यानाधेयातिशयस्यात्मनो मनश्चेष्टितेन फलाभावे मनसस्तस्मिन्नेवात्मन्युपशान्तिस्तन्मात्रत्वेन पर्यवसानमुचितमिति फलितमाह—**विमुच्येति**। मायामयकार्यतां = मिथ्याचेष्टितं किमिति प्रत्यगात्मनि मनसः शान्तिरुच्यते? ब्रह्मणि सत्यज्ञानादिलक्षणे किमिति तदुपशान्तिर्नोच्यते तत्राह—**अहमिति**॥२॥

ब्रह्मणो विशेषराहित्येन सदाविमुक्तत्वादिसिद्धावपि आत्मनो [1]विशेषदर्शनाद्विमुक्तत्वाद्ययोगान्न ब्रह्मात्मनोरैक्योपपत्तिरित्याशङ्क्यात्मनोऽपि वस्तुतो विशेषो नास्तीति दृष्टान्तेन साधयति—**सदेति**॥३॥

ब्रह्मभूतस्य तव उपयोगाभावेऽपि मच्चेष्टया त्वत्सम्बन्धिनो गुणभूतस्य प्रधानभूतस्य वा क्वचित्कश्चिदुपयोगो भविष्यतीत्याशङ्क्याह—**अहमिति**। अहमेकस्तस्मान्मत्तोऽन्यन्मम नेष्यते गुणभूतम्। तथा प्रधानभूतस्य कस्यापि न गुणभूतोऽस्मि। कस्मात्? असङ्गत्वात्। हेतुमुक्तमनूद्य फलितं कथयति—**असङ्गेति**।

---

१. शुद्धबुद्धमुक्तस्वभावत्वादात्मनः।

फले च हेतौ च जनो विषक्तवान् इति प्रचिन्त्याहमतो विमोक्षणे।
जनस्य संवादमिमं प्रक्लृप्तवान् स्वरूपतत्त्वार्थविबोधकारणम्॥५॥
संवादमेतं यदि चिन्तयेन्नरो विमुच्यतेऽज्ञानमहाभयागमात्[1]।
विमुक्तकामश्च तथा जनः सदा चरत्यशोकः सम आत्मवित्सुखी॥६॥

ब्रह्मात्माविद्याविजृम्भितत्वात्परमार्थतो मनसो व्यापारायोगादपि प्रशान्तिरेव प्रत्यगात्मनि तस्य युक्तेत्याह—**तव चेति**॥४॥

ननु कृतार्थेनाचार्येण किमित्येवं प्रकरणं प्रणीतम्? नहि तस्य ख्यात्याद्यपेक्षा सम्भवति, तत्राह—**फले चेति।** अतो हेतुफलात्मनः संसारादिति यावत्। संवादस्य [2]स्वरूपमाचष्टे—**स्वरूपेति।** स्वस्यात्मनो यद्रूपं तस्य तत्त्वार्थो ब्रह्मत्वम्। तस्य स्पष्टत्वपरिज्ञाने कारणं पदार्थविवेकद्वारा संवादः॥५॥

यस्मादात्मनो ब्रह्मत्वाधिगतौ हेतुरयं कथितः संवादस्तस्माद्यस्तन्निष्ठः स ब्रह्मात्मज्ञानावाप्त्या जीवन्नेव कृतकृत्यः स्यादित्याह—**संवादमिति।** विशिष्ट-फलत्वान्मुमुक्षुणाऽस्य संवादस्य सर्वदाऽनुसन्धातव्यता सिध्यतीत्यर्थः॥६॥

।।इति विवृतमष्टमं चितिस्वरूपप्रकरणम्।।८।।

●

---

१. महाभयस्यागमो यस्मात्तन्महाभयागममज्ञानं तस्मात्।

२. सच्चिदानन्दं ब्रह्म, इति श्रुत्या सत् चिद् आनन्दाद्युपाधिना आत्मनः स्वरूपप्रतिपादानात्।

अथ नवमं सूक्ष्मताव्यापिताप्रकरणम्

सूक्ष्मताव्यापिते ज्ञेये गन्धादेरुत्तरोत्तरम्।
प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः॥१॥
शारीरा पृथिवी तावद्यावद् बाह्या प्रमाणतः।
अम्ब्वादीनि च तत्त्वानि तावज्ज्ञेयानि कृत्स्नशः॥२॥
वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा।
अहमेकः सदा शुद्धश्चिन्मात्रः सर्वगोऽद्वयः॥३॥
ब्रह्माद्याः स्थावरान्ता ये प्राणिनो मम पूः स्मृताः।
कामक्रोधादयो दोषा जायेरन् मे कुतोऽन्यतः॥४॥

सूक्ष्मताव्यापिताप्रकरणम्

यस्य प्रत्यगात्मनो ब्रह्मणो वाक्योत्थज्ञानादज्ञाननिवृत्त्या मुक्तिरुच्यते तस्य सर्वान्तरत्वेन निरतिशयसूक्ष्मत्वं व्याप्तित्वं च व्याख्यातुं प्रकरणान्तरमवतारयति—**सूक्ष्मतेति**। पृथ्वी गन्धशब्देनोच्यते गन्धादेरारभ्य प्रत्यगात्मपर्यन्तेषु पदार्थेषु पूर्वस्य पूर्वस्य त्यागेनोत्तरस्मिन्नुत्तरस्मिन् भागे सूक्ष्मत्वं व्यापित्वं चेत्युभयं ज्ञातव्यम्। तथा च प्रत्यगात्मनि सर्वान्तरे निरतिशयातिसूक्ष्मत्त्वादि सिद्ध्यतीत्यर्थः॥१॥

कथं पुनरध्यात्ममधिदैवतं च ज्ञानं तस्य च प्रत्यगात्मावसानत्वमुभयत्र पृथिव्यादीनां भेदेन प्रथमानत्वादित्याशङ्क्याह—**शारीरेति**। अध्यात्माधिदैवाधिभूतविभक्तानां पृथिव्यादीनामेकाज्ञानविजृम्भितानामेकत्वादेकप्रयत्नेन प्रविलापनोपपत्तेः। सर्वत्र[1] प्रत्यक्त्वानुगमात्प्रत्यगात्मावसानत्वं ज्ञानस्य युक्तमेवेत्यर्थः॥२॥

ननु ज्ञानस्य प्रत्यगात्मावसानमयुक्तम्। प्रत्यक्त्वस्य पराचीनविकारापेक्षया तदभावे भावानुपपत्तेरित्याशङ्क्य चिन्मात्रत्वात्प्रत्यक्त्वस्य विकारापेक्षाभावाद्युक्तं ज्ञानस्य तदवसानत्वमित्याह—**वाय्वादीनामिति**॥३॥

प्रतिशरीरमात्माभेदोपलब्धेर्न तवैकत्वमित्याशङ्क्य सर्वदेहानां मयैवात्म-

१. सर्वं खल्विदं ब्रह्म (छा. ३.१४.१) इति श्रुत्या ब्रह्मणो व्यापकत्वप्रतिपादनात्।

भूतदोषैः सदाऽस्पृष्टं सर्वभूतस्थमीश्वरम्।
नीलं व्योम यथा बालो दुष्टं मां वीक्षते जनः॥५॥

मच्चैतन्यावभास्यत्वात्[1]सर्वप्राणिधियां सदा।
पूर्मम प्राणिनः सर्वे सर्वज्ञस्य विपाप्मनः॥६॥

जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते।
नित्यं निर्विषयं ज्ञानं तस्माद् द्वैतं न विद्यते॥७॥

ज्ञातुर्ज्ञातिर्हि नित्योक्ता सुषुप्ते त्वन्यशून्यतः।
जाग्रज्ज्ञातिस्त्वविद्यातस्तद्ग्राह्यं चासदिष्यताम्॥८॥

वत्त्वान्मदेकत्वमविरुद्धमित्याह—**ब्रह्माद्या इति**। तथापि न ते चिन्मात्रत्वं, रागद्वेषादिदोषोपलब्धेरित्याशङ्क्य मद्व्यतिरिक्ताभावान्मैवमित्याह—**कामेति**॥४॥

प्रत्यगात्मनो निर्दोषत्वमसिद्धं संसारदोषस्य प्रत्यक्षत्वादित्याशङ्क्याकाशस्य नीलादिप्रतिभासवदात्मनो दुष्टताप्रतिभास्याविवेकमूलत्वात्र वस्तुतो दुष्टत्वाशङ्केत्याह—**भूतदोषैरिति**॥५॥

सर्वदोषराहित्ये तव सर्वे प्राणिनो विगतपुण्यापुण्यस्य पुरमिति कथमित्याशङ्क्याह—**मच्चैतन्येति**॥६॥

तर्हि भास्यभासकभेदादद्वैतासिद्धिरित्याशङ्क्याह—**जनिमदिति**। कार्यत्वाद् दृश्यत्वाच्च जागरितवस्तुजातं[2] स्वप्नज्ञानज्ञेयवन्मिथ्या तेन द्वैतस्य वस्तुतोऽसत्त्वादात्मस्वरूपं ज्ञानं विषयनिरपेक्षं कूटस्थमद्वितीयमित्यर्थः॥७॥

स्वरूपज्ञानस्यापि ज्ञानत्वाज्ज्ञेयसापेक्षत्वमित्याशङ्क्य श्रुतिविरोधान्मैवमित्याह—**ज्ञातुरिति**। किं च सुषुप्ते विविधकरणोपरमेऽपि चैतन्यस्य तत्साक्षित्वेन विद्यमानत्वान्नित्यमेव [3]स्वरूपज्ञानमित्याह—**सुषुप्ते त्विति**। करणोपरतिवद्विषयस्यापि 'न तु तद्द्वितीयमस्ती'ति निषिद्धत्वात् तत्र सर्वविषयज्ञानायोगात्कूटस्थमेव ज्ञानं सिद्धमित्यर्थः। तथापि जागरिते ज्ञानज्ञेयविभागोऽस्तीत्याशङ्क्याह—**जाग्रदिति**। जागरिते यज्जनिमद् ज्ञानं ज्ञेयं च तदुभयमविद्याकार्यत्वान्मिथ्यैवेत्यर्थः॥८॥

---

१. तथा च श्रुतिः 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (कौ. २.५)।

२. स्वप्नज्ञानं स्वप्नज्ञेयं च यथा जागरितवस्तुज्ञानेन निवर्त्येते, तथैव जागरितवस्तुज्ञानमपि ब्रह्मज्ञानेन निवर्त्यत इति ज्ञाननिवर्त्यत्वरूपमिथ्यात्वमुभयत्रापि समम्।

३. सुषुप्ते विषयाभावेन नित्यज्ञानसत्त्वेऽप्यवस्थान्तरे विषयसत्वाज्ज्ञानस्यानित्यत्वं स्यादत आह।

रूपवत्त्वाद्यसत्त्वान्न दृष्ट्यादेः कर्मता यथा।
एवं विज्ञानकर्मत्वं भूम्नो नास्तीति गम्यते॥९॥

द्रष्टव्यादिश्रुतेरात्मनोऽपि ज्ञेयत्वेन रजतादिवदसत्त्वमित्याशङ्क्याह—**रूपत्त्वादीति**। अतो द्रष्टव्यादिश्रुतेरात्मनो ज्ञानकर्मत्वे नास्ति तात्पर्यमिति शेषः। तथापि 'यत्र नान्यत्पश्यति' इत्यादिना भूम्नोऽन्यदर्शनादिनिषेधेनात्मनो दर्शनाद्यभ्यनुज्ञानात्तदसत्त्वं दृश्यत्वादाशङ्कितव्यमित्याशङ्क्याह—**एवमिति**। 'यत्र नान्यत्पश्यतीत्यादि'वाक्यस्य चक्षुरादिद्वारा भ्रमप्राप्तान्यदर्शनादिनिवृत्तिपरत्वाद्भूम्नो दर्शनादिकर्मत्वापादकत्वायोगादविषयो नित्यो भूमा प्रत्यगात्मा सर्वान्तरः सिद्ध्यतीत्यर्थः[१]॥९॥

॥इति नवमं व्याकृतमदःसूक्ष्मताप्रकरणम्॥९॥

१. यथा द्रष्टव्यः श्रोतव्य इत्यादौ तव्यत्प्रत्ययो न दर्शनकर्मतापर एवं यत्र नान्यद्विजानाति स भूमेत्यत्रापि नात्मदर्शनं विधीयते पूर्वोक्तश्रुतिविरोधात्।

अथ दशमं दृशिस्वरूपपरमार्थदर्शनप्रकरणम्

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ॐ॥१॥

दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः स्वभावतः।
पुरस्तिरश्चोर्ध्वमधश्च सर्वतः सम्पूर्णभूमा त्वज आत्मनि स्थितः॥२॥

अजोऽमरश्चैव तथाऽजरोऽमृतः स्वयंप्रभः सर्वगतोऽहमद्वयः।
न कारणं कार्यमतीव निर्मलः सदैकतृप्तश्च ततो विमुक्त ॐ॥३॥

सुषुप्तजाग्रत्स्वपतश्च दर्शनं न मेऽस्ति किञ्चित्तु मतेर्हि मोहनम्[१]।
स्वतश्च तेषां परतोऽप्यसत्त्वतस्तुरीय एवास्मि सदादृगद्वयः॥४॥

दृष्टिस्वरूपपरमार्थदर्शनप्रकरणम्

प्रकृतस्याविषयस्य प्रत्यगात्मनो ज्ञानमविषयत्वेनैव भवतीति स्वानुभवानुरोधेन प्रकटयन् प्रकरणान्तरं प्रस्तौति—**दृशीति**। तच्चेदमुक्तमात्मस्वरूपमोङ्कारद्वारा मुमुक्षुप्रतिपत्तिगोचरतामाचरतीति सूचयति—**ओमिति**॥१॥

दृशेर्दृश्यसम्बन्धादशुद्धत्वं विक्रियावत्त्वं चेत्यतो नाकाशवदलेपकत्वादिसिद्धिरित्याशङ्क्यात्मस्वरूपत्वाद्दृशेः दृश्यनिरपेक्षत्वान्नैवमित्याह—**दृशीति**। आत्मनो विकारहेतुर्विषयो नास्तीत्यत्र हेतुमाह—**पुर इति**॥२॥

आत्मनो जन्माभावेऽपि जरादिविकारान्तरं भविष्यतीत्याशङ्क्याह—**अज इति**। आचार्योपदिष्टमात्मस्वरूपं ज्ञात्वा स्वकीयं ज्ञानं ज्ञापयितुं भवत्येवमेवेति शिष्योऽनुजानाति—**ओमिति**॥३॥

ननु दृशेः स्थानत्रयेऽन्यथा प्रथमानस्य कथमविक्रियात्मत्वं तत्राह—**सुषुप्तेति**। मोहनमविवेकादारोपितमिदं[२] दर्शनमित्यत्र हेतुमाह—**स्वतश्चेति**। जागरितादिस्थानानां स्वेन रूपेण निरूप्यमाणानां रज्जुसर्पादिवदसत्त्वात्परतोऽपि चिद्रूपेण विचार्यमाणानां रज्जुसर्पादिवत् सत्त्वाभावात्प्रतीतेरारोपमात्रत्वसिद्धेरित्यर्थः। आत्मा तर्हि किंलक्षणस्तत्राह—**तुरीय इति**। यस्त्ववस्थात्रयसाक्षी अद्वय[३] एवास्मीत्यर्थः॥४॥

---

१. स्वमिवेह मोहनम्।—पा। २. अध्यस्तवस्तुस्वरूपज्ञानमित्यर्थः। ३. त्रिकालाबाध्यरूपः।

शरीरबुद्धीन्द्रियदुःखसन्ततिर्न मे न चाहं मम निर्विकारतः।
असत्त्वहेतोश्च तथैव सन्ततेरसत्त्वमस्याः स्वपतो हि दृश्यवत्॥५॥
इदं तु सत्यं मम नास्ति विक्रिया विकारहेतुर्न हि मेऽद्वयत्वतः।
न पुण्यपापे न च मोक्षबन्धने न चास्ति वर्णाश्रमताऽशरीरतः॥६॥
अनादितो निर्गुणतो न कर्म मे फलं च तस्मात्परमोऽहमद्वयः।
यथा नभः सर्वगतं न लिप्यते तथा ह्यहं देहगतोऽपि सूक्ष्मतः॥७॥
सदा च भूतेषु समोऽहमीश्वरः क्षराक्षराभ्यां परमो ह्यथोत्तमः।
परात्मतत्त्वं च तथाऽद्वयोऽपि सन् विपर्ययेणाभिमतस्त्वविद्यया॥८॥
अविद्यया भावनया च कर्मभिर्विविक्त आत्माऽव्यवधिः सुनिर्मलः।
दृगादिशक्तिप्रचितोऽहमद्वयः स्थितः स्वरूपे गगनं [1]यथाचलम्॥९॥

यदद्वयशब्देन निर्विशेषत्वमुच्यते तदयुक्तमात्मनः शरीरादिसम्बन्धस्य प्रत्यक्षत्वादित्याशङ्क्याह—**शरीरेति**। तथैव स्वरूपत्वं धर्मत्वं वा नात्मन इत्यर्थः। सन्ततेरसत्वं साधयति—**असत्वमस्या इति**। स्वपतः स्वप्नावस्थायां दृश्यमान-शरीरवज्जाग्रच्छरीरादेस्तत्सन्ततेश्च मिथ्यात्वमित्यर्थः[2]॥५॥

शरीरादिसन्ततेर्दृश्यत्वेन मिथ्यात्वं चेदात्मा निर्विशेषः शुद्धश्चेत्ययमर्थोऽपि दृश्यत्वादेव मिथ्या स्यादित्याशङ्क्याह—**इदमिति**। कर्म वा तत्फलं वा तद्धेतुर्वा विक्रियाहेतुस्तवास्ति तत्कुतोऽद्वयत्वमित्याशङ्क्याह—**नेत्यादिना**। आत्मनो यदुक्तं पुण्यापुण्यवैधुर्यं तदुपपादयति—**अनादीति**। परमत्वं संसारिभ्योऽविद्याकल्पितेभ्यो विलक्षणत्वम्। ननु तव मायाप्रत्युपस्थापितेषु देहेष्वन्तरनुप्रविष्टस्य तद्दोषैर्दूषितत्व-सम्भवात्कुतः संसारिभ्यो वैलक्षण्यं तत्राह—**यथेति**॥७॥

ननु देहानां वैषम्यदर्शनादात्मनोऽपि देहेषु प्रविष्टत्वाद्वैषम्यं स्यादित्याशङ्क्य व्यवहारतो देहानुप्रवेशेऽपि परमार्थतस्तदभावान्मैवमित्याह—**सदेति**। हिशब्दो हेत्वर्थः। अथशब्दस्तस्मादर्थः। एवंविधश्चेदात्मा कथं तर्हि विपरीतरूपप्रतिभान-मित्याशङ्क्याह—**तथेति**। विपर्ययेण मिथ्याज्ञानेन तत्कारणाविद्ययाऽवच्छिन्नस्ततो नावभासत इत्यर्थः॥८॥

अविद्यामूलेन मिथ्याज्ञानेनावृतश्चेदात्मा तर्हि तस्याविद्यादिसम्बन्धः स्यादित्याशङ्क्याह—**अविद्ययेति**। अव्यवधिर्व्यवधायकेनाच्छादकेन शून्यः। आत्मनो यथोक्तलक्षणत्वे कथं द्रष्टा श्रोतेत्यादिविशेषव्यवहारस्तस्मिन्नित्याशङ्क्याविद्यामूलान्तः-

---

१. गगनवत् सर्वोपाधिभिरपरिच्छिन्नम्।
२. अविद्याया ब्रह्मज्ञाननिवर्त्यतया कारणाभावे कार्यस्याप्यसम्भवात्।

अहं परं ब्रह्म विनिश्चयात्मदृङ् न जायते भूय इति श्रुतेर्वचः।
न चैव बीजेऽप्यसति प्रजायते फलं न जन्मास्ति ततो ह्यमोहता॥१०॥
ममेदमित्थं च तथेदमीदृशं तथाहमेवं न परो न वान्यथा।
विमूढतैवं न जनस्य कल्पना सदा समे ब्रह्मणि चाद्वये शिवे॥११॥
यदद्वयं ज्ञानमतीव निर्मलं महात्मनां तत्र न शोकमोहता।
तयोरभावे न हि जन्म कर्म[1] वा भवेदयं वेदविदां विनिश्चयः॥१२॥
सुषुप्तवज्जाग्रति यो न पश्यति[2] द्वयं तु पश्यन्नपि चाद्वयत्वतः।
तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः॥१३॥
इतीदमुक्तं परमार्थदर्शनं मया हि वेदान्तविनिश्चितं परम्।
विमुच्यतेऽस्मिन् यदि निश्चितो भवेन्न लिप्यते व्योम इवेह कर्मभिः॥१४॥

करणपरिणामदृगादिशक्तिसम्बन्धादित्याह—**दृगादीति।** दर्शनश्रवणादिशक्तिभिश्चक्षुरादिद्वारजन्याभिर्बुद्धिवृत्तिभिः प्रचित उपचित इवाहम्, अतस्तत्सम्बद्ध इवेत्यर्थः॥९॥

यथोक्तप्रत्यगात्मतत्त्वपरिज्ञाने पुनरावृत्तिरहितं कैवल्यं फलमित्याह—**अहमिति।** श्रुतेर्वचो 'ब्रह्म वेद ब्रह्मैव भवती'त्यादि। श्रुतिसिद्धेऽर्थे युक्तिमपि समुच्चिनोति—**न चैवेति।** सामान्यन्यायं प्रकृते योजयति—**न जन्मेति।** ततो ब्रह्मात्मज्ञानादमोहता मूलभूतमोहाभावो[3] यतस्ततो जन्मादिलक्षणो विचित्रः संसारो मोहमूलो न सिद्ध्यतीत्यर्थः॥१०॥

ब्रह्मात्मज्ञानान्मोहनिवृत्तिद्वारा निवर्त्त्यं विचित्रं संसारमेव मोहकार्यं विवृणोति—**ममेति।** विचित्रस्य संसारस्याज्ञानकार्यत्वमुक्त्वा ज्ञानादज्ञाननिवृत्त्या तन्निवृत्तिं स्फुटयति—**यदिति।** तयोः शोकमोहयोरित्यर्थः॥१२॥

'भिद्यते हृदयग्रन्थिरि'त्यादिशास्त्रवशादात्मविदो मुक्तिरुक्ता। सम्प्रत्यात्मविदः स्वरूपमाह—**सुषुप्तवदिति।** विक्षेपदशायामप्रच्युतात्मयाथात्म्यदर्शनस्तत्त्वविदामुत्तमो नान्यो ज्ञातृत्वकर्तृत्वाभिमानीत्यर्थः॥१३॥

इह वेदान्तशास्त्रविषये शास्त्रन्यायानुसारेण स्वानुभवं प्रदर्श्येदानीमस्मिन् दर्शने परिनिष्ठितस्य कृतकृत्यता भवतीत्याह—**इतीदमिति।**॥१४॥

॥इति विवृतं दशमं दृशिस्वरूपप्रकरणम्॥१०॥

●

---

१. कर्मजन्य इति क्वचित् पाठः। २. पारमार्थिकत्वेन नानुभवति।
३. अज्ञानस्यैव मोहकारणत्वात्तस्य च ब्रह्मज्ञाननिवर्त्यतया न च मोहोत्पत्तिः।

अथैकादशमीक्षितृत्वप्रकरणम्

ईक्षितृत्वं स्वतःसिद्धं जन्तूनां च ततोऽन्यता।
अज्ञानादित्यतोऽन्यत्वं सदसीति निवर्त्यते॥१॥
एतावद्ध्यमृतत्वं न किञ्चिदन्यत्सहायकम्।
ज्ञानस्येति ब्रुवच्छास्त्रं सलिङ्गं [1]कर्म बाधते॥२॥
सर्वेषां मनसो वृत्तमविशेषेण पश्यतः।
तस्य मे निर्विकारस्य विशेषः स्यात्कथञ्चन॥३॥
मनोवृत्तं मनश्चैव स्वप्नवज्जाग्रतीक्षितुः।
सम्प्रसादे द्वयासत्त्वाच्चिन्मात्रः सर्वगोऽव्ययः॥४॥

ईक्षितृत्वप्रकरणम्

ननु ब्रह्मात्मैक्यज्ञानान्मुक्तिरित्ययुक्तम्। ब्रह्मात्मनोर्विरुद्धस्वभावत्वेनैक्यायोगात्तेन कर्मणा मोक्षस्तत्समुच्चिताद्वा ज्ञानादित्याशङ्क्य ज्ञानादेव मुक्तिरिति प्रतिपादयितुं प्रकरणान्तरं प्रस्तौति—**ईक्षितृत्वमिति**। सर्वेषामेव प्राणिनां चिद्रूपत्वं स्वाभाविकम्। ततश्चिद्रूपादन्यत्वं कर्तृत्वादिलक्षणमज्ञानकृतमित्यतस्तत्त्वमसिवाक्यार्थज्ञानादज्ञाननिवृत्त्या कर्तृत्वादिनिवृत्तेर्मुक्तिर्युक्तेत्यर्थः॥१॥

ज्ञानान्मोक्षो भवन्नपि कर्मसापेक्षात्ततो भवतीत्याशङ्क्याह—**एतावदिति**। लिङ्गशब्देन हेतुरुच्यते। ज्ञानिनः सहेतुकर्मानुपपत्तेर्न तदपेक्षात् ज्ञानान्मुक्तिरित्यर्थः॥२॥

ज्ञानिनो न सम्भवति कर्मेत्यत्र सर्वमनोवृत्तिसाक्षिणो जात्याद्यभिमानाभावं हेतुं करोति—**सर्वेषामिति**। विशेषो जात्याद्यभिमानः। कथञ्चनेत्याक्षेपो विवक्षितः॥३॥

कथं मनोवृत्तं पश्यतीत्युक्ते दृष्टान्तपूर्वकं स्पष्टयति—**मन इति**। यथा स्वप्नावस्थायां मनः सवृत्तिकं पश्यति तथा जागरितेऽपि पश्यतो नैव विशेषः सम्भवतीति पूर्वश्लोकेन सम्बन्धः। ननु विकाराभावेऽपि नात्मनोऽद्वितीयत्वं मनसस्तदर्थस्य च सत्त्वादित्याशङ्क्याह—**सम्प्रसादेति**॥४॥

---

१. अविद्या हि कर्मनिमित्तमात्मज्ञानेनाविद्यानिवृत्तौ सकारणकर्मनिवृत्तिः।

स्वप्नः सत्यो यथाऽऽ[१]बोधाद्देहात्मत्वं तथैव च।
प्रत्यक्षादेः प्रमाणत्वं जाग्रत्स्यादाऽऽत्मवेदनात्॥५॥

व्योमवत्सर्वभूतस्थो भूतदोषैर्विवर्जितः।
साक्षी चेताऽगुणः शुद्धो ब्रह्मैवास्मि स केवलः॥६॥

नामरूपक्रियाभ्योऽन्यो नित्यमुक्तस्वरूपवान्।
अहमात्मा परं ब्रह्म चिन्मात्रोऽहं सदाऽद्वयः॥७॥

अहं ब्रह्मास्मि कर्ता च भोक्ता चास्मीति ये विदुः।
ते नष्टा[२] ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः॥८॥

धर्माधर्मफलैर्योग इष्टोऽदृष्टो यथाऽऽत्मनः।
शास्त्राद्ब्रह्मत्वमप्यस्य मोक्षो ज्ञानात्तथेष्यताम्॥९॥

बाह्यान्तरद्वैतासत्त्वे लौकिकवैदिकव्यवहारविरहः स्यादिति चेन्नेत्याह—**स्वप्न इति**। यथा स्वप्नो जाग्रद्बोधोदयपर्यन्तं सत्यत्वेन व्यवह्रियते तथा जाग्रदवस्थायां देहादौ मिथ्यात्माभिमाने सति प्रत्यक्षादेः सर्वस्यात्मज्ञानात्प्रागवस्थायां प्रमाणत्वमतो नाविद्यावस्थायां व्यवहारविरहापत्तिरित्यर्थः॥५॥

तर्हि विद्यावस्थायां व्यवहारासिद्धिरित्याशङ्क्य तदा व्यवहारराहित्यमिष्टमेवेत्याह—**व्योमेति**। साक्षी अज्ञानतत्कार्ययोः स्वाभासोदयद्वारेणावभासकश्चिद्रूपः शुद्धोऽज्ञानरहितः। केवलोऽवस्थात्रयरहितः॥६॥

आत्मनो यदुक्तं केवलत्वं तदेव व्यनक्ति—**नामेति**॥७॥

आत्मनो यद्यपि ब्रह्मत्वं तथापि नाद्वयत्वमहं ब्रह्मास्मीतिवदहं कर्ता भोक्ता वाऽस्मीति समुच्चयवादिनां प्रतिपत्तेर्दुर्वारत्वादित्याशङ्क्याह—**अहं ब्रह्मेति**। विरुद्धार्थप्रतिपत्त्या कर्मकाण्डाज्ज्ञानकाण्डाच्च वहिर्मुखत्वेन सर्वपुरुषार्थायोग्यत्वं फलितमाह—**नास्तिकाः स्युरिति**॥८॥

ननु ब्रह्मैवास्मीति प्रतिपत्तुं न शक्यते। तादात्म्यश्रुतीनामन्यपरत्वोपपत्तेरित्याशङ्क्याह—**धर्मेति**। यथाऽऽत्मनो मानान्तरावदृष्टोऽपि धर्मफलै-

---

१. जागरितवस्तुज्ञानं यावद्यथा स्वप्नप्रपञ्चस्य प्रत्ययस्तथैव ब्रह्मसाक्षात्कारं यावज्जगतः सत्यत्वेन प्रत्ययः।

२. न कर्मकाण्डाख्योपासनाविधौ न वा ज्ञानकाण्डाख्योपनिषदि, अविद्यायाऽध्यस्तकर्तृत्वादिधर्माणामात्मनि संसर्गः सम्भवति।

या माहारजनाद्यास्ता वासनाः स्वप्नदर्शिभिः।
अनुभूयन्त एवेह ततोऽन्यः केवलो दृशिः॥१०॥
कोशादिव विनिष्कृष्टः कार्यकारणवर्जितः॥
यथाऽसिर्दृश्यते स्वप्ने तद्वद्बोद्धा स्वयंप्रभः॥११॥
आपेषात्प्रतिबुद्धस्य ज्ञस्य स्वाभाविकं पदम्।
उक्तं नेत्यादिवाक्येन कल्पितयापनेतृणा॥१२॥
महाराजादयो लोका मयि यद्वत्यकल्पिताः।
स्वप्ने तद्वद् द्वयं विद्याद्रूपं वासनया सह॥१३॥

रधर्मफलैश्च सुखदुःखादिभिः सम्बन्धः शास्त्रप्रामाण्यादिष्यते। तथा तस्य तत्त्वमस्यादिवाक्याद् ब्रह्मत्वं तज्ज्ञानादज्ञाननिवृत्त्या तदात्मनैवावस्थानं कैवल्यं चाऽऽस्थेयं शास्त्रप्रामाण्याविशेषादित्यर्थः॥९॥

नन्वात्मनो धर्माधर्मफलयोगो मानान्तराविरोधादुपपद्यते न तथा ब्रह्मत्वं प्रत्यक्षदृष्टकर्तृत्वादिविरोधादित्याशङ्क्य दृष्टान्तेनात्मनि कर्तृत्वादेरध्यस्तत्वं साधयति—**या इति**। या हि स्वप्नावस्थायां श्रुतिसिद्धवासना लिङ्गाश्रयाः स्वप्नदर्शिभिरुपलभ्यन्ते। ताभ्यो लिङ्गसहिताभ्यो दृश्याभ्यो द्रष्टाऽऽत्मा दृशिस्वभावो विलक्षण उपलक्ष्यते। तथैव जागरिते कर्तृत्वादीनामपि दृश्यत्वान्न द्रष्टरि सम्भवोऽस्तीत्यर्थः॥१०॥

आत्मनः स्वप्नावस्थायां दृश्यविलक्षणत्वेन प्रतीतिमेव दृष्टान्तेन स्पष्टयति—**कोशादिति**। असिर्यथा कोशान्निष्कृष्टस्तथा आत्मा कार्यात्कारणाच्च विलक्षणो दृश्यते। यथा चासिरुक्तलक्षणो दृश्यते तथाऽत्मापि स्वप्नसंस्काराश्रय-सूक्ष्मदेहविलक्षणो दृश्यते। न च तस्य दृश्यत्वान्मिथ्यात्वम्। तस्य स्वयंप्रभत्वेन स्वमहिम्ना प्रतीतेरिष्टत्वादित्यर्थः॥११॥

ननु कुतोऽस्य स्वयंप्रकाशत्वं ब्रह्मविलक्षणत्वादित्याशङ्क्य श्रुतिविरोधा-न्नैवमित्याह—**आपेषादिति**॥१२॥

आपेषात्पाणिपेषात् 'तं पाणिनाऽऽपेषं बोधयाञ्चकारे'त्यारभ्य 'स होत्तस्थौ'[१] इति श्रुतेः। प्रतिबुद्धस्य ज्ञस्य प्राणादिविलक्षणस्येति कल्पितस्यापनेतृणे'[२]त्यत्र

---

१. बृ. २.१।
२. अथात आदेशो नेति नेति न ह्येतस्मादिति नेति इति वाक्यं ब्रह्मण्यध्यस्तप्रपञ्चनिषेधकम्।

देहलिङ्गात्मना कार्या वासनारूपिणा क्रियाः।
नेति नेत्यात्मरूपत्वान्न मे कार्या क्रिया क्वचित्॥१४॥
न ततोऽमृतताऽऽशास्ति कर्मणोऽज्ञानहेतुतः।
मोक्षस्य ज्ञानहेतुत्वान्न तदन्यदपेक्षते॥१५॥
अमृतं चाभयं नार्तं नेतीत्यात्मा प्रियो मम।
विपरीतमतोऽन्यद्यत् त्यजेत्तत्सक्रियं ततः॥१६॥

संसारस्यात्मनि समारोपितत्त्वमुक्तम्। तदेव दृष्टान्तेन साधयति—**महाराजेति**। 'तदुतेव महाराजो भवत्युतेव महाब्राह्मण'[१] इत्यादि स्वप्नदशायां निर्दिष्टलोका भोग्यविशेषा अपि स्वप्नदृशि यथा कल्पितास्तद्वद्रूपद्वयं मूर्तामूर्तलक्षणं वासनया सह मयि कल्पितं विद्यादित्यर्थः॥१३॥

स्वप्नप्रपञ्चवज्जाग्रत्प्रपञ्चस्यापि प्रत्यगात्मनि कल्पितत्वे सिद्धे प्रत्यगात्माभिज्ञस्य कर्मासम्भवः[२] सिद्ध्यतीत्याह—**देहेति**॥१४॥

अज्ञानमूलत्वे कर्मणः सिद्धे न तस्मादमृतत्वमपेक्षितव्यमित्याह—**नेति**। भवतु ज्ञानममृतत्वसाधनं तथापि तदेव सहायत्वेन कर्मापेक्षतामित्याशङ्क्य तस्याज्ञाननिवृत्तौ निरपेक्षत्वान्नैवमित्याह—**मोक्षस्येति**॥१५॥

कर्मसाध्यं चेदमृतत्वं तदाऽऽर्तं सभयं च स्यान्न तथेष्टमित्याह—**अमृतमिति**। यद्यपि ब्रह्माभयमनार्तमकर्मसाध्यं च तथापि प्रियस्य भोक्तुरमृतत्वं कर्मसाध्यमित्याशङ्क्याह—**नेतीति**। यो मम प्रियो भोक्तृत्वेनाभिमतः स नेतीत्यात्मा निर्विशेषब्रह्मस्वरूपो न ततोऽन्यस्तस्मान्न मोक्षः[३] कर्मसाध्यः स्यादित्यर्थः। अज्ञानादात्मनि संसारस्याध्यस्तत्वे सिद्धे फलितमाह—**विपरीतमिति**। अतोऽस्माद्-ब्रह्मात्मनोऽन्यद्विरुद्धं रूपं यत्क्रियासहितं तत्ततो ब्रह्मात्मज्ञानादज्ञाननिवृत्त्या परित्यजेत्। तस्माद् ब्रह्मात्माज्ञानमूलस्य संसारस्य ब्रह्मात्माज्ञानादेव केवलान्निवृत्तिरूपपन्नेत्यर्थः॥१६॥

॥इति व्याकृतमेकादशमीक्षितृत्वप्रकरणम्॥११॥

●

---

१. बृ. २.१। २. ब्रह्मणो वासनाहीनत्वात्।
३. परमप्रकाशस्वरूपमोक्षाधिगते तमोरूपाविद्याया अभावात् सकारणं कर्म लयमेति।

अथ द्वादशं प्रकाशप्रकरणम्

प्रकाशस्थं यथा देहं सालोकमभिमन्यते।
द्रष्ट्राभासं तथा चित्तं द्रष्टाऽहमिति मन्यते॥१॥
यदेव दृश्यते लोके तेनाभिन्नत्वमात्मनः।
प्रपद्यते ततो मूढस्तेनात्मानं न विन्दति॥२॥
दशमस्य नवात्मत्वप्रतिपत्तिवदात्मनः।
दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा॥३॥

प्रकाशप्रकरणम्

यद्ययं भोक्ताऽऽत्मा निर्विशेषरूपोऽङ्गीक्रियते तर्हि किमित्यात्मानं तथैव न विजानातीत्याशङ्क्य[१] साभासान्तःकरणाविवेकान्न याथात्म्येनात्मानमात्मा प्रत्येतीति सदृष्टान्तं दर्शयति—**प्रकाशस्थमिति**। यथा प्रभूते प्रकाशे व्यवस्थितं स्थूलं शरीरं ततो विलक्षणमपि तेनालोकेन व्याप्तमालोकाविशिष्टं लोको मन्यते तथाऽयं द्रष्टाऽऽत्मा स्वाभासविशिष्टं चित्रमहमिति मन्यमानो न याथात्म्येनात्मानमवगच्छतीत्यर्थः॥१॥

आत्मनः साभासान्तःकरणे[२]विवेकमुक्त्वा तद्द्वारा देहपर्यन्तमविवेकं दर्शयन्नात्माप्रतिपत्तिमेव प्रदर्शयति—**यदेवेति**। यद्धि साभासचिताविविक्तमिन्द्रियादिदेहपर्यन्तं व्यवहारभूमावुपलभ्यते तेनेन्द्रियादिना द्रष्टुरभिन्नत्वं सर्वत्र चित्तादौ देहान्ते चिदाभासप्रतीतेरयात्मा प्रत्येति। तस्माद्देहादेरात्मनश्चान्योन्यमध्यासकर्ता मूढः सन् मौढ्येनैव हेतुना नात्मानं ब्रह्मत्वेन निश्चिनोतीत्यर्थः॥२॥

उक्तमर्थं दृष्टान्तेन साधयति—**दशमस्येति**। यथा लोके वस्तुतो दशमस्यात्मनो बालकस्य स्वव्यतिरिक्तेषु नवसु बालकेषु व्यापृतचित्तत्वात्तेष्वेव सत्त्वप्रतिपत्तिर्दशमस्तु नास्त्येवेति भ्रान्तिरुपलभ्यते तथैवायं लोको दृश्येषु बुद्ध्यादिषु

---

१. यदि भोक्ताऽपि ब्रह्मैव तर्हि अहमित्यनुभवन्नपि लोको ब्रह्माहमिति किं नानुभवतीत्याशङ्क्य पदार्थशोधनाभावादित्याह।

२. करणादि ख।

त्वं कुरु त्वं तदेवेति प्रत्ययावेककालिकौ।
एकनीडौ कथं स्यातां विरुद्धौ न्यायतो वद॥४॥
देहाभिमानिनो दुःखं नादेहस्य स्वभावतः।
स्वापवत्तत्प्रहाणाय तत्त्वमित्युच्यते दृशेः॥५॥
दृशेश्छाया यदारूढा मुखच्छायेव दर्शने।
पश्यंस्तं प्रत्ययं योगी दृष्ट आत्मेति मन्यते॥६॥
तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः।
स एव योगिनां प्रष्ठो नेतरः स्यान्न संशयः॥७॥

स्वविलक्षणेष्वेव तादात्म्यप्रतिपत्त्या मूढः शास्त्राचार्योपदेशरहित आत्मानं यथावन्नाधिगच्छति[१]। तदाह—**न चान्यथेति।** बुद्ध्यादिष्वात्मवैपरीत्येन ब्रह्मास्मीति यथावदात्मानं न प्रत्येतीत्यर्थः॥३॥

ननु प्रसङ्ख्यानादहमस्मि ब्रह्मेति यथावदात्माऽपरोक्षप्रतिपत्तेर्मोक्षः स्यादिति चेन्नेत्याह—**त्वमिति**॥४॥

दुःखित्वादिज्ञानेन प्रत्यक्षेण शाब्दस्य ज्ञानस्य बाध्यत्वात्तदीयस्थैर्यार्थं प्रसङ्ख्यानं स्यादिति चेन्नेत्याह—**देहेति।** यद्यन्वयव्यतिरेकाभ्यां मिथ्याज्ञानवतो दुःखं कथं तर्हि तन्निवृत्तिरित्याशङ्क्य वाक्योत्थज्ञानादित्याह—**तत्प्रहाणायेति**॥५॥

अहमित्यात्मप्रत्ययेऽपि दुःखित्वप्रतिपत्तेर्न दुःखित्वमविवेककृतमित्याशङ्क्याहमिति प्रत्ययस्य कल्पितात्मविषयत्वान्नैवमित्याह—**दृशेरिति।** यथा मुखस्य छाया आदर्शशब्दिते दर्पणादौ दृश्यते तथैव दृशेरात्मनः छाया प्रतिबिम्बरूपा यस्मिन्नन्तःकरणे समारूढा प्रतीयते तदन्तःकरणमहंप्रत्ययशब्दितं साभासं पश्यन्नात्मा दृष्टो मयेत्माभासज्ञानवान् मन्यते[२]। ततश्चाहमिति दर्शनस्य कल्पितात्मविषयत्वाद्युक्तं दुःखित्वस्याविवेकनिबन्धनत्वमित्यर्थः॥६॥

यदि साभासाहङ्कारं पश्यन् परमार्थदर्शी न भवति कस्तर्हि परमार्थदर्शीत्याशङ्क्याह—**तं चेति।** तमुपाधिभूतं प्रत्ययं परिणामिनं मूढं च मोहात्मकविवेकमन्यं च विवेकरूपं सुखदुःखादि च प्रति [३]साक्षित्वेन वेत्ति, न तु दृशेरात्मनः

---

१. यद्वा दशसंख्याकजनगणनाप्रसङ्गे स्वातिरिक्तं नवसंख्यामेव वेत्ति। तद्वदज्ञानाबाध्यज्ञानशक्त्या-आत्मानमपरिज्ञाय शरीरेन्द्रियादिरूपेणावगच्छति।

२. यथा दर्पणप्रतिबिम्बं न मुखबिम्बाद्भिन्नं तद्वदन्तकरणे प्रतिभासमानोऽहंप्रत्ययो न बिम्बभूतपरमात्मभिन्न इत्यवगच्छति। ३. यदि इति शब्दः संयोज्यः।

विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः।
स स्यादनुभवस्तस्य ततोऽन्योऽनुभवो मृषा॥८॥
दृशिरूपे सदा नित्ये दर्शनादर्शने मयि।
कथं स्यातां ततो नान्य इष्यतेऽनुभवस्ततः॥९॥
यत्स्थस्तापो रवेर्देहे दृशेः स विषयो यथा।
सत्त्वस्थस्तद्वदेवेह दृशेः स विषयस्तथा॥१०॥
प्रतिषिद्धेदमंशो ज्ञः खमिवैकरसोऽद्वयः।
नित्यमुक्तः सदा शुद्धः सोऽहं ब्रह्मास्मि केवलः॥११॥

सम्बन्धित्वेनेदं सर्वं प्रतिपद्यते। स एव परमार्थदर्शी नेतरः पूर्वोक्तसाभासाहङ्कार-दर्शीत्यर्थः॥७॥

सर्वस्यात्मत्वेन प्रतीयमानो देहादिवदहङ्कारो यद्यनात्मत्वेन त्यज्यते तदाऽन्यस्य त्वमर्थस्याप्रतीतेस्तत्त्वमसिवाक्यस्य निरालम्बनत्वं स्यादित्याशङ्क्याह—**विज्ञात इति।** अतो यथोक्तं त्वमर्थमवलम्ब्य तत्त्वमसिवाक्यप्रवृत्तेर्न निरालम्बनत्वाशङ्केति शेषः। यतो विज्ञप्तिरूपः साक्षी त्वं[१] तदसीति बोध्यते ततश्चात्मैवानुभवस्तस्य स्यात्। स्वरूपव्यतिरिक्तोऽनुभवस्तु साधनाधीनत्वान्मिथ्यैवेत्याह—**सस्यादिति**॥८॥

घटादावतिरिक्तस्यानुभवस्य व्यक्तत्वादात्मनोऽपि तथा स्यादित्याशङ्क्य जडत्वाजडत्वाभ्यां विशेषोपपत्तेर्मैवमित्याह—**दृशीति।** आत्मनि सदा स्फुरदात्मके दर्शनादर्शनयोरयोगात्ततोऽतिरिक्तोऽनुभवो [२]नास्तीत्यर्थः॥९॥

सुखदुःखादियुक्तत्वेनात्मनो भानान्न नित्यदृशिमात्रत्वमित्याशङ्क्याह—**यत्स्थ इति।** यथा देहे रवेस्तापो भवन् प्रदेशविशेषाश्रितो दृश्यते। स च साश्रयो दृगात्मनो विषयोऽभ्युपगम्यते। तथैवेहापि व्यवहारभूमावन्तःकरणनिष्ठः सुख-दुःखादिस्तापः स्वीक्रियते। स च तद्वदेव स्वाश्रयेणान्तःकरणेन सह दृगात्मनो दृश्यतयाऽवतिष्ठते तस्माद् दुःखादेस्तापस्य साश्रयस्यात्मदृश्यत्वादात्मनिष्ठत्वशङ्का नास्तीत्यर्थः॥१०॥

आत्मनः सुखदुःखादियुक्तान्तःकरणादिसम्बन्धाभावे फलितमाह—**प्रतिषिद्ध इति**॥११॥

---

१. यं परमात्मानं जिज्ञाससे तत्त्वमेवासि। २. अवेद्यत्वे सत्यपरोक्षविषयत्वादात्मनः।

विज्ञातुर्नैव विज्ञाता परोऽन्यः सम्भवत्यतः।
विज्ञाताऽहं परो मुक्तः सर्वभूतेषु सर्वदा॥१२॥
यो वेदालुप्तदृष्टित्वमात्मनोऽकर्तृतां यथा।
ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः॥१३॥
ज्ञातैवाहमविज्ञेयः शुद्धो मुक्तः सदेत्यपि।
विवेकी प्रत्ययो बुद्धेर्दृश्यत्वान्नाशवान् यतः॥१४॥
अलुप्ता त्वात्मनो दृष्टिर्नोत्पाद्या कारकैर्यतः।
दृश्यया चान्यया दृष्ट्या जन्यतास्याः प्रकल्पिता॥१५॥
देहात्मबुद्ध्यपेक्षत्वादात्मनः कर्तृता [१]मृषा।
नैव किंचित्करोमीति सत्या बुद्धिः प्रमाणजा॥१६॥

ननु विज्ञातुः सर्वदेहेषु भेदस्फुरणान्नाद्वयत्वं ब्रह्मत्वं वेत्याशङ्क्य तद्भेदस्याप्रामाणिकत्वान्नैवमित्याह—**विज्ञातुरिति**॥१२॥

सर्वदेहेष्वद्वयमात्मानं श्रुत्युपदेशानुरोधेन प्रतिपद्यमानस्यापि ब्रह्मविदस्मीत्यभिमानादस्ति सविशेषत्वमित्याशङ्क्याह—**य इति**। यः सर्वाभिमानं परित्यज्य निर्विशेषमात्मानं प्रागुक्तरीत्या साक्षात्करोति स ब्रह्मविदुच्यते[२]। अभिमानलेशमपि भजमानो न तथेत्यर्थः॥१३॥

सर्वविशेषत्यागेऽपि ब्रह्मात्मज्ञानस्यात्मसम्बन्धिता दुर्वारेत्याशङ्क्याह—**ज्ञातैवेति**। उक्तस्य विवेकात्मकस्य प्रत्ययस्य साक्षिविषयत्वान्नाशित्वाच्च परिणामिबुद्धिधर्मत्वादात्मा निर्विशेषो ब्रह्मैवेत्यर्थः॥१४॥

स्वरूपत्वेनाभ्युगतापि दृष्टिरात्मनो नाशवतीत्याशङ्क्याह—**अलुप्तेति**। जन्यत्वप्रतीतेरसिद्धो हेतुरित्याशङ्क्याह—**दृश्ययेति**। अन्तःकरणदृष्टेरात्मदृष्ट्याभासत्वात्तदविवेकादात्मदृष्टौ सर्वो व्यवहारः। वस्तुतः स्वात्मदर्शिनो न कश्चिद् व्यवहारोऽस्तीत्यर्थः[३]॥१५॥

किञ्च मिथ्याज्ञानमूलत्वात्कर्तृत्वादिप्रतिभासस्य मिथ्यात्वादकर्त्रभोक्त्रात्मज्ञानस्य

---

१. आत्मन्यध्यस्तदेहात्मबुद्ध्यादीनां मिथ्यात्वे सिद्धे तज्जन्यकर्तृत्वस्य स्वत एव मिथ्यात्वं सिद्धम्।
२. ज्ञातैवाहमित्यादिको यो विवेकप्रत्ययः सोऽप्यविद्याजन्यत्वान्नाशवानेव तस्मान्न विदुषोऽभिमानोऽप्यस्ति।
३. यं लोकव्यवहारं तात्त्विकमिति मत्वाऽज्ञाः प्रवर्तन्ते, तमेव व्यवहारमतात्त्विकं काल्पनिकञ्च मत्वा तत्त्वविद उपचरन्ति।

कर्तृत्वं कारकापेक्षमकर्तृत्वं स्वभावतः।
कर्ता भोक्तेति विज्ञानं मृषैवेति[1] सुनिश्चितम्॥१७॥
एवं शास्त्रानुमानाभ्यां स्वरूपेऽवगते सति।
नियोज्योऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत्॥१८॥
यथा सर्वान्तरं व्योम व्योम्नोऽप्यभ्यन्तरो ह्यहम्।
निर्विकारोऽचलः शुद्धोऽजरो मुक्तः सदाऽद्वयः॥१९॥

प्रमाणजन्यत्वेन बलवत्त्वाद् ब्रह्मात्मविदो न कश्चिद् व्यवहारोऽस्तीत्याह—**देहात्मेति**॥१६॥

इतश्च कर्तृत्वादि मिथ्याऽमिथ्या चाकर्तृत्वादीत्याह—**कर्तृत्वमिति**॥१७॥

पूर्वोक्तरीत्या वाक्यादापाततो ज्ञानेऽपि साक्षात्कारार्थं प्रसङ्ख्यानं कर्त्तव्यमिति चेत्तदयुक्तम्। उक्तप्रकारेण श्रवणमननाभ्यां ब्रह्मात्मलक्षणे गुरुप्रसादादेव साक्षान्निश्चिते प्रसङ्ख्यानादिशेषे नियोज्योऽहमिति न कथञ्चिदपि बुद्धिरुत्पद्येतेत्याह—**एवमिति**। प्रागवस्थायां यथोक्तज्ञानोत्पत्तेरस्ति नियोज्योऽहमिति बुद्धिरित्याशङ्क्य सापि कल्पितैवेत्याह—**सत्येति**॥१८॥

ब्रह्मविदो नियोज्यत्वादिबुद्धिर्न भवतीत्यत्र निर्विकारत्वादिकं हेतू कुर्वन् प्रकरणार्थमुपसंहरति—**यथेति**॥१९॥

॥इति व्याख्यातं द्वादशं प्रकाशप्रकरणम्॥१२॥

---

१. कर्तृत्वभोक्तृत्वादिवस्तूनां मिथ्यात्वे तत्प्रत्ययस्यापि मिथ्यात्वम्।

अथ त्रयोदशमचक्षुष्ट्वप्रकरणम्

अचक्षुष्ट्वान्न[1] दृष्टिर्मे तथाऽश्रोत्रस्य का श्रुतिः।
अवाक्त्वान्न तु वक्तिः स्यादमनस्त्वान्मतिः कुतः॥१॥
अप्राणस्य न कर्मास्ति बुद्ध्यभावे न वेदिता।
विद्याविद्ये ततो न स्तश्चिन्मात्रज्योतिषो मम॥२॥
नित्यमुक्तस्य शुद्धस्य कूटस्थस्याविचालिनः।
अमृतस्याक्षरस्यैवमशरीरस्य सर्वदा॥३॥
जिघत्सा वा पिपासा वा शोकमोहौ जरामृती।
न [2]विद्यन्तेऽशरीरत्वाद्व्योमवद्व्यापिनो मम॥४॥

अचक्षुष्ट्वप्रकरणम्

पूर्वस्मिन् प्रकरणे प्रसङ्गात्प्रत्यगात्मनः शुद्धत्वमचलत्व चोक्तम्। तदेव स्पष्टीकर्तुं प्रकरणान्तरं प्रस्तौति—**अचक्षुष्ट्वादिति**। चक्षुरादिरहितत्वात्तत्तदिन्द्रियद्वारकबुद्धि-वृत्तिरूपदृष्ट्यादिक्रियाविहीनत्वादात्मनो युक्तं निश्चलत्वेन शुद्धत्वमित्यर्थः॥१॥

कर्तृत्वज्ञातृत्वयोरभावाच्चात्मनो निश्चलत्वेन शुद्धता सिद्धेत्याह—**अप्रमाणस्येति**। बुद्धिसम्बन्धाभावेन ज्ञातृत्वाभावाच्चिन्मात्रस्यात्मनो विद्याऽविद्याऽ-सम्बन्धादपि सिद्धा शुद्धतेत्याह—**विद्येति**॥२॥

आत्मनो विद्याऽविद्याऽसम्बन्धेन शुद्धत्वमेव साधयति—**नित्येति**। विद्याविद्ये न स्यातामिति पूर्वेण सम्बन्धः॥३॥

आत्मनः षडूर्मिसम्बन्धाभावादपि सिद्धा शुद्धतेत्याह—**जिघत्सेति**। अशरीर-त्वादित्युपलक्षणमप्राणत्वादमनस्त्वाच्चेति द्रष्टव्यम्॥४॥

---

१. तथा हि 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्'॥

२. शरीरस्यैव जिघत्सापिपासादयो जायन्ते न शरीरहीनस्य।

अस्पर्शत्वान्न मे स्पृष्टिर्नाजिह्वत्वाद्रसज्ञता।
नित्यविज्ञानरूपस्य ज्ञानाज्ञाने न मे सदा॥५॥
या तु स्यान्मानसी वृत्तिश्चाक्षुष्का रूपरञ्जना।
नित्यमेवात्मनो दृष्ट्या नित्यया दृश्यते हि सा॥६॥
तथाऽन्येन्द्रिययुक्ता या वृत्तयो विषयाञ्जनाः।
स्मृती रागादिरूपा च केवलाऽन्तर्मनस्यपि॥७॥
मानस्यस्तद्वदन्यस्य दृश्यन्ते स्वप्नवृत्तयः।
द्रष्टुर्दृष्टिस्ततो नित्या शुद्धाऽनन्ता च केवला॥८॥
अनित्या साऽविशुद्धेति गृह्यतेऽत्राविवेकतः[१]।
सुखी दुःखी तथा चाहं दृश्ययोपाधिभूतया॥९॥
मूढया मूढ इत्येवं शुद्धया शुद्ध इत्यपि।
मन्यते सर्वलोकोऽयं येन संसारमृच्छति॥१०॥

अनिषिद्धेन्द्रियनिषेधद्वारा तद्द्वारप्राप्तां दृष्ट्यादिविक्रियामात्मनि निषेधति—**अस्पर्शत्वादिति।** आत्मनो विद्याऽविद्यायोरभावे हेत्वन्तरमाह—**नित्येति**॥५॥

आत्मनो दृष्ट्यादयो न सन्तीत्युक्तम्, इदानीमात्मदृष्ट्या भास्यत्वमभिदधानो दृष्टेरात्मभास्यत्वात्ततोऽतिरेकं दर्शयति—**या त्विति।** चाक्षुष्का चक्षुर्द्वारजनिता। रूपरञ्जना रूपाकारा॥६॥

चक्षुर्द्वारकवृत्तावुक्तन्यायं वृत्त्यन्तरेष्वतिदिशति—**तथेति।** केवला चक्षुरादिनिरपेक्षा मनस्यन्तर्वर्तमाना वृत्तिः सर्वाऽपि दृश्यैवात्मदृष्ट्येति सम्बन्धः॥७॥

किञ्च स्वप्नावस्थायां विद्यमाना वृत्तयो मनोविपरिणामात्मिकास्ततो व्यतिरिक्तस्यैव द्रष्टुर्दृश्या यथा स्वीक्रियन्ते तथा जागरितेऽपि सर्वा दृष्टयो व्यतिरिक्तस्य द्रष्टुर्दृश्या दृश्यत्वाविशेषादित्याह—**मानस्य इति।** कूटस्थदृष्टिभास्यत्वे भास्यदृष्टीनां सिद्धे फलितमाह—**द्रष्टुरिति**॥८॥

कूटस्था चेदात्मदृष्टिरिष्टा कथं तत्रान्यथा प्रथेत्याशङ्क्य वृत्तिमदन्तःकरणाविवेकादित्याह—**अनित्येति**॥९॥

मिथ्याभिमानादेव संसारप्राप्तिरित्युक्तमेव व्यनक्ति—**मूढयेति**॥१०॥

---

१. शुद्धा नित्याश्चात्मवृत्तयः कथमन्यथा जायन्ते, तदुच्यते, अविवेकज्ञानवशादिति।

अचक्षुष्कादिशास्त्रोक्तं सबाह्याभ्यन्तरं त्वजम्।
नित्यमुक्तमिहात्मानं मुमुक्षुश्चेत्सदा स्मरेत्॥११॥
अचक्षुष्कादिशास्त्राच्च नेन्द्रियाणि सदा मम।
अप्राणो ह्यमनाः शुभ्र इति चार्थर्वणं वचः॥१२॥
शब्दादीनामभावश्च श्रूयते मम काठके।
अप्राणो ह्यमना यस्मादविकारी सदा ह्यहम्॥१३॥
विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः॥१४॥
अमनस्कस्य शुद्धस्य कथं तत् स्याद् द्वयं मम।
अमनस्त्वाविकारित्वे विदेहव्यापिनो मम॥१५॥
इत्येतद्यावदज्ञानं(तं) तावत्कार्यं ममाभवत्।
नित्यमुक्तस्य शुद्धस्य बुद्धस्य च सदा मम॥१६॥

कथं तर्हि संसारनिवृत्तिरित्याशङ्क्य मुमुक्षुं शिक्षयति—**अचक्षुष्कादीति**। इह जन्तूनां मध्ये कश्चिन्मुमुक्षुः स्याच्चेत् स तर्हि स्वमात्मानमुक्तरूपं सदा स्मरेदिति[१] सम्बन्धः॥११॥

यदात्मनः चक्षुरादिराहित्यमुक्तं तत्रापि प्रमाणमाह—**अचक्षुष्कादीति**। आत्मनो यत्प्राणेन मनसा वा सम्बन्धराहित्यमुक्तं तत्रापि प्रमाणमाह—**अप्राण इति**॥१२॥

आत्मनो निर्विशेषत्वे श्रुत्यन्तरमुदाहरति—**शब्दादीनामिति**। प्राणादिसम्बन्धराहित्यादविकारित्वाच्च[२] मुमुक्षुत्वसिद्धिरित्याह—**अप्राणो हीति**॥१३॥

अविकारित्वप्रयुक्तं फलं कथयति—**विक्षेप इति**। तर्हि विक्षेपसमाधी कुत्र स्यातामित्याशङ्क्याह—**विक्षेपो वेति**॥१४॥

आत्मनि पुनरविकारिणि मनःसम्बन्धाभावात्र विक्षेपादिद्वयं युक्तमित्याह—**अमनस्कस्येति**। कथं पुनरमनस्कत्वमविकारित्वं च सिद्धमित्याशङ्क्य देहसम्बन्धाभावादमनस्कत्वं व्यापित्वादविकारित्वमित्याह—**अमनस्त्वेति**॥१५॥

कथं तर्हि जिज्ञासावस्थायां तव समाध्यादि कर्तव्यमिति बुद्धिरासीत्तत्राह—

---

१. आत्मस्वरूपमेव स्मरेन्नान्यद् बाह्यवस्तुजातमिति।

२. मनः प्राणेन्द्रियादिसम्बलितं ह्यन्तःकरणं विकारोत्पत्तौ कारणम्। आत्मनि प्राणादीनामभावात्र विकारसम्भावनाऽपि।

समाधिर्वाऽसमाधिर्वा कार्यं चान्यत्कुतो भवेत्।
मां हि ध्यात्वा च बुद्ध्वा च मन्यन्ते कृतकृत्यताम्॥१७॥

अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बुद्धोऽस्म्यतः सदा।
अजः सर्वत एवाहमजरश्चाक्षयोऽमृतः॥१८॥

मदन्यः सर्वभूतेषु बोद्धा कश्चिन्न विद्यते।
कर्माध्यक्षश्च साक्षी च चेता नित्योऽगुणोऽद्वयः॥१९॥

न सच्चाहं न चासच्च नोभयं केवलः शिवः।
न मे सन्ध्या न रात्रिर्वा नाहर्वा सर्वदा दृशेः॥२०॥

सर्वमूर्तिवियुक्तं यद्यथा खं सूक्ष्ममद्वयम्।
तेनाप्यस्मि विना भूतं ब्रह्मैवाहं तथाऽद्वयम्॥२१॥

इतीति। एतच्छब्देनात्मनो नित्यमुक्तत्वादि गृह्यते। स्वतः समाधानादेर्न कार्यतेत्यत्र हेतुं सूचयति—**नित्येति**॥१६॥

यथोक्तात्मस्वरूपपरिज्ञानेऽपि समाधानादि कर्तव्यमित्याशङ्क्य हेत्वभावान्नैवमित्याह—**समाधिर्वेति**। समाधिर्वाऽसमाधिर्वेत्यत्र हेतुमाह—**मां हीति**। प्रत्यगात्मनो ध्यानद्वारा साक्षात्कारे सति कृतकृत्यतायाः सिद्धत्वात्कर्तव्यशेषासिद्धिरित्यर्थः॥१७॥

ननु परमात्मध्यानादिना कृतकृत्यतासिद्धावपि कथमात्मध्यानादिना तत्सिद्धिरित्याशङ्क्य ब्रह्मात्मभेदाभावान्नैवमित्याह—**अहमिति**॥१८॥

ननु प्रतिदेहं चेतनभेदे भासमाने कथं तव ब्रह्मत्वमिति चेत्तत्राह—**मदन्य इति**। तथापि कर्तृत्वादिना भासमानस्य कुतस्ते ब्रह्मत्वमित्याशङ्क्याह—**कर्मेति**। चेता विशेषतो विज्ञाता॥१९॥

आत्मनः सर्वविशेषरहितत्वेन क्रियाशेषत्वायोगाच्च युक्तं ब्रह्मत्वमित्याह—**न सदिति**। मूर्तं भूतत्रयं सदित्युक्तम्। अमूर्तं भूतद्वयमसदित्युच्यते। उभयं मूर्तामूर्तात्मकभूतपञ्चकम्। तथापि सन्ध्यादिकालविशेषसम्बन्धात्कथं सर्वविशेषशून्यतया परिशुद्धत्वेन ब्रह्मत्वमात्मनः स्यादित्याशङ्क्याह—**न म इति**। तत्र हेतुः **सर्वदेति**॥२०॥

सदा चिदेकतानस्यात्मनो युक्तं ब्रह्मत्वमिति सदृष्टान्तं दर्शयति—**सर्वेति**। यथा खल्वाकाशं सर्वस्मात्परिच्छिन्नाकाशाद्विलक्षणमिति सूक्ष्ममालक्ष्यते तथेदं ब्रह्म

ममात्माऽस्य त आत्मेति भेदो व्योम्नो यथा भवेत्।
एकस्य सुषिभेदेन तथा मम विकल्पितः॥२२॥

भेदोऽभेदस्तथा चैको नाना चेति विकल्पितः।
ज्ञेयं ज्ञाता गतिर्गन्ता मय्येकस्मिन् कुतो भवेत्॥२३॥

न मे हेयं न चादेयमविकारी यतो ह्यहम्।
सदा मुक्तस्तथा शुद्धः सदा बुद्धोऽगुणोऽद्वयः॥२४॥

इत्येवं सर्वदाऽऽत्मानं विद्यात्सर्वं समाहितः।
विदित्वा मां स्वदेहस्थं[१]मृषिर्मुक्तो ध्रुवो भवेत्॥२५॥

परिपूर्णमत्यन्तसूक्ष्मं द्वैताभावोपलक्षितमिष्यते। तस्माद् ब्रह्मणोऽद्वितीयत्वादात्मनस्ततो भेदायोगादात्मैवास्मीत्यर्थः। तर्हि ब्रह्माकाशयोर्दृष्टान्तदार्ष्टान्तिकत्वेन भेदात् कुतो ब्रह्मद्वितीयत्वमित्याशङ्क्याह—**तेनेति**। आकाशेनापि विनाभूतं वस्तुतो विरहितमेव ब्रह्मेष्यते व्यवहारतस्तस्य दृष्टान्तत्वात्। वस्तुतो भेदाभावादद्वयमेव ब्रह्मेत्यर्थः। एकमद्वयपदमा[२]काशेन सम्बध्यते द्वितीयं ब्रह्मणेत्यपौनरुक्त्यम्॥२१॥

ननु कथमद्वितीयब्रह्मत्वं तव? त्वयि भेदप्रतीतेरित्याङ्क्य भेदप्रतीतेरौपाधिकत्वाद्वास्तवमेकत्वमविरुद्धमिति दृष्टान्तेन परिहरति—**ममेति**॥२२॥

पूर्वं प्रत्यगात्मानवगतेरविद्यावशाद्विशेषव्यवहारेऽपि प्रत्यगात्मन्यवगते सति परमार्थतो न कश्चिदपि विशेषोऽस्तीत्याह—**भेदोऽभेद इति**॥२३॥

हेयोपादेयसम्बन्धान्निर्विशेषत्वमात्मनोऽसिद्धमित्याशङ्क्य निर्विकारत्वान्मैवमित्याह—**न मे इति**। मुक्तत्वाद्युपादेयमशुद्धत्वादिहेयमित्याशङ्क्याह—**सदेति**॥२४॥

यस्मादेवं शास्त्राचार्याभ्यां नित्यमुक्तत्वादिलक्षण आत्मा दर्शितस्तस्मादुक्तलक्षणमात्मानमद्वितीयं श्रवणमननिदिध्यासनोपेतः सर्वदा ब्रह्मास्मीति विद्यान्मुमुक्षुरित्याह—**इतीति**। यथोक्तविद्याफलं कथयति—**विदित्वेति**॥२५॥

---

१. अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः (का. २.६.१७) इति श्रुत्याऽत्मनो देहस्थत्वज्ञापनात्।

२. एकमेवाद्वितीयमिति श्रुत्या बोधितं स्वसजातीयविजातीयस्वगतभेदशून्यम्।

३. नैकोपाधिभिर्यथैकमाकाशं घटाकाशं मठाकाशमित्यात्मना प्रतीयते तथैव काल्पनिकोपाधिभेदैर्भिन्नमिव ब्रह्मतत्त्वं प्रतिभाति।

कृतकृत्यश्च सिद्धश्च योगी ब्राह्मण एव च।
य एवं वेद तत्त्वार्थमन्यथा ह्यात्महा[1] भवेत्।।२६।।
वेदार्थो निश्चितो ह्येष समासेन मयोदितः।
संन्यासिभ्य प्रवक्तव्यः शान्तेभ्यः शिष्टबुद्धिना।।२७।।

उक्तपरमार्थतत्त्वपरिज्ञाने फलं प्रपञ्चयति विपक्षे प्रत्यवायं च दर्शयति—**कृतकृत्य इति।** उक्तस्यार्थस्य प्रामाणिकत्वं दर्शयन् प्रतिपत्तिसौकर्यं सूचयति—**वेदार्थ** इति। शास्त्राचार्यानुशिष्टबुद्धरुपदेष्टृत्वमभिप्रेत्य विशिनष्टि—**शिष्टेति।।२७।।**

।।इति विवृतं त्रयोदशमचक्षुष्ट्वप्रकरणम्।।१३।।

---

१. आत्मनो यथार्थस्वरूपापरिज्ञानादात्महेत्युच्यते।

अथ चतुर्दशं स्वप्नस्मृतिप्रकरणम्

स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते।
पुरा नूनं तदाकारा[1] धीर्दृष्टेत्यनुमीयते॥१॥

भिक्षामटन् यथा स्वप्ने दृष्टो देहो न स स्वयम्।
जाग्रद्दृश्यात्तथा देहाद् द्रष्टृत्वादन्य एव सः॥२॥

मूषासिक्तं तथा ताम्रं तन्निभं जायते तथा।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम्॥३॥

व्यञ्जको वा यथाऽऽलोको व्यङ्ग्यस्याकारतामियात्।
सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा[2] प्रदृश्यते॥४॥

स्वप्नस्मृतिप्रकरणम्

पूर्वस्मिन् प्रकरणे बुद्ध्यविवेकादात्मनि सुखदुःखादिसंसारप्रतीतिः स्वतस्तु शास्त्रप्रामाण्यादहं ब्रह्मास्मीति ज्ञानान्निवृत्ताज्ञानतत्कार्यो नित्यमुक्तोऽयं प्रत्यगात्मेत्युक्तम्। इदानीं परोक्षत्वाद्बुद्धेः सुखदुःखादिसंसारप्रतिभासस्य चापरोक्षत्वान्न बुद्ध्यविवेकनिबन्धना संसारप्रतीतिरात्मनीत्याशङ्क्य बुद्धेरपरोक्षत्वं साधयति— **स्वप्नस्मृत्योरिति।** स्वप्ने स्मृतौ च घटादेर्विषयजातस्याकारभेदो यस्मादुपलभ्यते तस्मात्पूर्वं जाग्रद्दशायामनुभवावस्थायां च तत्तदाकारा बुद्धिरेव दृष्टेति कल्प्यते। पूर्वमदृष्टाया स्मृत्यादौ स्फुरणायोगादतो वृत्तिमती बुद्धिर्वृत्तिद्वारेणानेकार्थसंस्कारोपेता साभासा स्वप्नादावपरोक्षा प्रतिभातीत्यर्थः॥१॥

स्वप्नादौ बाह्यविषयाभावाद् बुद्धिरेव तत्तद्वासनावासिता दृश्यते चेत्तावता प्रकृते किमायातमित्याशङ्क्य दृश्याद् बुद्ध्यादिसङ्घातान् द्रष्टुरात्मनो विवेक सिद्ध्यतीति सदृष्टान्तमाह—**भिक्षामिति**॥२॥

बुद्धेरर्थाकारेण दृश्यमानत्वं दृष्टान्तेन स्पष्टयति—**मूषेति**॥३॥

ताम्रादेरग्निसम्पर्काद् द्रुतस्य मूषानिषिक्तस्य कठिनमूषाभिघातेन शैत्यापत्तौ

---

१. संस्कारोत्स्फुरितविषयैः सहेन्द्रियप्रणाल्या निर्गतान्तःकरणस्य तदाकारेण परिणते स्वाप्निकप्रपञ्चप्रत्ययः।

२. स्वप्ने हि वाह्यप्रकाशस्याभावाद् अन्तःकरणावच्छिन्नचैतन्यस्यैव प्रकाशः। अतश्चैतन्यमेव व्यञ्जकत्वेनालोकात्मना बोधकत्वेन ज्ञानात्मना च विषयाकारेण परिणमते।

धीरेवार्थस्वरूपा हि पुंसा दृष्टा पुराऽपि च।
न चेत्स्वप्ने कथं पश्येत्स्मरतो वाऽऽकृतिः कुतः॥५॥
व्यञ्जकत्वं तदेवास्या रूपाद्याकारदृश्यता।
द्रष्टृत्वं च दृशेस्तद्वद् व्याप्तिः स्याद्धिय उद्भवे॥६॥
चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः।
मया यस्मात्प्रकाश्यन्ते सर्वस्यात्मा ततो ह्यहम्॥७॥
करणं कर्म कर्ता च क्रिया स्वप्ने फलं च धीः।
जाग्रत्येवं यतो दृष्टा द्रष्टा तस्मादतोऽन्यथा॥८॥

मृषाकारापत्तावपि बुद्धेरमूर्त्तायास्ताम्रादिविलक्षणाया विषयव्याप्तावपि कुतस्तदाकारापत्तिरित्याशङ्क्य दृष्टान्तान्तरमाह—**व्यञ्जको वेति**॥४॥

बुद्धेरन्वयमुखेन प्रत्यक्षत्वं स्वप्नस्मृत्योरित्यत्रोक्तमनुवदति—**धीरेवेति।** यस्माद् बुद्धिरेव विषयाकारा जागरिते पूर्वानुभवे च पुरुषेणोपलब्धा तस्मात्तस्याः स्मृतिस्वप्नयोरर्थाकाराया दर्शनमविरुद्धमित्यर्थः। तदेव व्यतिरेकमुखेन स्फोरयति—**न चेदिति।** यद्यर्थाकारा धीर्जागरिते न दृष्टा कथं तर्हि स्वप्ने दृश्येत। तत्र बुद्धिव्यतिरिक्तार्थाभावाददृष्टस्फुरणायोगाच्च। यदि पूर्वानुभवकाले बुद्धिरर्थाकारा नानुभूता तर्हि पुरुषस्य स्मरतः स्मृतेराकृतिर्न स्याद् बुद्धिव्यतिरिक्तस्यार्थस्याकारप्रदस्य तत्रासत्वाद् बुद्ध्यारूढस्यापि तस्यानुभूतत्वे तदाकारप्रदत्वायोगात्। तस्माज्जागरिते पूर्वानुभवे च धियो विषयाकारायाः सिद्धं प्रत्यक्षत्वमित्यर्थः॥५॥

यत्तु व्यञ्जकत्वादालोकवदर्थाकारा धीरित्युक्तम्। तदयुक्तम्। अर्थाकारत्वमन्तरेणापि स्वच्छस्वभावत्वेन व्यञ्जकत्वसम्भवादित्याशङ्क्याह—**व्यञ्जकत्वमिति।** चेतनेन बुद्धेर्दृश्यत्वे द्रष्टुश्चेतनस्य परिणामित्वमापद्येतेत्याशङ्क्याह—**द्रष्टृत्वं चेति।** यथा बुद्धेर्विषयाकारेण दृश्यत्वमेव व्यञ्जकत्वं तथा बुद्धिवृत्तीनां धर्माधर्मवशादुत्पत्तौ चिदात्मनः सन्निधिमात्रेण व्याप्तिस्तत्साक्षित्वं दृशेरात्मनो द्रष्टृत्वं न परिणामित्वमित्यर्थः॥६॥

बुद्धितद्वृत्तिसाक्षित्वेन चेतनस्यापरिणामित्वेऽपि न ब्रह्मरूपता युक्ता प्रतिदेहं बुद्धिभेदेन साक्षिभेदादित्याशङ्क्य साक्षिभेदे प्रमाणाभावान्नैवमित्याह—**चिन्मात्रेति**॥७॥

चेतनस्य सर्वत्रैकत्वेऽपि दृश्यस्य बुद्ध्यादेरनेकत्वान्नाद्वितीयब्रह्मतेत्याशङ्क्य क्रियाकारकफलात्मकदृश्यप्रपञ्चस्यानिर्वाच्यज्ञानविजृम्भितमात्रत्वाच्चेतनस्य ब्रह्मत्व-

बुद्ध्यादीनामनात्मत्वं [१]हेयोपादेयरूपतः।
हानोपादानकर्ताऽऽत्मा न त्याज्यो न च गृह्यते॥९॥

सबाह्याभ्यन्तरे शुद्धे प्रज्ञानैकरसे घने।
बाह्यमाभ्यन्तरं चान्यत्कथं हेयं प्रकल्प्यते॥१०॥

य आत्मा नेति नेतीति परापोहेन शेषितः।
स चेद्ब्रह्मविदात्मेष्टो यतेतातः परं कथम्॥११॥

अशनायाद्यतिक्रान्तं[२] ब्रह्मैवास्मि निरन्तरम्।
कार्यवान् स्यां कथं चाहं विमृशेदेवमञ्जसा॥१२॥

मविरुद्धमित्याह—**करणमिति**। स्वप्ने करणादेः सर्वस्य बुद्धिव्यतिरेकेणाभावाद् बुद्धेश्च सुषुप्तावज्ञानात्ममात्रत्वाज्जागरितेऽपि करणादिरूपेण बुद्धिरेव स्वप्नवद्यस्माद् द्रष्टा तस्माद् बुद्धिसाक्षी साक्ष्याया बुद्धेरन्यथाक्रियाकारकफलविलक्षणो लक्ष्यते। तथा च दृश्यस्य सर्वस्य मिथ्यात्वाद्युक्ता साक्षिणो ब्रह्मतेत्यर्थः॥८॥

बुद्ध्यादीनामात्मसम्बन्धित्वेन प्रतीयमानानां कथमनात्मत्वमित्याशङ्क्यागमापायित्वाद्वस्त्रादित्याह—**बुद्ध्यादीनामिति**। आत्मन्यपि स्यादागमापायित्वमित्याशङ्क्याह—**हानेति**॥९॥

आत्मनः स्वरूपेण हानोपादानयोरभावे तत्सम्बन्धित्वेन प्राप्तस्य वाह्यस्याभ्यन्तरस्य च हानोपादाने स्यातामिति चेन्नेत्याह—**सवाह्येति**। हेयमिति उपलक्षणमुपादेयमपि द्रष्टव्यम्॥१०॥

वस्तुस्वभावानुसारेणात्मसम्बन्धि त्याज्यमुपादेयं वा नास्तीत्युक्तम्। इदानीं विद्वत्प्रतिभासानुसारेणापि हानोपादानादिव्यवहारो न सम्भवतीत्याह—**य आत्मेति**॥११॥

कूटस्थं निर्विशेषं ब्रह्मात्मतत्त्वं स्वानुभवगम्यत्वात्तन्निश्चयार्थं स्वयमेवात्मविद्विवेक्तुमर्हतीत्याह—**अशनायेति**। षडूर्मिवर्जितं ब्रह्मैवास्मीति साक्षान्निश्चित्य कार्यवत्त्ववचनमनुभवविरुद्धत्वान्न सिद्ध्यतीत्यर्थः॥१२॥

---

१. यथा हेयरूपप्रपञ्चस्योपादानत्वेनाज्ञानस्यानात्मत्वम्, तथैव स्वाप्निकप्रपञ्चबोधने स्मरणात्मिकायाश्चित्तवृत्तेरपि हेयोपादानत्वेनानात्मत्वम्।

२. अनुभूते हि परमरसे नान्यस्मिन् रसे जागर्ति भोगेच्छा।

पारगस्तु यथा नद्यास्तत्स्थः पारं यियासति।
आत्मज्ञश्चेत्तथा कार्यं कर्तुमन्यदिहेच्छति॥१३॥

आत्मज्ञस्यापि यस्य स्याद्धानोपादानता यदि।
न मोक्षार्हः स विज्ञेयो वान्तोऽसौ ब्रह्मणा ध्रुवम्॥१४॥

सादित्यं हि जगत्प्राणस्तस्मान्नाहर्निशैव वा।
प्राणज्ञस्यापि न स्यातां कुतो ब्रह्मविदोऽद्वये[1]॥१५॥

न स्मरेदात्मनो ह्यात्मा विस्मरेद्वाऽप्यलुप्तचित्।
मनोऽपि स्मरतीत्येतज्ज्ञानमज्ञानहेतुजम्॥१६॥

ज्ञातुर्ज्ञेयः परो ह्यात्मा सोऽविद्याकल्पितः स्मृतः।
अपोढे विद्यया तस्मिन् रज्ज्वां सर्प इवाद्वयः॥१७॥

पूर्वोक्तरीत्या विमर्शेऽपि विविदिषावाक्यसिद्धस्य वेदानुवचनादेः सत्त्वशुद्धि-हेतुत्वेन ज्ञानोत्पत्तिहेतोर्व्यापारस्य परित्यागो न सम्भवतीत्याशङ्क्य ज्ञानिनस्तदसम्भवं दृष्टान्तेन प्रतिपादयति—**पारग इति**। इह—श्रेयोमार्गे॥१३॥

आत्मज्ञस्यापि हानोपादानव्यापाराङ्गीकारे को दोषः स्यादित्याशङ्क्याह—**आत्मज्ञस्येति**॥१४॥

'सन्ध्यां नोपासते विप्रास्ते कथं ब्राह्मणाः स्मृता' इत्यादिस्मृतेर्ब्रह्मविदोऽपि सन्ध्यावन्दनादिव्यापारेऽवश्यंभावीत्याशङ्क्य प्राणस्वरूपसाक्षात्कारेऽपि नाहोरात्रादि-विभागः सम्भवति। ब्रह्मात्मनि पुनः साक्षात्कृते तस्मिन्नद्वितीये नाहोरात्रादिविभागः सम्भवतीति किमुत वक्तव्यम्, अतो न ब्रह्मविदः सन्ध्यावन्दनादिव्यापार-सिद्धिरित्याह—**सादित्यमिति**॥१५॥

ब्रह्मविदो बाह्यक्रियाभावेऽपि स्वात्मनि विस्मृतिं परिहृत्य स्मृतिर्मोक्षाय कर्तव्येत्याशङ्क्याह—**न स्मरेदिति**। स्मरणविस्मरणयोरभावे हेतुमाह—**अलुप्तेति**। आत्मनि स्मरणास्मरणयोरभावेऽपि मनोज्ञानादूर्ध्वमाविर्भावतिरोभावात्मना वर्तमान-माविर्भावतिरोभावशान्त्यर्थमात्मानं स्मरिष्यतीत्याशङ्क्याह—**मनोऽपीति**॥१६॥

प्रत्यगात्मनः स्वात्मनि स्मरणाभावेऽपि परमात्मनि भविष्यतीत्याशङ्क्याह—**ज्ञातुरिति**। यदि परमात्मा प्रत्यगात्मनो ज्ञेयोऽभिप्रेतस्तर्हि स दृश्यत्वादविद्याकल्पितो रज्जुसर्पवद् विद्वद्भिरुपगतस्तथा च रज्ज्वां कल्पिते सर्पे रज्जुज्ञानान्निरस्ते रज्जुरेव

---

१. ब्रह्मविदः सर्वकर्मसन्न्यासान्नित्यकर्माभावेऽपि न प्रायश्चित्तविधिः।

कर्तृकर्मफलाभावात् सबाह्यभ्यन्तरं ह्यजम्।
ममाहं वेति यो भावस्तस्मिन् कस्य कुतो भवेत्।।१८।।

आत्मा ह्यात्मीय इत्येष भावोऽविद्याप्रकल्पितः।
आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलम्।।१९।।

दृष्टृ श्रोतृ तथा मन्तृ विज्ञात्रेव तदक्षरम्।
द्रष्ट्राद्यन्यन्न तद्यस्मात्तस्माद् द्रष्टाऽहमक्षरम्।।२०।।

स्थावरं जङ्गमं चैव द्रष्टृत्वादिक्रियायुतम्।
सर्वमक्षरमेवातः सर्वस्याऽऽत्माऽक्षरं[1] त्वहम्।।२१।।

अकार्यशेषमात्मानमक्रियात्मक्रियाफलम्।
निर्ममं निरहङ्कारं यः पश्यति स[2] पश्यति।।२२।।

यथाऽवशिष्यते तथा ब्रह्मात्मविद्ययाऽविद्यानिवृत्त्या कल्पिते सर्वस्मिन्नपाकृते प्रत्यगात्मैवाद्वितीयोऽवशिष्टो भवतीत्यर्थः।।१७।।

प्रत्यगात्मनो वस्तुतोऽद्वितीयत्वेऽपि तस्मिन्ममाहमिति संसारस्य प्रतीयमानत्वात्तन्निवृत्तये स्यादनुष्ठानमित्याशङ्क्य ज्ञानात्प्रागनुष्ठानेऽपि नोर्ध्वं तत्सिद्धिरित्याह—**कर्त्रिति**।।१८।।

आत्मविदो देहादावहङ्कारममकारयोरभावे हेतुमाह—**आत्मा हीति**। आत्मैकत्वे सतीति शेषः।।१९।।

केन प्रमाणेनात्मैकत्वं ज्ञातुं शक्यमित्याशङ्क्य वाक्यबलादित्याह—**द्रष्ट्रिति**। द्रष्ट्राद्यन्यन्न तद्यस्मात्तस्माद्रष्टाऽहमक्षरं तदेव प्रकृतमक्षरं द्रष्ट्रादिरूपेण वर्तते, न तु तस्मादक्षराद्द्रष्ट्रादिनामाऽस्ति। यस्मादेवं तस्माद् द्रष्ट्रादिरूपेण प्रसिद्धोऽहं प्रत्यगात्मा ब्रह्मैवाक्षरमिति वाक्यवशादैक्यप्रतिपत्तिरित्यर्थः।।२०।।

अक्षरस्य सर्वात्मकत्वादात्मनश्चातथात्वात्कथमेकत्वमित्याशङ्क्यात्मनोऽपि सर्वात्मकत्वमक्षरात्मकस्याविशिष्टमित्याह—**स्थावरमिति**।।२१।।

तर्हि स्थावरजङ्गमत्वेन सप्रपञ्चत्वं ब्रह्मात्मनः स्यादित्याशङ्क्य सर्वविशेषशून्यं चिन्मात्रमात्मतत्त्वमित्याह—**अकार्य इति**।।२२।।

---

१. सर्वेष्वपि प्रपञ्चेषु कूटस्थमविनश्यत्स्वरूपेण ब्रह्मतत्त्वमेवानुभूयते।

२. कार्यकारणरहितं सर्वविकारशून्यमात्मनो यथार्थस्वरूपं यो वेत्ति स आत्मविदित्यर्थः।

ममाहङ्कारयत्नेच्छाः शून्या एव स्वभावतः।
आत्मनीति यदि ज्ञातमाध्वं स्वस्थाः किमीहितैः॥२३॥
योऽहङ्कर्तारमात्मानं तथा वेत्तारमेव च।
वेत्त्यानात्मज्ञ एवासौ योऽन्यथाज्ञः स आत्मवित्॥२४॥
यथान्यत्वेऽपि तादात्म्यं देहादिष्वात्मनो मतम्।
तथाऽकर्तुरविज्ञानात्फलकर्मात्मताऽऽत्मनः॥२५॥
दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टा जनैः सदा।
तासामात्मस्वरूपत्वादतः प्रत्यक्षताऽऽत्मनः॥२६॥

आत्मविदोऽपि कर्माभ्युपगमादस्ति कार्यशेषत्वमित्याशङ्क्याह—**ममेति।** आत्मस्वरूपानुभवानुरोधादात्मनि ममाहङ्कारादीनामसत्त्वे ज्ञाते तेनैव ज्ञानेन कृतकृत्यत्वात्कर्मणां विफलत्वादात्मनः तच्छेषत्वासिद्धिरित्यर्थः॥२३॥

देहव्यतिरिक्तात्मदर्शिनः सर्वेषु पारलौकिककर्मसु अधिकाराभ्युपगमादस्त्यात्मविदोऽपि कर्मशेषतेत्याशङ्क्य तस्यात्मवित्त्वाभावान्नैवमित्याह—**योऽहमिति।** कर्तृत्वभोक्तृत्वप्रमातृत्वेनात्मानं जानन्नात्मज्ञो न चेत्तर्हि कः स्यादात्मविदित्याशङ्क्य योऽहंकर्त्रादिसाक्षिणमात्मानं वेत्ति स भवत्यात्मविदित्याह—**योऽन्यथेति**॥२४॥

आत्मा चेदहङ्कारादतिरिच्यते तर्हि तस्मिन्नात्मनि कथं कर्तृत्वभोक्तृत्वप्रथेत्याशङ्क्याह—**यथान्यत्वेऽपीति।** आत्मनो देहादिभ्यो वस्तुतोऽन्यत्वेऽपि तेषु तादात्म्यमाध्यासिकं यथाऽभिमतं तथैवाकर्तुरभोक्तुरपरिज्ञानादहङ्काराध्यासद्वारा[1] कर्तृता भोक्तृता च भातीत्यर्थः॥२५॥

अहङ्काराविवेकादात्मनि कर्तृत्वादिभ्रान्तिरित्ययुक्तम्। सवृत्तिकस्याहङ्कारस्यात्मनश्च व्यतिरेकासिद्धेरित्याशङ्क्याह—**दृष्टिरिति।** दृष्ट्यादीनां सान्तःकरणानां साक्षिवेद्यत्वात्ततो व्यतिरेकः साक्षिणः स्वप्ने सिद्ध्यतीत्यर्थः। दृष्ट्यादीनामन्तःकरणसहितानां दृश्यत्वेन तत्साक्षिणो व्यतिरेकमुक्त्वा सुषुप्ते दृष्ट्यादीनामज्ञानात्ममात्रत्वेनास्तमयादद्वितीयस्य तस्यापरोक्षचिन्मात्रत्वोपपत्तेश्च[2] सुघटो व्यतिरेकः स्यादित्याह—**तासामिति**॥२६॥

---

१. यथार्थस्वरूपापरिज्ञानात्।

२. जाग्रत्स्वप्नप्रपञ्चस्य लयादात्ममात्रमवशिष्यते।

परलोकभयं यस्य नास्ति मृत्युभयं[१] तथा।
तस्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेन्द्रा अपीश्वराः॥२७॥
ईश्वरत्वेन किं तस्य ब्रह्मेन्द्रत्वेन वा पुनः।
तृष्णा चेत्सर्वतश्छिन्ना सर्वदैन्योद्भवाऽशुभाः॥२८॥
अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि।
अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा॥२९॥
बुद्ध्यादौ सत्युपाधौ च तथाऽसत्यविशेषता।
यस्य चेदात्मनो ज्ञाता तस्य कार्यं कथं भवेत्॥३०॥
प्रसन्ने विमले व्योम्नि प्रज्ञानैकरसेऽद्वये।
उत्पन्नात्मधियो ब्रूत किमन्यत्कार्यमिष्यते[२]॥३१॥

अहंकर्तृव्यतिरेकापादनेन तत्साक्षिणो ब्रह्मत्वापादनेन च को लाभः स्यादित्याशङ्क्य परलोकसम्बन्धिभयाभावो मृत्युभयाभावश्चेत्यभिप्रेत्य द्विविधभयाभावज्ञापकं दर्शयति—**परलोकेति।** कृतार्थत्वेन प्रसिद्धा ब्रह्मेन्द्रादयोऽपि यदा शोच्यत्वेनात्मविदो ज्ञायन्ते तदा तस्योभयोरभावाधिगतिरित्यर्थः॥२७॥

न तेषां शोच्यत्वं प्रार्थनीयत्वादित्याशङ्क्य ब्रह्मविदस्तत्प्रार्थनाभावान्नैवमित्याह—**ईश्वरेति**॥२८॥

कदा तर्हि ब्रह्मात्मज्ञो भवतीत्याशङ्क्याह—**अहमिति।** शास्त्राचार्यानुगृहीतस्य पदार्थविवेकवतो यस्मिन् काले बुद्धिद्वयं न प्रवर्तकं तस्मिन् काले तस्य वाक्याद्यथोक्ता विद्योदेतीत्यर्थः॥२९॥

यथोक्तज्ञानोत्पत्त्यनन्तरं ज्ञानवतो नास्ति कार्यशेषत्वमित्याह—**बुद्ध्यादाविति।** अवस्थाद्वये बुद्ध्यादावुपाधौ विद्यमाने, सुषुप्ते च तस्मिन्नसति यस्य शास्त्राचार्यानुगृहीतस्यात्मनो निर्विशेषता वेदाश्चेत्प्रमाणमिति(वत्) निश्चिताऽवगता तदा तस्य कृतार्थत्वान्न कथञ्चित्कार्यं सम्भवतीत्यर्थः॥३०॥

आत्मविदो नास्ति कार्यावशेषतेत्यत्र हेत्वन्तरमाह—**प्रसन्न इति।** आगन्तुकनैसर्गिकदोषरहिते व्योमवन्निरवयवत्वादिलक्षणे चैतन्यतावन्मात्रे कार्य-

---

१. अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते (ईशा. ११) इति श्रुत्यनुरोधेन कर्मणि प्रवृत्तस्य न मृत्युभयमित्यर्थः।

२. सर्वविकल्पशून्यविषयकज्ञानवतो न किमपि कर्तव्यमवशिष्यते।

आत्मानं सर्वभूतस्थममित्रं चात्मनोऽपि यः।
पश्यन्निच्छत्यसौ नूनं शीतीकर्तुं विभावसुम्॥३२॥
प्रज्ञाप्राणानुकार्यात्मा छायेवाक्षादिगोचरः।
ध्यायतीवेति चोक्तो हि शुद्धो मुक्तः स्वतो हि सः॥३३॥
अप्राणस्याऽमनस्कस्य तथाऽसंसर्गिणो दृशेः।
व्योमवद्व्यापिनो ह्यस्य कथं कार्यं [1]भवेन्मम॥३४॥
असमाधिं न पश्यामि निर्विकारस्य सर्वदा।
ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्विपाप्मनः॥३५॥

कारणविभागशून्ये ब्रह्मण्यहस्मीति उत्पन्नज्ञानस्य न कार्यमवशिष्टमस्तीत्ययुक्ता कार्यशेषतेत्यर्थः॥३१॥

नन्वात्मविदोऽपि श्रेयोऽवाप्तिप्रतिबन्धकस्य शत्रोः सम्भवात्तत्परिहारार्थं किञ्चिदनुष्ठेयं स्यादिति चेन्नेत्याह—**आत्मानमिति**। यथा रवेरुष्मस्वभावस्य शीतीकरणमशक्यं तथा निर्विशेषब्रह्मात्मविदोऽपि मित्रामित्रादिदर्शनायोगान्नानुष्ठानशेषोपपत्तिरित्यर्थः॥३२॥

किञ्चात्मनः सोपाधिकस्य निरुपाधिकस्य वा कार्यशेषत्वमिति विकल्प्याऽऽद्यमङ्गीकरोति—**प्रज्ञेति**। यथा चन्द्रादिछाया जलपात्रानुविधायिनी तच्चलनादिकमनुकरोति। तथाऽऽत्माभासोऽपि बुद्ध्यादिगतो बुद्ध्यविवेकात्प्रज्ञाप्राणश्चेत्युभयानुकारीति। ध्यायतीव लेलायतीवेति श्रुत्योच्यते। तस्मादात्मा सोपाधिकः सन् कार्यशेषो भवत्येवेत्यर्थः। द्वितीयं दूषयति—**शुद्ध इति**। स्वतश्चात्मा शुद्धो मुक्तो निश्चलो यस्मादालक्ष्यते ततो नासौ कार्यशेषतां गन्तुमर्हतीत्यर्थः॥३३॥

निरुपाधिकस्यात्मनो न कार्यशेषतेत्युपपादयति—**अप्राणस्येति**। क्रियाशक्तिभागेन ज्ञानशक्तिभागेन चोपाधिना सम्बन्धविधुरस्य स्वभावतश्चासंसर्गिणोऽसङ्गस्य चैतन्यमात्रस्याकाशवदनवच्छिन्नस्य कर्त्तव्यं नैव सम्भवति। ततो न निरुपाधिकस्य कार्यशेषोपपत्तिरित्यर्थः॥३४॥

आत्मविदोऽपि कस्यचिदसमाधानविधूननार्थं व्यापारः स्यादित्याशङ्क्य सर्वदा निर्विकारत्वात्तस्य मे नासमाधिरित्याह—**असमाधिमिति**। तथापि शोद्धव्यस्य पाप्मनः

---

१. यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः। (ईशावास्यो. ६)

गन्तव्यं च तथा नैव सर्वगस्याऽचलस्य च।
नोर्ध्वं नाधस्तिरो वापि निष्कलस्यागुणत्वतः॥३६॥

चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते।
कथं कार्यं ममैवाद्य नित्यमुक्तस्य[1] शिष्यते॥३७॥

अमनस्कस्य का चिन्ता क्रिया वाऽनिन्द्रियस्य का।
'अप्राणो ह्यमनाः शुभ्र' इति सत्यं श्रुतेर्वचः॥३८॥

अकालत्वाददेशत्वाददिक्त्वादनिमित्ततः।
आत्मनो नैव कालादेरपेक्षा ध्यायतः[2] सदा॥३९॥

शोधनार्थं व्यापारः स्यादित्याशङ्क्य विशुद्धब्रह्मस्वभावत्वान्नैवमित्याह—**ब्रह्मण इति**॥३५॥

अन्यत्र पश्यामीत्युक्तं तदयुक्तम्। गन्तव्यस्य गमनसाधनस्य च ब्रह्मविदो ज्ञातव्यत्वादित्याशङ्क्यानवच्छिन्नत्वादचलत्वाच्चात्मनो निर्गुणब्रह्मनिष्ठस्य गन्तव्यं गमनसाधनं च नैव पश्यामीत्याह—**गन्तव्यं चेति**। किञ्च निर्गुणत्वान्निरवयवत्वाच्चात्मनो देशभेदाभावान्न गन्तव्यादिविभागसिद्धिरित्याह—**नोर्ध्वमिति**॥३६॥

आत्मनो गुणादिरहितत्वं कथमित्याशङ्क्य चिन्मात्रज्योष्ट्वात्तस्मिन् गुणादिहेतोरज्ञानस्य सदैवासत्त्वादित्याह—**चिन्मात्रेति**। एवंलक्षणस्य मम नित्यमुक्तस्येदानीमवगतब्रह्मभावस्य न कथञ्चिदपि कार्यं विधातुं शक्यमिति फलितमाह—**कथमिति**॥३७॥

किञ्चात्मविदोऽज्ञानासम्बन्धात्तत्कार्येण मनसा चक्षुरादिना च सम्बन्धाभावादुभयविधक्रियाऽसिद्धेर्नास्ति क्रियाशेषतेत्याह—**अमनस्कस्येति**। आत्मनो मनःप्राणादिराहित्ये प्रमाणमाह—**प्रमाण इति**। निर्दोषस्य श्रुतिवचसो यथार्थत्वादज्ञानमूलयोर्मनःप्राणयोरात्मविदोऽभावान्न तस्य क्रियोपपत्तिरित्यर्थः॥३८॥

किञ्च कालादिरहितत्वादात्मनः सदा[3] तथाविधमात्मानमवगच्छतो नैव कालादेरपेक्षा क्रियोपयुक्ता। तस्मान्नात्मविदोऽस्ति क्रियाशेषतेत्याह—**अकालत्वादिति**। निमित्तं राहुदर्शनसङ्क्रमणादि॥३९॥

---

१. कार्यकारणादीनामविद्याजन्यतया न प्रकाशपुञ्जे ज्ञानस्वरूपेऽवतिष्ठन्ते।

२. सर्वदेशकालातीतात्मज्ञानवतो न कालादिज्ञानस्यापेक्षा।

३. अतः परं 'तथाविधत्वादज्ञानमूलयोर्मनःप्राणयोर्मामात्मानमवगच्छतो' इति पाठः—क।

यस्मिन् देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम्।
व्रजेत्तन्मानसं तीर्थं यस्मिन् स्नात्वाऽमृतो भवेत्।।४०।।

न चास्ति शब्दादिरनन्यवेदनः परस्परेणापि न चैव दृश्यते।
परेण दृश्यास्तु यथा रसादयः तथैव दृश्यत्वत एव दैहिकाः।।४१।।

अहंममेत्येषणयत्नविक्रियासुखादयस्तद्वदिह प्रदृश्यतः।
दृश्यत्वयोगाच्च परस्परेण ते न दृश्यतां यान्ति ततः परो भवान्।।४२।।

अहंक्रियाद्या हि समस्तविक्रिया सकर्तृका कर्मफलेन संहता।
चितिस्वरूपेण समन्ततोऽर्कवत् प्रकाश्यमानाऽसितातात्मनो ह्यतः।।४३।।

दृशिस्वरूपेण हि सर्वदेहिनां वियद्यथा व्याप्य मनांस्यवस्थितः।
अतो न तस्मादपरोऽस्ति वेदिता परोऽपि तस्मादत [1]एक ईश्वरः।।४४।।

आत्मविदो देशकालादिसव्यपेक्षे कर्मण्यपेक्षाभावेऽपि प्रयागादितीर्थे स्यादपेक्षा तस्य मुक्तिहेतुत्वस्मरणादित्याशङ्क्य ब्रह्मात्मज्ञानलक्षणे तीर्थे साक्षादेव मुक्तिहेतौ स्नातस्य नास्ति तीर्थान्तरापेक्षेत्याह—**यस्मिन्निति**।।४०।।

एवं कृतार्थत्वापादकं ब्रह्मात्मज्ञानं केन लभ्यमित्याशङ्क्य पदार्थविवेकवता मुमुक्षुणेति विवक्षिततत्वात् पदार्थविवेकमुक्तमेव सङ्क्षिप्य वक्तुमादौ स्थूलदेहव्यतिरेकमात्मनो विशदयति—**न चेति**।।४१।।

एवं स्थूलदेहव्यतिरेकमात्मनस्तद्ग्राहकस्योक्त्वा सूक्ष्मदेहव्यतिरेकं तस्योपन्यस्यति—**अहमिति**। स्थूलदेहवदहङ्कारादयः सूक्ष्मदेहात्मका व्यवहारे न स्वतः सिद्ध्यन्ति। नापि तस्मादेव हेतोस्ते परस्परेण दृश्यन्ते। अतः स्वतोऽन्योन्यतश्च ग्रहणायोगात्तद्ग्राहकस्ततो व्यतिरिक्तः स्यादित्यर्थः।।४२।।

अहङ्कारादिग्राहकस्य ततो व्यतिरिक्तत्वेऽपि तत्सम्बन्धप्रतीतेर्नित्यमुक्तत्वासिद्धिरित्याशङ्क्य तत्सम्बन्धस्यापि साक्षत्विान्नैवमित्याह—**अहंक्रियेति**।।४३।।

बुद्धितद्वृत्तिसाक्षित्वेनासितत्त्वमनवरुद्धत्वमात्मनो यद्यपि सिद्धं तथापि न ब्रह्मत्वं लभ्यते। प्रतिदेहं भेदप्रतीतेरित्याशङ्क्य तद्भेदे प्रमाणाभावाद्युक्ता ब्रह्मात्मतेत्याह—**दृशीति**।।४४।।

---

१. तथा च श्रुतिः 'इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः'।। (का. १.३.१.)

शरीरबुद्ध्योर्यदि चान्यदृश्यता निरात्मवादाः सुनिराकृता मया।
परश्च शुद्धो ह्यविशुद्धिकर्मतः सुनिर्मलः सर्वगतोऽसितोऽद्वयः॥४५॥

घटादिरूपं यदि तेन गृह्यते मनः प्रवृत्तं बहुधा स्ववृत्तिभिः।
अशुद्ध्यचिद्रूपविकारदोषता मतेर्यथा वारयितुं न पार्यते॥४६॥

यथा विशुद्धं गगनं निरन्तरं न [1]सज्जते नापि च लिप्यते तथा।
समस्तभूतेषु सदैव तेष्वयं समः सदात्मा ह्यजरोऽमरोऽभयः॥४७॥

अमूर्तमूर्तानि च कर्मवासना दृशिस्वरूपस्य बहिः प्रकल्पिताः।
अविद्यया ह्यात्मनि मूढदृष्टिभिरपोह्य नेतीत्यवशेषितो दृशिः॥४८॥

प्रबोधरूपं मनसोऽर्थयोगजं स्मृतौ च सुप्तस्य च दृश्यतेऽर्थवत्।
तथैव देहप्रतिमानतः पृथग् दृशेः शरीरं च मनश्च दृश्यतः॥४९॥

देहद्वयसाक्षी ब्रह्मस्वभावश्चेदात्मा कुतस्तर्हि तस्य नास्तित्वादिकमेके मन्यन्ते तत्राह—**शरीरेति**। देहद्वयस्यान्येन स्थायिना ग्राह्यता यदि प्रागुक्तन्यायेन प्रतिपन्ना, तदा श्रुतिप्रत्यभिज्ञादिप्रमया बौद्धादिराद्धान्ता निराकृता भवन्ति, स चायं साक्षी संसारहेतुधर्माधर्माख्यकर्मणः सकाशात्परो व्यतिरिक्तो यतः सिद्धोऽतः सुनिर्मलोऽनवच्छिन्नो[2] द्वैतस्य दृश्यतया[3] तत्सम्बन्धरहितश्च सिध्यतीत्यर्थः॥४५॥

बुद्धिशरीरयोरात्मदृश्यत्वे सम्प्रतिपत्त्यभावमाशङ्क्योक्तलक्षणमात्मानमिच्छता तयोर्दृश्यत्वमाश्रयितव्यमित्याह—**घटादीति**। बहुधा स्ववृत्तिभिः प्रवृत्तं मनो पटाद्याकारं यदि ते तव पक्षे न गृह्यते तदा बुद्धिवदात्मनो दोषपरम्परा निवारयितुं न शक्यते। साक्षित्वानभ्युपगमे सत्यवश्यंभावित्वादित्यर्थः॥४६॥

घटादिरूपस्य मनसो दृश्यत्वेऽपि सर्वभूतस्थत्वादात्मनः सङ्गादिदोषात्कुतः सुनिर्मलत्वमित्याशङ्क्याह—**यथेति**॥४७॥

कथमात्मनो विशुद्धत्वमित्याशङ्क्यामूर्तादिनिराकरणद्वारेण श्रुत्याऽऽत्मस्वरूपप्रतिपादनादित्याह—**अमूर्त्तेति**॥४८॥

अमूर्तमूर्तादीनामात्मसम्बन्धित्वेन प्रतीयमानानां कुतः श्रुत्या निराकरणमित्याशङ्क्य स्थूलसूक्ष्मदेहात्मकानां सर्वेषां दृश्यत्वादित्याह—**प्रबोधरूपमिति**। अर्थवदित्यर्थाकारं मनसो रूपं दृश्यत इत्यन्वयः। देहप्रतिभा देहवासना॥४९॥

---

१. घटाद्युपाधिना नावछिद्यते। २. सर्वविकल्पातीतः।
३. दृश्यस्य मिथ्यात्वसाधकत्वे हेतुत्वमाह।

स्वभावशुद्धे गगने घनादिके मलेऽपयाते सति चाविशेषता।
यथा च तद्वच्छ्रुतिवारितद्वये सदाऽविशेषो गगनोपमे दृशौ॥५०॥

ननु श्रुत्या प्रतीयमानसंसारनिरासद्वारेणात्मा प्रतिपाद्यते चेन्निवृत्तसंसारस्यानिवृत्तसंसारस्य चाविशेषत्वादनित्यत्वादिदोषप्रसक्तिरित्याशङ्क्याह—**स्वभाव इति।** स्वभावशुद्धत्वाद् दृशो न कदाचिदध्यस्तनिवृत्तिव्यतिरेकेण स्वरूपे विशेषः स्यात्। निवृत्तिस्तु मिथ्याप्रतियोगिकत्वादधिष्ठानभूतदृगात्मव्यतिरिक्ता न भवतीत्यर्थः[१]॥५०॥

॥इति विवृतं चतुर्दशं स्वप्नस्मृतिप्रकरणम्॥१४॥

●

१. स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वरूपे चतुर्थमिथ्यात्वे त्रैकालिकनिषेधस्याधिष्ठानस्वरूपत्वेन स्वीकारात्।

अथ पञ्चदशं नान्यदन्यत्प्रकरणम्

नान्यदन्यद्भवेद्यस्मान्नान्यत्किञ्चिद्विचिन्तयेत्।
अन्यस्यान्यात्मभावे हि नाशस्तस्य ध्रुवो भवेत्॥१॥
स्मरतो दृश्यते दृष्टं पटे चित्रमिवार्पितम्।
यत्र येन च तौ ज्ञेयौ सत्त्वक्षेत्रज्ञसंज्ञकौ॥२॥
फलान्तं चानुभूतं यद्युतं कर्त्रादिकारकैः।
स्मर्यमाणं हि कर्मस्थं पूर्वं कर्मैव तच्चितः॥३॥

नान्यदन्यत्प्रकरणम्

सत्यज्ञानानन्दपूर्णानाद्यन्तं द्वैतवर्जितम्। ब्रह्माहमस्म्यहं ब्रह्मास्म्यसङ्गो नित्यमुक्त ॐ। केचिदेकदेशीयाः स्वभावशुद्धो न भवत्यात्मा किन्तु संसारी सन्नेव ज्ञानध्यानादिसाधनेन ब्रह्मभावमेष्यतीति मन्यन्ते तान् प्रत्याह—**नान्यदन्यदिति**। अन्यदब्रह्मरूपं स्वरूपे स्थिते नान्यद्ब्रह्म भवितुमर्हति तद्रूपस्थितिविरोधात्[1]। नापि तद्रूपे नष्टे तस्यान्यभावस्तस्यैव प्राप्तुरभावात्। यत एवं ततोऽब्रह्माहं संसारी ब्रह्म भविष्यामीति न किञ्चिदन्यच्चिन्तयेदित्यर्थः। यदि ब्रह्मणोऽन्यस्याब्रह्मणः संसारिणो ध्यानादिनाऽन्यब्रह्मभावः साध्येत तदा तस्य संसारिणः स्वरूप-नाशोऽवश्यंभावी स्यात्। तस्मादात्मनो ब्रह्मभावं मोक्षमिच्छता न ब्रह्मात्मभेदो वास्तवोऽस्तीति स्वीकर्तव्यमित्याह—**अन्यस्येति**॥१॥

अन्यस्यान्यभावासम्भवान्न चेदन्यद्ध्येयं न च स्वात्मनि ध्यानं सम्भवति कथं तर्हि निदिध्यासनविधिः स्यादित्याशङ्क्य नैरन्तर्येण पदार्थविवेकसम्पादनं तदर्थः स्यादित्यभिप्रेत्याह—**स्मरत इति**। दृष्टं नीलपीतादि स्मरतो यत्रान्तःकरणे तद्वासनामयं पटे चित्रमिवार्पितमुपलभ्यते। येन चेतनेन तद्दृश्येत तौ सत्त्वं क्षेत्रज्ञश्चेत्येवमात्मकेन विवेकेन ज्ञातव्यावित्यर्थः॥२॥

अन्तःकरणस्याप्रत्यक्षत्वात्कथं तत्रस्थं नीलपीतादि स्मृतौ द्रष्टुं शक्यमित्याशङ्क्याह—**फलान्तमिति**। कर्त्रादिकारकैर्युक्तं सुखादिफलावसानं च यद्द्वैतं

---

१. 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा. ६.१.४) इति श्रुत्योपादानस्यैव सत्ताप्रतिबोधनात्।

द्रष्टुश्चान्यद्भवेद् दृश्यं दृश्यत्वाद्घटवत्सदा।
दृश्याद् द्रष्टाऽसजातीयो न धीवत्साक्षिताऽन्यथा॥४॥
स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः।
जात्यादिः शववत्तेन तद्वन्नानात्मताऽन्यथा॥५॥
न प्रियाप्रिय इत्युक्तेर्नादेहत्वं क्रियाफलम्।
देहयोगः क्रियाहेतुस्तस्माद्विद्वान् क्रियास्त्यजेत्[१]॥६॥

पूर्वमनुभूतं तदिदानीं स्मर्यमाणं कर्मस्थं दृश्यात्मतया स्थितमिव दृश्यते। यस्मात्पूर्वदृष्टस्येदानीमाश्रयत्वेन चेतोऽनुभूयते तस्मात्पूर्वमपि चित्कर्मतया चेतोऽनुभूतं गम्यते। अन्यथाऽन्तःकरणे तत्स्मरणानुपपत्तेरित्यर्थः॥३॥

केचिदात्मैव द्रष्टा दृश्यश्चेत्याश्रयन्तः स्वाश्रयं वासनामयं रूपं स्वयमेव द्रष्टा पश्यतीति नान्तःकरणस्य प्रत्यक्षतेत्याचक्षते तान् प्रत्याह—**द्रष्टुश्चेति।** द्रष्टृदृश्ययोर्भेदेऽपि परिणामित्वेन साजात्यमाशङ्क्याह—**दृश्यादिति।** यदि तयोरसजातीयत्वं मिथो विलक्षणत्वं नेष्यते तर्हि धीवदेव साक्षिताऽऽत्मनो न स्यात्, परिणामित्वादित्यर्थः॥४॥

ननु भवत्येवात्मा साक्षी ब्राह्मण्यादिजातिमतस्तस्य विधिशेषत्वादित्याशङ्क्याह—**स्वात्मेति।** असौ जात्यादिः स्वस्मिन्नात्मबुद्धितादात्म्याध्यासमपेक्ष्य विधीनां प्रवर्तकः स्यात्। यथा शवो मम माता मम पितेति वाऽध्यासानुसारेण संस्कारप्रयोजको दृश्यते न त्वध्यासाभावे संस्कारप्रयोजकत्वं तस्योपलभ्यते। तेन शववदेव जात्यादिरात्मधर्मो न भवति। अन्यथा जात्यादिमत्त्वे घटवदात्मनोऽनात्मत्वप्रसङ्गादित्यर्थः॥५॥

नाध्यासात् कर्तृत्वं मोक्षाय विदुषोऽपि क्रियानुष्ठानादित्याशङ्क्याह—**न प्रियेति।** यत्क्रियाफलं तत्प्रियाप्रियसंस्पर्शि दृष्टम्। मोक्षे चाशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति श्रुतेर्नाप्रियप्रियसंस्पर्शोऽस्ति। ततोऽशरीरत्वं कैवल्यं क्रियाफलम्। किन्तु देवादिदेहप्राप्तिरेव तत्फलम्। यस्मान्मोक्षो न क्रियासाध्यः देहयोगस्तु क्रियया साध्यते। तस्मादेवं विद्वान् 'न कर्मसाध्या मुक्तिः ज्ञानादेव तु से'ति विजानन् विशुद्धसत्त्वो ब्रह्मात्मत्वं जिज्ञासमानः सर्वाणि कर्माणि त्यक्त्वा ज्ञानसाधनश्रवणादिनिष्ठः स्यादित्यर्थः॥६॥

---

१. विहितं कर्मैव फलोन्मुखं सत्प्रारब्धप्रयोजकम्। यतः कर्मणो देहयोगस्य हेतुत्वेन बन्धकारणत्वान्न मोक्षनिमित्तता तस्मादात्मविद्भिः कर्माणि त्याज्यानि।

कर्मस्वात्मा स्वतन्त्रश्चेन्निवृत्तौ च तथेष्यताम्।
अदेहत्वे फलेऽकार्ये ज्ञाते कुर्यात्कथं क्रियाः[१]।।७।।
जात्यादीन् सम्परित्यज्य निमित्तं कर्मणां बुधः।
कर्महेतुविरुद्धं यत्स्वरूपं शास्त्रतः स्मरेत्।।८।।
आत्मैकः सर्वभूतेषु तानि तस्मिंश्च खे यथा।
पर्यगाद्व्योमवत्सर्वं शुक्रं दीप्तिमदिष्यते।।९।।
व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत्।
शुद्धापापतया लेपं लिङ्गं चाकायमित्युत।।१०।।
वासुदेवो यथाऽश्वत्थे स्वदेहे चाब्रवीत्समम्।
तद्वद्वेत्ति य आत्मानं समं स ब्रह्मवित्तमः।।११।।

ननु सर्वेषां कर्मणामात्मकर्त्तव्यत्वेन प्रतीतेर्न विद्वान् क्रियास्त्यक्तुं शक्नोतीति चेन्नेत्याह—**कर्मस्विति।** कामादियुक्तस्य व्यापारेषु स्वाधीनतावद्विशुद्धसत्त्वस्य बुभुत्सोस्तत्त्यागेऽपि स्वातन्त्र्यमस्तीत्यर्थः। कर्मसु प्रयोजनाभावाच्च परित्यागो मुमुक्षोः सिद्ध्यतीत्याह—**अदेहत्व इति।** देहादिराहित्ये मोक्षलक्षणफले कर्मभिरसाध्ये शास्त्रादिना सिद्धे केनापि प्रकारेण मुमुक्षुर्न कर्माणि पारयतीत्यर्थः।।७।।

किं क्रियापरित्यागमात्रादेवाकार्यं विदेहत्वं प्राप्यते नेत्याह—**ज्यात्यादीनिति।।८।।**

आत्मा किंलक्षणः स्मर्तव्यः किं वा शास्त्रमित्याशङ्क्य यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते[२]। 'सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमि'ति मन्त्रद्वयं व्याकरोति—**आत्मैक इति।।९।।**

व्रणस्नाय्वोरिति च। सर्वदोषविनिर्मुक्तो निर्विशेषोऽद्वितीयः सन्नात्मा शास्त्राचार्यद्वारा सदाऽनुसन्धातव्यो मुमुक्षुणेत्यर्थः।।१०।।

यथोक्तमात्मानं यो वेत्ति स ब्रह्मविदामुत्तमो भवतीत्याह—**वासुदेव इति।** अश्वत्थे निकृष्टे स्वदेहे चोत्कृष्टे सममात्मानं भगवानुक्तवान्। 'अश्वत्थः सर्ववृक्षाणां' 'वृष्णीनां वासुदेवोऽस्मी'ति[३]।।११।।

---

१. क्रियाणां कार्यसिद्धौ प्रयोजकत्वम्, मोक्षस्य कार्यविरहित्वेन न तत्साधकत्वे कर्मणामुपयोगित्वम्।
२. ईशावास्ये।   ३. भ. गी. ११। २६, २७।

यथा ह्यन्यशरीरेषु ममाहन्ता न चेष्यते।
अस्मिंश्चापि तथा देहे धीसाक्षित्वाविशेषतः॥१२॥
'रूपसंस्कारतुल्या धी रागद्वेषौ भयं च यत्।
गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धोऽभयः सदा'॥१३॥
यन्मनास्तन्मयोऽन्यत्वे नात्मत्वाप्तौ क्रियाऽऽत्मनि।
आत्मत्वे चानपेक्षत्वात्सापेक्षं हि न तत्स्वयम्॥१४॥
खमिवैकरसा ज्ञप्तिरविभक्ताऽजराऽमला।
चक्षुराद्युपधाना सा विपरीता विभाव्यते॥१५॥

तद्युक्तम्, तस्योपाधिविशेषे ममाहङ्काराभावात्, न तथा मुमुक्षोर्युक्तमुपाधिविशेषे ममाहङ्कारोपलब्धेरित्याशङ्क्याह—**यथेति**। ममाहमोर्भावो ममाहन्ता सा मां प्रत्यन्यदेहेषु यथा नेष्यते, तथा स्वदेहेऽपि सा नेष्यते। साक्षित्वस्योभयत्र तुल्यत्वादित्यर्थः॥१२॥

मुमुक्षोः रागद्वेषादिदोषस्यात्मसम्बन्धित्वेन प्रतीतेर्न ममाहङ्कारादिराहित्यमित्याशङ्क्याह—**रूपेति**। नीलपीतादिसंस्कारेण तुल्यो भवत्याधिराश्रयो ययोस्तौ रागद्वेषौ तथा रूपादिवासनाया रागद्वेषयोर्भयस्य दुःखादेश्चान्तःकरणनिष्ठत्वेनानुभवादात्मा शुद्धः सिद्ध्यतीत्यर्थः॥१३॥

ननु न सदाऽऽत्मनः शुद्धिर्युक्ता, किन्तु 'यं यं वापि स्मरन् भावमि'ति स्मृतेरशुद्धोऽपि पुरुषो ब्रह्मभावनया ब्रह्म भविष्यतीत्याशङ्क्याह—**यन्मना इति**। यस्मिन् देवादौ मनो यस्येति यन्मनाः। ध्यायी पुमानुक्तः स तन्मयो भवतीत्यन्यत्वे सति ध्यानादिक्रियायास्तत्रार्थवत्त्वसम्भवादात्मत्वस्यात्मरूपावस्थानस्य मोक्षस्यावाप्तौ नैव क्रिया स्वात्मन्यर्थवती भवितुमुत्सहते। स्वात्मरूपस्य चतुर्विधक्रियाफलविलक्षणत्वात्। आत्मत्वे सति क्रियापेक्षाभावान्मोहमात्रव्यवहितत्वाच्च न तत्र क्रियापेक्षा युक्ता। यदि च क्रियासापेक्षं कैवल्यमिष्टं न तर्हि तदात्मस्वरूपं सिद्ध्येत् क्रियापेक्षस्यानात्मत्वादित्यर्थः[1]॥१४॥

चिदेकरसत्वाद्विभागादिमलाभावाच्च सदा शुद्धत्वमात्मनः श्रद्धेयमित्याह—**खमिवेति**। एवंविधा चेदेषा ज्ञप्तिस्तर्हि जायते नश्यतीत्यादिप्रतीतिस्तत्र कथमित्याशङ्क्याह—**चक्षुरादीति**॥१५॥

---

१. कैवल्यस्यात्मस्वरूपत्वान्न कर्मभिः साधयितुं शक्यते। तस्याकार्यत्वादविकारिरूपत्वाच्च। कर्मभिः साधयितुमिष्यते चेदनात्मवस्त्वेव सिद्ध्येत्।

दृश्यत्वादहमित्येष नात्मधर्मो घटादिवत्।
तथाऽन्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो ह्यतः॥१६॥

सर्वप्रत्ययसाक्षित्वादविकारी च सर्वगः।
विक्रियेत यदि द्रष्टा बुद्ध्यादीवाल्पविद्भवेत्[१]॥१७॥

न दृष्टिर्लुप्यते द्रष्टुश्चक्षुरादेर्यथैव तत्।
नहि द्रष्टुरिति ह्युक्तं तस्माद्द्रष्टा सदैकदृक्॥१८॥

सङ्घातो वाऽस्मि भूतानां करणानां तथैव च।
व्यस्तं वाऽन्यतमो वाऽस्मि को वाऽस्मीति विचारयेत्॥१९॥

व्यस्तं नाहं समस्तं वा भूतमिन्द्रियमेव वा।
ज्ञेयत्वात्करणत्वाच्च ज्ञाताऽन्योऽस्माद्घटादिवत्॥२०॥

आत्माग्नेरिन्धना बुद्धिरविद्याकामकर्मभिः[२]।
दीपिता प्रज्वलत्येषा द्वारैः श्रोत्रादिभिः सदा॥२१॥

यदमलत्वमात्मनो दर्शितं तत्प्रपञ्चयति—**दृश्यत्वादिति**। प्रत्ययशब्देन परिणामा गृह्यन्ते। दोषा रागादयः॥१६॥

अहमादेरात्मधर्मत्वाभावेऽपि नात्मनो विशुद्धिः सिद्ध्यति विकारित्वात्परिच्छिन्नत्वाच्चेत्याशङ्क्याह—**सर्वेति**। विक्रियावत्त्वे च सर्वसाक्षित्वानुपपत्तिरित्याह—**विक्रियेति**॥१७॥

आत्मनोऽपि बुद्ध्यादिवदल्पप्रकाशकत्वमेव ज्ञानस्य साधनाधीनस्योत्पत्तिविनाशवत्त्वादित्याशङ्क्याह—**नेति**। भुङ्क्ते पश्यतीति भुक् साक्षीत्यर्थः॥१८॥

यस्मादात्मा शुद्धस्वभावोऽपि सन्नुपाधिसम्बन्धादन्यथा प्रतीयते तस्मादात्मानं ब्रह्मत्वेन प्रतिपत्तुं पदार्थविवेकं कुर्यादित्याह—**सङ्घातो वेति**॥१९॥

विचारफलं पदार्थविवेकं कथयति—**व्यस्तमिति**॥२०॥

व्यस्तमिति पदार्थविवेकं दर्शयित्वेदानीमवस्थात्रयविवेकद्वारा तत्साक्षिणस्तुरीयस्याधिगमप्रकारं दर्शयति—**आत्माग्नेरिति**। आत्मैवाग्निरिध्यते दीप्यते

---

१. बुद्धिपदेनात्रान्तःकरणवृत्तिर्ग्राह्या। साक्षिचैतन्यं नान्तःकरणवृत्तिवद्विकारि, तथा सति चैतन्यस्यापि जडत्वमापद्येत।

२. अन्तःकरणवृत्तेरविद्याकर्मसम्बन्धित्वेनेन्धनत्वमुक्तम्।

दक्षिणाक्षिप्रधानेषु यदा बुद्धिर्विचेष्टते।
विषयैर्हविषा दीप्ता ह्यात्माग्निः स्थूलभुक्तदा॥२२॥
हूयन्ते तु हवींषीति रूपादिग्रहणे स्मरन्।
अरागद्वेष आत्माग्नौ जाग्रद्दोषैर्न लिप्यते॥२३॥
मानसे तु गृहे व्यक्तः सोऽविद्याकर्मवासनाम्।
पश्यंस्तैजस आत्मोक्तः स्वयंज्योतिः प्रकाशिता॥२४॥
विषया वासना वापि चोद्यन्ते नैव कर्मभिः।
यदा बुद्धौ तदा ज्ञेयः प्राज्ञ आत्मा ह्यनन्यदृक्[1]॥२५॥
मनोबुद्धीन्द्रियाणां च ह्यवस्थाः कर्मचोदिताः।
चैतन्येनैव भास्यन्ते रविणेव घटादयः॥२६॥
तत्रैवं सति बुद्धीर्ज्ञ आत्मभासाऽवभासयन्।
कर्ता तासां यदर्थास्ता मूढैरेवाभिधीयते॥२७॥

व्यवहारयोग्यः क्रियते यया सा बुद्धिरविद्यादिभिः प्रेरिता गवाक्षनिस्सृतदीर्घप्रभान्यायेन परिणमते तज्जागरितमित्यर्थः॥२१॥

तदा चात्मा स्थूलपदार्थदर्शी भवतीत्याह—**दक्षिणेति**॥२२॥

दक्षिणस्याङ्गस्य श्रेष्ठत्वप्रसिद्धेर्दक्षिणाक्षिद्वारेषु प्रधानमित्यवधेयम्। उक्तज्ञानवतोऽवान्तरफलमाह—**हूयन्त इति**॥२३॥

जागरितावस्थामुक्त्वा स्वप्नावस्थामुपन्यस्यति—**मानसे त्विति**॥२४॥

सुषुप्तिं दर्शयति—**विषयेति**। अन्यदात्मव्यतिरिक्तं विषयं संस्कारं वा न पश्यतीत्यनन्यदृगुच्यते॥२५॥

अवस्थात्रयसाक्षिणं तुरीयं नित्यविज्ञप्तिमात्रमात्मानमुदाहरति—**मन इति**॥२६॥

यद्यत्मा निर्विकारः साक्षी कथं तर्हि बुद्धीनां कर्तोच्यते तत्राह—**तत्रैवमिति**। तस्मिन्नात्मनि निर्विकारे मोहेनावस्थात्रयेऽध्यस्ते सति यस्यात्मनः सुखदुःख-

---

१. निर्वातदेशे दीपशिखेव यदाऽन्तःकरणवृत्तिरप्यात्मनि लीयते, तदा सर्वव्यतिरिक्तमात्मतत्त्वं परिचीयते।

सर्वज्ञोऽप्यत एव स्यात् स्वेन भासाऽवभासयन्।
सर्वं सर्वक्रियाहेतोः सर्वकृत्त्वं तथाऽऽत्मनः॥२८॥

सोपाधिश्चैवमात्मोक्तो निरुपाख्योऽनुपाधिकः।
निष्कलो निर्गुणः शुद्धस्तं मनो वाक्च नाप्नुतः[१]॥२९॥

चेतनोऽचेतनो वापि कर्ताऽकर्ता गतोऽगतः।
बद्धो मुक्तस्तथा चैकोऽनेकः शुद्धोऽन्यथेति वा॥३०॥

अप्राप्यैव निवर्तन्ते वाचो धीभिः सहैव तु।
निर्गुणत्वात् क्रियाभावाद्विशेषाणामभावतः॥३१॥

व्यापकं सर्वतो व्योम मूर्तैः सर्वैर्वियोजितम्।
यथा तद्वदिहात्मानं[२] विद्याच्छुद्धं परं पदम्॥३२॥

प्रतिभासार्था बुद्धयः स्वीक्रियन्ते स ताश्चैतन्याभासेन प्रकाशयन्निर्विकारोऽपि मूढैः शास्त्राचार्योपदेशरहितैरेव बुद्धीनां कर्तेति व्यपदिश्यत इत्यर्थः॥२७॥

ज्ञातृत्वव्यपदेशं दर्शयित्वा सर्वज्ञत्वसर्वकर्तृत्वव्यपदेशमपि निर्विकारस्यात्मनो दर्शयति—**सर्वज्ञ इति**॥२८॥

आत्मनि सर्वज्ञत्वादिव्यपदेशोऽभ्युपगतश्चेत्तथैवात्मा परमार्थतः स्यादित्याशङ्क्याह—**सोपाधिरिति**। निरुपाधिकस्य निरुपाख्यत्वं व्यनक्ति—**तमिति**॥२९॥

मनो वाक् च नाप्नुतस्तमित्युक्तं व्यक्तीकरोति—**चेतन इति**॥३०॥

अप्राप्यैवेति च। कस्माद्वाचो धियश्चाप्राप्य निवर्तन्त इत्याशङ्क्य परमार्थतः प्रवृत्तिद्वाराभावादित्याह—**निर्गुणत्वेति**। विशेषा गोधनादयः। आत्मनि शब्दप्रवृत्तिहेतूनां षष्ठ्यादीनां बुद्धिप्रवृत्तिहेतूनां रूपादीनां परमार्थतोऽभावादारोपितरूपैरेतैः सर्वोऽपि व्यवहारस्तत्र सिद्ध्यतीत्यर्थः॥३१॥

आत्मा तर्हि किंलक्षणः समारोपितषष्ठ्यादिद्वारेण प्रतिवक्तव्यः स्यादित्याकाङ्क्षायामाह—**व्यापकमिति**। इह वेदान्तसमयेऽवस्थात्रयसाक्षिणमात्मानं सत्यज्ञानादिलक्षणं ब्रह्म जानीयादित्यर्थः॥३२॥

---

१. अवाङ्मनोगोचरत्वादात्मनः तथा च श्रुतिः 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'। (तै. ३.१)

२. आकाशवत् सर्वव्यापकत्वेनात्मानं जानीयात्।

दृष्टं हित्वा स्मृतिं तस्मिन् सर्वग्रश्च तमस्त्यजेत्।
सर्वदृग्ज्योतिषा युक्तो दिनकृच्छार्वरं यथा॥३३॥
रूपस्मृत्यन्धकारार्थाः प्रत्यया यस्य गोचराः।
स एवात्मा समो द्रष्टा सर्वभूतेषु सर्वगः॥३४॥
आत्मबुद्धिमनश्चक्षुर्विषयालोकसङ्गमात्।
विचित्रो जायते बुद्धेः प्रत्ययोऽज्ञानलक्षणः॥३५॥
विविच्यास्मात्स्वमात्मानं विद्याच्छुद्धं परं पदम्।
द्रष्टारं सर्वभूतस्थं समं सर्वभयातिगम्॥३६॥
समस्तं सर्वगं शान्तं विमलं व्योमवत्स्थितम्।
निष्कलं निष्क्रियं सर्वं नित्यं द्वन्द्वैर्विवर्जितम्॥३७॥

एवमात्मानं ज्ञात्वा पुनरवस्थात्रयाभिमानं परित्यजेदित्याह—**दृष्टं हित्वेति**। दृष्टं जागरितं तस्मिन् दृष्टे स्मृतिं स्वप्नं सर्वं जागरितादि ग्रस्यते येन तमसा तत्सर्वग्रः तत् तमः सुषुप्तं त्यजेत्। कोऽसावित्यपेक्षायामाह—**सर्वदृगिति**। सर्वसाक्षी प्रत्यगात्मा ज्योतिषा ब्रह्मणा स्वयमेकीभूतः सवितेव शार्वरं तमो यथोक्तं सुषुप्तं तमो वर्जयेदित्यर्थः[१]॥३३॥

उक्तमेव त्यागप्रकारं प्रकटयति—**रूपेति**। यच्चक्षुरादिना रूप्यते तज्जागरितं रूपमुच्यते। स्मृतिः स्वप्नः संस्कारजत्वात्। अन्धकारः सुप्तं तमोरूपत्वात्। तेऽर्था येषां प्रत्ययानां ते यस्य वेद्याः स एवात्मा निर्विशेषोऽनवच्छिन्नश्चेति ज्ञात्वा पूर्वोपदिष्टं द्रष्ट्रादि त्यजेदित्यर्थः॥३४॥

आत्मा चेदुक्तस्वभावोऽभ्युपगम्यते कुतस्तत्र विचित्रः संसारप्रत्ययो जायते तत्राह—**आत्मेति**। अविद्यापरिकल्पितोपाधीनामात्मनश्च विवेकानुपलब्धेरनर्थात्मको विचित्रः संसारप्रत्ययो भवतीत्यर्थः॥३५॥

अज्ञानकल्पितोपाध्यविवेकादात्मनो विचित्रसंसारानर्थः स्यादिति स्थिते मुमुक्षुणा कर्तव्यं दर्शयति—**विविच्येति**। पञ्चम्या बुद्ध्यादिरुच्यते[२]॥३६॥

वेद्यमेवात्मरूपं विशिनष्टि—**समस्तमिति**। समस्तशब्दस्य सर्वशब्दस्य च ब्रह्मात्मद्वये विशेषप्रतिपत्त्यर्थत्वादपुनरुक्तता। येऽत्र विधिमुखेन निषेधमुखेन च

---

१. यथा ज्योतिषा युक्तो दिनकरः शार्वरं व्यावर्तयति, तथैव सुषुप्तिकाले सर्वतमोव्यावृत्तमात्मस्वरूपं साक्षिचैतन्यं प्रकाशयति। २. प्रपञ्चानतिरिक्तं सर्वभूतस्थमात्मरूपं मुमुक्षुणा वेदितव्यम्।

सर्वप्रत्ययसाक्षी ज्ञः कथं ज्ञेयो मयेत्युत।
विमृश्यैवं विजानीयाज्ज्ञानकर्म न वेति वा॥३८॥

अदृष्टं द्रष्टृविज्ञातं दभ्रमित्यादिशासनात्।
नैव ज्ञेयं मयाऽन्यैर्वा परं ब्रह्म कथञ्चन॥३९॥

स्वरूपाव्यवधानाभ्यां ज्ञानालोकस्वभावतः।
अन्यज्ञानानपेक्षत्वाज्ज्ञातं[१] चैव सदा मया॥४०॥

नान्येन ज्योतिषा कार्यं रवेरात्मप्रकाशने।
स्वबोधान्नान्यबोधेच्छा बोधस्यात्मप्रकाशने॥४१॥

न तस्यैवान्यतोऽपेक्षा स्वरूपं यस्य यद्भवेत्।
प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन॥४२॥

विशेषा निर्दिश्यन्ते तानशेषानेव साक्षिणित्वं पदार्थे तत्पदार्थे च ब्रह्मण्यनुसन्धाय तुल्यलक्षणत्वमनयोर्निश्चित्य तत्त्वमसि वाक्यादहं ब्रह्मेति निश्चिनुयादित्यर्थः॥३७॥

ब्रह्मात्मत्वेन ज्ञातव्यमित्युक्ते विषये मुमुक्षुं शिक्षयति—**सर्वप्रत्ययेति।** यो हि सर्वेषां प्रत्ययानां साक्षी प्रत्यगात्मा स कथं वर्तते। स किं घटादिवज्ज्ञेय उत न ज्ञेय इत्येवं विमृश्य ब्रह्म प्रत्यग्भूतमविषयत्वेन ज्ञातं, न तु विषयत्वेनेत्येवं विजानीयात्। वाशब्दस्त्वर्थे प्रयुक्तो द्वितीयस्तु वाशब्दः प्रत्यगात्मन्यपि समानमविषयत्वेन ज्ञानमिति सूचयतीत्यर्थः॥३८॥

उक्तया रीत्या विमर्शे ब्रह्मात्मनो ज्ञेयत्वपक्षस्तावन्न सम्भवतीति साधयति—**अदृष्टमिति।** 'यदि मन्यसे सुवेदेति दह्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपमि'ति ज्ञेयस्यानात्मत्वोपदेशाददृष्टमित्यादिश्रुतेश्च ज्ञेयत्वं ब्रह्मात्मनो न युक्तमित्यर्थः॥३९॥

सम्प्रत्यविषयत्वेन ब्रह्मात्मनो ज्ञानं 'यस्यामतमि'त्यादिश्रुत्यवष्टम्भेन स्पष्टयति—**स्वरूपेति।** यदन्यदेशादिव्यवहितं जडं च तत्र ज्ञानादिव्यवहारो न स्वरूपे नित्ये चैतन्ये सम्भवति स्वतःस्फुरणादित्यर्थः॥४०॥

ज्ञानस्वरूपस्य नान्यज्ञानापेक्षेत्येतद् दृष्टान्तेन साधयति—**नान्येनेति**॥४१॥

दृष्टान्तस्य दार्ष्टान्तिकस्य च नैरपेक्ष्यं विवृणोति—**न तस्येति।** इतश्च दृष्टान्तस्य दार्ष्टान्तिकस्य च न प्रकाशान्तरापेक्षेत्याह—**प्रकाशान्तरेति**॥४२॥

---

१. आत्मातिरिक्तवस्तूनामपरोक्षप्रत्ययार्थमालोकसहकृतज्ञानस्य कारणता, आत्मनः स्वप्रकाशरूपत्वाज्ज्ञानस्वरूपत्वाच्च नान्यत्कारणमापेक्षते।

व्यक्तिः स्यादप्रकाशस्य प्रकाशात्मसमागमात्।
प्रकाशस्त्वर्ककार्यः स्यादिति मिथ्यावचो ह्यतः।।४३।।
यतोऽभूत्वा भवेद्यच्च तस्य तत्कार्यमिष्यते।
स्वरूपत्वादभूत्वा न प्रकाशो जायते रवेः।।४४।।
सत्तामात्रे प्रकाशस्य कर्ताऽऽदित्यादिरिष्यते।
घटादिव्यक्तितो यद्वत्तद्वद्बोधात्मनीष्यताम्।।४५।।
बिलात् सर्पस्य निर्याणे सूर्यो यद्वत्प्रकाशकः।
प्रयत्नेन विना तद्वज्ज्ञाताऽऽत्मा[१] बोधरूपतः।।४६।।
दग्धैवमुष्णः सत्तायां तद्वद्बोधात्मनीष्यताम्।
सत्येव यदुपाधौ तु ज्ञाते सर्प इवोत्थिते।।४७।।
ज्ञाताऽयत्नोऽपि तद्वज्ज्ञः कर्ता भ्रामकवद्भवेत्।
स्वरूपेण स्वयं नात्मा ज्ञेयोऽज्ञेयोऽथवा ततः।।४८।।

नन्वादित्यस्य घटादिप्रकाशकत्ववदात्मप्रकाशकत्वमपि सम्भवति तथाऽऽत्मा बुद्ध्यादीनां प्रकाशकः स्वरूपमपि प्रकाशयिष्यतीत्याशङ्क्याह—**व्यक्तिः स्यादिति।** यतो दृष्टान्तासिद्धिस्ततो दार्ष्टान्तिकमपि न सिद्ध्यतीत्यर्थः।।४३।।

कस्माद् घटादिप्रकाशोऽर्ककार्यो मुख्यादिवृत्त्या न भवतीत्याशङ्क्याह—**यत इति**।।४४।।

कथं तर्हि प्रकाशस्वरूपस्यादित्यस्य प्रकाशयितृत्वमात्मनश्च बोधमात्रस्वभावस्य बोद्धृत्वं व्यपदिश्यते तत्राह—**सत्तेति**।।४५।।

स्वगतविक्रियामन्तरेणादित्यस्यात्मनश्च प्रकाशकत्वमित्येतद्दृष्टान्तेन विस्पष्टयति—**विलादिति**।।४६।।

उपाधिभावे कर्तृत्वव्यपदेशात्तदभावेऽभावादुपाधिनिबन्धनमेव कर्तृत्वमिति दर्शयितुमपरमुदाहरणमाह—**दग्धैवमिति।** यथा प्रकाश्यसन्निधौ निर्व्यापारोऽपि सविता प्रकाशको व्यपदिश्यते तथा दाह्यसन्निधावुष्णस्याग्नेः सत्तामात्रेण स दग्धोच्यते। तथा बोधस्वरूपेऽपि बोध्यसन्निधिमात्रेण बोद्धृत्वमिष्यताम्। यस्मादुपाधौ ज्ञाने सत्येवात्मा ज्ञातोच्यते। यथा बिलादुत्थिते सर्पे सविता प्रकाशकः कथ्यते। तस्मादुपाधिभावे कर्तृत्वव्यपदेशादौपचारिकः तद्व्यपदेशः सिद्ध्यतीत्यर्थः।।४७।।

औपाधिकं ज्ञातृत्वमुक्त्वा दृष्टान्तेन कर्तृत्वमपि नात्मनः स्वतोऽस्तीत्याह—

---

१. सत्तामात्रेण सूर्यस्य प्रकाशकत्वमिव ज्ञानस्वरूपमात्रेणात्मनो ज्ञानतेष्यते।

विदिताविदिताभ्यां तदन्यदेवेति[१] शासनात्।
बन्धमोक्षादयो भावास्तद्वदात्मनि कल्पिताः॥४९॥

नाहोरात्रे यथा सूर्ये प्रभारूपाविशेषतः।
बोधरूपाविशेषान्न बोधाबोधौ तथाऽऽत्मनि॥५०॥

यथोक्तं ब्रह्म यो वेद हानोपादानवर्जितम्।
यथोक्तेन विधानेन स सत्यं नैव जायते[२]॥५१॥

जन्ममृत्युप्रवाहेषु पतितो नैव शक्नुयात्।
इत उद्धर्तुमात्मानं ज्ञानादन्येन केनचित्॥५२॥

ज्ञातेति। यथाऽयमात्मा स्वगतप्रयत्नरहितोऽपि सत्येवोपाधौ ज्ञाता व्याख्यातस्तथाऽयमात्मा स्वगतविक्रियाशून्योऽपि सन्निधिमात्रेण कारकाणि प्रवर्तयन् क्रियाणां कर्ता भवतीत्यर्थः। यथा भ्रामकः स्वगतचलनेन विकलो लोहस्य प्रेरको दृष्टस्तथाऽऽत्मा निश्चलोऽपि चिदाभासोपेतस्य मोहादेः परिणामापेक्षया कर्ता भवेदित्याह **भ्रामकवदिति।** यस्मादयमात्मा परमार्थतो न कस्यचिदपि ज्ञाता कर्ता वा ततः स्वरूपेण स्वेन स्वयमात्मा न ज्ञेयो नाप्यज्ञेयो न कार्यो नापि प्राप्यो हेयो वेति सर्वविशेषशून्यता तस्य सिद्धेत्याह—**स्वरूपेणेति**॥४८॥

आत्मनि ज्ञेयत्वाद्यभावमुक्तमेव साधयति—**विदितेति।** यथाऽऽत्मनि ज्ञातृत्वं कर्तृत्वं कार्यत्वं कारणत्वमित्यादि सर्वं कल्पितमेवेत्युक्तं तथा बन्धो मोक्षः छिन्नो भिन्नः सुखी दुःखीत्यादयोऽपि भावास्तत्र कल्पिता वस्तुतो न सन्तीत्याह—**बन्धेति**॥४९॥

बन्धमोक्षयोरात्मनि कल्पितत्वे दृष्टान्तपूर्वकं हेतुमाह—**नाहोरात्र इति**॥५०॥

उक्तवस्तुपरिज्ञानफलं कथयति—**यथोक्तमिति।**।५१।।

यथोक्तप्रयोजनं प्रकारान्तरेणापि सम्भावितमिति कृतमनेन ब्रह्मात्मज्ञानेनेत्याशङ्क्याह—**जन्मेति**॥५२॥

---

१. आत्मा हि स्वरूपतो न ज्ञेयस्तदतिरिक्तज्ञानाभावात्, नाप्यज्ञेयः 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ. ३.४.१) इति श्रुत्याऽऽत्मनोऽपरोक्षत्वप्रतिपादनात्। अतो विदिताविदितपदार्थनिश्चयद्वारा वेद्यावेद्याधिष्ठानत्वेनात्मप्रत्ययः।

२. आत्मविदः सर्वकर्मक्षयान्न कर्मबन्धः, नापि जन्मादिविकारः, तरति शोकमात्मवित् (छा. ७.१.३) इति श्रुतेः।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्ट'[१] इति श्रुतेः॥५३॥
ममाहमित्येतदपोह्य सर्वतो विमुक्तदेहं पदमम्बरोपमम्।
सुदृष्टशास्त्रानुमितिभ्य ईरितं विमुच्यतेऽस्मिन् यदि निश्चितो नरः॥५४॥

ज्ञानादेव तु मोक्षो नोपायान्तरेणेत्यत्र प्रमाणमाह—**भिद्यत इति**॥५३॥

प्रकरणार्थं सङ्क्षिप्योपसंहरति—**ममाहमिति।**

सर्वतः सर्वात्मना ममाहमित्येतन्मिथ्याज्ञानं सकारणं निराकृत्य सम्यग्दृष्टशास्त्रेभ्यस्तथाविधानुमानेभ्यश्च यत्परं पदं विमुक्तदेहद्वयं गगनवदनवच्छिन्नत्वादिलक्षणमस्माभिरुदीरितम्। अस्मिन् यदि मुमुक्षुर्निश्चितो भवेत्तदा विमुच्यते मुक्तबन्धनः स्वाराज्ये स्थितो भवतीत्यर्थः॥५४॥

॥इति व्याख्यातं पञ्चदशं नान्यदन्यत्प्रकरणम्॥१५॥

---

१. मुण्ड. २.२.८।

अथ षोडशं पार्थिवप्रकरणम्

पार्थिवः कठिनो धातुर्द्रवो देहे स्मृतोऽम्मयः।
पक्तिचेष्टावकाशाः स्युर्वह्निवाय्वम्बरोद्भवाः॥१॥
घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात्।
रूपालोकवदिष्टं हि सजातीयार्थमिन्द्रियम्॥२॥
बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्मणे।
तद्विकल्पार्थमन्तःस्थं मन एकादशं भवेत्॥३॥

पार्थिवप्रकरणम्

पूर्वस्मिन् प्रकरणे स्वयूथ्यपक्षप्रतिक्षेपमुखेन ब्रह्मात्मैकत्वज्ञानमेव स्वरूपावस्थानलक्षणं मोक्षसाधनमिति प्रतिपादितम्। अधुना सर्वत्तार्किकमतप्रतिषेधेन मुमुक्षुं स्वाराज्ये स्थापयितुं प्रकरणान्तरं कुर्वन्नादौ स्थूलशरीरमात्मेति लोकायतमतं प्रत्याह—**पार्थिव इति**। यो हि देहे कठिनो धातुर्दृश्यते स पार्थिवो विवेकिभिरिष्टो यश्च द्रवो धातुः सोऽम्मयोऽभ्युपगतः। ये च पक्तिश्चेष्टाऽवकाशश्चेत्यत्र प्रतीयन्ते ते क्रमेण वह्नेर्वायोरम्बराच्चोद्भवन्तोऽभ्युपगम्यन्ते। तस्माद्भूतपञ्चकभागस्य स्थूलदेहस्य बाह्यभूतवदात्मत्वानुपपत्तिरित्यर्थः॥१॥

इन्द्रियाण्यात्मेत्यपरो लोकायतः तं प्रत्याह—**घ्राणादीनीति**। घ्राणं रूपादिषु[1] गन्धस्यैव व्यञ्जकत्वात् हिङ्गुवत्। एवं रसनमप्याप्यं रसादिषु रसस्यैव व्यञ्जकत्वात् आस्योदकवत्। चक्षुस्तैजसं रूपादिषु रूपस्यैव व्यञ्जकत्वाद् दीपवत्। त्वग्वायवीया स्पर्शादिषु स्पर्शस्यैवाभिव्यञ्जकत्वात्, व्यजनवायुवत्। श्रोत्रमाकाशीयं शब्दादिषु शब्दस्यैव व्यञ्जकत्वाद् वेणुविवरवद् इति भौतिकत्वानुमानाद् घटादिवदनात्मत्वमिन्द्रियाणामित्यर्थः। यथा तैजसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथा यदिन्द्रियं यज्जातीयमर्थं प्रकाशयति तत्तज्जातीयं भवितुमर्हतीत्युक्तमनुमानजातं सूचयति—**रूपालोकवदिति**॥२॥

इन्द्रियाणां करणत्वादनात्मत्वं कार्यकथनेनैकादशत्वनियमं च कथयति—

---

१. एवकारः मनसि व्यभिचारवारणाय। ततश्च स्वरूपासिद्धिः घ्राणस्य गन्धत्वगन्धाभावव्यञ्जकत्वेन गन्धेतराव्यञ्जकत्वस्य एवकारार्थस्य तस्मिन्नसम्भवात्। अतः रूपादिषु मध्ये इत्युक्तम्। एवमग्रेऽपि योजनीयम्।

निश्चयार्था भवेद्बुद्धिस्तां सर्वार्थानुभाविनीम्।
ज्ञाताऽऽत्मोक्तः स्वरूपेण ज्योतिषा व्यञ्जयन् सदा॥४॥
व्यञ्जकस्तु यथाऽऽलोको व्यङ्ग्यस्याकारतां गतः।
व्यतिकीर्णोऽप्यसङ्कीर्णस्तद्वज्ज्ञः प्रत्ययैः सदा॥५॥
स्थितो दीपो यथाऽयत्नः प्राप्तं सर्वं प्रकाशयेत्।
शब्दाद्याकारबुद्धीर्ज्ञः प्राप्तास्तद्वत्प्रपश्यति॥६॥
शरीरेन्द्रियसङ्घात आत्मत्वेन गतां धियम्।
नित्यात्मज्योतिषा दीप्तां विशिंषन्ति सुखादयः॥७॥

बुद्ध्यर्थानीति। कर्मणे वचनादानविहरणोत्सर्गानन्दाख्याय। तेषामिन्द्रियाणां विषयविकल्पार्थं क्रमेण गन्धादिज्ञानसिद्ध्यर्थमेकादशं मनो भवेत्[१]। अन्यथा कदलीफलादौ हस्तविन्यस्ते पुनरास्वाद्यमाने युगपदनेकार्थसम्प्रयोगादनेकज्ञान-प्रसङ्गादित्यर्थ:॥३॥

बुद्दिर्नात्मा करणत्वाद्दीपवदिति बौद्धं प्रत्याह—**निश्चयार्थेति।** सा स्वसंवेद्येत्यपि वक्तुं न शक्यमित्याह—**तामिति।** रूपालोकयोर्भास्यभासकयोर्भेदो यथा तद्वदात्मा सर्वार्थग्राहिकां बुद्धिं स्वरूपेण ज्योतिषा व्यञ्जयन् सदा बुद्धेर्विलक्षणः सिद्ध्यतीत्यर्थ:[२]॥४॥

यदा बुद्धेरात्मा प्रकाशकोऽभिमतस्तदा तया संसर्गादशुद्धि-रापद्येतेत्याशङ्क्याह—**व्यञ्जक इति।** यथा दीपादिरालोको व्यङ्ग्यस्य घटादेः समानतां गतो व्यतिकीर्णवदुपलक्षितोऽपि वस्तुतोऽसङ्कीर्णः गृह्यते। तद्वदात्मा प्रत्ययैः बुद्धिपरिणामैर्बुद्ध्या च सङ्कीर्णवदुपलब्धोऽपि वस्तुतोऽसङ्कीर्णः शुद्धः सिद्ध्यतीत्यर्थ:॥५॥

बुद्ध्यादेरत्यन्तविलक्षणो निर्व्यापारश्चेदात्मा कथं बुद्ध्यादि भासयेदित्याशङ्क्य दृष्टान्तेनोत्तरमाह—**स्थितो दीप इति**॥६॥

तथापि सुखित्वादिस्मरणादात्मनः शुद्धिरसिद्धेत्याशङ्क्याह—**शरीरेन्द्रियेति**॥७॥

---

२. अन्यथा दीर्घशष्कुलीभक्षणादौ युगपत् सर्वेन्द्रियजन्यज्ञानानि स्युः इत्यपि वेद्यम्।

३. अन्तःकरणविशिष्टाया बुद्धेर्जडात्मकतया न स्वतः प्रकाशयोग्यता अतस्तत्प्रतिबिम्बितं चैतन्यं तत्र प्रकाशयोग्यतां सम्पादयति।

अथ षोडशं पार्थिवप्रकरणम्

पार्थिवः कठिनो धातुर्द्रवो देहे स्मृतोऽम्मयः।
पक्तिचेष्टावकाशाः स्युर्वह्निवाय्वम्बरोद्भवाः॥१॥
घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात्।
रूपालोकवदिष्टं हि सजातीयार्थमिन्द्रियम्॥२॥
बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्मणे।
तद्विकल्पार्थमन्तःस्थं मन एकादशं भवेत्॥३॥

पार्थिवप्रकरणम्

पूर्वस्मिन् प्रकरणे स्वयूथ्यपक्षप्रतिक्षेपमुखेन ब्रह्मात्मैकत्वज्ञानमेव स्वरूपावस्थानलक्षणं मोक्षसाधनमिति प्रतिपादितम्। अधुना सर्वत्तार्किकमतप्रतिषेधेन मुमुक्षुं स्वाराज्ये स्थापयितुं प्रकरणान्तरं कुर्वन्नादौ स्थूलशरीरमात्मेति लोकायतमतं प्रत्याह—**पार्थिव इति**। यो हि देहे कठिनो धातुर्दृश्यते स पार्थिवो विवेकिभिरिष्टो यश्च द्रवो धातुः सोऽम्मयोऽभ्युपगतः। ये च पक्तिश्चेष्टाऽवकाशश्चेत्यत्र प्रतीयन्ते ते क्रमेण वह्नेर्वायोरम्बराच्चोद्भवन्तोऽभ्युपगम्यन्ते। तस्माद्भूतपञ्चकभागस्य स्थूलदेहस्य बाह्यभूतवदात्मत्वानुपपत्तिरित्यर्थः॥१॥

इन्द्रियाण्यात्मेत्यपरो लोकायतः तं प्रत्याह—**घ्राणादीनीति**। घ्राणं रूपादिषु[१] गन्धस्यैव व्यञ्जकत्वात् हिङ्गुवत्। एवं रसनमप्याप्यं रसादिषु रसस्यैव व्यञ्जकत्वात् आस्योदकवत्। चक्षुस्तैजसं रूपादिषु रूपस्यैव व्यञ्जकत्वाद् दीपवत्। त्वग्वायवीया स्पर्शादिषु स्पर्शस्यैवाभिव्यञ्जकत्वात्, व्यजनवायुवत्। श्रोत्रमाकाशीयं शब्दादिषु शब्दस्यैव व्यञ्जकत्वाद् वेणुविवरवद् इति भौतिकत्वानुमानाद् घटादिवदनात्मत्वमिन्द्रियाणामित्यर्थः। यथा तैजसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथा यदिन्द्रियं यज्जातीयमर्थं प्रकाशयति तत्तज्जातीयं भवितुमर्हतीत्युक्तमनुमानजातं सूचयति—**रूपालोकवदिति**॥२॥

इन्द्रियाणां करणत्वादनात्मत्वं कार्यकथनेनैकादशत्वनियमं च कथयति—

---

१. एवकारः मनसि व्यभिचारवारणाय। ततश्च स्वरूपासिद्धिः घ्राणस्य गन्धत्वगन्धाभावव्यञ्जकत्वेन गन्धेतराव्यञ्जकत्वस्य एवकारार्थस्य तस्मिन्नसम्भवात्। अतः रूपादिषु मध्ये इत्युक्तम्। एवमग्रेऽपि योजनीयम्।

निश्चयार्था भवेद्बुद्धिस्तां सर्वार्थानुभाविनीम्।
ज्ञाताऽऽत्मोक्तः स्वरूपेण ज्योतिषा व्यञ्जयन् सदा॥४॥
व्यञ्जकस्तु यथाऽऽलोको व्यङ्ग्यस्याकारतां गतः।
व्यतिकीर्णोऽप्यसङ्कीर्णस्तद्वज्ज्ञः प्रत्ययैः सदा॥५॥
स्थितो दीपो यथाऽयत्नः प्राप्तं सर्वं प्रकाशयेत्।
शब्दाद्याकारबुद्धीर्ज्ञः प्राप्तास्तद्वत्प्रपश्यति॥६॥
शरीरेन्द्रियसङ्घात आत्मत्वेन गतां धियम्।
नित्यात्मज्योतिषा दीप्तां विशिंषन्ति सुखादयः॥७॥

बुद्ध्यर्थानीति। कर्मणे वचनादानविहरणोत्सर्गानन्दाख्याय। तेषामिन्द्रियाणां विषयविकल्पार्थं क्रमेण गन्धादिज्ञानसिद्ध्यर्थमेकादशं मनो भवेत्[१]। अन्यथा कदलीफलादौ हस्तविन्यस्ते पुनरास्वाद्यमाने युगपदनेकार्थसम्प्रयोगादनेकज्ञान-प्रसङ्गादित्यर्थः॥३॥

बुदिर्नात्मा करणत्वाद्दीपवदिति बौद्धं प्रत्याह—**निश्चयार्थेति।** सा स्वसंवेद्येत्यपि वक्तुं न शक्यमित्याह—**तामिति।** रूपालोकयोर्भास्यभासकयोर्भेदो यथा तद्वदात्मा सर्वार्थग्राहिकां बुद्धिं स्वरूपेण ज्योतिषा व्यञ्जयन् सदा बुद्धेर्विलक्षणः सिद्ध्यतीत्यर्थः[२]॥४॥

यदा बुद्धेरात्मा प्रकाशकोऽभिमतस्तदा तया संसर्गादशुद्धि-रापद्येतेत्याशङ्क्याह—**व्यञ्जक इति।** यथा दीपादिरालोको व्यङ्ग्यस्य घटादेः समानतां गतो व्यतिकीर्णवदुपलक्षितोऽपि वस्तुतोऽसङ्कीर्णः गृह्यते। तद्वदात्मा प्रत्ययैः बुद्धिपरिणामैर्बुद्ध्या च सङ्कीर्णवदुपलब्धोऽपि वस्तुतोऽसङ्कीर्णः शुद्धः सिद्ध्यतीत्यर्थः॥५॥

बुद्ध्यादेरत्यन्तविलक्षणो निर्व्यापारश्चेदात्मा कथं बुद्ध्यादि भासयेदित्याशङ्क्य दृष्टान्तेनोत्तरमाह—**स्थितो दीप इति**॥६॥

तथापि सुखित्वादिस्मरणादात्मनः शुद्धिरसिद्धेत्याशङ्क्याह—**शरीरेन्द्रियेति**॥७॥

---

२. अन्यथा दीर्घशष्कुलीभक्षणादौ युगपत् सर्वेन्द्रियजन्यज्ञानानि स्युः इत्यपि वेद्यम्।

३. अन्तःकरणविशिष्टाया बुद्धेर्जडात्मकतया न स्वतः प्रकाशयोग्यता अतस्तत्प्रतिबिम्बितं चैतन्यं तत्र प्रकाशयोग्यतां सम्पादयति।

शिरोदुःखादिनाऽऽत्मानं दुःख्यस्मीति[१] हि पश्यति।
द्रष्टाऽन्यो दुःखिनो दृश्याद्द्रष्टृत्वाच्च न दुःख्यसौ॥८॥
दुःखी स्याद्दुःख्यहंमानाद्दुःखिनो दर्शनान्न वा।
संहतेऽङ्गादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः॥९॥
चक्षुर्वत्कर्मकर्तृत्वं स्याच्चेन्नानेकमेव तत्।
संहतं च ततो नात्मा द्रष्टृत्वात्कर्मतां व्रजेत्॥१०॥
ज्ञानयत्नाद्यनेकत्वमात्मनोऽपि मतं यदि।
नैकज्ञानगुणत्वात्तु ज्योतिर्वत्तस्य कर्मता॥११॥

शरीरादिसम्बन्धिनीं धियं सुखादयो विशिंषन्ति नात्मानमिति कुतो निश्चय इत्याशङ्क्याह—**शिर इति**। देहावयवगतेन दुःखेनात्मानं दुःख्यस्मीति यस्मादुपलभते तस्माद्देहादिष्वात्मत्वेन गता बुद्धिरेव दुःखिनी। तद्द्रष्टा तु दुःखिनो दृश्याद्विलक्षणो न दुःखी भवितुमुत्सहते। द्रष्टृत्वादेव तस्य दुःखित्वानुपपत्तिरित्यर्थः॥८॥

द्रष्टृत्वाच्च न दुःख्यसावित्येतदेव स्पष्टयति—**दुःखीति**। किमयमात्मा दुःखपरिणामवत्यहमित्यभिमानाद् दुःखी स्यात्। किं वा परिणामिनो दुःखिनः साक्षित्वान्न स्वयं दुःखीति विवेक्तव्यम्। तत्राद्ये गौरोऽहमितिवदहमभिमानस्य भ्रान्त्यापि सम्भवान्नास्ति वस्तुतो दुःखितेति मत्वा द्वितीयं प्रत्याह—**संहत इति**। हस्तादिभिर्देहावयवैर्घ्राणादिभिश्चेन्द्रियैः संयुक्ते यद्दुःखं तस्य साक्षी नैव दुःखी भवितुमर्हति। मध्यस्थस्योदासीनस्य लोके कार्यान्वयादर्शनादित्यर्थः॥९॥

दुःखिनोऽपि द्रष्टृत्वेऽपि दुःखित्वमात्मनो युक्तमिति शङ्कते—**चक्षुर्वदिति**। यथा चक्षुषो दर्पणस्थतया दृश्यत्वं, तस्यैव बहिरवस्थानेन द्रष्टृत्वं, तथाऽऽत्मनोऽपि दृश्यत्वं द्रष्टृत्वं च स्यादित्यर्थः। गोलकांशस्य दर्पणस्थस्य दृश्यत्वं, शक्तिमत्त्वांशस्य मुखनिर्विष्टस्य द्रष्टृत्वमिति दृष्टान्तस्योभयथात्वोपपत्तेर्नेदं प्रकृतानुगुणमुदाहरणमित्यत्राह—**नेति**। चक्षुषश्च सावयवत्वादुक्तव्यवस्था युक्तेत्याह—**संहतमिति**। आत्मा तु नानेकात्मको नापि देहादिभिः संहन्यते। ततो द्रष्टृत्वेन समाप्तत्वान्न कर्मतां गन्तुमर्हतीत्याह—**तत इति**॥१०॥

आत्मनोऽपि ज्ञानादिभिरनेकात्मकत्वाद्भास्यभासकत्वं स्यादिति शङ्कते—**ज्ञानेति**। [२]विज्ञानघनश्रुतैरात्मनो ज्ञानैकस्वभावत्वान्नानेकात्मत्वम्। ततो ज्योतिर्वत्तस्य न स्वकर्मतेति दूषयति—**नैकेति**॥११॥

---

१. अन्तःकरणधर्माणामात्मन्यारोपादहं सुखी दुःखीत्यादिव्यवहारः।

२. विज्ञानघन एवैतेभ्यो भूतेभ्यः (बृ. २.५.१२)।

ज्योतिषो द्योतकत्वेऽपि यद्वन्नात्मप्रकाशनम्।
भेदेऽप्येवं समत्वाज्ज्ञ आत्मानं नैव [1]पश्यति॥१२॥

यद्धर्मा यः पदार्थो न तस्यैवेयात्स कर्मताम्।
न ह्यात्मानं दहत्यग्निस्तथा नैव प्रकाशयेत्॥१३॥

एतेनैवात्मनाऽऽत्मानो[2] ग्रहो बुद्धेर्निराकृतः।
अंशोऽप्येव समत्वाद्धि निर्भेदत्वान्न युज्यते॥१४॥

शून्यतापि न युक्तैवं बुद्धेरन्येन दृश्यता।
युक्ताऽतो घटवत्तस्याः प्राक्सिद्धेश्च विकल्पतः॥१५॥

अविकल्पं तदस्त्येव यत्पूर्वं स्याद्विकल्पतः।
विकल्पोत्पत्तिहेतुत्वाद्यद्यस्यैव तु कारणम्॥१६॥

दृष्टान्तं व्याचष्टे—**ज्योतिष इति**। द्रव्यबोधांशभेदेऽप्येवं ज्योतिरंशयोरिव समत्वादात्मानमात्मा नैव पश्यतीति दार्ष्टान्तिकमाह—**भेदेऽपीति**॥१२॥

स्वरूपेणांशद्वारेण वा यद्यप्यात्मानमात्मा नैव पश्यति तथापि स्वगुणस्य ज्ञानस्य कर्मतां यास्यतीत्याशङ्क्याऽऽत्मा न स्वीयप्रकाशगोचरो वस्तुत्वाद् वह्निवदित्याह—**यद्धर्मेति**॥१३॥

उक्तन्यायं बौद्धपक्षेऽप्यतिदिशति—**एतेनैवेति**। बुद्धेरात्मनः स्वरूपस्यात्मनः स्वेन ग्रहो यथोक्तदृष्टान्तेन निराकृतो न सिद्ध्येदित्यर्थः। एकेनांशेन ग्राहकत्वमंशान्तरेण ग्राह्यत्वं बुद्धेरसिद्धमित्याह—**अंशोऽपीति**। अंशोऽपि तस्य निरंशत्वान्न घटत इत्याह—**निर्भेदत्वादिति**॥१४॥

शून्यवादं निराचष्टे—**शून्यतेति**। यथैकस्या बुद्धेर्ग्राह्यग्राहकता न युक्तेत्युक्त मेवमपरोक्षतया प्रतीयमानायास्तस्याः शून्यताऽपि न युक्ता। तेन घटादेरिवान्येन साक्षिणा ग्राह्यता बुद्धेरुक्ता। ततस्तस्याः साक्षिणि पर्यवसानान्न शून्यताशङ्केत्यर्थः। किञ्च तस्याः बुद्धेर्ग्राह्यग्राहकरूपविकल्पापेक्षायाः प्रागेव सुषुप्तादौ साक्षिणः सिद्धेर्न शून्यता बुद्धेः सिद्ध्येत्। अन्यथा परामर्शायोगादित्याह—**प्रागिति**॥१५॥

किञ्च यद्यस्यान्वयिकारणं दृष्टं तत्तस्मात्प्रागेव सिद्धमेष्टव्यम्। यथा

---

१. दृष्टान्तं व्याचष्टे आदित्यादिज्योतिषः प्रकाशनस्वभावेऽपि नात्मप्रकाशनं तद्वदंशभेदकल्पनेऽपि आत्मा चैतन्यस्वभावाविशेषादात्मानं स्वांशं न विषयीकरोतीत्यर्थः।

२. आत्मान इति प्रयोग आर्षः। आत्मन इत्यर्थः।

अज्ञानं कल्पनामूलं संसारस्य नियामकम्।
हित्वाऽऽत्मानं [१]परं ब्रह्म विद्यान्मुक्तं सदाऽभयम्॥१७॥
जाग्रत्स्वप्नौ तयोर्बीजं सुषुप्ताख्यं तमोमयम्।
अन्योन्यस्मिन्नसत्त्वाच्च नास्तीत्येतत्त्रयं [२]त्यजेत्॥१८॥
आत्मबुद्धिमनश्चक्षुरालोकार्थादिसङ्करात्।
भ्रान्तिः स्यादात्मकर्मेति क्रियाणां सन्निपाततः॥१९॥
निमीलोन्मीलने स्थाने वायव्ये ते न चक्षुषः।
प्रकाशत्वान्मनस्येवं बुद्धौ न स्तः प्रकाशतः॥२०॥

घटादेरन्वयिकारणं मृदादिस्तस्मात्प्रागेव सिद्धम्। तथा सदनुविद्धस्य भेदजातस्य कारणं सदपि पूर्वसिद्धमस्तीत्याह—**अविकल्पमिति**॥१६॥

समस्तविकल्परहितं ब्रह्म कथं विकल्पस्य कारणमित्याशङ्क्याज्ञानद्वारा तस्य कारणत्वमाह—**अज्ञानमिति।** तर्हि ब्रह्म किमज्ञानविशिष्टमेव द्रष्टव्यं नेत्याह—**हित्वेति।** अज्ञानं सकार्यं हित्वा तत्साक्षिणमात्मानं तत्त्वमसिवाक्यादहं ब्रह्मास्मीत्युक्तलक्षणं ब्रह्म विद्यादित्यर्थः॥१७॥

संसारनियामकमज्ञानं हित्वा वेद्यो ब्रह्मत्वेनात्मा चेत्तर्हि कः संसारस्तस्य वा कारणमज्ञानं किं लक्षणं ततो वा कथं विवेकः स्यादित्याशङ्क्याह—**जाग्रदिति।** अन्योन्यव्यभिचारित्वाद् दृश्यत्वाच्च रज्जुसर्पवद्वस्तु न भवतीति ज्ञात्वा सर्वमेतत् त्येजेदित्यर्थः॥१८॥

नन्ववस्थात्रये त्यक्तेऽपि नात्मनो ब्रह्मत्वं कर्तृत्वेन प्रतीतेरित्याशङ्क्याह—**आत्मेति।** अर्थादीत्यादिशब्देन देशकालादि गृह्यते। तेषामात्मादीनां सङ्करात्तादात्म्याध्यासात्क्रियाणामुदयादात्मनोऽस्ति कर्मेति भ्रान्तिः स्यात्तत आत्मनः स्वतो निष्क्रियत्वान्निष्क्रियब्रह्मत्वमविरुद्धमित्यर्थः॥१९॥

अन्यव्यापारस्यान्यत्रारोपे दृष्टान्तमाह—**निमीलोन्मीलने इति।** ये गोलकस्थाने निमीलोन्मीलने दृष्टे ते वायुकार्ये क्रियात्मकस्य वायोस्तदाश्रयत्वसम्भवात्र चक्षुषः तस्य प्रकाशरूपत्वात् क्रियाश्रयत्वानुपपत्तेस्तथापि तत्रारोप्येते। तथा मनसि बुद्धौ च

---

१. अज्ञानस्यैव सकलप्रपञ्चमूलत्वात्तत्परित्यागेन तत्त्वमस्यादिमहावाक्येनात्मचैतन्यमेवानुभूयते।
२. तिस्रोऽवस्थाविशेषास्तमस जाग्रात्स्वप्नौ हि बीजभूतस्य तमसः कार्ये, तयोश्च सुषुप्तौ लयः। सुषुप्तेश्चात्मबोधेन लयः।

सङ्कल्पाध्यवसायौ तु मनोबुद्ध्योर्यथा क्रमात्।
नेतरेतरधर्मत्वं सर्वं चात्मनि कल्पितम्॥२१॥

स्थानावच्छेददृष्टिः स्यादिन्द्रियाणां तदात्मताम्।
गता धीस्तां हि पश्यन् ज्ञो देहमात्र इवेक्ष्यते॥२२॥

क्षणिकं हि तदत्यर्थं धर्ममात्रं निरन्तरम्।
सादृश्याद्दीपवत्तद्धीस्तच्छान्तिः पुरुषार्थता॥२३॥

स्वाकारान्यावभासं च येषां रूपादि[1] विद्यते।
येषां नास्ति ततश्चान्यत्पूर्वासङ्गतिरुच्यते॥२४॥

चलनाचलने न स्वतो विद्येते प्रकाशरपत्वात्तथाप्यारोप्येते। चञ्चलं मनः स्थिरा बुद्धिरिति व्यपदेशदर्शनादित्यर्थः॥२०॥

मनोबुद्ध्योरसाधारणधर्मप्रदर्शनपूर्वकं दार्ष्टान्तिकं निगमयति—**सङ्कल्पेति**॥२१॥

आत्मनो देहपरिमाणत्वान्नानवच्छिन्नब्रह्मत्वं सङ्गच्छते, न च तत्कल्पितमिति दिगम्बरमतमाशङ्क्याह—**स्थानेति**। इन्द्रियाणामन्यत्र वृत्त्यभावाद्देहावच्छेदो गृह्यते। तेन तेषां देहपरिमाणत्वात्सेन्द्रियदेहे तादात्म्यं गता बुद्धिरिति सापि मध्यमपरिमाणा। तां च पश्यन्नात्मा देहमात्र इव भ्रान्त्या दृश्यते। स्वरूपेण त्वनन्त एव। अन्यथा घटादिवदनित्यत्वादिप्रसङ्गादित्यर्थः॥२२॥

दिगम्बरमतं निराकुर्वता यदनन्तपरिमाणत्वमात्मनो दर्शितं तदमृष्यमाणः शाक्यः शङ्कते—**क्षणिकं हीति**। तदिति ज्ञानं ज्ञेयं च गृह्यते। द्वित्रिक्षणस्थायित्वं परिहृत्य स्वरसभङ्गुरत्वं दर्शयितुमत्यर्थमित्युक्तम्। धर्ममात्रमिति मात्रचा स्थायि किञ्चिदधिष्ठानं नास्तीत्युच्यते। स्वरसभङ्गुरत्वे पूर्वोत्तरक्षणेष्वसद्बुद्धिः स्यादित्याशङ्क्याव्यवच्छेदेनोत्पद्यमानत्वान्नैवमित्याह—**निरन्तरमिति**। यदि क्षणिकं ज्ञानं ज्ञेयं च कथं तदेवेदमिति प्रत्यभिज्ञानमित्याशङ्क्याह—**सादृश्यादिति**। तस्य स्थायित्वप्रतिभासस्य ग्राह्यग्राहकत्वमूलस्य वाऽज्ञानस्य वा विद्यमानताप्रतिभासस्य निवृत्तिरेव मुक्तिरित्याह—**तच्छान्तिरिति**॥२३॥

बौद्धमतं दूषणविभागविज्ञानाय विविच्य कथयति—**स्वाकारेति**। स्वाकारस्यान्येन ज्ञानेनावभासोऽस्यास्तीति तत्तथोच्यते। तददिं रूपादि येषां बाह्यार्थवादिनां

---

१. सिद्धान्ती बौद्धमतभेदमाह, येषां बाह्यास्तित्ववादिनां मते रूपादिकं स्वाकारादन्येन ज्ञानेन भासते।

बाह्याकारत्वतो ज्ञप्तेः स्मृत्यभावः सदा क्षणात्।
क्षणिकत्वाच्च संस्कारं नैवाधत्ते क्वचित्तु धीः॥२५॥

आधारस्याप्यसत्त्वाच्च तुल्यतानिर्निमित्ततः[१]।
स्थाने वा क्षणिकत्वस्य हानं स्यान्न तदिष्यते॥२६॥

शान्तेश्चायत्नसिद्धत्वात्साधनोक्तिरनर्थिका।
एकैकस्मिन् समाप्तत्वाच्छान्तेरन्यानपेक्षता॥२७॥

अपेक्षा यदि भिन्नेऽपि परसन्तान इष्यताम्।
सर्वार्थे क्षणिके कस्मिंस्तथाप्यन्यानपेक्षता॥२८॥

विद्यते येषां च ज्ञानमात्रवादिनां ज्ञानादन्यद्वस्तु नास्ति, चशब्दाद्येषां तदपि विज्ञानं वस्तुतो नास्ति शून्यमेव सर्वमित्येतद्दर्शयति। पूर्वस्य बाह्यार्थवादस्यासङ्गतिरघटमानतोच्यते प्रथममित्यर्थः॥२४॥

कथं बाह्यार्थवादस्याघटमानतेत्येतदाह—**बाह्येति**। क्षणिकत्वेन ज्ञेयसम्बन्धायोगाद् ज्ञप्तेरेव विज्ञानस्य बाह्याकारत्वप्रसङ्गात् विज्ञानवादापत्तेर्बाह्यार्थवादासिद्धिरित्यर्थः। किञ्च चैत्रानुभूते मैत्रस्य स्मृत्यदर्शनात्त्वन्मते स्मृत्यभावश्च सदा प्रसज्येत। क्षणिकत्वादनुभवितुः स्मर्तुश्चैकत्वासम्भवादित्याह—**स्मृतीति**। किञ्च, बुद्धेः संस्काराधायकत्वमपि नोपपद्यते। क्षणिकत्वादेव संस्काराधानकालेऽनवस्थानात्। तथा च कथं संस्कारजन्या स्मृतिरित्याह—**क्षणिकत्वाच्चेति**॥२५॥

किञ्चाधारस्य स्थायिनोऽभावादपि संस्कारसमर्पकत्वं बुद्धेर्न सिद्ध्यतीत्याह—**आधारस्येति**। यदुक्तं सादृश्यप्रयुक्ता स्थायित्वभ्रान्तिरिति तत्राह—**तुल्यतेति**। गुणावयवसामान्याभावाद् द्रष्टुश्चासत्त्वात्तुल्यता न लभ्यते। प्राचीनयोगाननुषङ्गादित्यर्थः। यदि पूर्वापरक्षणयोः सादृश्यद्रष्टा स्थायी कश्चिदास्थीयते तत्राह—**स्थाने वेति**। तच्छब्देन क्षणिकत्वस्य हानं परामृश्यते॥२६॥

यत्तु क्षणिकत्वादिभावनया स्थायित्वादिभ्रान्तिशान्तिर्मुक्तिरिति, तत्राह—**शान्तेश्चेति**। सन्ततेरवस्तुत्वादेकैकस्मिन् क्षणे च भ्रमाभावस्य स्वारसिकत्वान्न युक्ता शान्तेः साधनापेक्षेत्यर्थः॥२७॥

किञ्चास्मिन् पक्षे लोकेऽपि साध्यसाधनभावो न सिद्ध्यतीत्याह—**अपेक्षेति**। कार्यकारणक्षणानामत्यन्तविलक्षणत्वाद्भिन्नेऽपि क्षीरादौ दध्याद्यपेक्षा यदि विवक्ष्यते

---

१. तुल्यतानिर्निमित्तत इत्येकं पदं तुल्यतायाः पूर्वोत्तरक्षणयोः सदृशत्वस्य निमित्ताभावादित्यर्थः। गुणैरवयवैर्वा सामान्यं सादृश्यव्यवहारनिमित्तं तद्विज्ञानानां नास्ति निर्गुणत्वान्निरवयवत्वाच्च।

तुल्यकालसमुद्भूतावितरेतरयोगिनौ।
योगाच्च संस्कृतो यस्तु सोऽन्यं हीक्षितुमर्हति॥२९॥
मृषाध्यासस्तु यत्र स्यात्तन्नाशस्तत्र[१] नो मतः।
सर्वनाशो भवेद्यस्य मोक्षः कस्य[२] फलं वद॥३०॥
अस्ति तावत्स्वयं नाम ज्ञानं वात्माऽन्यदेव वा।
भावाभावज्ञतस्तस्य नाभावस्त्वधिगम्यते॥३१॥

तर्हि परसन्ताने सिकतादौ किमित्यपेक्षा नेष्यते। तथा च सिकताभ्योऽपि दधि जायेतेत्यतिप्रसक्तिरित्यर्थः। प्रसिद्ध्यवष्टम्भेनातिप्रसङ्गपरिहारशङ्कामनुवदति—**सर्वेति।** सर्वजनस्यार्थे कार्यकारणभावलक्षणे विषये दधिक्षीरमित्यादौ प्रसिद्धे यदेकं क्षणिकं क्षीरादि तत्रैवापेक्षा कार्यस्य दध्यादेः सिध्येत्। न यत्र क्वापि, प्रसिद्धिविरोधात्। तथा च कुतोऽतिप्रसिक्तिरित्यर्थः। प्रसिद्ध्याश्रयणेऽपि न चान्यापेक्षा युक्तेत्याह—**तथापीति**॥२८॥

तत्र हेतुमाह—**तुल्यकालेति।** एककालभाविनौ यौ पर्जन्याङ्कुरौ परस्परसम्बद्धौ तयोर्मध्ये पर्जन्यसम्बन्धाद्योऽङ्कुरः संस्कृतोऽतिशयमापन्नोऽस्ति सोऽन्यं पर्जन्यमपेक्षितुमर्हतीति प्रसिद्धम्। क्षणभङ्गुरवादे तु भिन्नकालत्वान्मिथः सम्बन्धाभावादुपकार्योपकारकत्वानुपपत्तेर्नापेक्षा युक्तेत्यर्थः॥२९॥

यथा क्षणभङ्गपक्षे मोक्षानुपपत्तिरुक्ता तथा त्वत्पक्षेऽपि ब्रह्मात्मनोऽधेयातिशयत्वात्तुल्या मोक्षानुपपत्तिरित्याशङ्क्याह—**मृषेति।** यत्र ब्रह्मात्मन्यविद्यया कर्तृत्वादिमिथ्याध्यासो भवति तत्राहं ब्रह्मास्मीति ज्ञानादज्ञाननिवृत्तिद्वारा यथोक्ताध्यासनिवृत्तिरेवास्मत्पक्षे मोक्षो विवक्ष्यते। न हेयोपादेयरूपः सङ्गृह्यते। तस्मादस्मत्पक्षे वस्तुतोऽनाधेयातिशयत्वेऽपि नास्ति मोक्षानुपपत्तिरित्यर्थः। शून्यवादे दोषान्तरमाह—**सर्वेति।** अधिष्ठानारोप्ययोरुभयोरपि नाशे फलाभावात्फलासिद्धेर्मोक्षासिद्धिरित्यर्थः॥३०॥

सर्वनाश एव मोक्षो बलादापतति। परमार्थस्यास्तित्वे मानाभावादित्याशङ्क्याह—**अस्तीति।** सर्ववादिभिः स्वयंप्रकाशं ज्ञानमात्मा शून्यमित्यादिव्यपदेशैः स्वीकृतं परमार्थं वस्तु तावदेकमस्ति तस्य च लौकिकभावाभावाभिज्ञत्वान्नाभावोऽधिगम्यते केनापीत्यर्थः॥३१॥

---

१. नाशोऽत्र निवृत्तिः। सा तत्त्वमस्यादिमहावाक्यस्याखण्डार्थबोधेनाज्ञानरूपकारणव्यपगतेऽध्यासनिवृत्तिरूपा।

२. सर्वस्यापि नाशे शेषत्वाभावान्न मोक्षरूपं किमपि फलं स्यात्।

येनाधिगम्यतेऽभावस्तत्स स्यात्तन्न चेद्भवेत्।
भावाभावानभिज्ञत्वं लोकस्य स्यान्न चेष्यते॥३२॥
सदसत्सदच्चेति विकल्पात्प्राग् यदिष्यते।
तदद्वैतं समत्वात्तु नित्यं चान्यद्विकल्पितात्॥३३॥
विकल्पोद्भवतोऽसत्त्वं स्वप्नदृश्यवदिष्यताम्।
द्वैतस्य प्रागसत्त्वाच्च सदसत्त्वादिकल्पनात्॥३४॥
वाचारम्भणशास्त्राच्च विकाराणां ह्यभावता।
मृत्योः स मृत्युमित्यादेर्मम मायेति च स्मृतेः॥३५॥

तस्यापि कस्यचिदभावो भावीत्याशङ्क्य तस्य सत्त्वप्राप्तेस्त्वत्पक्षनिवृत्तिरस्मत्पक्षप्राप्तिश्चेत्याह—**येनेति**। सतोऽधिगन्तुरनङ्गीकारे लोकस्य विभागज्ञानानुपपत्तेः स्वानुभवविरोधः स्यादित्याह—**न चेदिति**॥३२॥

ननु यद्यपि भावाभावविभागज्ञमस्ति वस्तु किञ्चिदिति ज्ञातुं शक्यते तथापि कथमीदृशमिति विशेषतस्तदधिगन्तुं शक्यमित्याशङ्क्याह—**सदिति**। तदद्वैतमित्यत्र सदसदादेर्वैषम्यहेतोरभावादिति हेतुमाह—**समत्वादिति**। तस्यैव विनाशरहितत्वं विशेषान्तरमाह—**नित्यं चेति**। सदसदादेर्विकल्पिताद्विलक्षणाद्वैतत्वे हेत्वन्तरमाह—**अन्यदिति**॥३३॥

नानारूपे द्वैते प्रतीयमाने कथमिदमद्वैतमित्याशङ्क्याह—**विकल्पेति**। द्वैतस्यासत्त्वं मिथ्यात्वं विकल्परूपेण भेदेनोद्भवनाज्जायमानत्वात्सदसत्त्वादिकल्पनात्प्रागसत्त्वाच्च स्वप्नवदेष्टव्यम्। अतो भिन्नत्वात्कार्यत्वात्कल्पनाकालमात्रभावित्वाच्च सम्मतवन्मिथात्वं द्वैतस्य सिद्धमित्यद्वैतमविरुद्धमित्यर्थः॥३४॥

न्यायतो द्वैतस्य मिथ्यात्वमुक्त्वा शास्त्रादपि तन्मिथ्यात्वं सिद्ध्यतीत्याह—**वाचारम्भणेति**। 'वाचारम्भणं[१] विकारो नामधेयमि'ति वाक्यात्कार्यानृतत्वप्रतिपादकात्, 'मृत्योः[२] स मृत्युमाप्नोती'त्यादेर्निन्दाश्रवणाच्च विकारसत्यत्वे तदयोगाद् विकाराणामाकाशादीनां यतो मिथ्यात्वमवगम्यते तस्मादद्वितीयत्वमविरुद्धमित्यर्थः। किञ्च 'दैवी[३] ह्येषा गुणमयी'त्युपक्रम्य मामेवेश्वरं परापरप्रकृतिवियुक्तमात्मत्वेन प्रपद्यन्ते ये ते मायामेतां तरन्तीति भगवदनुशासनान्मायायाः सकार्याया ब्रह्मात्मज्ञाननिरस्यत्वसिद्धेरपि सिद्धमद्वैतमित्याह—**ममेति**॥३५॥

---

१. छा. ६.२। २. बृ., ४.४। ३. गी. ७।१४।

विशुद्धिश्चात एवास्य विकल्पाच्च विलक्षणः।
उपादेयो न हेयोऽत आत्मा नान्यैरकल्पितः॥३६॥
अप्रकाशो यथाऽऽदित्ये नास्ति ज्योतिःस्वभावतः।
नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि॥३७॥
तथाऽविक्रियरूपत्वान्नावस्थान्तरमात्मनः।
अवस्थान्तरवत्त्वे हि नाशोऽस्य स्यान्न संशयः॥३८॥
मोक्षोऽवस्थान्तरं यस्य कृतकः स चलो ह्यतः।
न संयोगो वियोगो वा मोक्षो युक्तः कथञ्चन॥३९॥
संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च।
गमनागमने[1] चैव स्वरूपं तु न हीयते॥४०॥

द्वैतस्य मिथ्यात्वादेवाशुद्धिहेतोरभावादात्मनो विशुद्धिरपि सिद्धेत्याह—**विशुद्धिरिति।** विकल्पो द्वैतं, ततो हेयोपादेयरूपाद्विलक्षणत्वादात्मनः स्वेनान्यैर्वा स्वयमुपादेयो हेयो वा (न) भवितुमुत्सहते। तस्मान्निर्विशेषो विशुद्धश्चिद्धातुरात्मेत्याह—**विकल्पाच्चेति।** किञ्चात्मा न केनचिदपि कल्प्यते तदविषयत्वादतोऽपि सर्वविशेषशून्यः शुद्धः सिद्ध्यतीत्याह—**नान्यैरिति**॥३६॥

कस्मादात्मा कल्पितो न भवतीत्याशङ्क्य कल्पनाहेतोरज्ञानस्य वस्तुतस्तत्राभावादित्याह[2]—**अप्रकाश इति**॥३७॥

यथाऽऽत्मनो न कल्पितत्वं तथा तस्यावस्थान्तरमपि नास्तीत्याह—**तथेति।** विपक्षे दोषमाह—**अवस्थान्तरेति**[3]॥३८॥

मोक्षस्यावस्थान्तरत्वात्कथमस्यावस्थान्तरराहित्यमित्याशङ्क्याह—**मोक्ष इति।** यस्य वादिनो मोक्षोऽवस्थान्तरात्मा क्रियते तस्य पक्षे कृतकत्वादसौ मोक्षश्चलो विनाशी स्यात्तेन न स मोक्षो भवेदित्यर्थः[5]। मा भूदवस्थान्तरं मोक्षः। ब्रह्मणा संयोगो वा प्रकृतेर्वियोगो वा स्यादित्याशङ्क्याह—**नेत्यादिना**॥३९॥

तत्र हेतुमाह—**संयोगस्येति।** ननु न संयोगादिलक्षणो मोक्षः, किन्तु संसारिणः संसारदेशात्परमात्मदेशगमनं वा परमात्मनः साधकोपकाराय तन्निकट-

---

१. आकाशवद् व्यापकस्यात्मनो गमनागमनस्यासम्भवात्।
२. प्रकाशस्वरूप आत्मनि तमःस्वरूपस्याज्ञानस्य संश्लेषाभावात्।
३. सावयवपदार्थस्यैवावस्थान्तरनियमात्।
४. अवस्थान्तरत्वे ह्यात्मनो विकारत्वमापद्येत। अवस्थान्तरस्य विकाररूपत्वात्।
५. मोक्षस्यात्मरूपत्वात्।

स्वरूपस्यानिमित्तत्वात्सनिमित्ता हि चापरे।
अनुपात्तं स्वरूपं हि स्वेनात्यक्तं तथैव च॥४१॥
स्वरूपत्वान्न सर्वस्य त्यक्तुं शक्यो ह्यनन्यतः।
ग्रहीतुं वा ततो नित्योऽविषयत्वापृथक्त्वतः॥४२॥
आत्मार्थत्वाच्च[1] सर्वस्य नित्य आत्मैव केवलः।
त्यजेत्तस्मात्क्रियाः सर्वाः साधनैः सह मोक्षवित्॥४३॥
आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः।
अलाभोऽन्यात्मलाभस्तु त्यजेत्तस्मादनात्मताम्॥४४॥

देशागमनं वा मोक्षः स्यादित्याशङ्क्य तयोर्निरवयवत्वाद्विक्रियावत्त्वाभावान्मैवमित्याह—**गमनेति**। स्वपक्षे मोक्षस्य नित्यत्वमाह—**स्वरूपं त्विति**॥४०॥

तस्य हान्यभावे कारणनिरपेक्षत्वेनाकार्यत्वं हेतुमाह—**स्वरूपस्येति**। अपरे पुनरवस्थान्तरादयः सनिमित्तत्वात्कार्यत्वेनानित्या भवन्तीत्याह—**सनिमित्ता हीति**। स्वरूपस्यानिमित्तत्वं साधयति—**अनुपात्तमिति**। यतः स्वरूपं स्वेनान्येन चोपात्तं न, स्वरूपत्वेन नित्यत्वात्। तथैव स्वेनान्येन वा न त्यक्तं स्वरूपत्वादेव त्यक्तुमयोग्यत्वात्। तस्मादनिमित्तत्वान्नित्यमेव स्वरूपमित्यर्थः॥४१॥

आत्मा केनचिदपि हातुमुपादातुं वा शक्यो न भवतीत्युक्तमुपपादयति—**स्वरूपत्वादिति**। सर्पादे रज्जुवदाकाशादेः सर्वस्यात्मभूतत्वादात्मा तेन त्युक्तुं शक्यो नेत्यत्र हेतुमाह—**अनन्यत इति**। परमार्थतोऽन्यस्याभावात्तेनात्मनो हेयत्वाभाववदुपादेयत्वमपि नास्तीत्याह—**ग्रहीतुं वेति**। हेयत्वाहेयत्वयोरभावे हिशब्दसूचितं फलितमाह—**तत इति**। आत्मनो हानादानयोरयोगे हेतुद्वयमाह—**अविषयत्वेति**॥४२॥

आत्मनो नित्यत्वे हेत्वन्तरमाह—**आत्मार्थत्वाच्चेति**। यस्मादात्मा नित्योऽन्यत्सर्वमनित्यमात्मार्थमात्मावस्थानं च मोक्षस्तस्मान्मुमुक्षुणा ससाधनं कर्म त्याज्यमित्याह—**त्यजेदिति**॥४३॥

अतश्च मोक्षवित्क्रियास्त्यजेदित्याह—**आत्मलाभ इति**। 'आत्मलाभान्न परं विद्यते' इति शास्त्रम्। सर्वप्रवृत्तीनामात्मार्थत्वादित्याद्युपपत्तयः। स्वरूपस्यानिमित्त-

---

१. आत्मनस्तु कामाय सर्वं प्रियं भवति, (बृ. ३.२.४.५) आत्मार्थं सर्वस्यापि वस्तुनः प्रियत्वप्रतिपादनात्।

गुणानां समभावस्य भ्रंशो न ह्युपपद्यते।
अविद्यादेः प्रसुप्तत्वान्न चान्यो हेतुरुच्यते॥४५॥
इतरेतरहेतुत्वे प्रवृत्तिः स्यात्सदा न वा।
नियमो न प्रवृत्तीनां गुणेष्वात्मनि वा भवेत्॥४६॥
विशेषो मुक्तबद्धानां तादर्थ्ये न च युज्यते।
अर्थार्थिनोस्त्वसम्बन्धो नार्थी ज्ञो नेतरोऽपि वा॥४७॥

त्वान्नास्यालाभः सम्भवतीत्याशङ्क्याह—**अलाभ इति**। स्वाज्ञानपरिकल्पिताहङ्काराद्यात्मत्वभ्रमोऽस्यालाभो नाम। तस्माद् ब्रह्मात्मज्ञानेन तन्मूलाज्ञाननिवर्त्तनेनाहङ्काराद्यात्मभ्रमं परित्यजेदित्यर्थः॥४४॥

सांख्यास्तु त्रिगुणमचेतनं प्रधानं पुरुषस्य भोगापवर्गार्थं महदादिरूपेण परिणमते। तदविवेकादस्य संसारो, मोक्षस्तु तद्विवेकात्र ब्रह्मात्मज्ञानादिति मन्यन्ते। तत्र प्रथमं परिणामासम्भवमाह—**गुणानामिति**। सत्त्वरजस्तमसां गुणानां साम्यं हि प्रधानम्। तस्य समभावस्य प्राक्कालीनस्य भ्रंशो नाम च्युतिः[१]। पूर्वावस्थात्यागेनावस्थान्तरापत्तिस्तथाविधः परिणामो नैव घटते। तस्यामवस्थायामविद्यादेर्धर्मादेश्च लीनत्वादीश्वरस्य चाऽनभ्युपगमादभ्युपगमेऽपि तस्य पुरुषत्वेनोदासीनत्वादन्यस्य सर्वस्य प्रधानकार्यत्वादित्यर्थः॥४५॥

सत्त्वादीनां गुणानामन्योन्यप्रवृत्तिनिमित्तत्वमाशङ्क्याह—**इतरेतरेति**। यदि गुणानामन्योन्यप्रवृत्तिहेतुत्वं तदा प्रवृत्तिर्महदादेरुत्पादः सदा स्यात्सर्वदा हेतोः सत्त्वात्। न चेदेवं कदाचिदपि प्रवृत्तिर्न स्यात्। हेतोरप्रयोजकत्वादित्यर्थः। क्रमेणोत्पत्तिस्थितिसंहाराणां प्रसिद्धत्वान्न यौगपद्यमित्याशङ्क्याह—**नियम इति**। यस्मादुत्पत्त्यादीनां प्रवृत्तीनां नियामको गुणाश्रयो वाऽऽत्माश्रयो वा न कश्चिदुपपद्यते[२] तस्मान्न तासां नियमः संम्भवेदित्यर्थः॥४६॥

कथञ्चित्प्रधानप्रवृत्त्यभ्युपगमेऽपि दोषो दुर्निवारः स्यादित्याह—**विशेष इति**। प्रधानस्य पुरुषार्थत्वे सति सर्वसाधारण्यात् बद्धान् मुक्तांश्च प्रति विशेषो न युज्यते। तेन सर्वान् प्रति प्रवर्तते न वा कमपि प्रतीत्यव्यवस्थेत्यर्थः। किञ्च शेषशेषिणोः सम्बन्धो वक्तव्यः। स च नासङ्गत्वात्पुरुषस्य। नार्थी ज्ञो निर्विशेषत्वात्। नेतरोऽपि प्रधानाख्यो जडत्वादिति न तयोः सङ्गतिरित्याह—**अर्थेति**॥४७॥

---

१. प्रकृतेर्महदादिरूपेण विकारः।

२. आत्मनोऽविकारित्वाद् गुणानाञ्च परस्परमप्रयोजकत्वात्।

प्रधानस्य च पारार्थ्यं पुरुषस्याविकारतः।
न युक्तं सांख्यशास्त्रेऽपि विकारेऽपि[1] न युज्यते॥४८॥
सम्बन्धानुपपत्तेश्च प्रकृतेः पुरुषस्य च।
मिथोऽयुक्तं तदर्थत्वं प्रधानस्याचितित्वतः॥४९॥
क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रे च पूर्ववत्।
निर्निमित्ते त्वनिर्मोक्षः प्रधानस्य प्रसज्यते॥५०॥
न प्रकाश्यं यथोष्णत्वं ज्ञानेनैवं सुखादयः।
एकनीडत्वतोऽग्राह्याः स्यु कणादादिवर्त्मनाम्॥५१॥

प्रधानस्य पारार्थ्यासम्भवे हेत्वन्तरमाह—**प्रधानस्य चेति**। विकारेऽपि पुरुषस्यानित्यत्वप्रसङ्गान्न तादर्थ्यं प्रधानस्य युक्तमित्याह—**विकारेऽपीति**॥४८॥

प्रधानपुरुषयोः सम्बन्धाभावमुक्तं प्रपञ्चयति—**सम्बन्धेति**। न हि पुरुषस्यासङ्गस्य निर्विकारस्य प्रकृत्या सङ्गतिः सङ्गच्छते। नापि प्रकृतेर्जडत्वाच्चिदेकतानेन पुरुषेणोदासीनस्वभावेन सम्बन्धः सिद्ध्यति। तथा च तयोर्मिथः सम्बन्धाभावान्नार्थार्थित्वोपपत्तिरित्यर्थः[2]॥४९॥

निर्विकारत्वं पुरुषस्योक्तं व्यनक्ति—**क्रियोत्पत्ताविति**। यदि पुरुषे काचित्क्रियोत्पद्येत तदा तस्य सक्रियत्वाद्विनाशित्वं क्षीरादिवदापद्येत। नित्यश्च पुरुषोऽभ्युपगतः। तेन तस्य निर्विकारत्वमित्यर्थः। ननु देहादिवत्पुरुषस्यापरा क्रिया न स्वीक्रियते, किन्तु ज्ञानलक्षणैव क्रियाऽभ्युपगम्यते। तत्राह—**ज्ञानेति**। यदि जन्यज्ञानत्वं पुरुषस्येष्टं तदा पूर्ववद्विनाशित्वम्। अजन्यज्ञानत्वे च न तादर्थ्यं प्रकृतेः सिद्ध्येदित्यर्थः। यदि पुरुषशेषत्वं विनापि प्रधानप्रवृत्तिरिष्येत तदा निर्निमित्ते प्रधानव्यापारे सत्यनिर्मोक्षः प्रसज्यते। सदा व्यापारप्रसङ्गादित्याह—**निर्निमित्त इति**॥५०॥

साङ्ख्यपक्षे बन्धमोक्षाभावेऽपि वैशेषिकादिपक्षे तद्व्यवस्थोपपत्तिरित्याशङ्क्याह—**नेति**। यथोष्णत्वमग्निनिष्ठमग्निष्ठेन प्रकाशेन न प्रकाश्यमेकाश्रयत्वाद् ग्राह्यग्राहकत्वायोगात्। तथाऽऽत्मगताः सुखदुःखादयो न तद्गतेन ज्ञानेन ग्राह्या भवितुमर्हन्ति एकाश्रयत्वादेव ग्राह्यग्राहकत्वस्य तेषु दुर्ग्रहत्वात्। तस्मात्काणादादिमतानुसारिणां मतेऽपि कुतो बन्धमोक्षव्यवस्था सिद्ध्यतीत्यर्थः॥५१॥

---

१. पुरुषस्याविकारित्वे सिद्धे न तदर्थं प्रधानस्य विकारः।
२. तमःप्रकाशवद्विरुद्धस्वभावयोः पुरुषप्रधानयोरर्थार्थिसम्बन्धोऽपि निषिद्धः।

युगपत्समवेतत्वं सुखविज्ञानयोरपि।
मनोयोगैकहेतुत्वादग्राह्यत्वं सुखस्य च।।५२।।
तथाऽन्येषां च भिन्नत्वाद्युगपज्जन्म नेष्यते।
गुणानां समवेतत्वं ज्ञानं चेन्न विशेषणात्।।५३।।
ज्ञानेनैव विशेषत्वाज्ज्ञानाप्यत्वं स्मृतेस्तथा।
सुखं ज्ञातं मयेत्येवं तवाज्ञानात्मकत्वतः।।५४।।
सुखादेर्नात्मधर्मत्वमात्मनस्तेऽविकारतः।
भेदादन्यस्य कस्मान्न मनसो वाऽविशेषतः।।५५।।

एकाश्रयत्वाज्ज्ञानसुखादीनां भास्यभासकत्वानुपपत्तिरित्युक्त्वा युगपत्तेषामसम्भवादपि भास्यभासकत्वानुपपत्तिरित्याह—**युगपदिति**। मनोयोगस्यैकं कार्यं प्रति हेतुत्वादनेकगुणोत्पत्तिहेतुत्वानभ्युपगमात्पूर्वसंयोगनाशे तत्कार्यस्य नष्टत्वाद्युगपत्समवेतत्वं न घटते। नापि समवाये प्रमाणमस्ति[1]। ततो न ज्ञानेन सुखादेर्ग्राह्यत्वम्। न चात्ममनसोर्निरवयवत्वादात्मनोऽस्ति संयोगः[2] संयोगविभागवत्त्वे घटादिवद्विकारित्वमनित्यत्वं च दुर्वारमापद्येतेत्यर्थः।।५२।।

यथा ज्ञानसुखयोर्युगपज्जन्माभावाद् ग्राह्यग्राहकत्वानुपपत्तिरित्युक्तं तथेच्छादीनामपि विलक्षणत्वादेकस्मिन् काले जन्म नेष्यते। एकस्यात्ममनःसंयोगस्यानेककार्योत्पत्तिहेतुत्वानुपपत्तेरुक्तत्वादतो न तेषां ग्राह्यग्राहकत्वसिद्धिरित्यतिदिशति—**तथेति**। ज्ञानेन दुःखादीनां भास्यत्वं मा भूदात्मसमवेतत्वमेव तेषां ज्ञानं नामेत्याशङ्क्य ज्ञानेन तेषां विशेषितत्वदर्शनान्नैवमित्याह—**गुणानामिति**।।५३।।

तदेव विशदयति—**ज्ञानेनैवेति**। ज्ञानसंस्कारजनितस्मृतिविषयत्वादपि ज्ञानव्याप्यत्वं सुखादेर्वक्तव्यमित्याह—**स्मृतेरिति**। किञ्च तव मते ज्ञानादेरस्वयंप्रकाशत्वादात्मसमवेतत्वमात्रेण न तत्सिद्धिः सिद्धेत्याह—**तवेति**।।५४।।

ज्ञानसुखादीनामात्मगुणाभ्युपगमेन भास्यभासकत्वानुपपत्तिरुक्ता न च तेषामात्मगुणत्वमात्मनो निर्विशेषत्वादित्याह—**सुखादेरिति**। सर्वगत्वेनाविकारत्वादविकारस्य च गुणवत्त्वे सम्प्रतिपन्नदृष्टान्ताभावान्नात्मनो गुणवत्त्वमित्यर्थः। किञ्च गुणगुणिनोर्भवता भेदाङ्गीकारादात्मान्तरस्य मनसो वा ते सुखादयः कुतो न स्युर्विशेषाभावात्[3]। अदृष्टादेरप्यात्मीयत्वासिद्धेरनियामकत्वादित्याह—**भेदादिति**।।५५।।

---

१. वेदान्तनये समवायस्य निरस्तत्वात्। २. निरवयवपदार्थस्य संयोगत्वासम्भवात्।
३. निर्धर्मकत्वादात्मनो गुणाश्रयत्वासिद्धे तत्संयुक्तस्य मनसः सुखादयो गुणाः कथं न स्युरित्याह।

स्यान्मालाऽपरिहार्या तु ज्ञानं चेज्ज्ञेयतां व्रजेत्।
युगपद्वापि चोत्पत्तिरभ्युपेताऽत इष्यते॥५६॥
अनवस्थान्तरत्वाच्च बन्धो नात्मनि विद्यते।
नाशुद्धिश्चाप्यसङ्गत्वादसङ्गो हीति च श्रुतेः॥५७॥
सूक्ष्मैकागोचरेभ्यश्च न लिप्यत इति श्रुतेः[१]।
एवं तर्हि न मोक्षोऽस्ति बन्धाभावात्कथञ्चन॥५८॥
शास्त्रानर्थक्यमेव स्यान्न बुद्धेर्भ्रान्तिरिष्यते।
बन्धो मोक्षश्च तन्नाशः स यथोक्तो न चान्यथा॥५९॥
बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते।
बुद्धिर्नान्योऽस्ति बोद्धेति सेयं भ्रान्तिर्हि धीगता॥६०॥

किञ्च ज्ञानं ज्ञानान्तरवेद्यं परैरिष्यते तदयुक्तमित्याह—**स्यादिति**। अथैकस्मादेव संयोगाद् घटज्ञानं तज्ज्ञानं चेत्यन्तो मालायाः स्यादिति मन्यसे तर्हि मनः संयुक्तात्मसमवायलक्षणसामग्र्यास्तुल्यत्वात्तत्तज्ज्ञानविषयं ज्ञानान्तरं तदैव स्याद् घटादिज्ञानान्तराणि च तदैव स्युस्तत्सामग्र्या अपि सम्भवादित्याह—**युगपदिति**॥५६॥

इतश्च वैशेषिकादिकल्पना न युक्तेत्याह—**अनवस्थेति**। अनवस्थान्तरत्वात् कूटस्थत्वेन आत्मनोऽवस्थान्तररहितत्वादिति यावत्। आत्मनि परमार्थतो बन्धाभाववत्परमार्थतो मोक्षोऽपि नास्तीति वक्तुं चशब्दः॥५७॥

इतश्च पारमार्थिकमात्मनि बन्धनादिकं न सिद्ध्यतीत्याह—**सूक्ष्मैकेति**। तवापि तर्हि बन्धमोक्षव्यवस्था नैव सुस्थेति साम्यमाशङ्कते—**एवमिति**॥५८॥

बन्धमोक्षाभावे का क्षतिरित्याशङ्क्य स एवाह—**शास्त्रेति**। मोहपरिकल्पित-भ्रान्तिनिवर्त्तनेन शास्त्रसाफल्यं दर्शयन्नुत्तरमाह—**नेत्यादिना**। अज्ञानं कल्पना-मूलमित्यादिना यथा पूर्वत्रात्माज्ञाननिबन्धनो बन्धः स्वज्ञानप्रयुक्तो मोक्ष इत्युक्तम्, तथैवासौ बन्धो मोक्षश्चाभ्युपगन्तव्यो न पारमार्थिको बन्धो मोक्षो वा सम्भवतीत्याह—[२]**स यथेति**॥५९॥

अज्ञानमूलबुद्धिधर्माध्यासलक्षणो बन्धः चिदात्मनीत्युक्तमुपपादयति—**बोधेति**। चिदात्माभासाज्ञानकञ्चुकः सन्नज्ञानकार्यभूतां साभासां बुद्धिमविवेकादात्मत्वेन गतः संसरतीत्यर्थः॥६०॥

---

१. असङ्गो न हि सज्यते (बृ. ४.२.४) असङ्गो ह्ययं पुरुषः (बृ. ४.३.१५) इति श्रुतिः।
२. शुद्धबुद्धमुक्तस्वभावस्यात्मनो न वास्तविकबन्धमोक्षौ प्रपद्येते।

बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते।
अविवेकोऽप्यनाद्योऽयं संसारो नान्य इष्यते॥६१॥

मोक्षस्तन्नाश एव स्यान्नान्यथाऽनुपपत्तितः।
येषां वस्त्वन्तरापत्तिर्मोक्षो नाशस्तु[1] तैर्मतः॥६२॥

अवस्थान्तरमप्येवमविकारान्न युज्यते।
विकारेऽवयवित्वं स्यात्ततो नाशो घटादिवत्॥६३॥

तस्माद् भ्रान्तिरतोऽन्या हि बन्धमोक्षादिकल्पनाः।
साङ्ख्यकाणादबौद्धानां मीमांसाह(र्ह)तकल्पनाः[2]॥६४॥

बुद्धौ बोधस्य प्रतीयमानत्वे स्वाभाविकत्वं किन्न स्यादित्याशङ्क्याह—**बोधस्येति।** आत्मनः स्वरूपस्यैव बोधस्याविवेकाद्बुद्धावध्यासश्चेदयमविवेकः सादिरनादिर्वेति वीक्षायामाह—**अविवेकोऽपीऽति।** तथा ब्रह्मात्मज्ञानेन तस्यैव निवृत्तिर्न संसारस्येत्याशङ्क्याह—**संसार इति।** स चायमविवेकः प्रवाहरूपेणानादिस्तेन संसारस्यापि प्रवाहरूपेणानादित्वम्। न चाविवेकादन्यः संसारस्तेन[3] विवेकादविवेकनिवृत्तिर्वाक्यार्थज्ञानादज्ञाननिवृत्त्या संसारनिवृत्तिरित्यर्थः॥६१॥

बन्धस्याज्ञानात्मकत्वे फलितमाह—**मोक्ष इति।** ज्ञानादज्ञाननिवृत्त्या तत्कार्यस्य बन्धस्य ध्वस्तिरेव मुक्तिर्नान्यो मोक्षो युज्यते। अन्यस्य मोक्षस्यानुपपत्तेरुक्तत्वादित्यर्थः। येषां पुनर्वादिनां स्वरूपादन्यवस्तुप्राप्तिर्मोक्षोऽभ्युपगम्यते तैर्नाश एव मोक्षो विवक्षितः। स्वरूपस्यान्यभावेऽवस्थानायोगान्न स्वरूपनाशो युज्यते फलिनोऽभावादित्याह—**येषामिति**॥६२॥

मा भूद्वस्त्वन्तरापत्तिर्मोक्षोऽवस्थान्तरापत्तिः स्यादित्याशङ्क्याह—**अवस्थान्तरमिति।** आत्मनो विकाराभावस्यासिद्धिमाशङ्क्योक्तम्—**विकार इति**॥६३॥

वेदान्तसिद्धान्तादन्या बन्धस्य मोक्षस्य तदुभयसाधनस्यात्मस्वरूपस्य च कल्पनाः श्रुतिन्यायानुभवविरुद्धत्वाद्विभ्रमत्वाच्च प्रामाणिकैरादर्त्तव्या न भवन्तीत्याह—**तस्मादिति।** केषां पुनरेताः कल्पना नादर्त्तव्याः स्युरित्याशङ्क्याह—**साङ्ख्येति।** एतेषां कल्पनाः सर्वा भ्रान्तिरिति पूर्वेण सम्बन्धः॥६४॥

---

१. एकविंशतिदुःखध्वंसो मोक्ष इति नैयायिकाः।

२. अनुपपत्तिमेव द्रढयन् पक्षान्तरं निराकरोति एषां वादिनां स्वरूपादन्यवस्त्वन्तरापत्तिरात्मनो मोक्ष इति मतं तैरात्मनाश एव मोक्ष इति स्वीकृतः।

३. आत्मानात्मवस्तुनोरविवेक एव संसारः।

शास्त्रयुक्तिविहीनत्वान्नादर्तव्याः कदाचन।
शक्यन्ते शतशो वक्तुं दोषास्तासां सहस्रशः।।६५।।
अपि निन्दोपपत्तेश्च यान्यतोऽन्यानि चेत्यतः।
त्यक्त्वाऽतो ह्यन्यशास्त्रोक्तीर्मतिं कुर्याद्दृढां बुधः।।६६।।
श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनार्जवम्।
वेदान्तस्यैव तत्त्वार्थे व्यासस्याभिमते तथा।।६७।।
इति प्रणुन्ना द्वयवादकल्पना निरात्मवादाश्च तथा हि युक्तितः।
व्यपेतशङ्काः परवादतः स्थिरा मुमुक्षवो ज्ञानपथे स्युरित्युत।।६८।।
स्वसाक्षिकं ज्ञानमतीव निर्मलं विकल्पनाभ्यो विपरीतमद्वयम्।
अवाप्य सम्यग्यदि निश्चितो भवेद् निरन्वयो निर्वृतिमेति शाश्वतीम्[1] ।।६९।।

तासां भ्रान्तिप्रदत्वादेव प्रमाणयुक्तिविरुद्धानामनादर्त्तव्यत्वं फलितमाह—**शास्त्रेति**। तासु शास्त्रयुक्तिविरोधमेव स्फोरयति—**शक्यन्त इति**।।६५।।

इतश्च साङ्ख्यादिकल्पना नादर्त्तव्या इत्याह—**अपीति**।

यान्यतोऽन्यानि शास्त्राणि पृथिव्यां विविधानि वै।
शङ्कनीयानि विद्वद्भिर्धर्मशुद्धिमभीप्सुभिः।।
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः।।

इत्यादिनिन्दावचनाच्च यथोक्तकल्पना नादर्त्तव्या इत्यर्थः। यस्मादेवं वेदबाह्याः कल्पना निन्दितास्तस्माद्वेदान्तशास्त्रादन्यशास्त्रोक्तीस्त्यक्त्वा दृढां बुद्धिं विवेकाय मुमुक्षुः सततं कुर्यादित्याह—**त्यक्त्वेति**।।६६।।

कथं मतिं कुर्यात्कुत्र चेत्यपेक्षायामाह—**श्रद्धेति**।।६७।।

उक्तं परपक्षनिराकरणं सप्रयोजनं सङ्क्षिप्य कथयति—**इति प्रणुन्ना इति**। प्रणुन्ना निराकृताः। परवादेभ्यो व्यपेतशङ्कास्तत्प्रामाणिकत्वशङ्कावर्जिताः अतएव स्थिरा निश्चलाः ज्ञानपथे मुमुक्षुवः स्युरिति यतोऽतः प्रयोजनात्प्रणुन्ना इति सम्बन्धः।।६८।।

ब्रह्मात्मज्ञानस्यैव परमपुरुषार्थसाधनत्वमिति तदीयस्वरूपानुवादपूर्वकं दर्शयन् मुमुक्षूणां तन्निष्ठत्वमावश्यकमिति दर्शयति—**स्वसाक्षिकमिति**। निरन्वयो निरस्ताज्ञानतत्कार्यसम्बन्धः।।६९।।

---

१. सर्वविकल्पातीतं ब्रह्म ज्ञानमेत्य निरस्ताज्ञानतत्कार्यसम्बन्धो भवति।

इदं रहस्यं परमं परायणं व्यपेतदोषैरभिमानवर्जितैः।
समीक्ष्य कार्या मतिरार्जवे सदा न तत्त्वदृक्स्वान्यमतिर्हि कश्चन॥७०॥
अनेकजन्मान्तरसञ्चितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकैः।
इदं विदित्वा परमं हि पावनं न लिप्यते व्योम इवेह कर्मभिः[१]॥७१॥
प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥७२॥
परस्य देहे न यथाभिमानिता परस्य तद्वत्परमार्थमीक्ष्य[२] च।
इदं हि विज्ञानमतीव निर्मलं सम्प्राप्य मुक्तोऽथ भवेच्च सर्वतः॥७३॥
नहीह लाभोऽभ्यधिकोऽस्ति कश्चन स्वरूपलाभाः स इतो हि नान्यतः।
न देयमैन्द्रादपि राज्यतोऽधिकं स्वरूपलाभं त्वपरीक्ष्य यत्नतः॥७४॥

इदानीमुक्तज्ञानाधिकारिणं सङ्क्षिप्योपन्यस्यति—**इदमिति**॥७०॥

एवमतियत्नलभ्येन तज्ज्ञानेन किं फलं प्राप्यते तदाह—**अनेकेति**॥७१॥

यथोक्तज्ञानमाचार्येण कस्मै दातव्यमित्येपेक्षायामाह—**प्रशान्तेति**। सदेति दीर्घकालत्वं सततमिति नैरन्तर्यमुच्यते। यथोक्तार्थकारिणे तथैवानुष्ठायिने॥७२॥

यथोक्तोऽधिकारी गुरुणा श्रावितत्त्वमस्यादिवाक्यः सन् कथं ब्रह्मात्मानमवगच्छति। किं वा फलं प्राप्नोतीत्यपेक्षायामुक्तमेव सङ्क्षिप्याह—**परस्येति**। न हि देवदत्तस्यान्यदीये देहे ममाहंभावोऽभिमानो भवति। तथा परमार्थमहं ब्रह्मेति विज्ञाय स्वदेहेऽप्यभिमानरहितः सर्वानर्थरहितो निर्वृणोतीत्यर्थः॥७३॥

किमिति यत्नेन शिष्यपरीक्षणं क्रियते यस्मै कस्मैचिदुपस्थिताय दयालुना गुरुणा दातव्येत्याशङ्क्याह—**न हीति**। स्वरूपं ब्रह्मात्म लभ्यते येन तद्ब्रह्मात्मज्ञानं स्वरूपलाभः, तदेवेह शास्त्रोक्तसाधनस्य मुमुक्षोः श्रावितत्त्वमस्यादिवाक्यस्य पदार्थविवेकवतो निर्विचिकित्समहं ब्रह्मेति साक्षात्काररूपं ज्ञानं वाक्यानुत्पन्नं मोक्षकारणमिति सिद्धम्॥७४॥

॥इति षोडशं पार्थिवप्रकरणं विवृत्तम्॥१६॥

---

१. ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा (गी. ४.३७)।
२. यथा परस्य देहेऽभिमानराहित्यं सर्वस्य तथैवात्मविदः स्वदेहेन्द्रियादिषु स्वत्वरहितो भवति।

अथ सप्तदशं सम्यङ्मतिप्रकरणम्

आत्मा ज्ञेयः परो[1] ह्यात्मा यस्मादन्यन्न विद्यते।
सर्वज्ञः सर्वदृक् शुद्धस्तस्मै ज्ञेयात्मने नमः।।१।।

पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितम्।
ब्रह्म वेदरहस्यं यैस्तान्नित्यं प्रणतोऽस्म्यहम्।।२।।

यद्वाक्सूर्यांशुसम्पातप्रणष्टध्वान्तकल्मषः।
प्रणम्य तान् गुरून् वक्ष्ये ब्रह्मविद्याविनिश्चयम्।।३।।

सम्यङ्मतिप्रकरणम्

परपक्षप्रतिक्षेपमुखेनोक्तं ज्ञानं मोक्षसाधनं स्वपक्षसाधनेन व्यक्तीकर्तुं प्रकरणान्तरमारभमाणो देवताभक्तेर्ज्ञानप्राप्तावन्तरङ्गसाधनं व्यक्तीकर्तुं प्रकरणान्तरं सूचयति—**आत्मा ज्ञेय इति**। नन्वात्मवत् ज्ञेयत्वं घटादेरपि विद्यते ज्ञातुरन्यस्य भावादित्याशङ्क्य घटादे रूपादिमत्वाच्चक्षुरादिगम्यत्ववदात्मनो रूपादिराहित्यात्र चक्षुरादिसापेक्षत्वमिति विवक्षितमाह—**परो हीति**। तस्य स्वप्रकाशत्वं चक्षुराद्यविषयत्वं चोक्तमद्वितीयत्वमाह—**यस्मादिति**। तस्यैव सामान्यविशेषाभ्यां सर्वत्राप्रतिबद्धज्ञानत्वेन तदस्थरूपं दर्शयति—**सर्वज्ञ इति**। तर्हि सर्वसम्बन्धादशुद्धिः शङ्क्यते, नेत्याह—**शुद्ध इति**। ज्ञेयात्मत्वं=शास्त्रप्रतिपाद्यत्वम्।।१।।

गुरुभक्तेरपि देवताभक्तेरिव ज्ञानप्राप्तावन्तरङ्गत्वं दर्शयितुं गरुपरम्परां प्रणमति—**पदवाक्येति**। दीपभूतैः सर्वप्रकाशनसामर्थ्यैः।।२।।

सामान्येनाचार्यपरम्परां नमस्कृत्य विशेषेण स्वगुरुनमस्कारपूर्वकमुद्देश्यप्रतिज्ञां करोति—**यद्वागिति**। ब्रह्मविद्यायां विनिश्चयो निर्विचिकित्सता येन न्यायेन भवति तं वक्ष्य इत्यर्थः।।३।।

---

१. इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।। (कठो. १.३.१०)

आत्मलाभात्परो नान्यो[१] लाभः कश्चन विद्यते।
यदर्था वेदवादाश्च स्मार्ताश्चापि तु याः क्रियाः॥४॥
आत्मार्थोऽपि हि यो लाभः सुखायेष्टो विपर्ययः।
आत्मलाभः परः प्रोक्तो नित्यत्वाद् ब्रह्मवेदिभिः॥५॥
स्वयं लब्धस्वभावत्वाल्लाभस्तस्य न चान्यतः।
अन्यापेक्षस्तु यो लाभः सोऽन्यदृष्टिसमुद्भवः॥६॥
अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते।
ज्ञानेनैव तु सोऽपि स्याद्विरोधित्वान्न कर्मणा[२]॥७॥

किमर्थं ब्रह्मविद्याविनिश्चयो वक्ष्यते तत्राह—**अत्मेति।** आत्मलाभस्य प्रामाणिकत्वं सूचयति—**यदर्था इति।** श्रुतयः स्मृतयश्च यथाऽऽत्मज्ञाने पर्यवस्यन्ति तथा ताभिः विहिताः सर्वाः क्रियाः क्रियमाणाश्चित्तशुद्धिद्वारा तत्रैव निष्ठां प्राप्नुवन्तीत्याह—**अपि त्विति**॥४॥

पुत्रादिलाभादात्मलाभस्य परत्वेऽपि पुत्रादिपरित्यागेन नात्मलाभोपायाश्रयणं युक्तं तस्याप्यात्मसुखहेतुत्वादित्याशङ्क्याह—**आत्मार्थोऽपीति।** योऽपि पुत्रादेरर्थस्य लाभः स्वार्थः सन्नस्यैवात्मनः सुखायेष्यते स कदाचिद्विपर्ययो विपरीतो भवति पुत्रादेरेव कदाचिद् दुःखहेतुत्वदर्शनादित्यर्थः। आत्मलाभस्य लाभान्तरापेक्षया परत्वमुक्तं स्फोरयति—**आत्मेति**॥५॥

तस्य नित्यत्वं कुतोऽवगम्यते तत्राह—**स्वयमिति।** पुत्रादिलाभस्य साधनाधीनत्वेनानित्यत्वं विशेषमाह—**अन्येति।** अन्यदृष्टेः सकाशात् समुद्भवो यस्य स तथोक्तः। आत्मलाभस्तु नैवं, तेन नित्य इत्यर्थः॥६॥

अन्यदृष्टिसमुद्भवादनित्यश्चेदनात्मलाभस्तर्हि कासावन्यदृष्टिस्तत्राह—**अन्यदृष्टिरिति।** अन्यस्मिन्ननात्मनि दृष्टिः प्रतीतिर्यतो भवति साऽन्यदृष्टिः। उक्तलक्षणो मोक्षो ज्ञानमन्तरेणैव स्यादिति चेन्नेत्याह—**ज्ञानेनैवेति।** ज्ञानेनाज्ञानस्य सकार्यस्य विरोधित्वात्तन्निवृत्तिलक्षणो मोक्षस्तेनैव भवति, न कर्मणा कर्माज्ञानयोर्विरोधाभावादित्यर्थः॥७॥

---

१. आत्मलाभस्य परमपुरुषार्थमोक्षस्वरूपत्वान्नित्यत्वम्। तथा च श्रुतिः 'न स पुनरावर्तते' (छा. ८.१५.१)।

२. अविद्याजन्यत्वेन कर्मणोऽज्ञानविरोधिता।

कर्मकार्यस्त्वनित्यः स्यादविद्याकामकारणः।
प्रमाणं वेद एवात्र ज्ञानस्याधिगमे स्मृतः॥८॥
ज्ञानैकार्थपरत्वात्तं वाक्यमेकं ततो विदुः।
एकत्वं ह्यात्मनो ज्ञेयं वाक्यार्थप्रतिपत्तितः॥९॥
वाच्यभेदात्तु तद्भेदः कल्प्यो वाच्योऽपि तच्छ्रुतेः।
त्रयं त्वेतत्ततः प्रोक्तं रूपं नाम च कर्म च॥१०॥
असदेतत्त्रयं तस्मादन्योन्येन हि कल्पितम्।
कृतो वर्णो यथा शब्दाच्छ्रुतोऽन्यत्र धिया बहिः॥११॥

कर्मणा सकार्याविद्यानिवृत्तिरूपो मोक्षो विरोधाभावान्माभूत्तथापि स्वर्गादिवन्मोक्षस्य कर्मसाध्यत्वं स्यादित्याशङ्क्याह—**कर्मेति**। मिथ्याप्रत्ययरागमूलकर्मसाध्यत्वादित्याह—**अविद्येति**। न मोक्षस्य कर्मसाध्यत्वम्, किन्तु ज्ञानैकलभ्यत्वमित्यत्र किं प्रमाणं तदाह—**प्रमाणमिति**। कर्मणोऽनित्यफलत्वं ज्ञानस्य मोक्षफलत्वमित्यस्यार्थस्याधिगमे प्रमाणम्॥८॥

'तद्यथेह कर्मचितो लोक क्षीयते'[1], 'ब्रह्मविदाप्नोति परम्'[2] इत्यादिवेद एव यतो विद्वद्भिः स्मृतस्ततोऽध्ययनविध्युपात्तस्य वेदस्य परमपुरुषार्थसाधनज्ञानैकार्थपरत्वात्तं वेदमेकं वाक्यं प्रामाणिका विदुरित्याह—**ज्ञानेति**। किं तर्हि तेन ज्ञानेन ज्ञेयमित्याशङ्क्याह—**एकत्वमिति**। सत्यं [3]ज्ञानमित्यवान्तरवाक्यार्थप्रतिपत्तिद्वाराऽऽत्मनो ब्रह्मैकत्वं विज्ञेयमित्यर्थः॥९॥

नन्वात्मनो ब्रह्मणश्चैकत्वमयुक्तमपर्यायशब्दभेदादर्थभेदावगमादित्याशङ्क्याह—**वाच्यभेदादिति**। तद्भेदोऽपर्यायवाचकशब्दभेदो वाच्यार्थभेदात्कल्प्यते त्वया, वाच्योऽपि चार्थो भिन्नस्तच्छ्रुतेश्च पर्य्यायशब्दभेदश्रवणादेव कल्प्यते। तथा चान्योन्याश्रयादविद्याकल्पितस्य वाच्यवाचकभेदस्य नाद्वितीयब्रह्मात्मविरोधितेत्यर्थः। त्रयं वा इदं नामरूपं कर्मेत्यादिश्रुत्यैवात्मातिरिक्तं त्रयं प्रोक्तं ततोऽनेकत्वमेव वेदार्थः स्यादिति शङ्कते—**त्रयं त्विति**[4]॥१०॥

प्रागुक्तान्योन्याश्रयत्वदोषादन्योन्यापेक्षया समीक्षितमेतत्त्रयं न प्रमातुं शक्यं, किन्तु लोकप्रसिद्धं मिथ्याभूतमनूद्यते तेन नाद्वैतविरोधितेति सिद्धान्तवाद्याह—**असदिति**। अन्योन्यापेक्षया दृष्टस्य कल्पितत्वे दृष्टान्तमाह—**कृत इति**। यथा

---

१. छा. ८.१.६। २. तै. २.१। ३. सत्यं ज्ञानमनन्तं ब्रह्म (तै. २.१.१)।
४. अविद्याकल्पितो हि नामरूपात्मको भेदः।

दृष्टं चापि यथा रूपं बुद्धेः शब्दाय कल्पते।
एवमेतज्जगत्सर्वं भ्रान्तिबुद्धिविकल्पितम्।।१२।।
असदेतत्ततो युक्तं संविन्मात्रं न कल्पितम्।
वेदश्चापि स एवाद्यो वेद्यं चान्यत्तु कल्पितम्।।१३।।
येन वेत्ति स वेदः स्यात्स्वप्ने सर्वं तु मायया।
येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते।।१४।।
येन स्वप्नगतो वक्ति सा वाग्घ्राणं तथैव च।
रसनस्पर्शने चैव मनश्चान्यत्तथेन्द्रियम्।।१५।।
कल्प्योपाधिभिरेवैतद्भिन्नं ज्ञानमनेकधा।
आधिभेदाद्यथा भेदो मणेरेकस्य जायते।।१६।।

हीन्द्रादेर्वर्णभेदः सहस्राक्षत्वाद्याकारः शब्दादेव श्रुतोऽन्यत्वबुद्ध्या कुड्यादौ कृतो निवेशितो मिथ्या कथ्यते। नहि शब्दाद्बुद्धिस्थस्याकारविशेषस्य भित्त्यादावन्यत्वधिया कृतस्य संत्यत्वमस्तीत्यर्थः।।११।।

दृष्टान्तान्तरेण दार्ष्टान्तिकं स्पष्टयति—**दृष्टञ्चेति**। यथा च भित्तिपटादौ देवदत्तादे रूपं दृष्टं बुद्धौ निक्षिप्तं बुद्धेरागत्य शब्दव्यवहाराय समर्थो भवति। एवमेव जगत्सर्वं नामरूपकर्मात्मकं भ्रान्तबुद्ध्या मिथ्याज्ञानेन परिकल्पितं रज्जुसर्पादिवन्मिथ्यैवेत्यर्थः।।१२।।

जगतो मिथ्यात्वे फलितमाह—**असदिति**। सर्वं जगत्कल्पितं चेत्तर्हि शून्यवादः स्यात्। मैवम्। चिन्मात्रस्यात्मनः सर्वकल्पनास्पदत्वेनाकल्पिततत्वादित्याह—**संविदिति**[1]। वेदाचार्यादिरात्मप्रतिपत्तिहेतुत्वेनाकल्पिततत्वमाशङ्क्योक्तम्—**वेदश्चेति**। आत्मैवाविद्यया शास्त्रचार्यादिरूपेण स्वज्ञानहेतुतां प्रतिपद्यते। वेद्यश्च लौकिको वैदिकश्चात्मैव तद्व्यतिरिक्तस्तु कल्पितो मिथ्यैवेत्यर्थः।।१३।।

कथं पुनरात्मैवाद्यो वेदो वेद्यश्चेत्याशङ्क्य स्वप्नदृष्टान्तेन साधयति—**येनेति**[2]।।१४-१५।।

कथमेकरूपं ज्ञानं वेदादिरूपेणानेकधा भिद्यते तत्राह—**कल्पोपाधिभिरिति**। स्वप्ने कल्प्योपाधिवशादेकमेव चैतन्यमनेकधा भिन्नमित्यत्र दृष्टान्तमाह[3]—**आधीति**।

---

१. सच्चिन्मात्रमिति मु. पु. पाठः। २. आत्मैव प्रकाशकप्रकाश्यचक्षुरादिकरणरूपेण स्वप्ने भासते।
३. एतेनैव चैतन्यस्वरूपत्वं ज्ञानस्य प्रपञ्चितम्।

जाग्रतश्च तथा भेदो ज्ञानस्यास्य विकल्पितः।
बुद्धिस्थं व्याकरोत्यर्थं भ्रान्त्या तृष्णोद्भवक्रियः॥१७॥

स्वप्ने तद्वत्प्रबोधे यो बहिश्चान्तस्तथैव च।
आलेख्याध्ययने यद्वत्तदन्योन्यधियोद्भवम्॥१८॥

यदाऽयं कल्पयेद् भेदं तत्कामः सन् यथाक्रतुः।
यत्कामस्तत्क्रतुर्भूत्वा कृतं यत्तत्प्रपद्यते॥१९॥

अविद्याप्रभवं सर्वमसत्तस्मादिदं जगत्।
तद्वता दृश्यते यस्मात्सुषुप्ते न च गृह्यते॥२०॥

यथा नीलपीताद्युपधानभेदान्नीलपीतात्मता स्फटिकादेस्तथा ज्ञानविशेषस्यापीत्यर्थः॥१६॥

एवं स्वप्ने निर्भेदस्य ज्ञानस्य मणेरिवाविद्याकल्पितोपाधिभेदादशेषव्यवहारास्पदत्वमुक्त्वा जागरितेऽपि ज्ञानस्य सर्वव्यवहारास्पदत्वमुपपन्नमिति दार्ष्टान्तिकमाह—**जाग्रतश्चेति**। कथं भेदस्य विकल्पितत्वं तत्राह—**बुद्धिस्थमिति**। आत्मा खल्वज्ञानकञ्चुको बुद्धिं परिकल्प्य तदविवेकादनेकरूपं प्रपञ्चं स्वात्मनि कल्पयतीत्यर्थः[1]॥१७॥

स्वप्नदृष्टान्तेनोक्तमर्थं निगमयति—**स्वप्न इति**। बाह्यमाभ्यन्तरं सर्वमन्योन्यापेक्षया कल्पितमित्येतदुदाहरणान्तरेण दर्शयति—**आलेख्येति**। यथा आलेख्यापेक्षयाऽध्ययनं श्लोकादेरध्ययनापेक्षया च पुनरालेखनं पत्रादौ मिथ्यैव, सर्वगतानां निरवयवानां वर्णानां लेखनाद्यसम्भवात्। तथा तदन्तर्बहिश्चान्योन्यधियोद्भवं मिथ्यैव। बहिर्दृष्टं बुद्धौ निदधाति बुद्धौ च वासनामयं स्थितम्। ततो बहिः शब्दव्यवहाराय प्रसारयतीत्यन्योन्यसापेक्षत्वेन वस्तुत्वायोगाद्युक्तं मिथ्यात्वमित्यर्थः॥१८॥

एतदेव स्पष्टयति—**यदाऽयमिति**। पूर्वभ्रान्तिसंस्कारवशादयमात्मा यदा भेदं कल्पयति तदा तत्कामस्तदभिलाषो भवति। तत्कामश्च तत्राध्यवसायलक्षणक्रतुमान् भवति। ततश्च यत्कामस्तत्क्रतुस्तत्साधनकर्मानुष्ठाय तत्फलं प्रतिपद्यते। पुनश्च तत्संस्कारवशाद्भेदं परिकल्पयति। तत्कामश्च क्रतुर्भवतीत्येवमन्योन्यधियोद्भूतहेतुफलात्मना संसरतीत्यर्थः[2]॥१९॥

अन्योन्यापेक्षया संसारस्योद्भूतत्वे फलितमाह—**अविद्येति**। तस्मादित्यपेक्षितं पूरयति—**तद्वतेति**॥२०॥

---

१. भ्रान्तिप्रयुक्ततृष्णाख्यकामो हानादिरूपा क्रिया यस्य सः बुद्धिकल्पितमर्थं व्याकरोति तेन व्यवहरति।

२. तथा च श्रुतिः यथाकामो भवति तत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते (बृ. ४.४)।

विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हि नः।
तस्मात्सर्वप्रयत्नेन शास्त्रे विद्या विधीयते॥२१॥
चित्ते ह्यादर्शवद्यस्माच्छुद्धे[1] विद्या प्रकाशते।
यमैर्नित्यैश्च यज्ञैश्च तपोभिस्तस्य शोधनम्॥२२॥
शारीरादितपः कुर्यात्तद्विशुद्ध्यर्थमुत्तमम्।
मन आदिसमाधानं तत्तद्देहविशोषणम्॥२३॥
'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते'॥२४॥
दृष्टं जागरितं विद्यात्स्मृतं स्वप्नं तदेव तु।
सुषुप्तं तदभावं च स्वमात्मानं परं[2] पदम्॥२५॥

यद्यविद्याविनिर्मितमनिर्वाच्यं जगदुच्यते तर्हि जगद्धेतुरविद्या कीदृशी, कीदृशी च विद्या तन्निवृत्तिहेतुः। केन वा तयोर्गम्यत्वं तत्राह—**विद्याविद्ये इति**। यस्मात् 'अथ योऽन्यामन्योऽसावन्यो[3]ऽहमि'त्यादिश्रुत्याऽनुभवसिद्धैवाविद्या संसारहेतुरनूद्यते। विद्या तु ब्रह्मात्मनोरेकत्वयोः स्वतोऽप्राप्ता प्रमाणमपेक्षते। तस्माद् ज्ञानकाण्डे श्रवणादिद्वारा तत्त्वमस्यादिश्रुत्या तात्पर्येण व्युत्पाद्यत इत्याह—**तस्मादिति**॥२१॥

शास्त्रे सर्वप्रयत्नेन विद्या चेद्, व्युपाद्यते तर्हि मुमुक्षुः किमिति न प्रतिपद्यत इत्याशङ्क्य चित्तशुद्ध्यभावादित्यभिप्रेत्य कर्त्तव्या चित्तशुद्धिरित्याह—**चित्ते हीति**॥२२॥

तर्हि कैरुपायैश्चित्तं शोधनीयं तत्राह—**यमैरिति**। अहिंसाब्रह्मचर्य्यादयो यमाः तपःशब्देन स्वाध्यायादयो गृह्यन्ते। तपोभिरित्यादि प्रपञ्चयति—**शारीरादीति**। तदेव तपो विवक्षितं विशदयति—**मन आदीति**॥२३॥

यमनियमादिभिरुपायैः श्रवणादिभिश्च संस्कृतचित्तोऽवस्थात्रयात्तत्साक्षिणं विविच्य ब्रह्मत्वेन वाक्याज्जानीयादित्याह—**दृष्टिमिति**। इन्द्रियजं ज्ञानं जागरितम्। इन्द्रियोपरमे जागरितसंस्कारजं ज्ञानं स्वप्नः। द्वयोरप्यभावः सुषुप्तम्। तेषां साक्षी स्व आत्मेति जानीयादित्यर्थः॥२४-२५॥

---

१. शास्त्रव्युत्पादिताऽपि विद्या मलिनान्तःकरणे न प्रकाशमर्हति। अतो मुमुक्षुभिश्चित्तशोधनोपायः कर्तव्यः।
२. जाग्रत्स्वप्नसुषुप्तिव्यतिरिक्तं साक्षिभूतमात्मानं विद्यात्।
३. अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्। (बृ. १.४.१०)।

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः।
स्वात्मबोधप्रदग्धं स्याद्बीजं दग्धं यथाऽभवम्॥२६॥

तदेवैकं त्रिधा ज्ञेयं मायाबीजं पुनः क्रमात्।
मायाव्यात्माऽविकारोऽपि बहुधैको जलार्कवत्॥२७॥

बीजं चैकं यथा भिन्नं प्राणस्वप्नादिभिस्तथा।
स्वप्नजाग्रच्छरीरेषु तद्वच्चात्मा जलेन्दुवत्॥२८॥

मायाहस्तिनमारुह्य मायाव्येको यथा व्रजेत्।
आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिगोचरः॥२९॥

अवस्थात्रयहेतोरात्मनः सत्यज्ञानादिलक्षणब्रह्मत्वमयुक्तमित्याशङ्क्य नात्मनोऽवस्थात्रयहेतुत्वमित्याह—**सुषुप्ताख्यमिति**। कथं तर्हि सति बीजे मुक्तिरित्याशङ्क्याह—**स्वात्मेति**। अभवमनुत्पादकं स्यादित्यर्थः॥२६॥

सुषुप्ताख्यस्य तमसो दाहेऽपि स्वप्नजागरितयोर्दाहे पृथगेव यत्नः स्यादित्याशङ्क्याह—**तदेवैकमिति**। तदेकमेव मायाख्यं जागरिते विश्ववैश्वानररूपेण स्वप्ने तैजसहिरण्यगर्भात्मना सुषुप्ते प्राज्ञाव्याकृतप्रकारेण त्रिधाऽधिगन्तव्यम्। तत्पुनः श्रवणाद्यनुष्ठानक्रमेण समुत्पन्नाद्वाक्यीयादेव ब्रह्मात्मसाक्षात्कारादशेषतो व्यावर्त्तते तथा च तमसो दाहातिरेकेण स्वप्नादिदाहे पृथगेव यत्नो न क्रियते स्वप्नादेस्तमोमात्रत्वात्तन्निवृत्तौ निवृत्तत्वादित्यर्थः। यथोक्तस्य तमसोऽस्वातन्त्र्यादपेक्षितमाश्रयं दर्शयति—**मायावीति**। कूटस्थासङ्गाद्वितीयस्यात्मनस्तदाश्रयत्वं कथमित्याशङ्क्याह—**अविकारोऽपीति**। आत्मस्वभावालोचनया तत्र तमसोऽसंसर्गेऽपि तमःस्वभावादाश्रयान्तराभावात्तत्रैवास्याश्रितत्वात्कूटस्थोऽद्वितीयोऽप्यात्मा तमःसम्बन्धादेव सचलोऽनेकश्च लक्ष्यत इत्यर्थः। तत्तत्पात्रस्थसलिलसम्बन्धादादित्यवत्। अतो ब्रह्मैवैकमनाद्यनिर्वाच्याज्ञानसम्बन्धादन्यथा भातीत्यर्थः॥२७॥

उक्तमेव दृष्टान्तदार्ष्टान्तिकरूपेण प्रपञ्चयति—**बीजं चैकमिति**। यथैकमेवाविद्यारूपं बीजमव्याकृतहिरण्यगर्भविराडात्मभिरुपाधिभिर्भिन्नं, तथा हिरण्यगर्भादिदेहेषु चिदाभासो भिन्नस्तदविवेकादात्मापि साक्षी तद्वदेव भिन्नो लक्ष्यते। यथा नानाविधेषु सलिलेषु तत्र तत्र चन्द्रमण्डलं भिन्नमुपलभ्यते तथैव स्थूलसूक्ष्मदेहभेदेषु मोहकल्पितेषु चिदाभासवदात्मापि तदविविक्तो भिन्नो भातीत्यर्थः॥२८॥

नन्वात्मनो मायाकल्पितेषु प्राणादिषु बहुत्वं चेत्, तस्य व्यापारवत्त्वमपि तद्वदेव स्यादित्याशङ्क्य दृष्टान्तेन निरस्यति—**मायेति**॥२९॥

न हस्ती न तदारूढो मायाव्यन्यो यथा स्थितः।
न प्राणादि न तद्द्रष्टा तथा ज्ञोऽन्यः सदादृशिः[१]॥३०॥
अबद्धचक्षुषो नास्ति माया मायाविनोऽपि वा।
बद्धाक्षस्यैव सा मायाऽमायाव्येव ततो भवेत्॥३१॥
साक्षादेव स विज्ञेयः साक्षादात्मेति च श्रुतेः।
भिद्यते हृदयग्रन्थिर्न चेदित्यादितः श्रुतेः॥३२॥
अशब्दादित्वतो नास्य ग्रहणं चेन्द्रियैर्भवेत्।
सुखादिभ्यस्तथाऽन्यत्वाद्बुद्ध्या वाऽपि कथं भवेत्॥३३॥
अदृश्योऽपि यथा राहुश्चन्द्रे बिम्बं यथाऽम्भसि।
सर्वगोऽपि तथैवाऽऽत्मा बुद्धावेव स गृह्यते॥३४॥

प्राणादिसम्बन्धमङ्गीकृत्योक्तं सोऽपि वस्तुतो नास्तीत्याह—**न हस्तीति**॥३०॥

परमार्थात्मसद्भावेऽपि मायासम्बन्धोऽपरिहार्यः स्यादित्याशङ्क्याह—**अबद्धेति**। लोके तावदप्रतिबद्धदृष्टेर्नास्ति मायादर्शनम्। मायाविनो दर्शने सत्यप्यवस्तुत्वनिश्चयान्न तत्कृतो भयादिर्भवति। किन्तु बुद्धाक्षस्यैव सा हस्त्यादिमाया भासते सत्यतया हर्षविषादादिहेतुश्च निश्चीयते। तथा ब्रह्मात्मज्ञानाद्वस्तुतो ब्रह्मास्मीति ज्ञानाद्विद्वान्मायाव्येव मायातत्कार्यबन्धविधुरो मुक्तः स्यादित्यर्थः। साक्षाद् ब्रह्मात्मज्ञानादमायावी मायातत्कार्यबन्धविनिर्मुक्तो भवतीत्यर्थः॥३१॥

श्रुतिसिद्धः श्रद्धेयः स्यादित्याह—**साक्षादिति**। 'यत्साक्षादपरोक्षाद्ब्रह्म[२] य आत्मा सर्वान्तर' इति श्रुतेरपरोक्षज्ञानमेव परमार्थज्ञानं तत एव बन्धमोक्षः। 'भिद्यते हृदयग्रन्थि'रित्यादिदर्शनात्[३]। 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टि'रित्यादिश्रुतेश्चेत्यर्थः॥३२॥

साक्षादात्मविज्ञानमुक्तमाक्षिपति—**अशब्दादीति**॥३३॥

तत्त्वमस्यादिवाक्योत्थबुद्धिवृत्तौ प्रतिबिम्बितः परमात्मा स्वतोऽपरोक्षः स्फुरति ऐन्द्रियकत्वाभावेऽपीति परिहरति—**अदृश्योऽपीति**[४]॥३४॥

---

१. यथा मायावी मायाजालनिर्मितप्रपञ्चेन सर्वान् मोहयति। परन्तु स्वयं मायाजालविनिर्मुक्त एवास्ति। एवमेव चैतन्यमपि मायाकृतकार्येषु न वस्तुतो व्यापारवत्त्वं भजते।

२. बृ. ३.४.१। ३. मुण्ड. २.२.८।

४. आकाशवद् व्यापकस्यात्मनो बिम्बत्वं कथमिति चेत्, तत्परिहरति यथा राहुदर्शनं चन्द्रोपराग एव भवति, यथा जल एव चन्द्रप्रतिबिम्बस्तद्वदात्मनोऽन्तःकरणं प्रतिबिम्बः।

भानोर्बिम्बं यथा चौष्ण्यं जले दृष्टं न चाऽम्भसः।
बुद्धौ बोधो न तद्धर्मस्तथैव स्याद्विधर्मतः[१]॥३५॥

चक्षुर्युक्ता धियो वृत्तिर्या तां पश्यन्नलुप्तदृक्।
दृष्टेर्द्रष्टा भवेदात्मा श्रुतेः श्रोता तथा भवेत्॥३६॥

केवलां मनसो वृत्तिं पश्यन् मन्ता मतेरजः।
विज्ञाताऽलुप्तशक्तित्वात्तथा शास्त्रं न हीत्यतः॥३७॥

ध्यायतीत्यविकारित्वं तथा लेलायतीत्यपि।
अत्र स्तेनेति शुद्धत्वं तथाऽनन्वागतश्रुतेः॥३८॥

शक्त्यलोपात्सुषुप्ते ज्ञस्तथा बोधेऽविकारतः।
ज्ञेयस्यैव विशेषस्तु यत्र वेति श्रुतेर्वचः॥३९॥

बुद्धौ बोधो गृह्यते चेत्तद्धर्मः स्यादित्याशङ्क्य दृष्टान्तेन निराचष्टे—**भानोरिति**। विधर्मत्वं बुद्धेर्जडत्वात्॥३५॥

न केवलं शास्त्रीयबुद्धावेव विशुद्धचिद्धातुः परमात्मा स्फुरति, किन्तु लौकिकीष्वपि बुद्धिवृत्तिष्वात्मा स्वतोऽपरोक्ष साक्षितया स्फुरतीत्याह—**चक्षुरिति**। न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया इत्यादिश्रुतिरत्रानुकूलेति दर्शयति—**तथेति**। चक्षुर्युक्ता चक्षुर्द्वारिका रूपाकारा या धीवृत्तिस्तां स्वाभासद्वारा पश्यन् दृष्टेर्द्रष्टेत्युच्यते। एवमिन्द्रियान्तरद्वारामपि धीवृतिं पश्यन् श्रुतेः श्रोतेत्यादि-व्यहारविषयो भवति॥३६॥

इदानीं बाह्येन्द्रियनिरपेक्षधीवृत्तिसाक्षित्वं दर्शयति—**केवलामिति**। विज्ञाता अध्यवसायलक्षणाया धीवृत्तेः साक्षित्वद् अलुप्तशक्तित्वाद्—अलुप्तचित्स्वभावत्वात् 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत'[२] इति श्रुतेः॥३७॥

द्रष्टृत्वादिव्यपदेशाद्विकारित्वादशुद्धिप्रसक्तावाह—**ध्यायतीति**। ध्यायतीवेतीव शब्दश्रुतेरविकारित्वम्। अत्र स्तेनोऽस्तेनो भवति' 'अनन्वागतं पुण्येनानन्वागतं पापेने'ति श्रुतेश्च शुद्धत्वमवगम्यत इत्यर्थः॥३८॥

ननु सुप्ते ज्ञानाभावात् जागरितस्वप्नयोश्च तद्भावादात्मा विकारीत्याशङ्क्याह—**शक्त्यलोपादिति**। बोधशब्देनावस्थाद्वयमुच्यते। तत्राप्यात्मनोऽपरोक्षत्वे हेतुरविकारत

---

१. सधर्मस्य भानोरपि प्रतिबिम्बस्थानीयशैत्यादिकं नारोहति। निर्धर्मकस्य ब्रह्मणः कुतः।

२. बृ. ४.३.३०।

व्यवधानाद्धि पारोक्ष्यं लोकदृष्टेरनात्मनः।
दृष्टेरात्मस्वरूपत्वात्प्रत्यक्षं ब्रह्म तत्स्मृतम्।।४०।।
न हि दीपान्तरापेक्षा यद्वद्दीपप्रकाशने।
बोधस्यात्मस्वरूपत्वान्न बोधोऽन्यस्तथेष्यते।।४१।।
विषयत्वं विकारित्वं नानात्वं वा न हीष्यते।
न हेयो नाप्युपादेय आत्मा नान्येन वा ततः।।४२।।
सबाह्याभ्यन्तरोऽजीर्णो जन्ममृत्युजरातिगः।
अहमात्मेति यो वेत्ति [1]कुतो न्वेव बिभेति सः।।४३।।
प्रागेवैतद्विधेः कर्म वर्णित्वादेरपोहनात्।
तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवेति निश्चयात्।।४४।।

इति।. ननु सुषुप्ते नाज्ञासिषमिति परामर्शो बोधे च जानामीत्यनुभवस्तत्कथमवस्थात्रये निर्विशेषचिद्रूपतेत्याशङ्क्याह—**ज्ञेयस्येति**। सुषुप्ते ज्ञेयस्याज्ञानातिरिक्तस्यासत्त्वमवस्थान्तरे तु तस्य सत्त्वमित्यत्र नियामकमाह—**यत्र वेति**।।३९।।

यदुक्तमात्मनः स्वतोऽपरोक्षत्वं निर्विकारत्वञ्च तदिदानीं स्पष्टयति—**व्यवधानाद्धीति**।।४०।।

लोकानां दृष्टेरनात्मविषयाया[2] अनात्मनश्च घटादेर्देशकालादिव्यवधानात्पारोक्ष्यं न त्वेवमात्मनो व्यवधानमस्ति। तस्मात्सदैव प्रत्यक्षं ब्रह्मेत्यर्थः। यस्मादपरोक्षदृष्टिरूपं प्रत्यक्षं ब्रह्म तस्मान्न परमार्थतस्तज्ज्ञाने घटादेरिवान्यज्ञानापेक्षेत्याह—**नहीति**।।४१।।

एवमपरोक्षत्वमात्मनो विशदीकृत्याविकारित्वं विशदीकुर्वन्निर्विशेषत्वमाह—**विषयत्वमिति**। नान्येन तस्यैव बाधादसत्त्वादित्यर्थः।।४२।।

ननु कुतोऽस्य निर्विकारत्वं नरकपातादिभीतिदर्शनात्तन्निवृत्त्यर्थं धर्मानुष्ठानसिद्धेरित्याशङ्क्याज्ञानावस्थायामेव भीतिरनुष्ठानञ्च न ज्ञानावस्थायामित्याह—**सबाह्येति**।।४३।।

ज्ञानिनोऽपि यावज्जीवादिश्रुतिचोदितान्यग्निहोत्रादीनि कर्माणि सन्तीत्याशङ्क्याह—**प्रागिति**। तस्य ब्रह्मात्मरूपस्य विधिर्विधानं प्रतिपादनं तस्मात्पूर्वमेवाग्नि-

---

१. यत्र त्वस्य सर्वमात्मैवाभूत तत् केन कं पश्येत् (बृ. ४.५.१५)।
२. अविद्याजन्येन्द्रियैरविद्यया एव विषया गृह्यन्ते। तदेवाविद्यातत्कार्याणि चात्मसाक्षात्कारे व्यवधानानि।

पूर्वदेहपरित्यागे जात्यादीनां प्रहाणतः।
देहस्यैव तु जात्यादिस्तस्याप्येवं ह्यनात्मता॥४५॥
ममाहं चेत्यतोऽविद्या शरीरादिष्वनात्मसु।
आत्मज्ञानेन हेया स्यादसुराणामिति श्रुतेः॥४६॥
दशाहाशौचकार्याणां पारिव्राज्ये निवर्तनम्।
यथा ज्ञानस्य सम्प्राप्तौ तद्वज्जात्यादिकर्मणाम्॥४७॥
यत्कामस्तत्क्रतुर्भूत्वा कृतं त्वज्ञः प्रपद्यते।
यदा स्वात्मदृशः कामाः प्रमुच्यन्तेऽमृतस्तदा॥४८॥
आत्मरूपविधेः कार्यं क्रियादिभ्यो निवर्तनम्।
न [1]साध्यं साधनं वाऽऽत्मा नित्यतृप्तः स्मृतेर्मतः॥४९॥

होत्रादिकर्म नोर्ध्वं ब्रह्मात्मज्ञानेन कर्मानुष्ठानप्रयोजकस्य वर्णित्वमाश्रमित्वमित्यादेरभिमानस्यापास्तत्वादित्यर्थः। अधिकारिणो वर्णित्वादियुक्तस्य न कर्मत्यागोपपत्तिरित्याशङ्क्याह—**तदिति**। तद्ब्रह्मास्थूलादिलक्षणं त्वमेवेति तत्त्वमसिवाक्यान्निश्चयादधिकारित्वेन प्रसिद्धस्याहं ब्रह्मेति बोधोत्पत्तौ कर्मानुपपत्तिरित्यर्थः॥४४॥

वर्णित्वादेरपोहे युक्तिमाह—**पूर्वदेहेति**। तथापि वर्त्तमानदेहस्यात्मत्त्वात्तद्गतजात्यादेरप्रहाणमित्याशङ्क्याह—**तस्यापीति**। पूर्वदेहवद्वर्तमानदेहस्याप्यागमापायित्वेऽनात्मत्वान्न तद्धर्मस्य जात्यादेरप्रहाणमित्यर्थः॥४५॥

शरीरादिष्वात्मत्वाभिमानस्य प्रसिद्धत्वेनाहेयत्वमाशङ्क्याह—**ममाहमिति**। यतः शरीरादिषु वस्तुतोऽनात्मस्वागमापायिषु शुद्धस्यात्मनोऽविद्यावशान्ममाहमित्यभिमानस्तस्मा'दसुराणां ह्येषोपनिषदि'ति श्रुतेर्देहात्मदर्शनस्य हेयत्वमित्यर्थः॥४६॥

ज्ञानादूर्ध्वं न कर्म तत्प्रयोजकं वा जात्यादीत्येतद् दृष्टान्तेन साधयति—**दशाहाशौचेति**। यथा हि सपिण्डताभिमानाभावान्मुनेराशौचादिनिवृत्तिरेवं जात्याद्यभिमानाभावाद्विदुषः कर्म निवर्तत इत्यर्थः॥४७॥

ब्रह्मात्माज्ञानमूलः संसारो यस्मात्तस्माद् ब्रह्मात्मज्ञानात् प्राक्कामादियुक्तो धर्माधर्मद्वारा संसरति। ब्रह्मात्मज्ञाने च कामादिरहितो मुक्तो भवतीत्याह—**यत्काम इति**॥४८॥

कामकर्मनिवृत्त्या मोक्षेऽपि कुतः कामकर्मनिवृत्तिरित्याशङ्क्याह—**आत्मेति**। यद्यपि क्रियाकारकफलेभ्यो निवर्तनमात्मनः स्वरूपबोधनद्वारा क्रियते तथापि तस्य

---

१. आत्मा हि साध्यं नास्ति तदतिरिक्तसाधनाभावात्। नापि साधनं तदतिरिक्तसाध्याभावात्।

उत्पाद्याप्यविकार्याणि संस्कार्यं च क्रियाफलम्[1]।
नातोऽन्यत्कर्मणा कार्यं त्यजेत्तस्मात्ससाधनम्॥५०॥
तापान्तत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः।
संहृत्याऽऽत्मनि तां प्रीतिं सत्यार्थी गुरुमाश्रयेत्॥५१॥
शान्तं प्राज्ञं तथा मुक्तं निष्क्रियं ब्रह्मणि स्थितम्।
श्रुतेराचार्यवान् वेद तद्विद्धीति स्मृतेस्तथा॥५२॥
स गुरुस्तारयेद्युक्तं शिष्यं शिष्यगुणान्वितम्।
ब्रह्मविद्याप्लवेनाशु [2]स्वान्तध्वान्तमहोदधिम्॥५३॥
दृष्टि स्पृष्टिः श्रुतिर्घ्रातिर्मतिर्विज्ञातिरेव च।
शक्तयोऽन्याश्च भिद्यन्ते[3] चिद्रूपत्वेऽप्युपाधिभिः॥५४॥

साध्यसाधनान्यतरान्तर्भावात्क्रियासंस्पर्शित्वमित्याशङ्क्य विज्ञानमानन्दं ब्रह्मेत्यादि-कूटस्थपरमानन्दश्रुतेर्मैवमित्याह—**न साध्यमिति**॥४९॥

आत्मस्वरूपावस्थानलक्षणस्य मोक्षस्य चतुर्विधक्रियाफलविलक्षण-त्वान्मुमुक्षुर्दाराग्न्यादिसम्बन्धं कर्म वर्जयेदिति फलितमाह—**उत्पाद्येति**॥५०॥

ससाधनं कर्म त्यक्त्वा मुमुक्षुणा कर्त्तव्यमर्थं दर्शयति—**तापान्तत्वा-दित्यादि**॥५१॥

अशेषत्वादपि स्वस्याभ्यर्हितत्वादात्मन्येव प्रीतिः कार्येत्यर्थः। किं लक्षणं गुरुमुपगच्छेदित्यपेक्षायामाह—**शान्तमिति**। गुरोराश्रयणीयत्वे प्रमाणमाह—**श्रुतेरिति**॥५२॥

उक्तप्रमाणानुरोधेनोक्तविशेषणस्य गुरोराश्रयणे फलं सूचयति—**स गुरुरिति**। युक्तं समाहितम्। अमानित्वादयः शिष्यगुणाः॥५३॥

कथं पुनरुक्तलक्षणो गुरुः सम्यग्ज्ञानेनाप्रयत्नेन शिष्यं संसारसागरात्तारयेदित्य-पेक्षायां प्रथमं पदार्थविवेकं कारयतीत्यभिप्रेत्य पदार्थशुद्धिं सङ्क्षेपतो दर्शयति—**दृष्टिरिति**। दृश्यादिशक्तीनामन्यासां च रसयति वक्त्यादिशक्तीनां चिद्रूपत्वा-विशेषान्न भिन्नतेत्याशङ्क्यार्थेन्द्रियोपाधिबुद्धिवृत्तिद्वारा काल्पनिको भेदः सिद्ध्यतीत्याह—**चिद्रूपत्वेऽपीति**॥५४॥

---

१. चतुर्विधक्रियाफलातिरिक्तमात्मज्ञानमिति। २. स्वान्तमन्तःकरणं तदुपहितो जीवः।
३. आत्मसाक्षात्कारे सति संसारविषयकाऽनुभूतिर्विनश्यति।

अपाययोद्भूतिहीनाभिर्नित्यं दीप्यन् रविर्यथा।
सर्वदृक् सर्वगः शुद्धः [१]सर्वं जानाति सर्वदा॥५५॥

अन्यदृष्टिः शरीरस्थस्तावन्मात्रो ह्यविद्यया।
जलेन्द्वाद्युपमाभिस्तु तद्धर्मा च विभाव्यते॥५६॥

दृष्ट्वा बाह्यं निमील्याथ स्मृत्वा तत्प्रविहाय च[२]।
अथोन्मील्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनध्वगः॥५७॥

प्राणाद्येवं त्रिकं हित्वा तीर्णोऽज्ञानमहोदधिम्।
स्वात्मस्थो निर्गुणः शुद्धो बुद्धो मुक्तः स्वतो हि सः॥५८॥

दृश्यादीनां स्वारस्येनाभिन्नत्वमौपाधिकत्वेन भिन्नत्वमित्यभीष्टेऽपि कथं पदार्थशुद्धिरित्यपेक्षायामाह—**अपायेति**। यथाऽऽदित्यो जगति स्वरश्मिभिः नित्यं दीप्यते, तथा स्वभावतो जन्मविनाशशून्यया चिच्छक्त्याऽयमात्मा पूर्वोक्तदृश्यादि-साक्षित्वेन सदा दीप्यमानो वर्तते। स च सर्वं कार्यं कारणं च कल्पितं व्याप्नोति। सर्वं च सामान्येन पश्यति। सर्वस्य साभासत्वात्स ह्यशुद्धेर्भास्यत्वात्परिशुद्धः सिद्ध्यति। सर्वं च सर्वस्मिन् काले स्वाभासद्वारा विशेषतो जानाति। तदेवं पदार्थशुद्धिः सिद्ध्यतीत्यर्थः॥५५॥

उक्तलक्षणश्चेदात्मा कथं तस्य संसारोपलब्धृत्वं परिच्छेदप्रतिभासश्चेत्या-शङ्क्याह—**अन्यदृष्टिरिति**। अविद्यया शरीरद्वयगतस्तावन्मात्रमात्मानं मन्यमानो भेददर्शी परिच्छिन्नं संसारिणं चात्मानं पश्यतीत्यर्थः। तदेव दृष्टान्तेन स्पष्टयति—**जलेन्द्विति**। यथा जलचन्द्रादिभिर्वियच्चन्द्रादीनां परिच्छेदश्चलनादिव्यवहार-स्तथाऽऽत्मनः सर्वव्यवहारातीतस्याविद्याकल्पितोपाधिभिः सर्वो व्यवहारस्तस्मा-दात्मनि परिच्छेदव्यवहारस्यौपाधिकतया स्वतोऽसौ शुद्धोऽपरिच्छिन्नश्चेत्यर्थः॥५६॥

आत्मनः सत्यज्ञानादिरूपस्याविद्याकल्पितः संसारव्यवहारस्ततश्चाचार्य-प्रसादाद्विविक्तपदार्थः समाधियुक्तोऽवस्थात्रयसाक्षिणमवस्थात्रयाद्विविच्य ब्रह्मत्वेन ज्ञात्वा मुच्यते मुमुक्षुरित्याह—**दृष्ट्वेति**॥५७॥

कथमनध्वगो ब्रह्म प्राप्नोतीत्यपेक्षायामाह—**प्राणाद्येवमिति**। पदार्थविवेकद्वारा वाक्यार्थज्ञानादज्ञाननिवृत्तौ स्वतो मुक्तत्वाद्विदुषो गतिव्यतिरेकेण ब्रह्म प्राप्तस्यापुनरावृत्तिर्युक्तेत्यर्थः॥५८॥

---

१. साक्षिभूतः सन्नात्मा सर्वं पश्यन्नपि न तत्कार्यकारणत्वेन लिप्यते।

२. बाह्यवस्तुपरित्यज्यात्मविषयकगतिं करोति।

अजोऽहं चामरोऽमृत्युरजरोऽभय एव च।
सर्वज्ञः सर्वदृक् शुद्ध इति बुद्धो न जायते॥५९॥

पूर्वोक्तं यत्तमोबीजं तन्नास्तीति विनिश्चयः।
तदभावे कुतो जन्म[1] ब्रह्मैकत्वं विजानतः॥६०॥

क्षीरात्सर्पिर्यथोद्धृत्य क्षिप्तं तस्मिन्न पूर्ववत्।
बुद्ध्यादेर्ज्ञस्तथाऽसत्यान्न देही पूर्ववद्भवेत्[2]॥६१॥

सत्यं ज्ञानमनन्तं च रसादेः पञ्चकात्परम्।
स्यामदृश्यादिशास्त्रोक्तमहं ब्रह्मेति निर्भयः[3]॥६२॥

यस्माद्भीताः प्रवर्तन्ते वाङ्मनःपावकादयः।
तदात्मानन्दतत्त्वज्ञो न बिभेति कुतश्चन॥६३॥

केन प्रकारेणात्मानं प्रतिपद्यमाने न पुनः शरीरं गृह्णाति तत्राह—**अजोऽहमिति**॥५९॥

ज्ञानवतो भूयः शरीरग्रहणाभावे कारणमाह—**पूर्वोक्तमित्यादि**। सुषुप्ताख्यं तमोऽज्ञानमित्यादिनोक्तम्॥६०॥

साक्षादात्मानमहं ब्रह्मास्मीति पश्यतोऽपि पूर्ववद्व्यवहारदर्शनात्तत्कृत-धर्माधर्मनिबन्धनः संसारः स्यादित्याशङ्क्य बाधितानुवृत्तिमात्रत्वान्न संसारहेतुत्वं स्यादिति दृष्टान्तपूर्वकमाह—**क्षीरादिति**। यथा नवनीतं क्षीरादुद्धृत्य तस्मिन्नेव निःसारे क्षिप्तं न पूर्ववद्भवति। तथा बुद्ध्यादेरसत्यादात्मानं विविच्याहं ब्रह्मास्मीति वाक्यादवगच्छन् बुद्ध्यादौ वर्तमानोऽपि न पूर्ववद्देहद्वयाभिमानभागी बद्धः सिद्ध्येदित्यर्थः॥६१॥

किं लक्षणमात्मानं पश्यन् विद्वान्निर्भयोऽसंसारी स्यादित्याकाङ्क्षायामाह—**सत्यमिति**। रसादेः पञ्चकादन्नमयादिकोशपञ्चकात्॥६२॥

अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयन इति शास्त्रोक्तं विदुषो निर्भयत्वे भयहेतोरात्मत्वावगमं हेत्वन्तरमाह—**यस्मादिति**। वागादयोऽध्यात्ममधिदैव-मग्न्यादयः॥६३॥

---

१. जन्मादिकारणभूतस्याज्ञानस्य नाशे नोत्पत्त्यादिकं भजते।

२. आत्मानात्मवस्तुविवेके सति न पुनर्मोहमुगच्छति।

३. पञ्चकोशव्यतिरिक्तमात्मतत्त्वं परिचिन्त्य ज्ञानी निर्भयो भवति।

नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितोऽद्वये।
प्रणमेत् कं तदाऽऽत्मज्ञो न कार्यं कर्मणा तथा।।६४।।
विराड्वैश्वानरो बाह्यः स्मरन्नन्तः प्रजापतिः।
प्रविलीने तु सर्वस्मिन् प्राज्ञोऽव्याकृतमुच्यते।।६५।।
वाचारम्भणमात्रत्वात्सुषुप्तादित्रिकं त्वसत्।
सत्यो ज्ञश्चाहमित्येवं सत्यसन्धो[१] विमुच्यते।।६६।।
भारूपत्वाद्यथा भानोर्नाहोरात्रे तथैव च।
ज्ञानाज्ञाने न मे स्यातां चिद्रूपत्वाविशेषतः[२]।।६७।।
शास्त्रस्यानतिशङ्क्यत्वाद् ब्रह्मैव स्यामहं सदा।
ब्रह्मणो मे न हेयं स्याद् ग्राह्यं वेति च संस्मरेत्।।६८।।
अहमेव च भूतेषु सर्वेष्वेको नभो यथा।
मयि सर्वाणि भूतानि पश्यन्नेवं न जायते।।६९।।

ननु विदुषोऽपि हरिहरहिरण्यगर्भादीनां नमस्कार्यत्वात्तदतिक्रमे भयं सम्भावितमिति चेन्नेत्याह—**नामादिभ्य इति**। परिपक्वायां विद्यायां विदुषो गुणाभावात्कृतकृत्यत्वान्न कर्मणा ज्ञानेन वा कर्तव्यं किञ्चिदस्तीत्यर्थः।।६४।।

भूम्नो नामादिभ्यो विलक्षणत्वेऽपि कथमद्वयत्वमित्याशङ्क्य नामादिरूपावस्थात्रयस्याध्यस्तत्वात्तत्साक्षिणस्तुरीयस्य भूम्नोऽद्वयत्वमिति वक्तुमवस्थात्रयमनुवदति—**विराडिति**। अध्यात्माधिदैवतयोरेकत्वाभिप्रायेण विराड्वैश्वानरादिरूपेणावस्थात्रयमुक्तम्।।६५।।

तस्यावस्थात्रयस्य मिथ्यात्वे सति तत्साक्षिणो वस्तुभूतस्याहं ब्रह्मेति सम्यग्ज्ञानान्मुक्तिरित्याह—**वाचारम्भणेति**।।६६।।

आत्माज्ञानादध्यस्तः संसारस्तत्त्वज्ञो मुक्तो भवतीत्युक्ते ज्ञानाज्ञानयोरात्मधर्मत्वं स्यादित्याशङ्क्याह—**भारूपत्वादिति**।।६७।।

आत्मनो निर्विशेषत्वशास्त्रप्रामाण्याद् ब्रह्मैवाहं सदा स्यामिति स्मरेत्, तस्य मे ब्रह्मणस्त्याज्यमादेयं वा नास्तीति सर्वदाऽनुसन्दध्यादित्याह—**शास्त्रस्येति**।।६८।।

किं तद् ब्रह्मात्मपरं शास्त्रं किं वा ब्रह्मात्मत्वं सर्वदाऽनुसन्दधानस्य

---

१. सत्येन परमात्मना सन्धः सम्मिलितः सन् मुक्तो भवति।
२. संसारविषयके ज्ञानाज्ञाने नात्मनि संश्लिष्येते।

न बाह्यं मध्यतो वाऽन्तर्विद्यतेऽन्यत्स्वतः क्वचित्।
अबाह्यान्तःश्रुतेः किञ्चित्तस्माच्छुद्धः स्वयंप्रभः॥७०॥
नेति नेत्यादिशास्त्रेभ्यः 'प्रपञ्चोपशमोऽद्वयः'।
अविज्ञातादिशास्त्राच्च नैव ज्ञेयो ह्यतोऽन्यथा॥७१॥
सर्वस्यात्माऽहमेवेति ब्रह्म चेद्विदितं परम्।
स आत्मा सर्वभूतानामात्मा ह्येषामिति श्रुतेः॥७२॥
जीवश्चेत्परमात्मानं स्वात्मानं देवमञ्जसा।
देवो(वेदो)पास्यः स देवानां पशुत्वाच्च निवर्तते[1]॥७३॥
अहमेव सदात्मज्ञः शून्यस्त्वन्यैर्यथाम्बरम्।
इत्येवं सत्यसन्धत्वादसद्धाता न बध्यते॥७४॥
कृपणास्तेऽन्यथैवातो विदुर्ब्रह्म परं हि ये।
स्वराड्योऽनन्यदृक् स्वस्थस्तस्य देवा असन्वशे॥७५॥

फलमित्याशङ्क्य 'यस्तु सर्वाणि भूतानि' इत्यादिमन्त्रमुदाहरन्नुत्तरमाह—**अहमेवेति**॥६९॥

तदेतद्ब्रह्मापूर्वमनपरमित्यादिवाक्यमपि निर्विशेषब्रह्मात्मपरमस्तीत्याह—**न बाह्यमिति**। उक्तं श्रुत्यर्थमाश्रित्य फलितमाह—**तस्मादिति**॥७०॥

शास्त्रान्तराण्याश्रित्य सर्वप्रपञ्चसंस्पर्शशून्यत्वमात्मनो दर्शयति—**नेति नेत्यादीति**। कार्यकारणरहितश्च अन्यदेव तद्विदितादित्यादिशास्त्रादात्मेत्याह—**अविज्ञातादीति**। तस्मान्मुमुक्षुणा सप्रपञ्चत्वेन न ज्ञेय इत्याह—**नैव ज्ञेयो ह्यतोऽन्यथेति**॥७१॥

एवमुक्तलक्षणं ब्रह्माऽऽत्मत्वेन पश्यतः किं स्यादित्यपेक्षायामाह—**सर्वस्यात्मेति**॥७२॥

उक्तसाधनसम्पन्नो जीवन्नेव ब्रह्मत्वं विदित्वा देवानां पशुभावान्निवृत्तः सन् कृतकृत्यो भवतीत्याह—**जीवश्चेति**॥७३॥

यदुक्तं सत्यसन्धो विमुच्यत इति तदेव स्पष्टयति—**अहमेवेति**। असद्धातेत्यसतः सकार्यस्याज्ञानस्य नाशयितेत्यर्थः॥७४॥

एवंविधज्ञानाभावादितरे पशुभूताः शोच्या भवन्तीत्याह—**कृपणा इति**। यो यथोक्तलक्षणं वेद स पशुभावाद् व्यावृत्तो मुच्यत इत्याह—**स्वराडिति**। असन्निति

---

१. जीवन्मुक्तो हि न देवानां पशुत्वमेति।

हित्वा जात्यादिसम्बन्धान्वाचोऽन्याः सह कर्मभिः।
ओमित्येवं स्वमात्मानं सर्वं शुद्धं प्रपद्यथ॥७६॥

सेतुं सर्वव्यवस्थानामहोरात्रादिवर्जितम्।
तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयम्॥७७॥

धर्माधर्मविनिर्मुक्तं भूतभव्यात्कृताकृतात्।
स्वमात्मानं परं विद्याद्विमुक्तं सर्वबन्धनैः॥७८॥

अकुर्वन् सर्वकृच्छुद्धस्तिष्ठन्नत्येति धावतः।
मायया सर्वशक्तित्वादजः[1] सन् बहुधा मतः॥७९॥

राजवत्साक्षिमात्रत्वात्सान्निध्याद्भ्रामको यथा।
भ्रामयञ्जगदात्माहं निष्क्रियोऽकारकोऽद्वयः॥८०॥

निर्गुणं निष्क्रियं नित्यं निर्द्वन्द्वं यन्निरामयम्।
शुद्धं बुद्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत्॥८१॥

छान्दसः प्रयोगः। आसन्निति तु वक्तव्यम्, तस्य ब्रह्मविदः सर्वे देवा वशे वर्त्तन्त इत्यर्थः॥७५॥

यत् आत्मज्ञानादेव कृतकृत्यता तस्मादात्मज्ञाने मुमुक्षुभिरोङ्कारद्वारा प्रयतितव्यमिति शिष्यान् शिक्षयति—**हित्वेति**॥७६॥

तमेव प्रतिपत्तव्यमात्मानं विशिनष्टि—**सेतुमिति**। **धर्माधर्मेति** च। उक्तविशेषणमात्मानं किमिति विद्यादित्यपेक्षायामाह—**स्वमिति**॥७७-७८॥

कर्तृत्वादिश्रवणादात्मनो बन्धरहितत्वं कथमित्याशङ्क्य कर्तृत्वादेर्मायामयत्वादित्याह—**अकुर्वन्निति**। धावतो मन आदीन् प्राणानतीत्य गच्छति तत्र तत्र चैतन्याभासस्याभिव्यक्तेस्तत्रात्मा गत इव लक्ष्यत इत्यर्थः॥७९॥

एतदेव प्रपञ्चयति—**राजवदिति**॥८०॥

यस्मादेवमात्मा स्वतो नित्यशुद्धबुद्धमुक्तब्रह्मस्वभावस्तस्मात्तं तथैव जानीयादित्याह—**निर्गुणमिति**। भूयोऽपि पथ्यं वक्तव्यमिति न्यायात्रैतेषु श्लोकेषु पौनरुक्त्यं शङ्कितव्यमिति भावः॥८१॥

---

१. अविद्याकल्पितं कर्तृत्वादिकमात्मनि, न वास्तविकम्।

बन्धं मोक्षं च सर्वं यत इदमुभयं हेयमेकं द्वयं च।
[1]ज्ञेयाज्ञेयाभ्यतीतं परममधिगतं तत्त्वमेकं विशुद्धम्।
विज्ञायैतद्यथावच्छ्रुतिमुनिगदितं शोकमोहावतीतः।
सर्वज्ञः सर्वकृत् स्याद्भवभयरहितो ब्राह्मणोऽवाप्तकृत्यः॥८२॥
न स्वयं स्वस्य नान्यश्च नान्यस्यात्मा न हेयगः।
उपादेयो न चाप्येवमिति सम्यङ्मतिः स्मृता॥८३॥
आत्मप्रत्यायिका ह्येषा सर्ववेदान्तगोचरा।
ज्ञात्वैतां हि विमुच्यन्ते सर्वसंसारबन्धनैः॥८४॥

उक्तमर्थजातं सङ्क्षिप्य प्रतिपत्तिसौकर्यार्थं कथयति—**बन्धमिति**। सर्वं पूर्वोक्तं निःशेषं बन्धं सुखदुःखात्मकं, मोक्षं ब्रह्मस्वरूपावस्थानं विज्ञाय कृतकृत्यः स्यादिति सम्बन्धः। यस्मादज्ञानाद् बन्धो यस्माच्च ज्ञानान्मोक्षस्तदिदमुभयं बन्धमोक्षाख्यं ससाधनं ज्ञात्वा तथैकमनुवृत्तं कारणं द्वयञ्च व्यावृत्तं कार्यमुभयं हेयं विज्ञाय ज्ञेयाज्ञेयाभ्यामतीतं यत्परं तत्त्वं ब्रह्म वेदान्तेष्वधिगतमद्वितीयमशेषसंसारसंस्पर्शशून्यं तच्च यथावदेव श्रुतिभिर्मुनिभिश्च निगदितं प्रत्यक्त्वेन प्रतिपद्य शोकमोहावतीतो भवति। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः। यथोक्ततत्त्वज्ञानतश्च सर्वज्ञो विज्ञायते ज्ञातव्यवस्त्वन्तराभावात्। कर्त्तव्याभावाच्च सर्वकृदसौ सम्पद्यते। उक्तादेव ज्ञानाद्भवभयरहितश्च निश्चीयते। 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति श्रुतेः[2]। 'अथ ब्राह्मण' इति श्रुतेर्ब्रह्मभावमापन्नश्च तज्ज्ञानाद्भवति तदाप्त्या च सकलकर्मफलावाप्तिद्वारा कृतकृत्यतामाप्नोति। 'एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारते'ति स्मृतेरित्यर्थः[3]॥८२॥

कथमात्मानं जानन् कृतकृत्यः स्यादित्यपेक्षायामाह—**न स्वयमिति**। स्वस्य हेयत्वं न गम्यते नाप्युपादेयो भवति। एकस्मिन्कर्मकर्तृभावासम्भवात्। नचान्यः स्वस्योपादेयो हेयो वा भवितुमुत्सहते। अद्वितीये स्वात्मन्यन्यस्याभावात्। न चान्यस्यान्यो वा स्वयं वाऽऽत्मा हेयः स्यादुपादेयो वा यथोक्तन्यायाविशेषात् उक्तलक्षणा धीः सम्यङ्मतिर्ब्रह्मविद्भिः स्मृता। तस्मादेवं जानन् कृतकृत्यः स्यादित्यर्थः॥८३॥

कूटस्थचैतन्यैकरसे पूर्णे वस्तुनि हानाद्यसंभवान्न हेयमुपादेयं वा किञ्चिदस्तीत्येवंविधाया धियः सम्यङ्मतित्वे हेतुमाह—**आत्मप्रत्यायिकेति**। आत्मानं ब्रह्मत्वेन प्रत्याययतीत्यात्मप्रत्यायिका विदुषां स्वानुभवारूढा वेदान्तप्रसिद्धा

---

१. ज्ञेयं ज्ञेयाभ्यतीतं—रामतीर्थपाठः। २. तैत्ति. २.९। ३. भ. गीता १५.२०।

रहस्यं सर्ववेदानां देवानां चापि यत्परम्।
पवित्रं परमं ह्येतत्तदेतत्सम्प्रकाशितम्।।८५।।
नैतद्देयमशान्ताय[१] रहस्यं ज्ञानमुत्तमम्।
विरक्ताय प्रदातव्यं शिष्यायानुगताय च।।८६।।
ददतश्चात्मनो ज्ञानं निष्क्रयोऽन्यो न विद्यते।
ज्ञानमिच्छंस्तरेत्तस्माद्युक्तः शिष्यगुणैः सदा।।८७।।
ज्ञानं ज्ञेयं तथा ज्ञाता यस्मादन्यन्न विद्यते[२]।
सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः।।८८।।
विद्यया तारिताः स्मो यैर्जन्ममृत्युमहोदधिम्।
सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्योऽज्ञानसङ्कुलम्।।८९।।

च यथोक्ता मतिः। एतां ज्ञात्वा लब्ध्वा मुच्यन्ते यस्मात्तस्मादेव सम्यङ्मतित्वमित्यर्थः।।८४।।

प्रकरणोक्तं ज्ञानमिदानीं स्तौति—**रहस्यं सर्ववेदानामित्यादि**।।८५।।

एतस्य गोपनीयत्वं सूचयति—**नैतद्देयमित्यादिना**। तस्यानुपयोगशङ्कां शिथिलयति—**विरक्तायेति**।।८६।।

एवं लक्षणं ज्ञानं प्रयच्छन्नाचार्यो यस्मात्कृतकृत्यत्वान्न प्रलोभादिना तत्प्रदातुं प्रवर्त्तते तस्मान्मुमुक्षुरमानित्वादिशिष्यगुणसम्पन्नः स्यात्, यथा कृपयाऽऽचार्यो विद्यां दद्यादित्याह—**ददतश्चेति**।।८७।।

प्रकरणस्यादाविवोपसंहारेऽपि देवतानमस्कारं तद्भक्तेर्विद्याप्राप्तावन्तरङ्गत्व-ज्ञापनार्थं प्रकरोति—**ज्ञानं ज्ञेयं तथेत्यादिना**।।८८।।

पूर्ववद्गुरुभक्तेरपि ज्ञानप्राप्तावन्तरङ्गत्वं ज्ञापयितुमन्तेऽपि गुरून् प्रणमत्याचार्यः—**विद्यया तारिताः स्मो यैरित्यादिना**। अज्ञानसङ्कुलं मिथ्याज्ञान-बहुलम्। जन्ममृत्यूपेतं संसारसमुद्रं विद्यया यैस्तारिताः स्मस्तेभ्यो गुरुभ्यो नमो भूयादित्यर्थः।।८९।।

।।इति विवृतं सप्तदशं सम्यङ्मतिप्रकरणम्।।१७।।

---

१. अशान्तचित्तस्यानधिकारित्वात्।
२. आत्मव्यतिरिक्तस्य सर्वस्य मिथ्याभूतत्वात्।

अथाष्टादशं तत्त्वमसिप्रकरणम्

येनात्मना विलीयन्ते उद्भवन्ति च वृत्तयः।
नित्यावगतये तस्मै नमो धीप्रत्ययात्मने॥१॥

प्रमथ्य वज्रोपमयुक्तिसम्भृतैः श्रुतेररातीञ्शतशो वचोऽसिभिः।
ररक्ष वेदार्थनिधिं विशालधीः नमो यतीन्द्राय गुरोर्गरीयसे॥२॥

नित्यमुक्तः सदेवास्मीत्येवं चेन्न भवेन्मतिः।
किमर्थं श्रावयत्येवं मातृवच्छ्रुतिरादृता॥३॥

सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो[१] निषिध्यते।
रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः॥४॥

तत्त्वमसिप्रकरणम्

पूर्वस्मिन् प्रकरणे ब्रह्मात्मविषयमपरोक्षज्ञानं मोक्षसाधनं वेदान्तेभ्यो भवतीत्युक्तम्। तदयुक्तम्। वेदान्तानां स्वर्गकामादिवाक्यवत्परोक्षज्ञानहेतुत्वादपरोक्षज्ञानं तु प्रसंख्यानादेव सिद्ध्यतीति केचित्। तन्निराकरणार्थं प्रकरणान्तरं प्रारभमाणो देवतानमस्कारव्याजेन वेदान्तवेद्यमपरोक्षब्रह्मात्मानमन्तःकरणतद्वृत्तिभावाभावसाक्षिणं कूटस्थावगतिरूपं प्रकरणप्रतिपाद्यं दर्शयति—**येनात्मनेति**॥१॥

स्वोक्तेऽर्थे मुमुक्षुणां विश्वासार्थं स्वसम्प्रदायशुद्धिं स्वाचार्यगुणोपवर्णनपूर्वकं कथयति—**प्रमथ्येति**॥२॥

एवं परापरगुरुनमस्कारव्याजेन प्रकरणार्थं स्वसम्प्रदायशुद्धिं चोक्त्वा तत्त्वमस्यादिवाक्यादेवापरोक्षज्ञानमिति प्रकरणसिद्धान्तमाह—**नित्यमुक्त** इति॥३॥

नित्यापरोक्षस्वभावत्वादेवात्मनो वाक्यादेवापरोक्षज्ञानेन तदज्ञानतत्कार्यनिवृत्तिः फलतीत्याह—**सिद्धादेवेति**। अस्मत्पदलक्ष्यादहमित्यपरोक्षतया सिद्धादात्मनः सकाशाद्युष्मद्धर्म्मः समूलो युक्त्या सहितैस्तत्त्वमस्यादिशासनैर्निषिद्ध्यते। यथा रज्ज्वामारोपिता सर्पबुद्धिर्युक्त्या प्रकाशोत्पत्त्या निर्वर्त्तते तद्वदित्यर्थः॥४॥

---

१. अहमर्थे सिद्धे चैतन्याध्यस्तो युष्मद्धर्मो निषिध्यते।

शास्त्रप्रामाण्यतो ज्ञेया धर्मादेरस्तिता यथा।
विषापोहो यथा ध्यानाद् ह्रुतिः स्यात्पाप्मनस्तथा॥५॥
सद्ब्रह्माहं करोमीति प्रत्ययावात्मसाक्षिकौ।
तयोरज्ञानजस्यैव त्यागो युक्ततरो[१] मतः॥६॥
सदस्मीति प्रमाणोत्था धीरन्या तन्निभोद्भवा।
प्रत्यक्षादिनिभा वाऽपि बाध्यते दिग्भ्रमादिवत्[२]॥७॥
कर्ता भोक्तेति यच्छास्त्रं लोकबुद्ध्यनुवादि तत्।
सदस्मीति श्रुतेर्जाता बाध्यतेऽन्यैतयैव धीः॥८॥

तन्निवृत्तिं दृष्टान्ताभ्यां स्पष्टयति—**शास्त्रेति**। ध्यानान्मन्त्रबीजादेर्गायत्र्यादिजपाच्च पापहानिर्यथा पाप्मशब्देनानर्थराशिर्गृह्यते। तथा तत्त्वमसिवाक्यं शक्तिविशेषादपरोक्षज्ञानं जनयतीत्यर्थः॥५॥

ननु तत्त्वमसिवाक्योत्थप्रत्ययवदहं करोमीति प्रत्ययो दृश्यते तेन विरोधाद् अहं ब्रह्मास्मीति प्रत्ययस्य कथं प्रतिष्ठा स्यात्तत्राह—**सद्ब्रह्माहमिति**॥६॥

अज्ञानजस्यैव त्यागो नान्यस्येत्यभ्युपगमेऽपि कोऽज्ञानजः को वा प्रमाणज इति जिज्ञासायामाह—**सदस्मीति**। ब्रह्मास्मीति धीस्तत्त्वमस्यादिवाक्योत्थत्वाद्बलवती। करोमीति धीस्तु तन्निभोद्भवा प्रमाणाभासोत्था बाध्येत्यर्थः। वाक्यजन्यज्ञानस्य प्रत्यक्षबाधनसामर्थ्यं नास्तीत्याशङ्क्याह—**प्रत्यक्षादीति**। यथा प्राची प्रतीचीति वा प्रत्यक्षनिश्चयप्राप्तापि दिग्बुद्धिराप्तवाक्योत्थविज्ञानादानुमानिकज्ञानाद्वा बाध्यते। तथा ब्रह्मास्मीत्यपि धिया कर्ताऽस्मीत्यादिधीरध्यक्षवदवस्थितापि बाध्यैवेत्यर्थः॥७॥

ब्रह्मास्मीति बुद्धेरिव कर्तृत्वभोक्तृत्वबुद्धेरपि कर्त्ता भोक्ता विज्ञाताऽऽत्मेति शास्त्रजन्यत्वाविशेषान्न ब्रह्मास्मीति बुद्ध्या बाध्यत्वसिद्धिरित्याशङ्क्याह—**कर्त्तेति**। अनयोर्बुद्ध्योरेवं व्यवस्थिततत्वादेतया शास्त्रोत्थया ब्रह्मास्मीति धिया कर्तृत्वादिधीरन्या बाध्यत इति युक्तमेवोक्तमित्यर्थः॥८॥

---

१. अविद्यातत्कार्ययोर्युक्तिपूर्णं त्यागो विधेयः।

२. दिग्भ्रमशीलस्य दिक्षु भ्रमः स चानुमानादिप्रमाणैर्बाध्यते, तथैव अहमित्यत्र कर्तृत्वादिकं तत्त्वमस्यादिमहावाक्यस्याखण्डार्थबोधेन बाध्यते।

सदेव त्वमसीत्युक्ते[1] नात्मनो मुक्तता स्थिरा।
प्रवर्तते प्रसंचक्षामतो युक्त्याऽनुचिन्तयेत्॥९॥
सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोऽपि यो भवेत्।
अपेक्षतेऽत एवान्यदवोचाम द्वयं हि तत्॥१०॥
नियोगीऽप्रतिपन्नत्वात्कर्मणां स यथा भवेत्।
अविरुद्धो भवेत्तावद्यावत्संवेद्यता दृढा॥११॥
चेष्टितं च यतो मिथ्या स्वच्छन्दः प्रतिपद्यते।
प्रसङ्ख्यानमतः कार्यं यावदात्माऽनुभूयते॥१२॥
सदस्मीति च विज्ञानमक्षजो बाधते ध्रुवम्।
शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः॥१३॥

तत्त्वमस्यादिवाक्यस्यापरोक्षब्रह्मात्मप्रतिपादकत्वे प्रतिपादिते स्वयूथ्यमतमुत्थापयति—**सदेवेति**। प्रसंचक्षां प्रसंख्यानं शब्दावृतिं युक्त्या सहाभ्यसेत्। त्वं तदेवेति वाक्यादेव निर्विचिकित्सब्रह्मात्माप्रतिपत्तेरित्यर्थः॥९॥

नन्ववान्तरवाक्यार्थपरिज्ञानात्सदस्मीत्यप्रतिपत्तिः, न तु वाक्यासामर्थ्यात्। नहि पदार्थज्ञानादृते वाक्यार्थज्ञानमित्याशङ्क्याह—**सकृदुक्तमिति**। योऽप्यवान्तरवाक्यात्तदर्थभूतं पदार्थं जानाति सोऽपि सकृदुक्तं तत्त्वमसिवाक्यार्थं यतो न प्रतिपद्यते। अत एवान्यत्सहकारिकारणं वाक्यमपेक्ष्यते। तच्च द्वयं शब्दानुचिन्तनं युक्त्यनुचिन्तनं च पूर्वश्लोकेऽवोचमित्यर्थः॥१०॥

ननु तत्त्वमस्यादिवाक्ये विधिर्नोपलक्ष्यते। ब्रह्मात्मभावस्य स्वतः सिद्धेर्मुमुक्षोर्नियोगो नोपपद्यते तत्राह—**नियोगेति**। वाक्यमात्रादैक्यस्याप्रतिपन्नत्वात्तत्प्रत्तिपत्तिदार्ढ्यपर्यन्तं प्रसङ्ख्यानविषये नियोगस्तावदविरुद्धः सिद्ध्येत्। यथा ज्योतिष्टोमादिकर्मणां नियोगो भवेत्तथेत्यर्थः॥११॥

किञ्च विधिमन्तरेण स्वेच्छातश्चेद्वाक्यार्थं प्रतिपद्यते तदा पारमहंस्यमपि चेष्टितं यमनियमात्मकं मिथ्या प्रसज्येत तस्मात्प्रसंख्यानमात्मसाक्षात्कारपर्यन्तं नियोगवशात्कार्यमित्याह—**चेष्टितमिति**॥१२॥

किञ्चाक्षजो बोधो दृढसंस्कारः शब्दोत्थं विज्ञानं बाधते रागादिदोषैर्मुमुक्षुर्बहिराकृष्यते। तत्परिहारार्थमपि प्रसंख्यानं विधिना कार्यमित्याह—**सदस्मीति**॥१३॥

---

१. सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६.२.१) इत्यारभ्य तदैक्षत बहुस्यां प्रजायेय (छा. ६.१०.३) तत्पदवाच्यतामुपादाय, स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो (छा. ६.११.३) इत्युपसंहारात्।

श्रुतानुमानजन्मानौ सामान्यविषयौ यतः।
प्रत्ययावक्षजोऽवश्यं विशेषार्थो निवारयेत्॥१४॥
वाक्यार्थप्रत्ययी कश्चिन्निर्दुःखो नोपलभ्यते[1]।
यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः॥१५॥
निर्दुःखोऽतीतदेहेषु कृतभावोऽनुमीयते।
चर्या नोऽशास्त्रसंवेद्या स्यादनिष्टं तथा सति॥१६॥
सदसीति फलं चोक्त्वा विधेयं साधनं यतः।
न तदन्यत्प्रसङ्ख्यानात्प्रसिद्धार्थमिहेष्यते॥१७॥
तस्मादनुभावायैव प्रसंचक्षीत यत्नतः।
त्यजन् साधनतत्साध्यविरुद्धं शमनादिमान्॥१८॥

न केवलं चिरनिरूढत्वेन प्रत्यक्षस्य प्राबल्यं विशेषविषयत्वादपि तस्य बलवत्त्वं मन्तव्यमित्याह—**श्रुतानुमानेति**॥१४॥

यदि च वाक्यार्थज्ञानमात्रात्प्रसंख्याननिरपेक्षात्कृतकृत्यता स्यात्तदा केनचिद् वाक्यार्थज्ञानिना निर्दुःखेन भवितव्यं न चासौ दृष्टोऽस्तीत्याह—**वाक्यार्थेति**। वामदेवादिर्वाक्यार्थज्ञानी कृतकृत्यो दृष्टोऽस्तीत्याशङ्क्याह—**यदि वेति**॥१५॥

निर्दुःख इति। पूर्वदेहेषु कृतभावोऽनुष्ठितप्रसङ्ख्यानोऽनुमीयते निर्दुःखत्वलिङ्गेनेत्यर्थः। किञ्च विध्यनभ्युपगमे नोऽस्माकं पारमहंसी चर्या शास्त्रसंवेद्या न स्यात्। तथा सति तत्परित्यागेऽप्यारूढपतितत्वं न सिद्ध्येत् तच्चानिष्टमित्याह—**चर्येति**॥१६॥

कस्तर्हि प्रसंख्यानविधिवादे सिद्धब्रह्मात्मोपदेशस्यार्थः स्यादित्याशङ्क्याह—**सदसीति**। ब्रह्मास्मीति वर्तमानापदेशेन साधनविधानाय फलमभिधीयते सर्वत्र फलमुक्त्वा साधनं विधेयमित्यभ्युपगमादित्यर्थः। कस्मात्तर्हि ज्योतिष्टोमादिकमेव साधनमिह न विधीयेत तत्राह—**न तदिति**। प्रसंख्यानादन्यत्प्रसिद्धार्थं स्वतः सिद्धार्थव्यञ्जनार्थं साधनमिह वेदान्तेषु नेष्यते। ज्योतिष्टोमादेर्व्यञ्जकत्वसामर्थ्याभावादित्यर्थः॥१७॥

पूर्वपक्षमुपसंहरति—**तस्मादिति**। साधनं प्रसंख्यानं तत्साध्यमैकात्म्यज्ञानं ताभ्यां विरुद्धकर्मनिष्ठत्वं तत् त्यजन् प्रसंख्यानं शमदमादियुक्तः सन् कुर्यादित्यर्थः॥१८॥

---

१. तत्त्वमसीति महावाक्यबोधमात्राद्दुःखनिवृत्तिश्चेत् शमदयादिसाधनस्य वैयर्थ्यमापद्येत।

नैतदेवं रहस्यानां नेति नेत्यवसानतः।
क्रियासाध्यं पुरा श्राव्यं न मोक्षो नित्यसिद्धतः॥१९॥
पुत्रदुःखं यथाध्यस्तं पित्राऽदुःखे स्व आत्मनि।
अहं कर्त्रा तथाऽध्यस्तो नित्यादुःखे स्व आत्मनि॥२०॥
सोऽध्यासो नेति नेतीति प्राप्तवत्प्रतिषिध्यते।
भूयोऽध्यासविधिः कश्चित्कुतश्चिन्नोपपद्यते॥२१॥
आत्मनीह यथाऽध्यासः प्रतिषेधस्तथैव च।
मलाध्यासनिषेधौ खे क्रियेते च यथाऽबुधैः॥२२॥

परिहारमुपक्रमते—**नैतदेवमिति**। नेति नेतीति सकलविशेषप्रतिषेधेन वेदान्तानां ब्रह्मात्मबोधने पर्यसानान्नियोगनिष्ठत्वं न प्रतिभातीत्यर्थः। यत्तु सिद्धब्रह्मात्मस्वरूपकथनं प्रसंख्यानानुष्ठानार्थं न तावता कृतकृत्यतार्थमित्युक्तं सदसीति फलं चोक्त्वेत्यादिना तत्राह—**क्रियेति**। यत् क्रियासाध्यं फलं तदेव क्रियापेक्षया प्रवृत्त्याङ्गत्वेन पूर्वमेव श्राव्यं न मोक्षस्तदा कथनीयः। नित्यसिद्धत्वेनाननुष्ठेयत्वात्तस्मात्तावता कृतकृत्यतार्थमेव तत्त्वमसिवाक्यमपरोक्षब्रह्मज्ञानोत्पादनेनाज्ञानतत्कार्यनिवर्त्तनेनापरोक्षाद्वितीयब्रह्मात्मस्वरूपे पर्यवस्यतीत्यर्थः॥१९॥

तत्त्वमसिवाक्यमपरोक्षाद्वितीयब्रह्मात्मज्ञानद्वारा तदज्ञानं तदध्यस्तं च दुःखित्वादिसंसारं निवर्तयतीति वक्तुं ब्रह्मात्मन्यज्ञानेनाध्यस्तं दुःखादीत्यत्र दृष्टान्तमाह—**पुत्रदुःखमिति**। उक्तदृष्टान्तानुसारेणाहंकर्त्रा साभासाहङ्कारविवेकेनात्मना स्वे दुःखादिरहिते दुःखादिसाक्षिण्यात्मनि परिशुद्धे तदविवेकाद् दुःखादि परिकल्पितमिति दार्ष्टान्तिकमाह—**अहं कर्त्रेति**। आत्मनि दुःखमिति शेषः॥२०॥

अपरोक्षब्रह्मात्मन्यज्ञानेन प्राप्तोऽध्यासो ब्रह्मात्मविषयेण विज्ञानेनाज्ञाननिवृत्त्या निवर्त्तत इत्याह—**सोऽध्यासः**। प्राप्तवदिति वस्तुवृत्त्या अप्राप्तमपि रजतादिवन्निषिध्यत इत्यर्थः। सुषुप्तावस्थायामिव ब्रह्मात्मज्ञानेनाध्यासो निवृत्तोऽपि पुनरुद्भविष्यतीत्याशङ्क्य कारणस्याज्ञानस्य ज्ञानेन बाधितत्वान्नैवमित्याह—**भूय इति**। विधिरुद्भवः। कारणस्याज्ञानस्य निवृत्तत्वादित्यर्थः॥२१॥

नन्वविषयब्रह्मात्मनि विषयिण्यध्यासो न सिद्ध्यति पुरोऽवस्थिते शुक्तिकादौ विषये विषयान्तरस्य रजतादेरध्यासदर्शनादित्याशङ्क्य व्यभिचारमाह—**आत्मनीहेति**। यथा देहव्यतिरिक्तात्मवादिनामात्मनि जन्मजराध्यासस्तत्प्रतिषेधश्च दृश्यते यथा वाऽविवेकिभिराकाशे मलाध्यासनिषेधाविन्द्रियाग्राह्येऽपि क्रियेते तथाऽऽत्मनि प्रसिद्धिमात्रेण दुःखाद्यध्यासनिषेधौ भवतोऽतः शक्यौ परिहर्त्तुमित्यर्थः॥२२॥

प्राप्तश्चेत्प्रतिषिध्येत मोक्षोऽनित्यो भवेद्ध्रुवम्।
अतोऽप्राप्तनिषेधोऽयं[१] दिव्यग्निचयनादिवत्॥२३॥
सम्भाव्यो गोचरे शब्दः प्रत्ययो वा न चान्यथा।
न सम्भाव्यौ तदात्मत्वादहंकर्तुस्तथैव च॥२४॥
अहंकर्त्रात्मनि न्यस्तं चैतन्ये कर्तृतादि यत्।
नेति नेतीति तत्सर्वं साहंकर्त्रा निषिध्यते[२]॥२५॥
उपलब्धिः स्वयंज्योतिर्दृशिः प्रत्यक्सदक्रियः।
साक्षात्सर्वान्तरः साक्षी चेता नित्योऽगुणोऽद्वयः॥२६॥
सन्निधौ सर्वदा तस्य स्यात्तदाभोऽभिमानकृत्।
आत्मात्मीयं द्वयं चातः स्यादहं ममगोचरः॥२७॥

कस्मात्पुनरात्मनि परमार्थवृत्त्यैव प्राप्तः संसारो न निषिध्यते तत्राह—**प्राप्तश्चेत्।** प्रमाणसिद्धस्य बन्धस्य प्रतिषेधे तन्निवृत्तिलक्षणस्य मोक्षस्यागन्तुकत्वात्तदनित्यत्वमावश्यकं स्यादित्यर्थः। प्रमाणप्राप्तस्य प्रतिषेधासम्भवात्पृथिव्यामिवाग्निचयनं नान्तरिक्षे न दिवीति भ्रमप्राप्तं यथा प्रतिनिषिध्यते तथा प्रमाणाप्राप्तस्य संसारस्यात्मनि भ्रान्तिसिद्धस्य प्रतिषेधोऽयमिति फलितमाह—**अतोऽप्राप्तेति**॥२३॥

आत्मनि बन्धसम्बन्धबोधकप्रमाणाभावादपि न तत्र बन्धस्य सत्यताप्राप्तिरस्तीत्याह—**सम्भाव्य इति। न चान्यथेति।** अगोचरे शब्दः प्रत्ययो वा लोके न सम्भाव्यते। ततश्चात्मन्यपि शब्दप्रत्ययौ न सम्भाव्यौ शब्दप्रत्यययोरपि तस्य स्वरूपत्वात्। अहंकर्तुश्च स्वरूपत्वात्स्वरूपे च शब्दः प्रत्ययः प्रत्ययी वा न प्रवर्तत इत्यर्थः॥२४॥

आत्मनि प्रमाणप्राप्तस्य प्रतिषेधायोगादज्ञानप्राप्तो बन्धो निषिध्यते तत्रेत्युपसंहरति—**अहंकर्त्रेति**॥२५॥

तत्त्वमस्यादिना शास्त्रेणाध्यस्तदुःखित्वादिनिषेधेऽपि कथमात्मसिद्धिरित्याशङ्क्याह—**उपलब्धिः।** आत्मनोऽनुपलब्ध्यादिरूपत्वे प्रमाणाभावादुपलब्ध्यादिस्वभावः स चासौ स्वतः सिद्ध्यतीत्यर्थः॥२६॥

आत्मात्मीयद्वयमहंममप्रत्ययगोचरत्वेन प्रसिद्धमिति कथमात्मा स्वतः सिद्धः स्यादित्याशङ्क्याह—**सन्निधौ।** अभिमानकृदहंकारश्चैतन्यस्य सन्निधौ सति

---

१. अनित्यस्यैवाविद्याकार्यस्य ब्रह्मज्ञानेन बाधः।
२. चैतन्येऽध्यस्तमहङ्कारादिसहितं कर्तृत्वादिकं निषिध्यते।

जातिकर्मादिमत्त्वाद्धि तस्मिञ्शब्दस्त्वहंकृतिः।
न कश्चिद्वर्तते शब्दस्तदभावात्स्व आत्मनि॥२८॥

आभासो यत्र तत्रैव शब्दाः प्रत्यग्दृशिं स्थिताः।
लक्षयेयुर्न साक्षात्तमभिदध्युः[1] कथंचन॥२९॥

न ह्यजात्यादिमान्कश्चिदर्थः शब्दैर्निरूप्यते॥३०॥

आत्माभासो यथाहंकृदात्मशब्दैस्तथोच्यते।
उल्मुकादौ यथाग्न्यर्थाः परार्तत्वान्न चाञ्जसा॥३१॥

मुखादन्यो मुखाभासो यथाऽऽदर्शानुकारतः।
आभासान्मुखमप्येवमादर्शाननुवर्तनात्। ३२॥

चैतन्यवदाभाति ततश्च तदविवेकादात्माऽऽत्मीयं चेति द्वयमहं ममेति भ्रान्तिधियो गोचरः स्यादिति चिदात्मनः स्वतः सिद्धत्वे न विरुद्धतेत्यर्थः॥२७॥

तथापि शब्दप्रमेयत्वादात्मनः स्वतः सिद्धिर्नास्तीत्याशङ्क्याह—**जातीति**। विशिष्टस्य शब्दप्रमेयत्वेऽपि केवलात्मनस्तदभावात्तस्य स्वतःसिद्धिरविरुद्धेत्यर्थः॥२८॥

स्वतः सिद्धे चिदात्मनि जातिगुणादिशब्दप्रवृत्तिनिमित्ताभावान्न कश्चिदपि शब्दो वर्त्तते चेत्कथं तर्हि वेदान्तवेद्यतेत्याशङ्क्याह—**आभासो**॥२९॥

यत्राहङ्कारादौ चिदाभासो जायते तत्रैव स्थिताः शब्दाः प्रत्यग्भूतं दृगात्मानं लक्षयेयुः न तु तं साक्षादभिदध्युरित्यत्र हेतुमाह—**नह्यजाति**॥३०॥

अहङ्कारातिरिक्तश्चेदात्मा लक्षणाद्वारेण वेदान्तैस्तात्पर्येण प्रतिपाद्येत तर्हि कथमहङ्कारे लोकस्यात्मशब्दप्रयोगः स्यादित्याशङ्क्याह—**आत्मेति**। तथेति आत्मवदित्यर्थः आत्माभासोपेतेऽहमादौ वर्त्तमानाः शब्दास्तत्साक्षिणं लक्षयन्ति न साक्षादभिदधतीत्यत्र दृष्टान्तमाह—**उल्मुकादौ**। श्लोकार्द्धम्। यथोल्मुकं दहत्ययो दहतीत्यादिप्रयोगे नैवोल्मुकादिशब्दाः साक्षादेवाग्नौ प्रयुज्यन्ते तेषामलाताद्यर्थत्वात्तथापि दहतेरनुपपत्त्या लक्षणयाऽग्न्यर्थास्तथा लक्षणयाऽहमात्मादिशब्दा ब्रह्मात्मप्रतिपत्त्यर्था भवन्तीत्यर्थः॥३१॥

आभासो यत्रेत्यत्रात्माभासः सिद्धान्तिनाऽभ्युपगतः। तस्य वस्तुत्वमवस्तुत्वं वेति वीक्षायामनिर्वाच्यत्वं वक्तुं दृष्टान्तमाह—**मुखादन्यो**॥३२॥

---

१. अज्ञानोपहितं सर्वज्ञत्वाल्पज्ञत्वविशिष्टमेव चैतन्यं तत्त्वमसि वाक्यस्य वाच्यं न तु शुद्धम्।

अहङ्कृत्यात्मनिर्भासो मुखाभासवदिष्यते।
मुखवत्स्मृत आत्माऽन्योऽविविक्तौ तौ[1] तथैव च॥३३॥
संसारी च स इत्येक आभासो यस्त्वहङ्कृतिः।
वस्तुच्छाया स्मृतेरन्यन्माधुर्यादि च कारणम्॥३४॥
ज्ञैकदेशो विकारो वा तदभासाश्रयः परे।
अहंकर्तैव संसारी स्वतन्त्र इति केचन॥३५॥
अहङ्कारादिसन्तानः संसारी नान्वयी पृथक्।
इत्येवं सौगता आहुस्तत्र न्यायो विचार्यताम्॥३६॥
संसारिणां कथा त्वास्तां प्रकृतं त्वधुनोच्यते।
मुखाभासो य आदर्शे धर्मो नान्यतरस्य सः।
द्वयोरेकस्य चेद्धर्मो वियुक्तोऽन्यतरे भवेत्॥३७॥

मुखस्य मुखाभासस्य तदाश्रयस्य वा प्रतीतितो भेदं प्राप्तमुक्त्वा दार्ष्टान्तिकमाह—**अहंकृत्यात्मेति**। आत्मात्माभासतदाश्रयाणां प्रातिभासिकभेदेऽपि वस्तुतो नात्मातिरिक्तं किञ्चिदस्ति, चिदात्मपरतन्त्रानाद्यनिर्वाच्याविद्यायां तत्कार्यो चाहङ्कारौ प्रतिबिम्बद्वारा तदेव चिदात्मतत्त्वमविद्यया संसरतीत्यर्थः॥३३॥

स्वमतमेव दृढयितुं मतान्तरमाह—**संसारीति**। आभासस्यावस्तुत्वान्न बन्धमोक्षभाक्त्वं युक्तमित्याशङ्क्याह—**वस्त्विति**। आभासः छायेत्यनर्थान्तरम्। नाक्रामेत्कामतश्छायामित्यादिवाक्यमत्र प्रमाणयति—**स्मृतेरिति**। अन्यच्च माधुर्यं छायावस्तुत्वे कारणमस्ति छायायामासीनस्य मुखे माधुर्योपलब्धेः शैत्योपलब्धेश्च छाया वस्त्वेवेत्याह—**अन्यदिति**॥३४॥

एकदेशिनां मतत्रयमाह—**ज्ञैकदेशो**। ममैवांश इति स्मृतेः परमात्मैकदेशो जीवः संसारी, व्युच्चरन्तीति श्रुतिबलाद्विकारो वा चैतन्यछायाविशिष्टोऽहङ्कारो वा संसारीत्यर्थः। भाट्टाद्यभिमतमाह—**अहंकर्त्तेति**॥३५॥

बौद्धादिमतमाह—**अहङ्कारादि**। यथोक्तेषु संसारिविकल्पेषु कश्चिदन्यतमः स्वेच्छया विकल्पः स्वीक्रियतामित्याशङ्क्यान्यतमस्यापि न्याय्यत्वाभावात्प्रागुक्त-सिद्धान्तसिद्धिरित्यभिसन्धायाह—**तत्रेति**॥३६॥

प्रासङ्गिकीं संसारिचिन्तां हित्वा प्रकृतामाभासनिरूपणां प्रस्तौति—**संसारिणामिति**। श्लोकार्द्धम्, प्रकृतमाभासमेव निरूपयन्नादौ मुखाभासं

---

१. जीवेश्वरौ, अविद्यायां प्रतिबिम्बितं चैतन्यं जीवः, मायायां प्रतिबिम्बितं चैतन्यमीश्वर इति।

मुखेन व्यपदेशात्स मुखस्यैवेति चेन्मतम्।
नादर्शानुविधानाच्च मुखे सत्यविभावतः॥३८॥
द्वयोरेवेति चेत्तन्न द्वयोरेवाप्यदर्शनात्॥
अदृश्यस्थ सतो दृष्टिः स्याद्राहोश्चन्द्रसूर्ययोः॥३९॥
राहोः प्रागेव वस्तुत्वं सिद्धं शास्त्रप्रमाणतः।
छायापक्षे त्ववस्तुत्वं तस्य स्यात्पूर्वयुक्तितः[1]॥४०॥

दृष्टान्तत्वेनापरमार्थतयोपपादयति—**मुखाभासो**। योऽयमादर्शे मुखाभासो दृश्यते स किमादर्शमुखयोर्यस्य कस्यचिद्धर्मः किं वा मुखस्यैव धर्मोऽथवा द्वयोरेव धर्मो यदि वा वस्त्वन्तरमिति विकल्प्य पक्षासम्भवं प्रतिज्ञातं प्रपञ्चयति—**द्वयोरिति**। यद्यादर्शमुखयोर्यस्य कस्यचिदाभासो धर्मो विवक्षितो मतस्तदा मुखधर्मत्वे दर्पणादिविप्रकर्षेऽपि मुखे दृश्यमानतद्धर्मरूपादिवदाभासो दृश्येत। दर्पणधर्मत्वे मुखवियोगे दर्पणे भासमाने सत्याभासो भासेत—न चैवमस्ति। तस्मादन्यतरस्याभासो धर्मो यस्य कस्यचिदित्ययुक्तमित्यर्थः॥३७॥

कल्पान्तरमनुवदति—**मुखेनेति**। यद्यपि मुखाभास इति मुखेनाभासो व्यपदिश्यते तथापि नाभासो मुखस्यैव धर्मो दर्पणानुविधानान्मुखैकधर्मत्वेऽपि तदयोगात्। किं चासत्यपि मुखे दर्पणवियोगे नाभासो भवति तस्मान्न मुखस्यैवाभासो धर्मः स्यादिति दूषयति—**नादर्शेति**॥३८॥

कल्पनान्तरमनूद्य प्रत्याह—**द्वयोरेवेति**। नहि मुखदर्पणयोरुभयोरपि वियुक्तयोराभासो दृश्यते, नापि संयुक्तयोरसौ धर्मो यथा कथञ्चन संयोगेऽपि तदुपलम्भासम्भवादित्यर्थः। आभासस्य वस्त्वन्तरत्वमिति पक्षान्तरं दृष्टान्तपूर्वकमाशङ्कते—**अदृश्यस्येति**। यथेह लोके सर्वकरणैरनुपलब्धस्यापि राहोर्विद्यमानस्य दर्शनं चन्द्रे सूर्ये वा उपाधौ कदाचिद्भवेत्। एवं मुखाभासयोर्विषयिविषयसम्बन्धोपाधावाभासस्य वस्तुभूतस्यैवाभिव्यक्तिः स्यादित्यर्थः॥३९॥

प्रागेव चन्द्रादिसम्बन्धाद्वस्तुत्वं ज्योतिःशास्त्रप्राणाण्यादेव राहोरधिगतम्। प्रकृते त्वादर्शसम्बन्धात्पूर्वमूर्ध्वं वा तद्व्यतिरिक्तवस्तुता मुखाभासस्य केनचित्प्रमाणेनावगम्यत इति दूषयति—**राहोरिति**। किं च भूम्यादिच्छायैव राहुरित्यङ्गीकाराद् दृष्टान्तेऽपि नास्ति सम्प्रतिपत्तिरित्याह—**छायेति**। तस्येति राहोः उक्तिः। मुखाभासो य आदर्श इत्यादिनोक्तां युक्तिं तत्र हेतूकरोति—**पूर्वेति**। दृष्टान्तस्यावस्तुत्वान्मुखाभासोऽपि वस्तुभूतो न भवतीति भावः॥४०॥

---

१. ज्योतिःशास्त्रे प्रमाणसिद्धोऽपि राहुः शास्त्रान्तरेषु भूमिच्छायात्वेनाभिमतः।

छायाक्रान्तेर्निषेधोऽयं न तु वस्तुत्वसाधकः।
न ह्यर्थान्तरनिष्ठं सद्वाक्यमर्थान्तरं[1] वदेत्।।४१।।

माधुर्यादि च यत्कार्यमुष्णद्रव्याद्यसेवनात्।
छायाया न त्वदृष्टत्वादपामेव च दर्शनात्।।४२।।

आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा।
गम्यन्ते शास्त्रयुक्तिभ्यामाभासासत्त्वमेव च।।४३।।

नाक्रामेत्कामतः छायामित्यादिस्मृतेर्वस्तुत्वं छायायाः स्यादित्युक्तमित्याशङ्क्याह—**छायाक्रान्तेरिति**। ननु छायालम्बनप्रतिषेधपरमपि वचनं तस्यावस्तुत्वमपि बोधयिष्यति नेत्याह—**नहीति**। वाक्याभेदप्रसङ्गादित्यर्थः।।४१।।

यत्तु माधुर्यादिकार्यहेतुत्त्वेन वस्तुत्वं छायायाः सिद्ध्येदिति तद्दूषयति—**माधुर्यादि**।।४२।।

दृष्टान्तनिविष्टमर्थं दार्ष्टान्तिके योजयति—**आत्मा**। यथा मुखं तदाभासस्तदाश्रयश्चेत्येते व्यवहारतो विभक्ता भासन्ते तथैवात्मा तदाभासः तदाश्रयश्चेत्येते मिथो विलक्षणा गम्यन्ते[2]। 'एको देवः सर्वभूतेषु गूढः'[3] इत्यादिशास्त्राद्बुध्यादेर्विषयान्तरस्यागमापायिनो नित्यसिद्धसाक्ष्यात्मव्यतिरेकेण स्फुरणानुपत्तेरिति युक्तेश्चात्मास्तित्वं सिद्धम्। 'अग्निर्यथैको भुवनं प्रविष्ट'[4] इत्यादिशास्त्रात्कूटस्थासङ्गाद्वितीयात्मनोऽविद्यातत्कार्यसंस्पर्शानुपपत्तेः सुखदुःखाद्यनुभवासिद्धौ अज्ञानादावाभासाद्युपगमेन तदविवेकादज्ञानतत्कार्यसंस्पर्शभ्रमप्रसिद्ध्या सुखदुःखाद्यनुभवसिद्धिरित्येवमात्मकयुक्तेश्चात्माभासास्तित्वं सिद्ध्यति। 'अव्यक्तात्पुरुषः परः अक्षरात्परतः परः' इत्यादिशास्त्रादसङ्गत्वादिलक्षणस्यात्मनः साक्षादाकाशादिरूपेण परिणामायोगादनाद्यनिर्वचनीयं किञ्चिदज्ञानं तदुपाधिभूतमभ्युपगन्तव्यमिति युक्तेश्चात्माभासाश्रयो निश्चीयते। एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यन्तीति श्रुतेरागमापायित्वयुक्तेश्चात्माभासासत्त्वं प्रतिभाति। 'ब्रह्म वेद'[5] इति शास्त्रात्, जडत्वादियुक्तेश्चाज्ञानादेराश्रयस्याप्यसत्त्वं निश्चितमिति चशब्दार्थः। एवमात्मा तदाभासस्तदाश्रयश्चेति त्रितयमुक्तलक्षणात्सिद्धमित्यर्थः।।४३।।

---

१. यदि राहुः वस्तुस्वरूपत्वेनाभिमतः स्यात्तदाऽवस्तुरूपाभासस्य दृष्टान्तो न स्यादित्यर्थः।

२. आत्मानात्मविवेकादविद्याकृत एवं सर्वो लोकव्यवहारः।

३. श्वेत. ६.११। ४. कठो. २.२.९। ५. मुण्ड. २.२.९।

न दृशेरविकारित्वादाभासस्याप्यवस्तुतः।
नाचितित्वादहङ्कर्तुः कस्य संसारिता भवेत्॥४४॥
अविद्यामात्र एवातः संसारोऽस्त्वविवेकतः।
कूटस्थेनात्मना नित्यमात्मवानात्मनीव सः॥४५॥
रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः।
अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा॥४६॥
आत्माभासाश्रयश्चात्मा प्रत्ययैः स्वैर्विकारवान्।
सुखी दुःखी च संसारी नित्य एवेति केचन॥४७॥
आत्माभासापरिज्ञानाद्याथात्म्येन विमोहिताः।
अहङ्कर्तारमात्मेति मन्यन्ते मे निरागमाः॥४८॥
संसारो वस्तु संस्तेषां कर्तृभोक्तृत्वलक्षणः।
आत्माभासाश्रयाज्ञानात् संसरन्त्यविवेकतः॥४९॥

संसारमोक्षसिद्ध्यर्थमात्माभासाश्रयास्त्वयोक्ताः। न चैतेषामेकस्यापि संसारमोक्षौ युक्ताविति शङ्कते—**न दृशेरिति**॥४४॥

विचार्यमाणे संसारस्य वस्तुत्वासम्भवादात्मन्यविद्यामात्रः संसारः स्यादित्युत्तरमाह—**अविद्येति**॥४५॥

त्रयाणामविवेकाद्वस्तुत्वानुपपत्तेरात्मसत्तया सतावानात्मन्येवाविद्यया संसारो भातीत्युक्तं तदेव दृष्टान्तेन स्पष्टयति—**रज्जुसर्प इति**॥४६॥

कल्पनालाघवमाश्रित्य चोदयति—**आत्मेति**। एवकारार्थे चकारः। न चागमो मूलभूतोऽस्ति तेन लाघवेऽपि स्वोत्प्रेक्षामात्रमेतद् इत्युत्तरमाह—**आत्माभासेति**॥४७॥

आत्मा। आत्मा परमार्थसत्यस्तदाभासो मिथ्येति याथात्म्येन यथावस्थित-रूपेणापरिज्ञानाद्विमोहिताः श्रुतिसम्प्रदायशून्यास्ते स्वोत्प्रेक्षया भ्राम्यन्तीत्यर्थः॥४८॥

परपक्षे मोक्षोऽपि दुर्लभः स्यादित्याह—**संसार इति**। स्वपक्षे पुनराभासाभ्युपगमे त्रयाणामविवेकद्वारेण बन्धस्तद्विवेकेन मोक्षश्चेत्याह—**आत्माभासेति**॥४९॥

चैतन्याभासता बुद्धेरात्मनस्तत्स्वरूपता।
स्याच्चेत्तं ज्ञानशब्दैश्च वेदः शास्तीति युज्यते॥५०॥

प्रकृतिप्रत्ययार्थौ यौ भिन्नावेकाश्रयौ यथा।
करोति गच्छतीत्यादौ दृष्टौ लोकप्रसिद्धितः॥५१॥

नानयोर्द्व्याश्रयत्वं च लोके इष्टं स्मृतौ तथा।
जानास्यर्थेषु को हेतुर्द्व्याश्रयत्वे निगद्यताम्॥५२॥

आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया।
उभयं चाविवेकेन जानातीत्युच्यते मृषा॥५३॥

न बुद्धेरवबोधोऽस्ति नात्मनो विद्यते क्रिया।
अतो नान्यतरस्यापि जानातीति च युज्यते॥५४॥

आत्माभासाश्रयाविवेकद्वारा बन्धस्तद्विवेकद्वारा मोक्षश्चेत्युक्तम्। इदानीमाभासाभ्युपगमे लाभान्तरमाह—**चैतन्येति**। साभासायां बुद्धौ गृहीतसम्बन्धैर्ज्ञानानन्दादिशब्दैरात्मानं वेदो लक्षणया बोधयतीत्यभ्युपगमादात्माभासो नापलापमर्हतीत्यर्थः[१]॥५०॥

तथापि जानात्यवगच्छतीत्यादिशब्दगम्यत्वमात्मनो न सिद्ध्यतीति शङ्कते—**प्रकृतीति**॥५१॥

प्रकृत्यर्थः क्रिया प्रत्ययार्थः कर्तृत्वं तयोरेकाश्रयत्वं यथा दृष्टं, तथा भिन्नाश्रयत्वमपि किं न स्यादित्याशङ्क्याह—**नानयोरिति**। जानातिर्ज्ञानमर्थो येषां जानात्यवगच्छतीत्यादीनां भिन्नाश्रयत्वे हेतुर्नास्तीत्यर्थः[२]॥५२॥

किं प्रकृतिप्रत्ययार्थयोरेकाश्रयत्वमात्रं नास्तीति चोद्यते किं वा परमार्थैकाश्रयत्वं नास्तीति। तत्र प्रथमं प्रत्याह—**आत्माभासस्त्विति**। आत्माभासो बुद्धिश्चेत्युभयं परमार्थात्माविवेकेन जानातीत्यादिशब्देन मृषैवोच्यते। तस्मादज्ञानद्वारेण प्रकृतिप्रत्ययार्थयोरेकाश्रयत्वप्रसिद्धिविरुद्धेत्यर्थः॥५३॥

द्वितीयं दूषयति—**न बुद्धेरवेति**[३]॥५४॥

---

१. बुद्धिकृताभासप्रत्ययः, निर्धर्मकस्यात्मन आभासासम्भवात्।

२. जानातेर्व्यापारस्यात्मनिष्ठत्वात् कर्तृत्वस्य चात्मनिष्ठत्वान्न भिन्नाश्रयत्वम्।

३. परमते बुद्धेरात्मगुणत्वाद् अस्मन्मते चात्मस्वरूपत्वात्।

नाऽप्यतो भावशब्देन ज्ञप्तिरित्यपि युज्यते।
न ह्यात्मा विक्रियामात्रो नित्य आत्मेति शासनात्॥५५॥

न बुद्धेर्बुद्धिवाच्यत्वं करणं न ह्यकर्तृकम्।
नापि ज्ञायत इत्येवं कर्मशब्दैर्निरुच्यते॥५६॥

न येषामेक एवात्मा निर्दुःखोऽविक्रियः सदा।
तेषां स्याच्छब्दवाच्यत्वं ज्ञेयत्वं चात्मनः सदा॥५७॥

यदाऽहङ्कर्तुरात्मत्वं तदा शब्दार्थमुख्यता।
नाशनायादिमत्वात्तु श्रुतौ तस्यात्मतेष्यते॥५८॥

हन्त तर्हि न मुख्यार्थो नापि गौणः कथञ्चन।
जानातीत्यादिशब्दस्य गतिर्वाच्या तथापि तु॥५९॥

निरूप्यमाणे जानात्यवगच्छतीत्यादिप्रयोगो यथा न घटते तथा ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्या आत्मनि ज्ञानशब्दप्रयोगोऽपि न सम्भवतीत्याह—**नाप्यत इति**। भावो नाम धात्वर्थसामान्यम्। न चात्मा तद्रूपः पारतन्त्रप्रसङ्गात्। अतो नात्मनि भावव्युत्पत्त्या ज्ञानशब्दोपपत्तिरित्यर्थः॥५५॥

करणव्युत्पत्त्या ज्ञानशब्दस्यात्मनि प्रवृत्तिं प्रत्याह—**न बुद्धेर्बुद्धीति**। बुद्धेरन्तः-करणस्य बुद्धिशब्दपर्यायज्ञानशब्दवाच्यत्वं करणव्युत्पत्त्या कथञ्चिदुपपद्यते। न त्वात्मनस्तद्युज्यते न हि करणमकर्तृकमस्ति तथा चात्मनश्चेत्करणत्वं कर्त्रन्तरमेष्टव्यमित्यनिष्टमापतेदित्यर्थः। कर्मव्युत्पत्त्या विज्ञानादिशब्दस्यात्मनि प्रयोगो न सिद्ध्यतीत्याह—**नापीति**। कर्तृकरणाभावे तदपेक्षकर्मत्वस्यापि वक्तुमशक्यत्वा-दित्यर्थः[१]॥५६॥

तवापि सर्वमेतत्तुल्यमित्याशङ्क्याह—**न येषामिति**। आत्माभासाश्रयाविवेकेन शब्दवाच्यत्वादिस्वपक्षः सिद्ध्यतीत्युक्तत्वान्न सिद्धान्ते कश्चिदपि दोषोऽ-स्तीत्यर्थः॥५७॥

आत्माभासाश्रयाविवेकमन्तरेणापि शब्दप्रवृत्तिरात्मन्यविरुद्धेति भाट्टादिमतं दर्शयति—**यदाहङ्कर्तुरिति**। अहङ्कर्तुरशनायादिमत्त्वादात्मनश्च तद्राहित्यस्य श्रुतौ सिद्धत्वात्तयोर्मिथो विलक्षणत्वान्नाहं कर्तुरात्मतेति परिहरति—**नेत्यादिना**॥५८॥

मुख्याभावे गौणोऽपि शब्दार्थो न स्यादिति शङ्कते—**हन्त तर्हि**॥५९॥

---

१. ज्ञायते यत्तज्ज्ञानमिति कर्मव्युत्पत्तिरपि न सम्भवति चैतन्यस्यावेद्यत्वात्।

शब्दानामयथार्थत्वे वेदस्याप्यप्रमाणता।
सा च नेष्टा ततो ग्राह्या गतिरस्य प्रसिद्धितः॥६०॥
प्रसिद्धिर्मूढलोकस्य यदि ग्राह्या निरात्मता।
लोकायतिकसिद्धान्तः स चानिष्टः प्रसज्यते॥६१॥
अभियुक्तप्रसिद्धिश्चेत्पूर्ववद्दुर्विवेकता।
गतिशून्यं न वेदोऽयं प्रमाणं संवदत्युत॥६२॥
आदर्शमुखसामान्यं मुखस्येष्टं हि मानवैः।
मुखस्य प्रतिबिम्बो हि मुखाकारेण दृश्यते॥६३॥
यत्र यस्यावभासस्तु तयोरेवाविवेकतः[1]।
जानातीति क्रियां सर्वो लोको वक्ति स्वभावतः॥६४॥
बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ[2] उच्यते।
तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते॥६५॥

कस्माज्जानातीत्यादिशब्दस्य वाच्यैव गतिरित्याशङ्क्यान्यथा वेदस्याप्रामाण्यप्रसङ्गादित्याह—**शब्दानामिति**[3]॥६०॥

प्रसिद्ध्यैव गतिराश्रीयते चेत्किं प्राकृतप्रसिद्ध्या किं वा पाणिन्यादिप्रसिद्ध्या साऽऽश्रयितव्या। नाद्य इत्याह—**प्रसिद्धिरिति**[4]॥६१॥

द्वितीयं दूषयति—**अभियुक्तेति**। बुद्धेरात्मनो वा दुर्विवेकं चेत् ज्ञातृत्वं तर्हि गतिशून्यमेव वेदो वदिष्यति नेत्याह—**गतीति**॥६२॥

चिदात्मन औपाधिको जानातीत्यादिशब्दप्रयोग इत्यङ्गीकृत्य सिद्धान्ती दृष्टान्तमाह—**आदर्शेति**। आदर्शे यन्मुखं तेन सामान्यमेकत्वं बहिःस्थितस्य स्वमुखस्येष्टं व्यक्त्यन्तरोपादनानुपपत्तेर्मदीयमेवेदं मुखमिति प्रत्यभिज्ञानाच्चेत्यर्थः। उक्तमेकत्वमुपपादयति—**मुखस्येति**॥६३॥

कल्पितमुखस्य परमार्थमुखस्य चान्योन्यमविवेकादितरेतरधर्माध्यारोपणान्मुखं मलिनमल्पं वक्त्रं चलतीत्यादिव्यपदेशवदात्मन्यपि सर्वमुपपन्नमिति दार्ष्टान्तिकमाह—**यत्रेति**॥६४॥

अवभासो नामाभासः प्रतिबिम्बभावः तद्द्वारेणात्मानात्मनोरन्योन्यधर्माध्यासेन जानातीत्यादिव्यपदेशो भवति इत्युक्तमेव स्पष्टयति—**बुद्धेरिति**॥६५॥

---

१. बिम्बप्रतिबिम्बयोरविवेकाद्यथा प्रतिबिम्बप्रत्ययस्तद्वदात्मानात्मनोरविवेकाज्जगद्व्यवहारः।
२. बुद्धेर्व्यापारस्यात्मन्यारोपात्तत्कर्तृत्वमात्मनः।
३. वेदप्रामाणाण्यान्यथाऽनुपपत्त्या तत्वंपदे लक्षणावृत्तिरूपेण।
४. तथा सति निरात्मवादिनां मतं स्वीकार्यं स्यात्।

स्वरूपं चात्मनो ज्ञानं नित्यं ज्योतिःश्रुतेर्यतः।
न बुद्ध्या क्रियते तस्मान्नात्मनाऽन्येन वा सदा॥६६॥
देहेऽहंप्रत्ययो यद्वज्जानातीति च लौकिकाः।
वदन्ति ज्ञानकर्तृत्वं तद्वद्बुद्धेस्तथात्मनः॥६७॥
बौद्धैस्तु प्रत्ययैरेवं क्रियमाणैश्च चिन्निभैः।
मोहिताः क्रियते ज्ञानमित्याहुस्तार्किका जनाः॥६८॥
तस्माज्ज्ञाभासबुद्धीनामविवेकात्प्रवर्तिताः।
जानातीत्यादिशब्दश्च प्रत्ययो या च तत्स्मृतिः॥६९॥
आदर्शानुविधायित्वं छायाया अस्यते मुखे।
बुद्धिधर्मानुकारित्वं ज्ञाभासस्य तथेष्यते॥७०॥

ननु ज्ञानं बुद्ध्यादिभिरात्मसम्बन्धित्वेन क्रियते कथमुच्यते चैतन्यमात्रस्वरूपं बुद्धावध्यारोप्यते इति तत्राह—**स्वरूपमिति**॥६६॥

बुद्ध्यात्मनोरन्योन्यधर्माध्यासेन व्यवहारे दृष्टान्तमाह—**देहेति**। अहम्प्रत्यया-योग्ये देहे घटादितुल्ये मनुष्योऽहमित्यहंप्रत्ययो यथा दृश्यते। यथा बुद्धेर्जडत्वेन ज्ञातृत्वायोग्येऽपि चिदाभासव्याप्त्या ज्ञातृत्वमारोप्य जानातीति लौकिका व्यवहरन्ति तथाऽऽत्मनोऽपि व्यवहाररहितस्य विकारिचित्ताविवेकाद्विकारित्वादिव्यपदेशसिद्धि-रित्यर्थः॥६७॥

ननु तार्किका ज्ञानस्योत्पत्तिविनाशौ पश्यन्तो ज्ञानं क्रियत इत्याहुः। ततो न नित्यज्ञानमात्मस्वरूपमिति तत्राह—**बौद्धैस्तु इति**॥६८॥

ज्ञाने जन्मविनाशप्रतिभासस्यौपाधिकत्वान्न स्वरूपेण क्रियमाणतेत्यर्थः। आदर्शमुखसामान्यमित्यादिना आत्मानात्मनोराभासद्वारेणाविवेकाज्जानातीत्यादि-व्यवहारमुपपाद्य प्रसक्तानुप्रसक्तं च परिहृत्य प्रकृतमनुसरति—**तस्मादिति**। यथोक्तः शब्दस्तदनन्तरभावी तदर्थप्रत्ययस्तदनुसारिणां तत्रैवार्थे स्मृतिश्चेत्येते सर्वे व्यवहारा यथोक्ताविवेककृता एवेत्यर्थः॥६९॥

ज्ञाभासबुद्धीनामविवेकमूलः सर्वो व्यवहार इत्युक्तमेव दृष्टान्तेन स्पष्टयति—**आदर्शानुविधेति**। छायेत्याभासो निर्दिश्यते। अस्यते समारोप्यत इत्यर्थः॥७०॥

बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः।
ग्राहका इव भासन्ते दहन्तीवोल्मुकादयः॥७१॥
स्वयमेवावभास्यन्ते ग्राहकाः स्वयमेव च।
इत्येवं ग्राहकास्तित्वं प्रतिषेधन्ति सौगताः॥७२॥
यद्येवं नान्यदृश्यास्ते किं तद्वारणमुच्यताम्।
भावाभावौ हि तेषां यौ नान्यग्राह्यौ सता यदि॥७३॥
अन्वयी ग्राहकस्तेषामित्येतदपि तत्समम्।
अचितित्वस्य तुल्यत्वादन्यस्मिन् ग्राहके सति॥७४॥
अध्यक्षस्य समीपे तु सिद्धिः स्यादिति चेन्मतम्।
नाध्यक्षेऽनुपकारित्वादन्यत्रापि प्रसङ्गतः॥७५॥

यस्माच्चिदाभासा बुद्धिस्तस्मात्तत्परिणामेषु ग्राहकत्वप्रतिभाससिद्धिरित्याह—**बुद्धेस्त्विति**[1]॥७१॥

बुद्धेश्चिदाभासत्वेन तत्परिणामानामपि चिदाभासत्वाद् ग्राहकत्वधीरित्युक्तमजानन्तः स्वोत्प्रेक्षामात्रमनुसरन्तो बौद्धा विरुद्धं वदन्तीत्याह—**स्वयमेवेति**॥७२॥

बुद्धौ बुद्धिवृत्तिषु चाभासस्य विद्यमानत्वात्तदविवेकनिबन्धनो भ्रमो बौद्धानामित्येवमेतत् चोद्यं परिहर्तुं शक्यं नान्यथेत्यभिप्रेत्य स्वयूथ्यं पृच्छति—**यद्येवमिति**[2]॥७३॥

नान्येन साक्षिणा दृश्यास्ते प्रत्यया भवेयुरित्येवं यदि बौद्धा वदन्ति तदा किं तेषां निवारणमुच्यतामित्युक्ते स्वयूथ्योक्तिः—**अन्वयीति**। तेषां प्रत्ययानां जन्मविनाशौ न सदा साक्षिवेद्यौ। किन्तु सोऽहमिति प्रत्यभिज्ञासिद्धः स्थायी ग्राहकोऽस्ति तावता बौद्धमतापाकरणमिति यदि मतमित्यर्थः। दूषयति—**एतदपीति**। ग्राहकरूपमपि प्रत्ययसमं जडम्। ततो न भावाभावसिद्धिरित्यर्थः॥७४॥

साक्षिण्यसति भावाभावसिद्धिर्नास्तीति चेत् तर्हि विनैवाभासं साक्षिसान्निध्यादेव भावाभावयोस्सिद्धिर्भविष्यतीति शङ्कते—**अध्यक्षस्येति**। परिहरति—**नेत्यादिना**। अहङ्कारादौ अध्यक्षचैतन्यस्यानुपकारित्वादाभासोदयाहेतुत्वादन्यत्रापि काष्ठलोष्ठादौ सन्निधानाविशेषेण सिद्धिप्रसङ्गान्न सन्निधिमात्रेण सिद्धिरित्यर्थः॥७५॥

---

१. आत्मव्यतिरिक्तस्य ज्ञानस्य प्रकाशकत्वासम्भवात्, आत्मप्रकाशिताः प्रत्यया एव बुद्धिप्रकाशान्विता अवभासन्ते।

२. बुद्धिवृत्तेराभासस्यैव ग्राहकत्वे सर्वकाले विषयावभासः स्यात्।

अर्थी दुःखी च यः श्रोता स त्वध्य[1]क्षोऽथवेतरः।
अध्यक्षस्य च दुःखित्वमर्थित्वं च न ते मतम्॥७६॥
कर्ताध्यक्षः सदस्मीति नैव सद्ग्रहमर्हति।
सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते॥७७॥
अविविच्योभयं वक्ति श्रुतिश्चेत्स्याद् ग्रहस्तथा।
अस्मदस्तु विविच्यैव त्वमेवेति वदेद्यदि॥७८॥
प्रत्ययान्वयिनिष्ठत्वमुक्तदोषः प्रसज्यते।
त्वमित्यध्यक्षनिष्ठश्चेदहमध्यक्षयोः कथम्॥७९॥

आत्माभासानभ्युपगमे बौद्धादिदोषपरिहारानुपपत्तिमुक्त्वा शास्त्रीयो बन्धमोक्षव्यवहारोऽपि निरनुग्रहाध्यक्षवादिनो न सिद्ध्यतीति वक्तुं विकल्पयति—**अर्थी**। दुःखित्वेन च मोक्षार्थित्वेन च प्रसिद्धः श्रोतैवाध्यक्षो विवक्षितः। किं वा तयोर्मिथो भेदोऽस्तीति विकल्पार्थः। प्रथमपक्षं प्रत्याह—**अध्यक्षस्येति**। आभासानङ्गीकारात्तद्द्वारेणाविद्यातत्कार्यसम्बन्धासिद्धेर्नाध्यक्षशुद्धस्य दुःखत्वादिसिद्धिरित्यर्थः॥७६॥

द्वितीयं दूषयति—**कर्ताध्यक्ष इति**। श्रोतुरध्यक्षस्य च भिन्नत्वे कर्तृभोक्तृत्वादियुक्तः श्रोता जडत्वाच्चेतनोऽध्यक्षोऽहं सद्ब्रह्मास्मीति सद्ग्रहं नैवार्हतीत्यर्थः। तत्रैव दोषान्तरमाह—**सदेवेति**॥७७॥

चिदाभासानभ्युपगमे बन्धमोक्षव्यवहारानुपपत्तिमुक्त्वा स्वपक्षे तदुपपत्तिमाह—**अविविच्येति**। आत्मानात्मरूपमुभयमाभासद्वारेणाविवेकापन्नं कृत्वा यथाप्राप्तार्थित्वाद्युपादाय श्रुतिस्तत्त्वमसीति तादात्म्यं वक्ति चेत्तथा सति सम्यगहं ब्रह्मास्मीति ग्रहः स्याच्चिदात्मनः स्वतो ब्रह्मत्वात्। अतो वाक्यीयब्रह्मात्मज्ञानादविद्यातत्कार्यनिर्वृत्तिराभासकृताविवेकाद्यभावाद् बन्धमोक्षव्यवहारसिद्धिरित्यर्थः। साङ्ख्यादिपक्षमनुभाष्य प्रतिक्षिपति—**अस्मदस्त्विति**। साक्षिणो मुञ्जादिवेषीकान्निष्कृष्य केवलमहङ्कर्तारं त्वमेव ब्रह्मेति श्रुतिद्वारेणाचार्यो यदि ब्रूयात्तदा तत्त्वमसीति श्रुतेरहङ्कारनिष्ठत्वान्मिथ्यावादित्वमुक्तो दोषः स्यादित्यर्थः॥७८॥

अहङ्कर्तृविषयो ह्युपदेशोऽध्यक्षे पर्यवस्यति त्वंशब्देनाहङ्कर्तृविषयेणाध्यक्षस्य लक्ष्यमाणत्वादिति शङ्कते—**त्वमित्यध्यक्षेति**। अहङ्काराध्यक्षयोः सम्बन्धाभावान्नाहङ्कारनिष्ठेन शब्देनाध्यक्षस्य लक्ष्यत्वमिति दूषयति—**अहमिति**। अहङ्कारस्य

---

१. साक्षी।

सम्बन्धो वाच्य एवात्र येन त्वमिति [1]लक्षयेत्॥
द्रष्टृदृश्यत्वसम्बन्धो यद्यध्यक्षेऽक्रिये कथम्॥८०॥
अविक्रियत्वेऽपि तादात्म्यमध्यक्षस्य भवेद्यदि।
आत्माध्यक्षो ममास्तीति सम्बन्धाग्रहणे न धीः॥८१॥
सम्बन्धग्रहणं शास्त्रादिति चेन्मन्यसे न हि।
पूर्वोक्ताः स्युस्त्रिधा दोषा ग्रहो वा स्यान्ममेति च॥८२॥
अदृशिर्दृशिरूपेण भाति बुद्धिर्यदा तदा।
प्रत्यया अपि तस्याः स्युस्तप्तायोविस्फुलिङ्गवत्[2]॥८३॥
आभासस्तदभावश्च दृशेः सीम्नो न चान्यथा।
लोकस्य युक्तितः स्यातां तद्ग्रहश्च तथा सति॥८४॥

दृश्यत्वमध्यक्षस्य द्रष्टृत्वमिति सम्बन्धमाशङ्क्याध्यक्षस्य कूटस्थत्वान्नैवमित्याह—**द्रष्टृदृश्यत्वेति**॥७९-८०॥

सम्बन्धान्तरं शङ्कते—**अविक्रियत्त्वेऽपि**। यत्र शुक्लः घट इति तादात्म्यं तत्र घटस्य शौक्ल्यमिति सम्बन्धग्रहणं दृष्टं तथा ममाहङ्कर्त्तुरात्माऽध्यक्षोऽस्तीति सम्बन्धाग्रहणे तादात्म्यधीर्न सम्भवतीत्याह—**आत्मेति**॥८१॥

एष आत्मान्तर्हृदयेऽणीयानित्यादिशास्त्राहङ्काराध्यक्षयोः सम्बन्धः सिद्ध्यतीति शङ्कते—**सम्बन्ध इति**। परिहरति—**नहीति**। अध्यक्षस्य सम्बन्धग्रहणं न युज्यते निर्विकारत्वात्। नाप्यहङ्कारस्य जडत्वात्। जडं प्रति श्रुतेः बोधकत्वमपि न युक्तमिति त्रिधा दोषाः स्युरित्यर्थः। सम्बन्धग्रहोऽपि ममाध्यक्षोऽस्तीति सम्बन्धग्रहः स्यात्। न त्वहमध्यक्ष एवेति ग्रहो युक्तः। सोऽपि न स्याज्जडत्वादित्याह—**ग्रहो वेति**॥८२॥

आत्मानात्मनोस्सम्बन्धासिद्धिं परमते दर्शयित्वा स्वमते मिथ्यातादात्म्यं दर्शयति—**अदृशिरिति**॥८३॥

बुद्धेः बुद्धिवृत्तीनां च चैतन्याभासवत्त्वे लौकिकवैदिकसर्वव्यवहार-सिद्धिरित्याह—**आभास इति**। भावाभावयोर्दृगवधित्वाद् दृशेः सीम्नः सकाशाल्लोकस्याभासतदभावौ नैव चिदाभासमन्तरेण युक्तितः स्याताम्। चैतन्यस्य नित्यत्वेन भावाभावायोगात्, तस्माच्चैतन्याभासाभ्युपगमे स्फुरणास्फुरणे साक्षिणः

---

१. सम्बन्धाभावे लक्षणाऽसम्भवात्।

२. अयसो दाहकत्वसामर्थ्याभावेऽपि पावकसंसर्गेणायो दहतीति व्यवहारवद् बुद्धेर्दृशित्वाभावेऽपि चैतन्याध्यासाद् दृशित्वमापद्यते।

नन्वेवं दृशिसङ्क्रान्तिरयःपिण्डेऽग्निवद्भवेत्।
मुखाभासवदित्येतदादर्शे तन्निराकृतम्॥८५॥
कृष्णायो लोहिताभासमित्येतद्दृष्टमुच्यते।
दृष्टदार्ष्टान्ततुल्यत्वं न तु सर्वात्मना क्वचित्॥८६॥
तथैव चेतनाभासं चित्तं चैतन्यवद्भवेत्।
मुखाभासो यथाऽऽदर्शे आभासश्चोदितो मृषा॥८७॥
चित्तं चेतनमित्येतच्छास्त्रयुक्तिविवर्जितम्।
देहस्यापि प्रसङ्गः स्याच्चक्षुरादेस्तथैव च[1]॥८८॥

सिद्ध्यतः नान्यथेत्यात्माभासः स्वीकर्तव्य इत्यर्थः। **किञ्च** तत्त्वमसिवाक्या-त्तस्यात्मनोऽहं ब्रह्मास्मीति ग्रहो बुद्धेश्चिदाभासत्वे सत्येव घटते तद्द्वारेणैवोपपत्तेरतोऽपि चिदाभासोऽभ्युपेय इत्याह—**तद्ग्रहश्चेति**॥८४॥

तप्तायोविस्फुलिङ्गवदित्युक्तत्वादात्मनो विकारप्राप्तिरिति शङ्कते—**नन्वेवमिति**। आदर्शे प्रतिबिम्बस्य मुखाभासस्य यथा मिथ्यात्वं तथा तच्चैतन्यं मिथ्यैव बुद्ध्यादिनिष्ठत्वेनाभातीत्येतेनैवैतच्चोद्यं निराकृतमित्याह—**मुखेति**॥८५॥

दृष्टान्तस्य सङ्क्रमणरूपत्वाद्दार्ष्टान्तिकस्यापि तथात्वं स्यादित्याशङ्क्य कस्य-चिदेवांशस्य दृष्टान्तत्वेन विवक्षितत्वाद् मैवमित्याह—**कृष्णाय इति**। दृष्टशब्देन दृष्टान्तो गृह्यते। सङ्क्रमणादिदृष्टान्तनिविष्टं दार्ष्टान्तिके कस्मान्न गृह्यते तत्राह—**दृष्टेति**॥८६॥

दृष्टान्ते विवक्षितमंशमुपन्यस्य दार्ष्टान्तिकेऽपि तथाविधमंशं दर्शयति—**तथैवेति**। कृष्णायस्यग्निव्याप्ते लौहित्यप्रत्ययवदन्तःकरणं तद्विकारजातं चाचेतनमपि चैतन्यव्याप्त्या चेतनवद्भातीत्यर्थः। किं चादर्शे मुखाभासो यथा मृषेत्युक्तं तथाऽऽत्माभासोऽपि मिथ्या पूर्वमेवोक्तः तस्मादाभासस्य मिथ्यात्वादपि न कूटस्थत्वविरोधो दृशेरित्याह—**मुखेति**॥८७॥

आत्माभासद्वारेण किमिति चित्तस्य चेतनत्वमुच्यते। स्वतस्तस्य चेतनत्वं किन्न स्यात्तत्राह—**चित्तमिति**। किञ्च दृश्यस्य चित्तस्य स्वतश्चेतनत्वे दृश्यस्यापि देहादेश्चिद्रूपत्वप्रसक्तिरित्यतिप्रसक्तिपरम्परां दर्शयति—**देहेति**॥८८॥

---

१. आत्माध्यस्तस्यैकस्य चेतनत्वस्वीकारे सर्वस्यापि दृश्यप्रपञ्चस्य चेतनत्वमापद्येत।

तदप्यस्त्विपि चेत्तन्न लोकायतिकसङ्गतेः।
न च धीर्दृशिरस्मीति यद्याभासो न चेतसि॥८९॥
सदस्मीति धियोऽभावे व्यर्थं स्यात्तत्त्वमस्यपि[१]।
युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः॥९०॥
ममेदंप्रत्ययौ ज्ञेयौ युष्मद्येव न संशयः।
अहमित्यस्मदीष्टः स्यादयमस्मीति चोभयोः॥९१॥
अन्योन्यापेक्षया तेषां प्रधानगुणतेष्यते।
विशेषणविशेष्यत्वं तथा ग्राह्यं हि युक्तितः॥९२॥
ममेदं द्वयमप्येतन्मध्यमस्य विशेषणम्।
धनी गोमान् यथा तद्वद्देहोऽहङ्कर्तुरेव च॥९३॥

इष्टापत्तिमाशङ्क्य परिहरति—**तदप्यस्त्विति चेदिति**। तत्र, लोकायतिकसङ्गतेः। इतश्चाचेतनस्यैव चित्तस्य चेतनाभासवत्त्वमास्थेयम्। अन्यथा द्वाराभावादहं ब्रह्मास्मीति आगन्तुकधीर्न सिद्ध्येदित्याह—**न चेति**॥८९॥

ब्रह्मास्मीति धियोऽभावे वा का क्षतिस्तत्राह—**सदस्मीति**। सार्थकं चेदिदं वाक्यं किमिति तर्हि सर्वो झटिति ब्रह्मास्मीति न प्रतिपद्यते तत्राह—**युष्मदिति**॥९०॥

तमेव युष्मदस्मद्विवेकं दर्शयितुमात्मानात्मविषयाणां प्रत्ययानां विषयानुक्त्वा तद्विषयाणां गुणप्रधानभावं विशेष्यविशेषणभावं दर्शयति—**ममेदमिति**। केवलात्मन्यहंप्रत्ययः। उभयोरात्मानात्मनोर्गुणप्रधानभावेन स्थितयोरयमस्मीति प्रत्ययः॥९१॥

इदानीमात्मानात्मविषयाणां गुणप्रधानभावमाह—**अन्योन्यापेक्षयेति**। चैतन्यस्याप्यन्तःकरणव्यञ्जकापेक्षत्वादन्तःकरणस्य जडत्वेन साधकापेक्षत्वात्त्रयाणां ज्ञात्वा करोमि कृत्वा भवामीत्यादिषु गुणप्रधानभावः स्यादित्यर्थः। तत्र गुणो विशेषणं प्रधानं विशेष्यः स्यादित्याह—**विशेषणेति**॥९२॥

ममेदमित्यादिना विशेषणविशेष्यत्वं युक्तिग्राह्यमित्युक्तमेव व्यक्तोकरोति—**ममेदं द्वयमिति**। मध्यमस्यात्मनो देहान्तस्यावच्छेदकं ममेदमिति द्वयमपि इत्यत्र दृष्टान्तमाह—**धनीति**। यथा धनादि देहाद्यभिमानवतः कर्तुरिव विशेषणम्। तथा देहः स्थूलो अहङ्कर्तुर्विशेषणमित्याह—**तद्वदिति**॥९३॥

---

१. अहं ब्रह्मास्मीति तत्त्वसाक्षात्कारयोजनीभूतत्त्वात्तत्त्वमसीति महावाक्यस्य।

बुद्ध्यारूढं सदा सर्वं साहङ्कर्त्रा च साक्षिणः।
तस्मात्सर्वावभासो ज्ञः किञ्चिदप्यस्पृशन् सदा[१]॥९४॥
प्रतिलोममिदं सर्वं यथोक्तं लोकबुद्धितः।
अविवेकधियामस्ति नास्ति सर्वं विवेकिनाम्॥९५॥
अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च।
स्यादेतदहमित्यत्र युक्तिरेवावधारणे॥९६॥
नाद्राक्षमहमित्यस्मिन् सुषुप्तेऽन्यन्मनागपि।
न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति॥९७॥

अहङ्कर्तृसहितं सर्वमेव बाह्यं वस्तु तत्राध्यारोपितं सर्वदा साक्षिणो विशेषणम्। साक्षित्वस्य बुद्ध्यादिसाक्ष्यार्थप्रयुक्तत्वादित्याह—**बुद्ध्यारूढमिति**। यस्मादहङ्कर्त्रा सह सर्वस्य साक्ष्यस्य तादात्म्यात् स्वाभासद्वारेण सर्वमवभासयतीति सर्वावभासकश्चित्स्वभावो वस्तुतो न किञ्चिदपि साक्ष्यं संस्पृशन् वर्तते तस्य सर्वदैवासङ्गस्वभावत्वादित्याह—**तस्मादिति**॥९४॥

एष विवेकिनां मार्गो विपरीतस्त्वविवेकिनां क्षेत्रादावप्यात्मनो विशेषणत्वप्रत्ययादित्याह—**प्रतिलोममिति**। लोको बाह्यार्थोपहतचेताः। तस्य बुद्धिर्बाह्यार्थप्रधानैव तेन बाह्यार्थं प्रधानीकृत्य तद्विशेषणत्वेन प्रत्यगर्थं लोको विनियुङ्क्ते। ततो विपरीतमेतद्विशेषणविशेष्यत्वादि सर्वमविवेकधियामविविक्तानात्मस्वरूपाणामस्ति। विवेकिनामवगतात्मस्वरूपाणां पुनर्नेदं सर्वं विद्यते। स्वप्नावस्थायामिव सर्वस्यात्माविद्याविलसितत्वादित्यर्थः[२]॥९५॥

नन्वेवमन्वयव्यतिरेकाभ्यां सर्वसंसारधर्मविनिर्मुक्तात्मावगमात् किं वाक्येनेत्याशङ्क्याह—**अन्वयेति**। आत्मपदार्थो द्रष्टा साक्षी न दृश्यः। साक्ष्यं च साहङ्कारं सर्वं जगदात्मपदार्थस्यैव शेषभूतं न कश्चिदपि जडोऽर्थः शेषी सम्भवति। आत्मेत्यादिपदमपि यथोक्तार्थस्यैव समर्थकं न कदाचिदपि दृश्यार्थमधिकरोति इत्येवं पदपदार्थयोरन्वयव्यतिरेकौ युक्तिरेव स्यात्। अहमित्यत्र विवेकावधारणेन वाक्यार्थे अन्वयव्यतिरेकव्यापारः। तस्मादेतदेव वाक्यं वाक्यार्थावधारणे प्रभवतीत्यर्थः॥९६॥

किञ्चावस्थात्रयं परस्परव्यभिचारि चैतन्यं तु सुषुप्तेऽपि न व्यभिचरतीति प्रकारान्तरेणात्मानात्मविवेकं दर्शयति—**नाद्राक्षमिति**। प्रतीयत इति व्युत्पत्त्या प्रत्ययशब्देन प्रमातृप्रमाणप्रमेयलक्षणः सर्वो विशेषो गृह्यते॥९७॥

---

१. सर्वस्यापि प्रपञ्चस्य साक्षिण्यध्यस्तत्वेऽपि न साक्षिप्रपञ्चयोः संश्लेषः।
२. अविद्याध्यासेन विशेषणविशेष्यभावप्रत्ययस्तत्र सम्भवति तत्त्वविदाम्।

स्वयंज्योतिर्न हि द्रष्टुरित्येवं संविदोऽस्तिताम्।
कौटस्थ्यं च तथा तस्याः प्रत्ययस्य तु लुप्तताम्।
स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक्॥९८॥
एवं विज्ञातवाक्यार्थे श्रुतिलोकप्रसिद्धितः।
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये॥९९॥
ब्रह्मा दाशरथेर्यद्वदुक्त्यैवापानुदत्तमः।
तस्य विष्णुत्वसम्बोधे न यत्नान्तरमूचिवान्॥१००॥
अहंशब्दस्य निष्ठा या ज्योतिषि प्रत्यगात्मनि।
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता॥१०१॥
श्रुतमात्रेण चेन्न स्यात्कार्यं तत्र भवेद् ध्रुवम्।
व्यवहारात्पुरापीष्टः सद्भावः स्वयमात्मनः[१]॥१०२॥

अन्वयव्यतिरेकव्यापारनिष्ठा या प्रदर्शिता सा शास्त्रसम्मता न स्वबुद्धिपरिकल्पितेत्याह—**स्वयंज्योतिरिति**। अयं श्लोकः षट्पदी। प्रत्ययो घटादिर्विषयः अवगतिरात्मस्वरूपभूता दृष्टिः ते पृथक्कूटस्थतयाऽनित्यतया चाब्रवीदित्यर्थः॥९८॥

युष्मदस्मद्विवेकमुपपाद्यावगतपदपदार्थे पुरुषे महावाक्यं फलवद्भवतीत्याह—**एवमिति**। अवान्तरवाक्यार्थो वाक्यार्थशब्देनोच्यते॥९९॥

वाक्यश्रवणमात्राद् मोहापोहे दृष्टान्तमाह—**ब्रह्मेति**। दृष्टान्ते त्वं विष्णुरसीत्युक्तमात्रादेव मोहनिवृत्तिरित्यत्र हेतुमाह—**तस्येति**॥१००॥

तत्त्वमसीति बोधितोऽपि मुमुक्षुरहं ब्रह्मेति न प्रतिपद्यते। कर्ताहमित्यादिप्रत्यक्षविरोधादित्याशङ्क्य कर्तृभोक्तृसाक्षिणोऽहमादिशब्दलक्षितस्य ब्रह्मत्वोपदेशाद् मैवमित्याह—**अहंशब्दस्येति**। तत्रेति सप्तम्या वाक्यार्थज्ञानमुच्यते॥१०१॥

यदि पुनरवगतपदपदार्थस्य वाक्यादहं ब्रह्मास्मीति ज्ञानं समूलसंसारनिवर्त्तकं नेष्यते तदा प्रामाण्यसिद्ध्यर्थमेवावश्यं कार्यपरत्वं कल्पनीयम्। न च तद्युक्तं विद्वदनुभवविरोधादित्याह—**श्रुतमात्रेणेति**। श्रुतमात्रे फलं न भवति चेत्तदाऽपरमनुष्ठानं कल्प्यम्। इह तु फलं दृश्यत एवेति भावः। किञ्च सिद्धेऽर्थे शास्त्रस्याप्रामाण्यं किं विपर्यासलक्षणं किं वा निष्फलत्वं उत संशयरूपं अनुत्पत्त्यात्मकं वा नाद्य इत्याह—**व्यवहारादिति**। शास्त्रीयव्यवहारात्पूर्वमप्यात्मसद्भावस्येष्टत्वान्न शुक्तिरूप्यज्ञानवत् ब्रह्मात्मज्ञानस्याप्रामाण्यमित्यर्थः॥१०२॥

---

१. अविद्याजन्यव्यहारात् पूर्वमपि चैतन्यस्य सत्स्वरूपत्वं सिद्धमेव।

अशनायादिनिर्मुक्त्यै तत्काला जायते प्रमा।
तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्वसंशयः॥१०३॥
प्रतिबन्धविहीनत्वात्स्वयं चानुभवात्मनः।
जायेतैव प्रमा तत्र स्वात्मन्येव न संशयः॥१०४॥
किं सदेवाहमस्तीति किं वाऽन्यत्प्रतिपद्यते।
सदेव चेदहंशब्दः सता मुख्यार्थ इष्यताम्॥१०५॥
अन्यच्चेत् सदहंग्राहप्रतिपत्तिर्मृषैव सा।
तस्मान्मुख्यग्रहे नास्ति वारणाऽवगतेरिह॥१०६॥

द्वितीयं प्रत्याह—**अशनायादीति**। वाक्यश्रवणसमकाले चाशनायादिनिवृत्त्यर्थं विदुषां प्रमोपजायते तेन वाक्यीयज्ञानस्य नास्ति नैष्फल्यमित्यर्थः[१]। तृतीयं दूषयन्ति—**तत्त्वमसीति**। तत्र हि प्रमा जायमाना कदाचिदपि संशयवती न भवतीत्यर्थः॥१०३॥

हुंफडादिशब्दवदनुत्पत्तिलक्षणमप्रामाण्यमिह नास्ति पदार्थज्ञानस्य प्रतिबन्धाभावादिति चतुर्थं शिथिलयति—**प्रतिबन्धेति**। कृतान्वयव्यतिरेकस्यासम्भावनादिप्रतिबन्धाभावाद्विषयस्य चानुभवात्मत्वेनानुभवितुं योग्यत्वात्तत्र ब्रह्मास्मीत्येव प्रमा जायेतैवेत्यर्थः॥१०४॥

प्रमाणस्वरूपनिरूपणेनाहं ब्रह्मास्मीति ज्ञानमुक्त्वा प्रतिपत्तृस्वरूपनिरूपणेनापि वाक्यादपरोक्षात्मज्ञानमेव युक्तमिति वक्तुं विकल्पयति—**किं सदेवेति**। तत्राद्ये विकल्पे परस्यानिष्ठापत्तिमाह—**सदेवेति**। सदस्मीति किं सदेव प्रतिपद्यते उतान्यः? आद्ये प्रतिपत्तुरेव विषयत्वात्सदस्मीत्यपरोक्षप्रमा युक्ता अहंशब्दस्य सद्रूपेण ब्रह्मणा मुख्यार्थत्वादित्यर्थः॥१०५॥

द्वितीयं प्रत्याह—**अन्यच्चेदिति**। प्रमाणस्वरूपस्य प्रमातृस्वरूपस्य च निरूपणेन वाक्यादहंब्रह्मास्मीत्यपरोक्षा प्रतिपत्तिरेव युक्तेत्युपसंहरति—**तस्मादिति**। अन्यस्य सदस्मीति ग्रहणस्य मृषार्थत्वप्रसङ्गात् सत एव सदस्मीति प्रतिपत्तिः स्वीकार्या तस्मात् सदस्मीत्यवगतेः प्रतिबन्धकं न किञ्चिदस्तीत्यर्थः। तत्त्वमसिवाक्यमिहेत्युच्यते[२]॥१०६॥

---

१. तत्त्वमसिवाक्यश्रवणसमकालमेव वासनानिवृत्तिरूपफलसिद्धे कथं तन्निष्फलत्वम्।

१. सच्छब्देन ब्रह्मैवोच्यते, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्या यत्तत्त्वं प्रतिपादितं तदेव तत्त्वमसिश्रुत्याऽखण्डार्थत्वेन कथ्यते। तदेवाहं ब्रह्मास्मि, इत्यस्यानुभूतिविषयः।

प्रत्ययी प्रत्ययश्चैव यदाभासौ तदर्थता।
तयोरचितिमत्त्वाच्च चैतन्ये कल्प्यते फलम्॥१०७॥

कूटस्थेऽपि फलं योग्यं राजनीव जयादिकम्।
तदन्तात्मत्वहेतुभ्यां क्रियायाः प्रत्ययस्य च॥१०८॥

आदर्शस्तु यदाभासो मुखाकारः स एव सः।
यथैवं प्रत्ययादर्शो यदाभासस्तदा ह्यहम्॥१०९॥

इत्येवं प्रतिपत्तिः स्यात्सदस्मीति च नान्यथा।
तत्त्वमित्युपदेशोऽपि द्वाराभावादनर्थकः॥११०॥

कूटस्थत्वादात्मनो मातृत्वानुपपत्तौ फलसम्बन्धो न सिद्ध्यतीत्यस्त्यात्मग्रहे निवारकमित्याशङ्क्याह—**प्रत्ययीति**। अन्तःकरणतत्परिणामौ यदाभासाधारौ तयोरात्मशेषत्वात् जडत्वाच्च फलाश्रयत्वानुपपत्तेस्तद्द्वाराऽस्य फलस्य कल्पनायाऽऽत्मसम्बन्धः स्यादित्यर्थः॥१०७॥

निर्व्यापारस्यापि फलसम्बन्धे दृष्टान्तमाह—**कूटस्थेति**। राजामात्ययोश्च स्वस्वामिसम्बन्धोऽस्ति नाध्यक्षाध्यक्ष्ययोरिति वैषम्यमाशङ्क्याह—**तदन्तेति**। स एव कूटस्थात्मा अन्तो निष्ठा अवसानमात्मरूपं च ययोः क्रियाप्रत्यययोस्तौ तदन्तात्मानौ तयोर्भावस्तात्त्वम्। तदन्तत्वतदात्मत्वे एव हेतू ताभ्यां तदन्तात्मत्वहेतुभ्यां तत्फलमात्मन्येवोपचरितम्। राजनीव योधानां जयादिकमित्यर्थः। परिशुद्धस्य प्रमातृत्वं नास्तीत्यभिप्रेत्येदमुक्तम्॥१०८॥

इदानीं चित्प्रतिबिम्बस्य तु भवत्येव स्वोपाधिव्यापारेण प्रमातृत्वमित्याह—**आदर्शस्त्विति**। येन मुखाकारेण विशिष्टतया भासत इति यदाभासोऽयमादर्शः स च मुखाकारस्तत्र दृश्यमानः स एव ग्रीवादेशस्थो मुखाकार एवेति बिम्बप्रतिबिम्बयोरैक्यं यथा लोके प्रसिद्धम्, एवं प्रत्ययादर्शोऽहङ्कारो येन चित्प्रतिबिम्बेन भास्यत इति यदाभासः स चित्प्रतिबिम्बः स एव बिम्बकल्पः परमात्मैव। तदा हि बिम्बप्रतिबिम्बयोरेकत्वे सत्यहं ब्रह्मास्मीति ज्ञानं सिद्ध्यतीत्यर्थः। यस्मादन्तःकरणस्थाभासस्य परमार्थात्मनश्च प्रागुक्तरीत्या सम्बन्धोऽस्ति तस्मादहं ब्रह्मात्मीत्येवमधिकृतस्य प्रतिपत्तिः स्यात्॥१०९॥

उक्तसम्बन्धानङ्गीकारे तु नैव प्रतिपत्तिर्युक्ता तस्मादुक्तसम्बन्धोऽवश्यम्भावीत्याह—**इत्येवमिति**। उक्तसम्बन्धानभ्युपगमे दोषान्तरमाह—**तत्त्वमिति**॥११०॥

श्रोतुः स्यादुपदेशश्चेदर्थवत्त्वं तथा भवेत्।
अध्यक्षस्य न चेदिष्टं श्रोतृत्वं कस्य तद्भवेत्॥१११॥
अध्यक्षस्य समीपे स्याद् बुद्धेरेवेति चेन्मतम्।
न तत्कृतोपकारोऽस्ति काष्ठाद्यद्वन्न कल्प्यते॥११२॥
बुद्धौ चेत्तत्कृतः कश्चिन्नन्वेवं परिणामिता।
आभासेऽपि च को दोषः सति श्रुत्याद्यनुग्रहे॥११३॥
आभासे परिणामश्चेन्न रज्ज्वादिनिभत्ववत्।
सर्पादेश्च तथाऽवोचमादर्शे च मुखत्ववत्॥११४॥

उपदेशस्यानर्थकत्वं स्पष्टयति—**श्रोतुः**। आभासद्वारकस्य श्रोतुः सत्त्वे स्यादुपदेशस्यार्थवत्वमाभासानङ्गीकारात्तदभावे तदानर्थक्यमित्यर्थः। किञ्च श्रोतृत्वमध्यक्षस्यान्यस्य वा विवक्षितम्। प्रथमे प्रागुक्तन्यायेनोपदेशस्य यक्तमर्थवत्त्वम्। द्वितीये त्वध्यक्षव्यतिरिक्तस्य जडत्वान्न श्रोतृत्वोपपत्तिरित्युक्त-दोषतादवस्थ्यमित्याह—**अध्यक्षस्येति**॥१११॥

अध्यक्षाध्यक्ष्ययोः श्रोतृत्वाभावेऽपि परमात्मसमीपे वर्त्तमानाया बुद्धेरेव श्रोतृत्वं स्यादिति शङ्कते—**अध्यक्षस्य समीप इति**। यथा काष्ठादेर्जडत्वाद् बुद्धेरुपकारो नास्ति तथा सन्निहितेनाध्यक्षेण कृतोपकारतया बुद्धेरुपकारो नाङ्गीक्रियते। तथा च सामीप्यमात्रेण बुद्धेः श्रोतृत्वं कल्पयितुमशक्यमित्याह—**न तदिति**॥११२॥

बुद्धावध्यक्षकृतः सन्नुपकारो मया नाभ्युपगम्यते तदभ्युपगमे सत्यध्यक्षस्य परिणामित्वप्रसङ्गादिति शङ्कते—**बुद्धौ चेदिति**। श्रुतिस्मृतिन्यायानुगृहीते चिदाभासे बिम्बगते स्वीकृते बुद्धिजनकत्वमात्रेण नाध्यक्षस्य परिणामित्वप्रसक्तिरित्याह—**आभासेऽपीति**॥११३॥

उक्तमेव दृष्टान्तेन स्पष्टयति—**आभासे परिणाम इति**। यथा रज्ज्वज्ञानविजृम्भितस्य सर्पादे रज्जुनिभत्वं मिथ्या तथाऽऽत्माज्ञानविजृम्भितस्य बुद्ध्यादेर्मिथ्यैव[1] चिन्निभत्वम्। तस्मादाभासजनकत्वानुरोधेन परिणामित्वमात्मनो नैव शङ्कितव्यमित्यर्थः। किञ्चादर्शे मुखस्यावस्थितत्वं मिथ्या न परिणाम इत्युक्तं यथा तथा बुद्धावात्मनोऽवस्थित्वं मिथ्येत्युक्तत्वान्न परिणामित्वप्रसक्तिरित्युक्तं स्मारयति—**तथेति**[2]॥११४॥

---

१. वृत्तिरूपज्ञानस्य। २. दर्पणे यथा मुखस्य स्थितिर्मिथ्या तथैव बुद्धौ ब्रह्मप्रतिबिम्बोऽपि मिथ्यैव।

नाऽऽत्माभासत्वसिद्धिश्चेदात्मनो ग्रहणात्पृथक्।
मुखादेश्च पृथक्सिद्धिरिह त्वन्योन्यसंश्रयः॥११५॥

अध्यक्षस्य पृथक्सिद्धावाभासस्य तदीयता।
आभासस्य तदीयत्वे ह्यध्यक्षव्यतिरिक्तता॥११६॥

नैवं स्वप्ने पृथक्सिद्धेः प्रत्ययस्य दृशेस्तथा।
रथादेस्तत्र शून्यत्वात्प्रत्ययस्याऽऽत्मना[1] ग्रहः॥११७॥

अवगत्या हि संव्याप्तः प्रत्ययो विषयाकृतिः[2]।
जायते स यदाकारः स बाह्यो विषयो मतः॥११८॥

बुद्धेरेवात्मत्वं गृहीत्वा तस्याश्चिन्निभत्वमाक्षिपति—**नात्माभासत्वेति**। बुद्धेरात्माभासत्वं न सिद्ध्यति। आत्मनो बुद्धेः सकाशात्पृथग्ग्रहणाभावादित्ययुक्तम्। आदर्शमुखतदाभासवद् बुद्ध्यात्मतदाभासानां पृथक्प्रथनसम्भवादित्याशङ्क्याह—**मुखादेस्त्विति**॥११५॥

अन्योन्याश्रयत्वमेव विशयदति—**अध्यक्षस्य पृथक्सिद्धौ**। अध्यक्षस्य भेदप्रतीतौ चिदाभासस्य तदीयत्वसिद्धौ चाध्यक्षस्य ततो भेदसिद्धिरिति तस्मान्नाभाससिद्धिरित्यर्थः॥११६॥

स्वप्नावस्थायां प्रत्ययस्यान्तःकरणस्य दृशेश्च साक्षिणः साक्षिसाक्ष्यभावेन भेदस्य प्रतिपन्नत्वान्नास्ति परस्पराश्रयतेत्युत्तरमाह—**नैवमिति**। स्वप्ने प्रत्ययस्यैव ग्राह्यत्वमुपपादयति—**रथादेरिति**। तत्र विषयान्तराभावादन्तःकरणस्यैव वासनात्मकस्यात्माधीनत्वेन ग्रहणमित्यर्थः॥११७॥

आत्मनोऽन्तःकरणसाक्षिणो ग्राह्यव्यतिरेकार्थं ग्राह्यस्वरूपमाह—**अवगत्येति**। चिदाभासस्य व्याख्यानान्तरे तु साभासान्तःकरणाच्चिदात्मनः स्वप्ने भेदः प्रतीयते। रथादेर्वासनारञ्जितबुद्ध्याकारत्वात् स्वरूपेणासम्भवात्। बुद्ध्याकारतया आत्मावभास्यत्वात्। आत्मनश्च स्वमहिम्ना पृथगेव सिद्धेः। सुषुप्तौ च बुद्धिगतचिदाभासोपरमेऽप्यात्मनः सत्त्वात्ततो भेदसिद्धेरित्यर्थः। व्याप्तश्चित्तपरिणामो यस्य घटादेराकारवान् जायते स बाह्यो विषयः। साक्षिण्यतिरिक्तो विषयो दर्शितः॥११८॥

---

१. अन्तःकरणरूपेण।

२. अन्तःकरणस्य विषयाकारेण परिणामे सति बाह्यविषयस्य प्रत्ययः।

कर्मेप्सिततमत्वात्स तद्वान् कार्ये नियुज्यते।
आकारो यत्र चार्प्येत करणं तदिहोच्यते॥११९॥
यदाभासेन संव्याप्तः स ज्ञातेति निगद्यते।
त्रयमेतद्विविच्याऽत्र यो जानाति स आत्मवित्[1]॥१२०॥
सम्यक् संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः।
एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः॥१२१॥
आधिभेदाद्यथा भेदो मणेरवगतेस्तथा[2]।
अशुद्धिः परिणामश्च सर्वं प्रत्ययसंश्रयात्॥१२२॥
प्रथनं ग्रहणं सिद्धिः प्रत्ययानामिहाऽन्यतः।
आपरोक्ष्यात्तदेवोक्तमनुमानं प्रदीपवत्॥१२३॥

सम्प्रति कर्म करणं कर्तेति त्रितयं साक्षिव्यतिरेकार्थं दर्शयति—**कर्म्मेप्सित**। स बाह्यो विषयः कर्मेत्युच्यते प्रमाणक्रियया व्याप्तुमिष्टतमत्वात् तद्वान् बाह्यविषयेच्छावान् कुर्विति चोदनया प्रेर्यते स कर्ता। यत्र बुद्धिविपरिणामे विषयेणाकारस्समर्पितस्तत्करणं विषयव्यक्तेरित्यर्थः। घटादिव्यक्तिः सप्तम्यर्थः॥११९॥

यस्य चैतन्यस्याभासेन संव्याप्तोऽहङ्कारः परिणमते सा चिद्धातुर्ज्ञातेत्याह—**यदाभासेन**। कर्त्रादित्रयं भोक्त्रादित्रयं ज्ञात्रादित्रयं श्रेयोमार्गे स्थितत्वात् साक्षिणो विविच्य यो बुध्यते सः लक्ष्यत्वं पदार्थं यथावदवगच्छतीत्याह—**त्रयमिति**॥१२०॥

यथा प्रमात्रादिभ्यो वैविक्त्यं नित्यावगतिस्वभावस्यात्मनो दर्शितं तथा प्रत्ययभेदेभ्योऽपि वैविक्त्यं प्रत्येतव्यमित्याह—**सम्यक् संशयेति**। अवगतावपि सम्यगवगतिः संशयावगतिर्मिथ्यावगतिरिति भेदोऽस्तीत्याशङ्क्य प्रत्ययैरेवोपाधिभूतैस्तत्र भेदोऽर्पितो न स्वतो यतस्तस्मादेकैवावगतिरित्याह—**भेदस्त्विति**॥१२१॥

एतमर्थं दृष्टान्तेन स्पष्टयति—**आधिभेदात्**। आत्मनि रागादिमत्त्वं कर्तृत्वादिमत्त्वञ्च सर्वमपि भेदवदन्तःकरणोपाधिकृतं न वास्तवमित्याह—**अशुद्धिरिति**॥१२२॥

ग्राहकादिव्यतिरिक्तात्मसिद्धौ किं प्रमाणमुक्तमित्याशङ्क्याह—**प्रथनमिति**। इह व्यवहारभूमौ प्रत्ययानां बुद्धितद्वृत्तीनां प्रथनं प्रकाशनं ग्रहणं गृहीतिरुपादानं सिद्धिः

---

१. तत्त्वमसिमहावाक्यस्य लक्ष्यार्थं तत्त्वतो वेत्तीत्यर्थः।

२. अन्तःकरणस्य कर्तृत्वादिधर्माः स्फटिके पुष्पगतलौहित्यादिवदात्मन्यध्यस्यन्ते।

किमन्यद्ग्राहयेत् कश्चित् प्रमाणेन तु केनचित्।
विनैव तु प्रमाणेन निवृत्त्याऽन्यस्य शेषतः॥१२४॥

शब्देनैव[1] प्रमाणेन निवृत्तिश्चेदिहोच्यते।
अध्यक्षस्याप्रसिद्धत्वाच्छून्यतैव प्रसज्यते॥१२५॥

चेतनस्त्वं कथं देह इति चेन्नाप्रसिद्धितः।
चेतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः॥१२६॥

अध्यक्षः स्वयमस्त्येव चेतनस्याऽपरोक्षतः।
तुल्य एवं प्रबोधः स्यादन्यस्याऽसत्त्ववादिनाः॥१२७॥

सत्त्वाभ्युपगमश्चान्यतो भवितुमर्हति। अपरोक्षत्वात्प्रत्ययानां स्वतस्तदयोगात्तदनेनानुमानमेवोक्तं भवति। तत्र दृष्टान्तमाचष्टे—**प्रदीपवदिति**। साश्रयाः प्रत्ययाः स्वातिरिक्ताधीनसिद्धिकाः अचिद्रूपत्वात्। ये त्वचिद्रूपास्ते स्वातिरिक्ताधीनसिद्धिकाः यथा प्रदीपाधीनसिद्धिका घटादय इत्यर्थः॥१२३॥

ये तु प्रतिषेधमुखेनैवात्मनि प्रमाणप्रवृत्तिं मन्यन्ते तान् प्रति विधिमुखेनापि प्रमाणप्रवृत्तिं प्रतिपादयितुं विकल्पयति—**किमन्यदिति**। कथं प्रमाणेन विना प्रतिपादनं तत्राह—**निवृत्त्येति**। आत्मन्यारोपितस्यानात्मनो निरासद्वारेणाध्यक्षस्यावशिष्टत्वात्तस्य मानेन बिना प्रतिपत्तिरित्यर्थः॥१२४॥

प्रथमे कल्पे प्रमाणप्रवृत्तिर्विधिमुखेनैवेष्टेत्यङ्गीकृत्य द्वितीयमनुवदति—**शब्देनैव**। आत्मन्यध्यस्तस्य शब्देन निवृत्तिरेवोच्यते। स त्वात्मा मानेन विना सिद्ध्यति चेदित्यर्थः। अस्मिन् पक्षे ब्रह्मात्मनो मानान्तरेणाप्रसिद्धेः शब्दस्य च तत्राऽव्यापारादात्मनः शून्यतैव प्राप्नोति इति दूषयति—**अध्यक्षस्येति**॥१२५॥

चेतनाचेतनयोर्विरुद्धरूपत्वकथनेनान्यनिवृतिः शब्देन क्रियते। तत्कुतः शून्यताप्रसक्तिरिति शङ्कते—**चेतनस्त्वमिति**। देहादिव्यतिरिक्तस्य चेतनस्याप्रसिद्धत्वान्नैवमिति प्रत्याचष्टे—**नेत्यादिना**। सिद्धे हि धर्मिणि प्रतियोगिनि वा अयमयं न भवतीति तादात्म्यनिषेधेन विरुद्धरूपत्वोपदेशः स्यात्। न चाद्यापि चेतनपदार्थोऽज्ञस्य पृथक्सिद्धोऽस्तीत्यर्थः॥१२६॥

स्वतः प्रसिद्धत्वादात्मा नात्यन्तमप्रसिद्धः स्यादिति शङ्कते—**अध्यक्षः स्वयमिति**। यथा शून्यवादिनः स्वतः सिद्धोऽस्त्यात्मेति न प्रमाणमन्तरेण प्रबोधो जायते तथाऽज्ञस्यापीत्युत्तरमाह—**तुल्य एवेति**॥१२७॥

---

१. वचनमात्रेण न तु युक्त्या।

अहमज्ञासिषं चेदमिति लोकस्मृतेरिह।
करणं कर्म कर्ता च सिद्धास्त्वेकक्षणे किल॥१२८॥
प्रामाण्येऽपि स्मृतेः शैघ्र्याद्यौगपद्यं विभाव्यते।
क्रमेण ग्रहणं पूर्वं स्मृतेः पश्चात्तथैव च॥१२९॥
अज्ञासिषमिदं मां चेत्यपेक्षा जायते ध्रुवम्।
विशेषोऽपेक्ष्यते यत्र तत्र नैवैककालता॥१३०॥
आत्मनो ग्रहणे चाऽपि त्रयाणामिह सम्भवात्।
आत्मन्यासक्तकर्तृत्वं न स्यात्करणकर्मणोः॥१३१॥

स्मृतिबलेन स्वतः सिद्धाध्यक्षसिद्धिरिति शङ्कते—**अहमज्ञासिषमिति**। व्यवहारभूमौ लोकप्रसिद्धकर्त्रादिविषयस्मृत्यनुरोधादेकस्मिन् क्षणे कर्त्रादयः सिध्यन्ति। न हि तेषां स्मृतिरनुभवादृते युज्यते। अनुभूते स्मृतिनियमादतो यतस्त्रयोऽपि युगपदनुभूयन्ते सोऽध्यक्षः स्वतः सिद्धोऽस्तीत्यर्थः॥१२८॥

एतन्निराकरोति—**प्रामाण्येऽपि**। पूर्वानुभवगमकत्वांशेन स्मृतेर्यद्यपि प्रामाण्यं तथापि न युगपत् त्रितयसिद्धिगमकत्वं यस्मात्क्रमेणैव पूर्वग्रहणं वृत्तं स्मृतिरपि पश्चात्तथैव भवति यौगपद्यं तु शतपत्रशतव्यतिभेदनवत् शैघ्र्यात्प्रतिभातीत्यपि सम्भावितत्वादित्यर्थः॥१२९॥

स्मृतेर्यौगपद्याभावे हेत्वन्तरमाह—**अज्ञासिषमिदमिति**। केनचिदज्ञासिषं इत्युक्ते विषये वा मातरि वा तव ज्ञानमिति श्रोतुर्विशेषापेक्षा निश्चयेन दृश्यते, यत्र च विशेषोऽपेक्ष्यते तस्मिन् विषये नैवैककालता युक्ता स्मृतेः। कर्तृकरणकर्मणां अनुभवस्य यौगपद्ये त्रितयविषयस्मृतेरपि यौगपद्यात्त्रयाणामव्यभिचाराद्विशेषापेक्षाभावादतस्तदपेक्षादर्शनान्न यौगपद्यं त्रितयानुभवस्य तदीयस्मृतेश्चेत्यर्थः॥१३०॥

कर्त्रादीनां युगपदनुभवसाधनाभावादपि युगपन्नास्ति सिद्धिरित्याह—**आत्मनो ग्रहणे**। ग्राहकादीनां एकैकस्य स्वरूपग्रहणे अन्येषां त्रयाणां च कर्तृकरणकर्मणामपेक्षासम्भवादनवस्था स्यादित्यर्थः। तैरेव कर्त्रादिभिरन्योन्यस्वरूपसिद्धेर्नानवस्था स्यादित्याशङ्क्याह—**आत्मनीति**। स्वरूपसिद्धौ कर्तुरुपक्षीणं कर्तृत्वं करणकर्मणोः सिद्धौ तदेव न स्यात्। अन्यत्रोपक्षीणत्वात्। न च कर्त्रादेः स्वरूपसिद्धिं प्रति कर्तृत्वादियुक्तं एकत्र तद्भावस्य विरुद्धत्वादित्यर्थः॥१३१॥

व्याप्तुमिष्टं च यत्कर्तुः क्रियया कर्म तत्स्मृतम्।
अतो हि कर्तृतन्त्रत्वं तस्येष्टं नाऽन्यतन्त्रता[1]॥१३२॥

शब्दाद्वाऽनुमितेर्वाऽपि प्रमाणाद्वा ततोऽन्यतः।
सिद्धिः सर्वपदार्थानां स्यादज्ञं[2] प्रति नाऽन्यथा॥१३३॥

अध्यक्षस्यापि सिद्धिः स्यात् प्रमाणेन विनैव [3]वा।
विना स्वस्य प्रसिद्धिस्तु नाज्ञं प्रत्युपयुज्यते॥१३४॥

तस्यैवाऽज्ञत्वमिष्टं चेज्ज्ञानत्वेऽन्या मतिर्भवेत्।
अन्यस्यैवाऽज्ञतायां च तद्विज्ञाने ध्रुवा भवेत्॥१३५॥

कर्त्रादीनां यौगपद्येन सिद्ध्यभ्युपगमे व्याकरणविरोधोऽपि स्यादित्याह—**व्याप्तुमिष्टं च**। कर्तृकरणकर्मणां पूर्वपूर्वायत्तत्वादुत्तरोत्तरसिद्धेर्न युगपत् सिद्धिरित्याह—**अतो हीति**॥१३२॥

विधान्तरेणानधिगतवस्तुप्रतिपत्तेरयोगाद्विधिरूपेण प्रवृत्तप्रमाणेनैव तथाभूतवस्तुसिद्धिरिति फलितमाह—**शब्दाद्वा**॥१३३॥

जडानामर्थानां प्रमाणादेव सिद्धत्वेऽपि चेतनस्याध्यक्षस्य नैवमित्याशङ्क्य निरस्ताशेषानर्थस्यापि तस्य तत्त्वमस्यादिवाक्येन वा सिद्धिर्वाक्यमन्तरेण स्वमहिम्नैव वा सिद्धिरिति विकल्पयति—**अध्यक्षस्यापि इति**। यदि तस्य तत्त्वमस्यादिवाक्येनावगतिस्तदा समूलसंसारनिवर्त्तकत्वेनोपयुक्तेत्यङ्गीकृत्य द्वितीयं प्रत्याह—**विनेति**। प्रमाणं विना स्वस्याध्यक्षस्य या स्वमहिम्ना सिद्धिः सा नाज्ञं प्रत्युपयुज्यते। सत्यामपि तस्यां सकार्याज्ञानानिवृत्तेरित्यर्थः॥१३४॥

किञ्चाज्ञत्वमपि चेतनस्याहङ्कारस्य वा? यदि ब्रह्मात्मनश्चेतनस्याज्ञत्वं तदा तस्य ज्ञानत्वेन स्वरूपव्यतिरिक्ता तत्त्वमस्यादिलक्षणा मतिरेष्टव्या। स्वरूपविज्ञानस्याज्ञानतत्कार्यानिवर्तकत्वादित्याह—**तस्यैवाज्ञत्वमिति**। यदि पुनरध्यक्षव्यतिरिक्तस्य क्वचिदहङ्कारादेरज्ञता तदापि प्रकृतस्याध्यक्षस्य विज्ञानार्थमव्यभिचारिणी मतिरेष्टव्या। न चाध्यक्षव्यतिरिक्तो ज्ञोऽस्ति। नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेरित्याह[4]—**अन्यस्यैवेति**॥१३५॥

---

१. व्याकरणशास्त्रानुगतं नान्यशास्त्रसम्मतम्।

२. अज्ञस्य कृत एव सर्ववस्तूनां संसिद्धिः, आत्मवित्तु आत्मत्वेन सर्वं जानाति।

३. वेद्यं हि वस्तु प्रमाणैर्निश्चीयते, अवेद्यत्वे सति अपरोक्षविषयत्वान्नात्मनः प्रमाणवेद्यता।

४. नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति विज्ञाता।

ज्ञातता स्वात्मलाभो वा सिद्धिः स्यादन्यदेव वा।
ज्ञातत्वेऽनन्तरोक्तौ त्वं पक्षौ संस्मर्तुमर्हसि॥१३६॥
सिद्धिः स्यात् स्वात्मलाभश्चेद् यत्नस्तत्र निरर्थकः।
सर्वलोकप्रसिद्धत्वात् स्वहेतुभ्यस्तु वस्तुनः॥१३७॥
ज्ञानज्ञेयादिवादेऽतः सिद्धिर्ज्ञातत्वमुच्यते।
अध्यक्षाध्यक्ष्ययोः सिद्धिर्ज्ञेयत्वं नाऽऽत्मलाभता॥१३८॥
स्पष्टत्वं कर्मकर्त्रादेः सिद्धिता यदि कल्प्यते।
स्पष्टताऽस्पष्टते स्यातामन्यस्यैव न चाऽऽत्मनः॥१३९॥
अद्रष्टुर्नैव चान्धस्य स्पष्टीभावो घटस्य तु।
कर्त्रादेः स्पष्टतेष्टा चेद् द्रष्टृताऽध्यक्षकर्तृका॥१४०॥

अध्यक्षस्य सिद्धिस्वरूपत्वान्मानापेक्षा नास्तीत्याशङ्क्य सिद्धिशब्दार्थं विकल्पयति—**ज्ञाततेति**। अन्यदिति स्पष्टत्वमुच्यते। प्रथमं प्रत्याह—**ज्ञातत्व इति**। यदि ज्ञातत्वं सिद्धिशब्दार्थः स्वीक्रियते तदा तस्यैवाज्ञत्वमिदं चेदित्यादिनोक्तौ पक्षावनुसन्धातव्यौ। तत्र चाध्यक्षस्य वाऽन्यस्य वा ज्ञत्वे ज्ञातत्वं प्रमाणादेव सिद्ध्यतीत्युक्तम्। अतो ज्ञातत्वे सिद्धिशब्दार्थे बलादेवाध्यक्षे प्रमाणावृत्तिः स्यादित्यर्थः॥१३६॥

द्वितीयमनूद्य लब्धस्वरूपे तस्मिन् प्रमाणव्यापारवैयर्थ्यं स्यादित्याह—**सिद्धिः स्यादिति**। वस्तुस्वरूपलाभार्थमेव प्रमात्रादिव्यापारोऽर्थवानित्याशङ्क्याह—**सर्वेति**॥१३७॥

द्वितीयपक्षासम्भवे फलितमाह—**ज्ञानज्ञेयादि**। ज्ञानं ज्ञेयं ज्ञातता चास्तीति यस्य वादस्तस्य पक्षे ज्ञातत्वमेव सिद्धिशब्दार्थः स्यादित्यर्थः। ज्ञातत्वमेव व्याकरोति—**अध्यक्षेति**॥१३८॥

तृतीयं कल्पमुत्थापयति—**स्पष्टत्वम्**। चिदाभासोदयानुदयद्वारा कर्त्रादेः स्पष्टत्वास्पष्टत्वे साक्षिणः स्याताम्, न तु केवलस्य कर्त्रादेरिति दूषयति—**स्पष्टत्वमिति**॥१३९॥

उक्तमेवार्थं दृष्टान्तेन स्पष्टयति—**अद्रष्टुर्नैव**। दृष्टिरहितस्य जडतमस्य घटादितुल्यस्य न वा अन्धस्य ज्ञानविषयत्वव्यतिरिक्तं प्राकट्यं नाम। किं च न स्पष्टत्वमभीष्टमस्ति नहि घटकर्तृकं साक्षात् प्रथनं सम्भवतीत्यर्थः। यदि तु कर्त्रादेः स्पष्टत्वं प्राकट्यं नामेष्टं तर्हि तद्विलक्षणस्यैवाभासद्वारा[1] द्रष्टृता वक्तव्येति फलितमाह—**कर्त्रादेरिति**॥१४०॥

---

१. साक्षिप्रकाशमाध्यमेन।

अनुभूतेः किमन्यस्मिन् स्यात्तवाऽपेक्षया वद।
अनुभवितरीष्टा स्यात् सोऽप्यनुभूतिरेव नः॥१४१॥
अभिन्नोऽपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥१४२॥
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते।
सत्त्वं नाशित्वमस्याश्चेत् सकर्तृत्वं तथेष्यताम्॥१४३॥
न कश्चिच्चेष्यते धर्म इति चेत्पक्षहानता।
नन्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः॥१४४॥
न भूतस्तर्हि नाशित्वं स्वालक्षण्यं मतं हि ते।
स्वलक्षणावधिर्नाशोऽनाशोऽनाशनिवृत्तिता॥१४५॥

उक्तममृष्यमाणः शाक्यः शङ्कते—**अनुभूतेः**। तस्याः स्वप्रकाशत्वादन्यापेक्षया न किञ्चित्तव फलमस्तीत्यर्थः।. अनुभूतेर्भावत्वेनानुभवित्रधीनत्वात्तस्मिन्नपेक्षाऽभीष्टेत्याशङ्क्यानुभवितापयस्माकमनुभूतिरेव व्यतिरेके प्रमाणाभावादित्याह—**अनुभवितरीति**॥१४१॥

कथं पुनरनुभूतिरनुभविताऽनुभांव्यश्चेति भेदव्यवहारः स्यादित्याशङ्क्यानुभूतिरेव क्षणिका संवृत्या भेदेन भातीत्याह—**अभिन्नोऽपीति**॥१४२॥

येषां पुनर्भूतिर्या सैव क्रिया कारकं च सैवोच्यते तेषां कोऽन्यो बुद्धिव्यतिरिक्तः स्यादित्याह—**भूतिर्येषामिति**। यदुक्तमनुभूतेरन्यापेक्षा नास्तीति तत्र किमसौ जन्मविनाशवती किं वा नेति विकल्प्याद्ये जन्मविनाशयोः व्यतिरिक्तकर्त्रधीनत्वदर्शनादनुभूतेः सकर्तृकत्वमपि स्त्रीकर्तव्यं तथा सति तस्या नान्यापेक्षेत्ययुक्तमित्याह—[१]**सत्त्वमिति**॥१४३॥

द्वितीये क्षणिकपक्षक्षतिरित्याह—**न कश्चिदिति**। धर्माणामन्यापोहरूपत्वान्नोक्तदोषोऽस्तीति शङ्कते—**नन्वस्तित्वादयो**। स्वेनैव स्वं लक्ष्यते ज्ञायत इति स्वलक्षणस्तस्य भावः स्वालक्षण्यं तवानुभूतेः अनुमतं ततः सविकल्पकज्ञानाविषयत्वान्नाशादीनां च तद्गोचरत्वादनुभूतेर्नाशित्वादि न प्राप्नोतीति दूषयति—**न भूतेरिति**॥१४४॥

एतदेव स्फुटयति—**स्वलक्षणेति**। स्वलक्षणं स्वप्रमाणकं वस्तु नाशस्यावधिः सीमा समस्तविकल्परहितामनुभूतिं न स्प्रष्टुं शक्नोतीत्यर्थः। किञ्च नाशो नाम अनाशनिवृत्तिमात्रं अनाशोऽपि नाशनिवृत्तिमात्रम्। अतोऽन्योन्याश्रयत्वान्न

---

१. प्रत्ययापेक्षया बुद्धेरेव क्रियाकारकत्वं तस्या अप्युत्पत्तिविनाशित्वेऽन्यस्य कर्तृत्वम्।

अगोरसत्त्वं गोत्वं ते न तु तद्गोत्वलक्षणम्।
क्षणवाच्योऽपि योऽर्थः स्यात्सोऽप्यन्याभाव एव ते॥१४६॥
भेदाभावेऽप्यभावस्य भेदो नामभिरिष्यते।
नामभेदैरनेकत्वमेकस्य स्यात्कथं तव॥१४७॥
अपोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि।
नाभावा भेदकाः सर्वे विशेषा वा कथञ्चन॥१४८॥
नामजात्यादयो यद्वत्संविदस्तेऽविशेषतः॥१४९॥
प्रत्यक्षमनुमानं च व्यवहारे यदिच्छसि।
क्रियाकारकभेदैस्तदभ्युपेयं ध्रुवं भवेत्॥१५०॥

वस्तुसंस्पर्शित्वमित्याह—**अनाश इति**। गोत्वादावपि तुल्यमन्योन्याश्रयत्वमित्याह—**अगोरिति**। अश्वत्वादेरगोपदार्थस्य निवृत्तिस्तव गोत्वं न तु गोः स्वलक्षणम्, वस्त्विति तदप्यगोत्वं व्यावृत्तिरूपमेवेत्यन्योन्याश्रयत्वात् तव मते गोत्वादेरपि न सिद्धिरित्यर्थः[1]॥१४५॥

किञ्चाऽपोहवादिपक्षे योऽपि क्षणशब्दवाच्यः क्षणिकोऽर्थो विवक्षितः सोऽप्यक्षणिकाभावत्वात्प्रतियोगित्वेनाक्षणिकमर्थमाक्षिपतीत्याह—**क्षणवाच्योऽपि**॥१४६॥

किञ्चापोहस्य भेदाभावेऽप्यगोत्वमनश्वत्वमित्यादिनामभिर्भेदस्त्वयेष्टः स च न सम्भवतीत्याह—**भेदेति**। किमित्यपोहस्यागोत्वादिनामभेदाद्भेदो न सम्भवतीत्याशङ्क्य निःस्वभावात्वादित्याह—**नामेति**॥१४७॥

किञ्च प्रतियोगिनामानन्त्यात्तदवगममन्तरेणापोहस्य गवि वृत्तिर्न ज्ञातुं शक्यत[2] इत्याह—**अपोह इति**। किञ्च क्षणिकत्वपक्षे गोत्वादयोऽन्यापोहत्वादभावाः सन्तो न व्यावर्त्तकाः स्युः। तथा च खण्डादयश्च न विशेष्या भवेयुः मिथः सम्बन्धानिरूपणात्तथा च खण्डो गौर्नीलमुत्पलमित्यादिविशिष्टव्यवहारानुपपत्तिरित्याह—**नाभावा भेदकाः इति**॥१४८॥

विशिष्टव्यवहारानुपपत्तौ दृष्टान्तमाह—**नामेति**। यथा त्वत्पक्षे संविदो विशेषाभावान्नामजात्यादयो भेदका न भवन्ति तथा भेदाभावादपोहस्यापि विशेषणत्वविशेष्यत्वासिद्धेर्विशिष्टव्यवहारानुपपत्तिरित्यर्थः॥१४९॥

किञ्च प्रत्यक्षमनुमानञ्च प्रमाणद्वयं भवतेष्यते तदनुरोधेन भूतिर्येषां क्रिया सैव चेति मतं हातव्यमित्याह—**प्रत्यक्षमनुमानं चेति**॥१५०॥

---

१. अपोहवादिसौगतमते।
२. गोव्यक्तिव्यतिरिक्तसकलवस्तुज्ञानोत्तरं गोव्यक्तिज्ञानं स्यादतोऽसम्भवः।

तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणम्।
संविदस्तदुपेयं स्याद्येन चाप्यनुभूयते॥१५१॥
रूपादीनां यथाऽन्यः स्याद् ग्राह्यत्वाद् ग्राहकस्तथा।
प्रत्ययस्य[1] तथाऽन्यः स्याद् व्यञ्जकत्वात् प्रदीपवत्॥१५२॥
अध्यक्षस्य दृशेः कीदृक् सम्बन्धः सम्भविष्यति।
अध्यक्ष्येण तु दृश्येन मुक्त्वाऽन्यो द्रष्टृदृश्यताम्[2]॥१५३॥
अध्यक्षेण कृता दृष्टिर्दृश्यं व्याप्नोत्यथाऽपि वा।
नित्याध्यक्षकृतः कश्चिदुपकारो भवेद्धियाम्॥१५४॥
स चोक्तस्तन्निभत्वं प्राक् संव्याप्तिश्च घटादिषु।
यथाऽऽलोकादिसंव्याप्तिर्व्यञ्जकत्वाद्धियस्तथा॥१५५॥

फलितमुपसंहरति—**तस्मान्नीलमिति**॥१५१॥

येनानुभूयते सोऽपि द्रष्टाऽभ्युपगन्तव्य इत्युक्तं तत्रानुमानमाह—**रूपादीनामिति**। प्रत्ययशब्दा बुद्धिः अतिरिक्तग्राहकग्राह्या ग्राह्यत्वाद्रूपादिवदिति बुद्धिग्राहकसाक्षिसिद्धिरित्यर्थः। किञ्च प्रत्ययः स्वातिरिक्तग्राहकग्राह्यो व्यञ्जकत्वाद्दीपवत्। व्यञ्जकत्वञ्च जडप्रकाशत्वमित्याशयेनानुमानान्तरमाह—**तथेति**॥१५२॥

कस्तर्हि साक्षिसाक्ष्ययोः सम्बन्धः स्यादित्याशङ्क्य द्रष्टृदृश्यभावं तयोः सम्बन्धं दर्शयति—**अध्यक्षस्येति**॥१५३॥

द्रष्टृदृश्यसम्बन्धाभ्युपगमे बलादाभासोऽभ्युपगन्तव्य इति दर्शयितुं विकल्पयति—**अध्यक्षेणेति**॥१५४॥

तेन परिणामिना कृता परिमामरूपा दृष्टिर्दृश्यमर्थं व्याप्नोतीत्येकः पक्षः। किं वा कूटस्थेन तेन सन्निधिमात्रेण बुद्धितद्वृत्तीनामुपकारोऽनुग्रहः कृतः तदेतद् द्रष्टृदृश्यत्वमिति पक्षान्तरं तत्र तावत्परिणामप्रसङ्गादाद्यस्य सावद्यत्वं मत्वा द्वितीयमङ्गीकुर्वन्नाह—**स चोक्तः**। स चोपकारो बुद्धेश्चिन्निभत्वं नाम प्रागेवोक्तोऽस्माभिरित्याभाससिद्धिरित्यर्थः कथं तर्हि वाह्यार्थसाधकत्वं तत्राह—**संव्याप्तिश्चेति**। यथा घटादेरादित्याद्यालोकेन दीपादिना च संव्याप्तिर्दृष्टा तथा व्यञ्जकत्वाविशेषाद् बुद्धेर्घटादिविषयेषु व्याप्तिरस्तीति बुद्धेः साक्षिदृश्याया विषयसाधकत्वमित्यर्थः॥१५५॥

---

१. अन्तःकरणवृत्तिरूपस्य प्रत्ययस्य जडतया तस्यापि प्रकाशकः साक्षी।
२. दृष्टदृश्यातिरिक्तः सम्बन्धो न सम्भवति।

आलोकस्थो घटो यद्वद्बुद्ध्यारूढो भवेत्तथा[1]।
धीव्याप्तिः स्याद्घटारोहो धियो व्याप्तौ क्रमो भवेत्॥१५६॥
पूर्वा[2] स्यात् प्रत्ययव्याप्तिस्ततोऽनुग्रह आत्मनः।
कृत्स्नाध्यक्षस्य नो युक्तः कालाकाशादिवत्क्रमः॥१५७॥
विषयग्रहणं यस्य कारणापेक्षया भवेत्।
सत्येव ग्राह्यशेषे च परिणामी स चित्तवत्॥१५८॥
अध्यक्षोऽहमिति ज्ञानं बुद्धेरेव विनिश्चयः।
नाध्यक्ष्याविशेषत्वान्न तस्यास्मि परो [3]यतः॥१५९॥

बुद्ध्यारूढप्रकरणे विषयस्य बुद्ध्यारूढत्वाभिधानादत्र च प्रमाद्वारेण बुद्धेर्विषयव्यापकत्ववचनात् मिथो विरोधः स्यादित्याशङ्क्यैकार्थत्वान्न विरोध इति दृष्टान्तपूर्वकमाह—**आलोकस्थ इति**। यथाऽऽलोकव्याप्तो घट आलोकस्थ उच्यते एवं बुद्धिव्याप्तो बुद्ध्यारूढ उच्यते। एतदेव स्पष्टयति—**धीव्याप्तिरिति**। घटस्य बुद्धावारोहो नाम तत्र व्याप्तिरेव तर्हि बुद्धेरात्मनश्च घटावभासकत्वे को भेद इति तत्राह—**धियो व्याप्ताविति**। बुद्धिः क्रमेण विषयानवभासयति परिणामित्वादात्मा तु युगपदेव सर्वमवभासयतीति विशेष इत्यर्थः॥१५६॥

वैलक्षण्यान्तरं चास्तीत्याह—**पूर्वा स्यात्**। अनुग्रहो नामोपकारश्चिदाभासोदयः। प्रथमं बुद्धिर्घटादिविषयं प्राप्य पश्चात्तदाकारसहिता सुखदुःखादिफलपर्यन्ता साक्षिणः साक्ष्यतां गच्छतीत्यर्थः। अध्यक्षस्यापि बुद्धेरिव क्रमेणैव विषयसाधकत्वं किन्न स्यादित्याशङ्क्याह—**कृत्स्नेति**। न हि कालस्याकाशस्यादित्यस्य वा स्वगोचरव्याप्तौ क्रमोऽस्ति। तथा सर्वाध्यक्षस्य स्वज्ञानतत्कार्ययोः सदा चिदाभासव्याप्तेर्न क्रमः सम्भवतीत्यर्थः॥१५७॥

अध्यक्षस्यापि विषयावभासकत्वाद्बुद्धेरिव परिणामित्वं स्यादित्याशङ्क्याह—**विषयग्रहणमिति**। अध्यक्षस्तु करणनिरपेक्षः स्वाभासद्वारेणाशेषबुद्धितद्वृत्तिसाक्षी न परिणामीत्यर्थः॥१५८॥

तस्यापि ब्रह्मास्मीति ज्ञानाकारेण परिणामः स्यादित्याशङ्क्याह—**अध्यक्षोऽहमिति**। यदि निर्विशेषस्याध्यक्षस्यापि ब्रह्मास्मीति परिणामः स्यात्तदा

---

१. यथा घटादिष्वालोकादिसंव्याप्तिः, व्यञ्जकत्वात्तथा धियो दृश्यघटादिव्याप्तिः।

२. पूर्वमिन्द्रियप्रणाल्याऽन्तःकरणं बहिर्निसृत्य विषयाकरेण परिणमति ततस्तत्र प्रतिबिम्बितं चैतन्यं वृत्तिसहितं विषयं प्रकाशयति।

३. अध्यक्षस्यापि परिणामित्वे तदन्यः प्रकाशकोऽभ्युपगन्तव्यः।

कर्त्रा चेदहमित्येवमनुभूयेत मुक्तता।
सुखदुःखविनिर्मोको नाहं कर्तरि युज्यते॥१६०॥

देहादावभिमानोत्थो दुःखीति प्रत्ययो ध्रुवम्।
कुण्डलीप्रत्ययो यद्वत्प्रत्यगात्माभिमानिना॥१६१॥

बाध्यते प्रत्ययेनेह विवेकेनाऽविवेकवान्।
विपर्यासेऽसदन्तं स्यात्प्रमाणस्याप्रमाणतः॥१६२॥

दाहच्छेदविनाशेषु दुःखित्वं नान्यथाऽऽत्मनः।
नैव ह्यन्यस्य दाहादावन्यो दुःखी भवेत्क्वचित्॥१६३॥

तस्यापि बुद्धेरिवान्येन साक्षिणा भवितव्यम्। न च तस्यान्यः साक्षी सम्भवतीत्याह—**न तस्येति**॥१५९॥

अन्तःकरणस्य ब्रह्मास्मीति ज्ञानाकारपरिणामश्चेत्तस्यैव फलभागितापि स्यादित्याशङ्क्याह—**कर्त्रेति**। साभासान्तःकरणेन परिणामिना ब्रह्माहमिति नित्य-मुक्तब्रह्मरूपता यदि साक्षात्क्रियेत तदा तत्र सुखादिमत्वेनानुभूयमाने तद्विनिर्मोक-स्यायुक्तत्वान्न तस्य फलभागित्वं किन्त्वात्मन एव फलित्वमित्यर्थः॥१६०॥

यथाऽहंकर्त्तुः सुखादिमत्त्वेन प्रतीतेर्न युक्ता मुक्तता तथाऽऽत्मनोऽपीत्याशङ्क्या-ध्यक्षस्य स्वतोऽशनायाद्यतीतस्य साभासबुद्ध्यविवेकमूलतो दुःखीति प्रत्ययस्य तद्विवेके मुक्तत्वानुभवः सम्भवतीत्याह—**देहादाविति**। यस्मान्मिथ्याभिमानोत्थः सुखी दुःखीत्यात्मनि प्रत्ययस्तस्मात्प्रत्यगात्मानं नित्यमुक्तत्वादिलक्षणं ब्रह्मरूपेणाऽवगमयता विवेकिप्रत्ययेन प्रागुक्ताविवेकिप्रत्ययस्य बाध्यता सिद्ध्यतीत्याह—**प्रत्यगात्मेति**। इहेति वेदान्तसमयोक्तिः॥१६१॥

अविवेकवता विवेकी प्रत्ययः किं न बाध्यते विरोधाविशेषादित्याशङ्क्याह—**विपर्यासे**। मिथ्याज्ञानेन सम्यग्ज्ञानस्य बाध्यत्वे प्रमाणस्य वस्तुबोधकस्य मिथ्याज्ञानेन बाधात्तद्बलाद्वस्तुनिश्चयानुपपत्तेः[1] सर्वशून्यतान्तमापद्येत। तथा च कुतो वैपरीत्यशङ्केत्यर्थः॥१६२॥

आत्मनो मुख्यमेव दुःखित्वं किं न स्यादित्याशङ्क्यान्यस्य दाहादावन्यस्य दुःखित्वायोगादात्मनश्च देहे दाहादौ दुःखित्वोपलम्भाद्देहे तादात्म्याध्यासात्तस्य दुःखित्वमित्याह—**दाहच्छेदेति**। अन्यथेत्यध्यासमन्तरेणेत्यर्थः॥१६३॥

---

१. प्रमाणज्ञानस्य बाध्यत्वे प्रमेयानिश्चयापत्तिः स्यात्।

अस्पर्शत्वाददेहत्वान्नाहं दाह्यो यतः सदा।
तस्मान्मिथ्याभिमानोत्थं मृते पुत्रे मृतिर्यथा॥१६४॥
कुण्डल्यहमिति ह्येतद् बाध्येतैव विवेकिना।
दुःखीति प्रत्ययस्तद्वत् केवलाहंधिया सह॥१६५॥
सिद्धे दुःखित्व इष्टं स्यात् तच्छक्तिश्छन्दसाऽऽत्मनः।
मिथ्याभिमानतो दुःखी तेनाऽर्थापादनक्षयः॥१६६॥
अस्पर्शोऽपि यथा स्पर्शमचलश्चलनादि च।
अविवेकात्तथा दुःखं मानसं चात्मनीक्षते॥१६७॥
विवेकात्मधिया दुःखं नुद्यते चलनादिवत्।
अविवेकस्वभावेन मनो गच्छत्यनिच्छतः॥१६८॥

आत्मनः स्वतो दाहादिसम्बन्धादध्यासमन्तरेणैव दुःखित्वं किं न स्यादित्याशङ्क्याह—**अस्पर्शत्वादिति**। अग्न्यादिसम्बन्धशून्यत्वं अस्पर्शत्वमदेशत्वं पादाद्यवयवराहित्यम्॥१६४॥

दुःखित्वप्रत्ययस्यात्मन्यध्यासात्मकत्वे दृष्टान्तपूर्वकं फलितमाह—**कुण्डल्यहमिति**। केवले शुद्धे ब्रह्मण्यहं ब्रह्मास्मीति धीः केवलाहंधीस्तया दुःखित्वप्रत्ययस्य कालत्रयेऽपि निवृत्तिरित्यर्थः॥१६५॥

आत्मनो मोक्षोपदेशानुपपत्त्या दुःखित्वे सिद्धे तदनुपपत्त्या तच्छक्तिमत्त्वमेष्टव्यमित्याशङ्क्याह—**सिद्धे दुःखित्व इष्टम्**। न च प्रमाणेन केनचिदात्मनो दुःखित्वं निश्चितम्, अतो न तस्य तच्छक्तिमत्त्वं कदाचिदपि स्वीकर्त्तव्यमित्याह—**मिथ्येति**। अर्थादनुपपत्त्या यच्छक्तिमत्त्वापादनं तस्य क्षयोऽन्यथोपपत्तिः उक्तन्यायेन सिद्धेत्याह—**तेनेति**॥१६६।

संसारस्य वस्तुत्वं निराकृत्याध्यासात्मकत्वमुक्तं प्रपञ्चयति—**अस्पर्शोऽपीति**। यथा स्थूलदेहव्यतिरिक्तस्तदविवेकात्तद्धर्मानात्मनि मन्यते तथा सूक्ष्मदेहाविवेकात्तद्धर्मानपि स्वात्मनि पश्यतीत्यर्थः[1]॥१६७॥

संसारस्याध्यासात्मकत्वे फलितमाह—**विवेकात्मेति**। मानसं दुःखं तदविवेकादारोपितं साक्षिणीत्युक्तमन्वयव्यतिरेकाभ्यां साधयति—**अविवेकेति**॥१६८॥

---

१. यथा स्थूलदेहसंसर्गेण जायमानं बाह्येन्द्रियसम्बन्धिदुःखादिकमात्मन्यध्यस्यते। तथैवान्तःकरणधर्मा अपि चैतन्येऽध्यस्यन्ते।

तदा तु दृश्यते दुःखं नैश्चल्ये नैव तस्य तत्।
प्रत्यगात्मनि तस्मात्तद् दुःखं नैवोपपद्यते[1]॥१६९॥
त्वं सतोस्तुल्यनीडत्वान्नीलाश्ववदिदं भवेत्॥१७०॥
निर्दुःखवाचिना योगात्[2] त्वंशब्दस्य तदर्थता।
प्रत्यगात्माभिधानेन तच्छब्दस्य युतेस्तथा॥१७१॥
दशमस्त्वमसीत्येवं वाक्यं स्यात् प्रत्यगात्मनि॥१७२॥
स्वार्थस्य ह्यप्रहाणेन विशिष्टार्थसमर्पकौ।
प्रत्यगात्मावगत्यन्तौ नान्योऽर्थोऽर्थाद्विरोध्यतः॥१७३॥

ब्रह्माज्ञानमूलमनोनिबन्धनत्वाद् दुःखित्वादिभ्रमस्य ब्रह्मात्मज्ञानेन मूलनिवृत्तौ निवृत्तिरित्याह—**प्रत्यगात्मनीति**॥१६९॥

एवं युक्त्या प्रत्यगात्मनो निर्दुःखत्वे सिद्धे वाक्यादेव त्वं ब्रह्मासीति ज्ञानं सिद्ध्यतीत्याह—**त्वं सतोरिति**। यथा नीलाश्वपदयोः सामानाधिकरण्यादेकद्रव्यनिष्ठत्वं तथा त्वंतच्छब्दयोः सामानाधिकरण्यादिदं तत्त्वमसिवाक्यमखण्डार्थनिष्ठं भवेदित्यर्थः॥१७०॥

तदेव स्फुटयति—**निर्दुःखेति**। सच्छब्देन निर्दुःखवाचिना योगात्त्वंशब्दस्य निर्दुःखब्रह्मार्थता सिद्ध्यति। तच्छब्दस्यापि त्वंशब्देन प्रत्यगात्माभिधायिना युतेः सम्बन्धात्तथा प्रत्यगात्मार्थत्वमित्यर्थः॥१७१॥

तत्त्वमसिवाक्यमुक्तन्यायेनापरोक्षवस्तुप्रतिपादकमित्येतद् दृष्टान्तेन स्पष्टयति—**दशम इति**॥१७२॥

तत्त्वंपदयोः एकार्थत्वे पर्यायत्वान्न सहप्रयोगः स्यादित्याशङ्क्याह—**स्वार्थस्य**। प्रत्यक्षपरोक्षलक्षणस्य स्वार्थस्यापरित्यागेनैतौ शब्दौ विशिष्टार्थसमर्पकौ। ततो वाच्यभेदान्न पर्यायतेत्यर्थः। तर्हि विशिष्टार्थसमर्प्पकत्वान्नाखण्डार्थत्वं तत्राह—**प्रत्यगात्मेति**। कल्पितभेदपरामर्शेनैकपदार्थनिष्ठता तर्हि सामानाधिकरण्यं तदनुपपत्त्या लक्षणया प्रत्यगात्मावगतिपरत्वं पदयोः सिद्ध्यतीत्यर्थः। त्वंतदर्थयोरंशांशिभावेन कार्यकारणभावेन वा पदद्वयसामानाधिकरण्यमन्यथासिद्धमित्याशङ्क्याह—**नान्योऽर्थ इति**। अतोऽर्थदिकरसाद्विरोधिकार्यकारणत्वांशांशित्वादिर्योऽन्योऽर्थो न स वेदान्तेषु प्रतिपाद्यते। 'अन्यत्रास्मात्कृताकृतात्', 'निष्कलं निष्क्रियमि'त्यादिविरोधादित्यर्थः[3]॥१७३॥

---

१. आत्मज्ञानेनाविद्यानिवृत्तौ सत्यां निमित्तापाये नैमित्तिकदुःखस्यापि निवृत्तिः।

२. अभेदात्मकबोधात्। ३. श्वेत. ६.१९।

नवबुध्यपहाराद्धि स्वात्मानं दशपूरणम्।
अपश्यञ्ज्ञातुमेवेच्छेत् स्वमात्मानं जनस्तथा॥१७४॥

अविद्याबद्धचक्षुष्ट्वात् कामापहृतधीः सदा।
विविक्तं दृशिमात्मानं नेक्षते दशमं यथा॥१७५॥

दशमस्त्वमसीत्येवं तत्त्वमस्यादिवाक्यतः।
स्वमात्मानं विजानाति कृत्स्नान्तःकरणे क्षणम्॥१७६॥

इदं पूर्वमिदं पश्चात् पदं वाक्यं भवेदिति।
नियमो नैव वेदेऽस्ति पदसाङ्गत्यमर्थतः।
अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थबोधनम्॥१७७॥

वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः॥१७८॥

ननु किमिति महता प्रयत्नेनाखण्डार्थप्रतिपत्तये व्याप्रियते किमिति वा प्रसङ्ख्यानादिलक्षणा क्रिया नोपदिश्यत इत्याशङ्क्य मुमुक्षोर्जिज्ञासुत्वादचिकीर्षुत्वाच्चेति दृष्टान्तपूर्वकं दर्शयति—**नवबुद्ध्यपहारादिति**। (नेह) दशमो माणवको नवैव वयमिति बुद्ध्या चित्तस्य स्वात्मनो बहिरपहृतत्वाद्दशानां पूरणं स्वात्मानमजानानश्चावगन्तुमेव दशममिच्छेन्न कर्त्तुं तथा मुमुक्षुरपि ब्रह्मात्मानं ज्ञातुमेवेच्छति न कर्त्तुं तस्मात्तत्त्वमसिवाक्ये प्रतिपत्तिरेव व्युत्पाद्यते न क्रियेत्यर्थः॥१७४॥

ब्रह्मात्मभूतश्चेन्मुमुक्षुर्नात्मानमनात्मराशेर्विविच्य ब्रह्मत्वेन किमिति न जानातीत्याशङ्क्य स्वभावतोऽनात्मविषयत्वाच्चित्तस्याचार्योपदेशं विना न शक्नोति ज्ञातुमिति दृष्टान्तेन कथयति—**अविद्याबद्धेति**॥१७५॥

शास्त्राचार्योपदेशयुक्तो मुमुक्षुर्विविच्यात्मानं ब्रह्मत्वेन जानातीति दृष्टान्तपुरःसरं दर्शयति—**दशम इति**॥१७६॥

त्वंशब्दस्यानुवादकत्वात् पूर्वं प्रयोगात् तच्छब्दस्य चापूर्वार्थवादित्वात् पश्चात्प्रयोगो युक्तः स्यादित्याशङ्क्याह—**इदं पूर्वमिति**। वेदे पदानां सम्बन्धोऽर्थबलान्न पाठबलादाहरपात्रं पात्रमाहरेत्युभयथा प्रयोगदर्शनात्तस्मादनुवादकस्यापि पश्चात्पाठे चापूर्वप्रतिपादकस्यापि पूर्वपाठो न विरोधीत्यर्थः॥१७७॥

उक्तेऽर्थे हेतुमाह—**वाक्ये हीति**॥१७८॥

यदा नित्येषु वाक्येषु पदार्थस्तु विविच्यते।
वाक्यार्थज्ञानसङ्क्रान्त्यै तदा प्रश्नो न युज्यते॥१७९॥
अन्वयव्यतिरेकोक्तिः पदार्थस्मरणाय तु।
स्मृत्यभावे[1] न वाक्यार्थो ज्ञातुं शक्यो हि केनचित्॥१८०॥
तत्त्वमस्यादिवाक्येषु त्वंपदार्थविवेकतः[2]।
व्यज्यते नैव वाक्यार्थो नित्यमुक्तोऽहमित्यतः॥१८१॥
अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा।
त्वंपदार्थविवेके हि पाणावर्पितबिल्ववत्[3]॥१८२॥
वाक्यार्थो व्यज्यते चैवं केवलोऽहंपदार्थतः।
दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात्॥१८३॥

आचार्येण ब्रह्मासीत्युपदिष्टो मुमुक्षुरहं कथं 'ब्रह्म स्यामि'ति पृच्छति। तदनुपपत्त्या (कथं) तत्त्वमसि वाक्यमैक्यबोधनार्थमित्याशङ्क्याह—**यदा नित्येषु**। वेदवाक्येषु शिष्यबुद्धौ वाक्यार्थज्ञानसमुदयार्थमन्वयव्यतिरेकाभ्यां पदार्थो वृद्धव्यवहारानुसारेण विविच्यते तदा कथमहं ब्रह्म स्यामिति प्रश्नो न घटते। तस्मात् पदार्थाव्युत्पत्तिनिबन्धनः प्रश्नो न वाक्यासामर्थ्यादित्यर्थः। पदार्थानभिज्ञस्यैव प्रश्नः स्यादित्युक्तमेव प्रकटयति—**अन्वयेति**॥१८०॥

पदार्थाऽज्ञाने प्रश्नस्य सावकाशत्वादन्वयव्यतिरेकायां पदार्थज्ञाने प्रयतितव्यमित्याह—**तत्त्वमस्यादि**। अतो वाक्यादिति यावत्॥१८१॥

पदार्थज्ञानाभावे वाक्यार्थज्ञानायोगात् त्वंपदार्थज्ञानार्थमन्वयव्यतिरेकयोरुक्तिस्तत्र तत्र प्रसिद्धेत्याह—**अन्वयव्यतिरेकोक्तिः**। वाक्यार्थज्ञानार्थमेव किमित्यन्वय-व्यतिरेकोक्तिर्न स्यादित्याशङ्क्यान्वयव्यतिरेकयोर्भेदविषयत्वादखण्डवाक्यार्थ-विषयत्वायोगादित्याह—**नान्यथेति**॥१८२॥

अन्वयव्यतिरेकाभ्यां पदार्थविवेके सति वाक्यादेवाखण्डवाक्यार्थस्या-परोक्षत्वेन प्रतिपत्तिः सिद्ध्यतीत्याह—**वाक्यार्थो व्यज्यत इति**। चकारोऽवधारणे। अपरोक्षत्वेनाखण्डवाक्यार्थप्रतिपत्तिमेव प्रकटयति—**एवमिति**। दुःखीति दुःख-विशिष्टत्वेन दृष्टस्येदमंशस्यापोहेन तत्साक्षितया प्रत्यगात्मनोऽनिदंचिद्धातोर्विनि-श्चयात्तस्यैव केवलाहंपदार्थस्य निष्प्रपञ्चस्य साक्षिमात्रावशिष्टत्वात्तस्याखण्डाद्वितीयं ब्रह्म तावन्मात्रतेत्येव सफलमपरोक्षज्ञानं वाक्यात् प्रकटीभवतीत्यर्थः॥१८३॥

---

१. शक्तिगृहाभावे। २. त्वं पदस्य लक्ष्यार्थाबोधे।
३. त्वंपदार्थस्य विविक्तार्थबोधे शीघ्रमात्मनिश्चयः।

तत्रैवं सम्भवत्यर्थे श्रुतहानाश्रुतार्थधीः।
नैव कल्पयितुं युक्ता पदवाक्यार्थकोविदैः॥१८४॥
प्रत्यक्षादीनि बाधेरन् कृष्णलादिषु पाकवत्।
अक्षजादिनिभैरेतैः कथं स्याद्वाक्यबाधनम्॥१८५॥
दुःख्यस्मीति सति ज्ञाने निर्दुःखीति न जायते।
प्रत्यक्षादिनिभत्वेऽपि वाक्यान्न व्यभिचारतः॥१८६॥
स्वप्ने दुःख्यहमध्यासं दाहच्छेदादिहेतुतः।
तत्कालभाविभिर्वाक्यैर्न[1] बाधः क्रियते यदि॥१८७॥

उक्तन्यायेन वाक्यादेवापरोक्षवाक्यार्थज्ञानमुपपाद्येदानीं पूर्ववादिकल्पनाया निर्मूलत्वमाह—**तत्रैवमिति**। तस्मिन्नखण्डवाक्यार्थे प्रागुक्तन्यायेन घटमाने सति श्रुतस्याखण्डापरोक्षार्थस्य हानमश्रुतस्य सखण्डपरोक्षार्थस्य धीश्चेत्येवं न कल्पयितुं शक्यते विद्वद्भिरित्यर्थः॥१८४॥

तत्र पूर्ववाद्याह—**प्रत्यक्षादीनीति**। यथा कृष्णलान् श्रपयेदिति कृष्णलेषु सुवर्णकणेषु श्रूयमाणोऽपि पाकः तेषु पाकफलासम्भवात् प्रत्यक्षेण बाध्यते तथा श्रुतं ब्रह्मात्मत्वं प्रत्यक्षादिभिर्बाध्यते। तस्मादश्रुतप्रसङ्ख्यानादिकल्पना युक्तेत्यर्थः। कर्तृत्वादिप्रतिभासानामितरेतराध्यासप्रसूतत्वेन विभ्रमत्वाद् बाधकत्त्वासिद्धिरिति सिद्धान्तयति—**अक्षजादीति**॥१८५॥

दुःख्यस्मीति ज्ञानस्य प्रत्यक्षादिनिभत्त्वेऽपि तत्र प्रत्यक्षगन्धस्य विद्यमानत्वाद् वाक्याद् बलवत्त्वान्न ततो निर्दुःखीति ज्ञानं सिध्यतीति शङ्कते—**दुःख्यस्मीति**। तद्दूषयति—**न व्यभिचारत इति**॥१८६॥

तमेव व्यभिचारं स्फोरति—**स्वप्ने इति**। अहमद्य स्वप्नावस्थायां दाहच्छेदादिवशाद् दुःखवान् आसम्। तच्च दुःखं तत्कालीनाप्तोपदेशान्निर्दुःखोऽसीत्येवं रूपाद् बाध्यते तथा तत्त्वमस्यादिवाक्यजनितेनापि ज्ञानेन जागरिते प्रतीतस्य दुःखस्य बाधो युक्त एवेत्यर्थः। स्वप्नकालभाविभिर्वाक्यैस्तत्कालीनस्य दुःखस्य बाधो न क्रियते तेषामाभासत्वादिति शङ्कते—**तत्कालेति**॥१८७॥

---

१. यदि तत्कालीनवाक्यैर्दुःखबाधो नास्ति, तदा पश्चाद् बाधस्यानुपयोगात्। न दुःखस्य धारासन्तानः कश्चित्।

समाप्तेस्तर्हि दुःखस्य प्राक्च तद् बाध इष्यताम्।
न हि दुःखस्य सन्तानो भ्रान्तेर्वा दृश्यते क्वचित्॥१८८॥

प्रत्यगात्मन आत्मत्वं दुःख्यस्मीत्यस्य बाधया।
दशमं नवमस्येव वेद चेदविरुद्धता॥१८९॥

नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः।
वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम्॥१९०॥

अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम्।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते॥१९१॥

सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत्।
दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि॥१९२॥

प्रबोधेन यथा स्वाप्नं सर्वदुःखं निवर्तते।
प्रत्यगात्मधिया तद्वद्दुखित्वं सर्वदाऽऽत्मनः॥१९३॥

तथापि न दोषोऽस्तीत्याह—**समाप्तेः**। दुःखस्य समाप्तेरूर्ध्वं प्राक् च तद्बाधोऽवश्यंभावीत्युक्तम्। तत्र हेतुमाह—**न हीति**॥१८८॥

प्रत्यक्षादिना तत्त्वमस्यादिवाक्यस्य विरोधाभावे हेत्वन्तरमाह—**प्रत्यगात्मनः**। आत्मत्वं प्रत्यग्भूतब्रह्मत्वम्॥१८९॥

उक्तमेव न्यायं सङ्क्षिप्य प्रतिपत्तिसौकर्यार्थं स्मारयति—**नित्यमुक्तत्वमिति**। अन्यतःशब्देन प्रसंख्यानाद्यनुष्ठानमुच्यते। तर्हि वाक्यस्य निरपेक्षस्यैव स्वार्थज्ञानहेतुत्वे श्रुतवाक्यस्य सर्वस्यापि श्रुतवाक्यार्थज्ञानमापद्येतेत्याशङ्क्याह—**वाक्यार्थस्येति**॥१९०॥

कथं तर्हि पदार्थस्मृतिस्तत्राह—**अन्वयव्यतिरेकाभ्याम्**। पदार्थज्ञाने सति श्रुताद्वाक्याद्वाक्यार्थज्ञानं भवतीति फलितमाह—**एवं निर्दुःखमात्मानमिति**॥१९१॥

वाक्यार्थज्ञानस्य निर्दोषवाक्यजन्यत्वात् प्रमात्वं कोटिद्वयासंस्पर्शित्वादसन्दिग्धत्वमबाध्यत्वादविपर्यस्तत्त्वमित्येतदाह—**प्रमेति**। एतदेव प्रागुक्तदृष्टान्तेन स्पष्टयति—**दशम इति**॥१९२॥

प्रदर्शितप्रक्रियया प्राप्तस्य वाक्योत्थज्ञानस्य फलं दृष्टान्तेन दर्शयति—**प्रबोधेन**॥१९३॥

---

१. वाक्यार्थबोधे पदार्थबोधस्य कारणत्वात् पदार्थबोधं विना वाक्यार्थो न सम्भवति।

कृष्णलादौ प्रमाऽजन्म तदन्यार्थाऽमृदुत्वतः।
तत्त्वमस्यादिवाक्येषु न त्वेवमविरोधतः॥१९४॥
वाक्ये तत्त्वमसीत्यस्मिन् ज्ञातार्थं तदसिद्वयम्।
त्वमर्थे सत्यसाहाय्याद्वाक्यं नोत्पादयेत् प्रमाम्॥१९५॥
तत्त्वमोस्तुल्यनीडार्थमसीत्येतत्पदं भवेत्॥१९६॥
तच्छब्दः प्रत्यगात्मार्थस्तच्छब्दार्थस्त्वमस्तथा।
दुःखित्वाप्रत्यगात्मत्वं वारयेतामुभावपि[1]॥१९७॥
एवं च नेति नेत्यर्थं गमयेतां परस्परम्॥१९८॥
एवं तत्त्वमसीत्यस्य गम्यमाने फले कथम्।
अप्रमाणत्वमस्योक्त्वा क्रियापेक्षत्वमुच्यते॥१९९॥

यदुक्तं कृष्णलादिविपाकवदिति तत्र वैषम्यमाह—**कृष्णलादौ**। आदिपदेन किं कणान् वहन्तीत्यादि गृह्यते। तत्र हि प्रमा न जायते। तण्डुलेभ्यो अन्यस्यार्थस्य कृष्णलादेस्तण्डुलानामिव मृदुत्वस्य पाकफलस्यायोगात्तत्र पुरुषस्यानैश्वर्यादशक्य-नियोगानुपपत्तेरित्यर्थः। दार्ष्टान्तिके विशेषं दर्शयति—**तत्त्वमस्यादीति**॥१९४॥

विविक्तपदार्थस्य तत्त्वमस्यादिवाक्यात् प्रमा जायत इत्युक्तम्। तत्र पदार्थेष्वपि त्वंपदार्थविवेके यत्नवता भवितव्यमित्याह—**वाक्य इति**। त्वंपदार्थज्ञानेऽपि वाक्यमहं ब्रह्मेति प्रमां नोत्पादयति तत्त्वंपदयोस्सामानाधिकरण्यद्वारेणोपयोगवदसि-पदस्योपयोगाभावादित्याशङ्क्याह—**तत्त्वमोरिति**। तत्त्वमित्युक्ते कुरु चिन्तयेति वा साकाङ्क्षत्वादसीति सिद्धैक्यानुवादे नैराकाङ्क्ष्यमित्यर्थः॥१९६॥

निराकाङ्क्षसामानाधिकरण्ये सति को लाभः स्यादित्याशङ्क्याह—**तच्छब्द इति**। यथा प्रत्यगात्मविषयस्तच्छब्दस्तथा त्वंशब्दस्य तच्छब्दार्थ एवार्थो भवती.त्युक्तेऽपि किं लभ्यते? तत्राह—**दुःखित्वेति**॥१९७॥

तत्त्वंशब्दावन्योऽन्यसन्निधानाद्विरुद्धार्थनिवारकावित्येवमङ्गीकारे निःशेषार्थ-गमकत्वं तयोः सिद्ध्यतीत्याह—**एवं चेति**॥१९८॥

यस्माद्वाक्यस्य पदानां सामानाधिकरण्यद्वाराऽखण्डापरोक्षब्रह्मात्मनिष्ठत्वं तस्माद्वाक्यस्य तथाविधार्थप्रतिपादकत्वं नास्तीत्ययुक्तमित्याह—**एवं तत्त्वमसीत्यस्य**॥१९९॥

---

१. तत्त्वंपदे जहदजहल्लक्षणया शुद्धचैतन्यबोधनेनात्मनो दुःखित्वं जीवत्वञ्चापनयति।

तस्मादाद्यन्तमध्येषु कुर्वित्येतद्विरोध्यतः।
न कल्पामोऽश्रुतत्वाच्च श्रुतत्यागोऽप्यनर्थकः॥२००॥
यथाऽनुभूयते तृप्तिर्भुजेर्वाक्यान्न गम्यते।
वाक्यस्य विधृतिस्तद्वद्गोशकृत् पायसी क्रिया॥२०१॥
सत्यमेवमनात्मार्थवाक्यात्पारोक्ष्यबोधनम्।
प्रत्यगात्मनि न त्वेवं संख्याप्राप्तिवदध्रुवम्॥२०२॥
स्वसंवेद्यत्वपर्यायः स्वप्रमाणक इष्यताम्।
निवृत्तावहमः सिद्धः स्वात्मनोऽनुभवश्च नः॥२०३॥
बुद्धीनां विषयो दुःखं नो यस्य विषया मताः।
कुतोऽस्य दुखसम्बन्धो दृशेः स्यात्प्रत्यगात्मनः॥२०४॥

प्रसङ्ख्यानादिनिरपेक्षं तत्त्वमसिवाक्यं स्वमहिम्नैवापरोक्षमर्थं यतो बोधयति ततः क्रियापेक्षकत्वं वाक्यस्यायुक्तमित्युपसंहरति—**तस्मादिति**। आदौ तत्त्वमसीति प्रथमोपदेशे मध्येऽन्वयव्यतिरेकिग्रहणकाले अन्ते निर्विचिकित्सब्रह्मानुभवकाले तत्त्वमसीति चेतः समाधानं कुर्विति कल्पनमश्रुतत्वेन श्रुतत्यागानुपपत्त्या च विरुद्धमित्यर्थः॥२००॥

वाक्याद् ब्रह्मात्मानुभवः स्यादित्युक्तमाक्षिपति—**यथानुभूयत इति**। लोके भुजिक्रियातः तृप्तिरनुभूयते न तु देवदत्तो भुक्त इत्यादिवाक्यादेव तृप्तिर्गम्यते। यथा वा गोशकृता पयसा पायसी क्रिया नोपपद्यते तद्वद्वाक्याद् ब्रह्मात्मन्यपरोक्षप्रतिपत्तिः स्यादिति वाक्यस्य विवृत्तिर्न युज्यते तस्माद्वाक्यात् परोक्षार्थप्रतिपत्तिरेवेत्यर्थः॥२०१॥

आनात्मनि परोक्षप्रतिपत्तावपि वाक्यादपरोक्षप्रतिपत्तिरात्मन्यपरोक्षत्वादित्युत्तरमाह—**सत्यमेवमनात्मार्थे**। यथा दशमस्त्वमसीत्युक्ते दशसंख्यापूरणस्य दशमस्य दशमोऽस्मीत्यरोक्षत्वेनावाप्तिर्दृष्टा तथा तत्त्वमसीत्युक्ते ब्रह्मास्मीत्यपरोक्षब्रह्मावाप्तिर्युक्तेत्युक्तवानहमिति पूर्वोक्तं स्मारयति—**सङ्ख्येति**॥२०२॥

कथं प्रत्यगात्मनोऽपरोक्षब्रह्मस्वभावत्वं तत्राह—**स्वसंवेद्येति**। कथं प्रमाणनिरपेक्षा प्रत्यगात्मप्रतीतिरित्याशङ्क्य सुषुप्तावहङ्कारादेरिदमंशस्य निवृत्तावात्मनोऽनुभवात्प्रमाणाधीनतामन्तरेण तदनुभवसिद्धिरित्याह—**निवृत्ताविति**॥२०३॥

अपरोक्षस्वभावत्वेऽपि प्रत्यगात्मनो दुःखादिमत्त्वेन प्रतीतेर्न वाक्यान्नित्य-

दृशिरेवाऽनुभूयेत स्वेनैवाऽनुभवात्मना[1]।
तदाभासतया जन्म धियोऽस्याऽनुभवः स्मृतः॥२०५॥
अशनायादिनिर्मुक्तः [2]सिद्धो मोक्षस्त्वमेव सः।
श्रोतव्यादि तवेत्येतद्विरुद्धं कथमुच्यते॥२०६॥
सेत्स्यतीत्येव चेत्तस्याच्छ्रवणादि तदा भवेत्।
मोक्षस्यानित्यतैवं स्याद्विरोधे नान्यथा वचः॥२०७॥
श्रोतृश्रोतव्ययोर्भेदो यदीष्टः स्याद्भवेदिदम्।
इष्टार्थकोप एवं स्यान्न युक्तं सर्वथा वचः॥२०८॥

मुक्तब्रह्मानुभवसिद्धिरित्याशङ्क्य दुःखित्वादेः साक्षित्वात्तत्साक्षिणस्तत्सम्बन्धासिद्धेर्मैवमित्याह—**बुद्धीनामिति**॥२०४॥

प्रत्यगात्मनः सम्बन्धरहितत्वे कथमहं ब्रह्मास्मीति वाक्यादनुभवः स्यादित्याशङ्क्याह—**दृशिरेवेति**। आत्मनोऽनुभवमेव प्रकटयति—**तादाभासतयेति**। कूटस्थात्माभासाक्रान्तत्वेन स्वाकाररहिताया बुद्धेः केवलापूर्वाद्याकारायाः शास्त्राचार्यप्रसादाज्जन्माऽस्यात्मनोऽनुभवो ब्रह्मविद्भिरिष्यते। अतोऽशेषसम्बन्धरहितस्यापि वाक्यादहं ब्रह्मेति प्रतिपत्तिरविरुद्धेत्यर्थः॥२०५॥

वाक्येन सामानाधिकरण्यादिद्वारेणाशनायादिनिर्मुक्तस्त्वमित्यवबोध्य प्रसङ्ख्यानाद्यनुष्ठानं कुरु त्वमित्याचार्यस्य शास्त्रस्य चायुक्तं विरोधादित्याह—**अशनायादीति**॥२०६॥

यथोक्तमुक्तत्वस्य प्रसंख्यानाधीनत्वात् प्रसंख्यानादिविधानमुपपन्नमित्याशङ्क्याह—**सेत्स्यतीत्येवेति**। तद्वन्मुक्तत्वं प्रसंख्यानाद्यनुष्ठानाद्भविष्यतीत्यङ्गीकारादनुष्ठानं मुमुक्षोरिष्टं चेत् तदा श्रवणाद्यनुष्ठेयं भवेत्। एवं च मोक्षस्याभीष्टस्यानित्यत्वं कृतकत्वादापद्येत। अन्यथा तस्य नित्यत्वे तस्य प्रसंख्यानादिविधायकं वचो विरुध्येत। तस्मान्मोक्षस्य प्रसंख्यानाद्यधीनत्वे नित्यता न लभ्या नित्यत्वे तस्य प्रसंख्यानादि न सिद्ध्यतीत्यर्थः॥२०७॥

इतश्च प्रसंख्यानवादो युक्तो न भवतीत्याह—**श्रोतृश्रोतव्ययोरिति**। मुमुक्षोर्ब्रह्मात्मभावस्य च भेदश्चेदिष्टस्तदा प्रसंख्यानाद्यनुष्ठानं भवेत्तथा चेष्टार्थस्य ब्रह्मात्मभावस्यापलापः स्यात्। किं बहुना सर्वप्रकारेण प्रसंख्यानादिविधिरूपं त्वदीयं वचो न युक्तम्। श्रोतृश्रोतव्यभेदाभ्युपगमे मुख्यब्रह्मात्मभावविरोधात्तदनभ्युपगमे चानुष्ठानायोगादित्यर्थः॥२०८॥

---

१. आत्मैवात्मानुभवेनानुभूयते। २. सर्वोपाधिभिरुपक्षीणः।

सिद्धो मोक्षोऽहमित्येवं ज्ञात्वाऽऽत्मानं भवेद्यदि।
चिकीर्षुर्यः स मूढात्मा शास्त्रं चोद्घाटयत्यपि॥२०९॥

न हि सिद्धस्य कर्तव्यं सकार्यस्य न सिद्धता[1]।
उभयालम्बनं कुर्वन्नात्मानं वञ्चयत्यपि॥२१०॥

सिद्धो मोक्षस्त्वमित्येतद्वस्तुमात्रं प्रदर्श्यते।
श्रोतुस्तथात्वविज्ञाने प्रवृत्तिः स्यात्कथं न्विति॥२११॥

कर्ता दुःख्यहमस्मीति प्रत्यक्षेणाऽनुभूयते।
कर्ता दुःखी च माभूवमिति यत्नो भवेत्ततः॥२१२॥

तद्विज्ञानाय युक्त्यादि कर्तव्यं श्रुतिरब्रवीत्।
कर्तृत्वाद्यनुवादेन सिद्धत्वानुभवाय तु॥२१३॥

वाक्यादवगतब्रह्मात्मभावस्य प्रसंख्यानाद्यनुष्ठानायोगादवगतब्रह्मात्मभावोऽहं वाक्यादिति मन्यमानः सन् योऽपि प्रसंख्यानादिकं कर्त्तुमिच्छति स मूढः शास्त्रप्रतारकः स्वात्मवञ्चकश्चेत्याह—**सिद्धो मोक्षः**। उद्घाटयति उत्थापयति स्वार्थात् प्रच्यावयतीत्यर्थः॥२०९॥

तदेव स्फुटयति—**नहि सिद्धस्येति**। वञ्चयति पुरुषार्थायोग्यं करोतीति यावत्॥२१०॥

सदसीति फलं चोक्त्वेत्यादिना प्रकरणादावुक्तं स्वाभिप्रायं प्रसंख्यानवादी प्रकटयति—**सिद्धो मोक्षः**। केनाभिप्रायेण वस्तुत्वमात्रप्रदर्शनं तत्राह—**श्रोतुरिति**। तथात्वविज्ञानं नित्यमुक्तब्रह्मात्मत्वविज्ञानम्। प्रवृत्तिर्नाम प्रसंख्यानाद्यनुष्ठानम्॥२११॥

कथमेवं श्राविते प्रसंख्यानाद्यनुष्ठानप्रवृत्तिः श्रोतुः स्यादित्याशङ्क्याह—**कर्त्तेति**। यतो यथोक्तमनुष्ठानं ततो ब्रह्मात्मवस्तुमात्रकथनादूर्ध्वमित्यर्थः॥२१२॥

शब्दयुक्त्याम्रेडनं[2] कर्त्तव्यमिति प्रमाणप्रयोजनाभ्यां सह प्रसंख्यानावश्यंभावं निगमयति—**तद्विज्ञानायेति**। प्रसङ्ख्यानादिकं चेत्कर्तव्यं कर्तृत्वादेरपि श्रुत्याक्षिप्तत्वाद् बाधो न स्यादित्याशङ्क्याह—**कर्तृत्वादीति**॥२१३॥

---

१. नित्यसिद्धमोक्षस्वरूपे तत्त्वमसिश्रुतिद्वारा प्ररोचनामात्रं क्रियते। नापूर्वसाधनं मोक्षस्य।

२. तत्त्वमसि श्वेतकेतोऽसिति वाक्यं पञ्चकृत्वो ब्रवीति दृढताप्रदानाय।

निर्दुःखो निष्क्रियोऽकामः सिद्धो मोक्षोऽहमित्यपि।
गृहीत्वैव विरुद्धार्थमादध्यात् कथमेव सः॥२१४॥
सकामः सक्रियोऽसिद्ध इति मेऽनुभवः कथम्।
अतो मे विपरीतस्य तद्भवान् वक्तुमर्हति॥२१५॥
इहैव घटते प्रश्नो न मुक्तत्वानुभूतये।
प्रमाणेन विरोधी यः सोऽत्रार्थः प्रश्नमर्हति॥२१६॥
अहं निर्मुक्त इत्येव सदसीत्यन्यमानजः।
प्रत्यक्षाभासजन्यत्वाद् दुःखित्वं प्रश्नमर्हति॥२१७॥
पृष्ठमाकाङ्क्षितं वाच्यं दुःखाभावमभीप्सितम्[1]।
कथं हीदं निवर्तेत दुःखं सर्वात्मना मम॥२१८॥
इति प्रश्नानुरूपं यद्वाच्यं दुःखनिवर्तकम्।
श्रुते स्वात्मनि नाशङ्का प्रामाण्ये सति विद्यते॥२१९॥
तस्मादात्मविमुक्तत्वं प्रत्याययति तद्वचः।
वक्तव्यं तत्तथार्थं स्याद्विरोधेऽसति केनचित्॥२२०॥

नेयमपि कल्पना समीचीनेति समाधत्ते—**निर्दुःख इति**। वाक्यात् ज्ञानमेव न जायत इति वक्तुमशक्यमप्रामाण्यप्रसङ्गात्। जातं चेद्, ज्ञानं तर्हि तद्विरुद्धानुष्ठानप्रतिपत्तिरयुक्तेत्यर्थः॥२१४॥

तदेव प्रश्नद्वारा प्रकटयति—**सकाम इति**॥२१५॥

अत सकामत्वादेर्विपरीतस्य मम कथं सकामत्वाद्यनुभवः स्यादित्यस्मिन्नेवार्थे प्रश्नो युज्येतेत्यत्र युक्तिमाह—**इहैवेति**॥२१६॥

कोऽर्थस्तर्हि प्रमाणेन विरोधीत्यपेक्षायामाह—**अहं निर्मुक्तः**॥२१७॥

शिष्याकाङ्क्षावशेनापि प्रसंख्यानानुष्ठानकल्पनं वेदान्तेषु न युक्तमित्याह—**पृष्टमाकाङ्क्षितमिति**। दुःखस्य सर्वप्रकारस्याभावो यस्मिन् ब्रह्मरूपे तत्तथोक्तम्, तस्यैव परमानन्दत्वेनाभीष्टत्वमाह—**अभीप्सितमिति**॥२१८॥

इष्टत्वमेव स्पष्टयति—**कथं हीति**। यदुक्तमाकाङ्क्षितं वाच्यमिति तन्निगमयति—**इति प्रश्नानुरूप इति**॥२१९॥

ननु पृष्टमेवोच्यते प्रसङ्ख्यानद्वारेण तद्व्यतिरेकेण श्रुतेः सामर्थ्याभावात्तत्राह—**श्रुतेरिति**। स्वात्मनि स्वप्रमेये श्रुतेर्न सामर्थ्याभावाशङ्का स्वतः प्रामाण्यादित्यर्थः।

---

१. सर्वदुःखाभावस्वरूपात्मविदो न दुःखानुभवः।

इतोऽन्योऽनुभवः कश्चिदात्मनो नोपपद्यते।
अविज्ञातं[1] विजानतां विज्ञातारमिति श्रुतेः॥२२१॥
त्वंपदार्थविवेकाय [2]संन्यासः सर्वकर्मणाम्।
साधनत्वं ब्रजत्येवं शान्तो दान्तानुशासनात्॥२२२॥
त्वमर्थं प्रत्यगात्मानं पश्येदात्मानमात्मनि।
वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलम्॥२२३॥
सर्वमात्मेति वाक्यार्थे विज्ञातेऽस्य प्रमाणतः।
असत्त्वे ह्यन्यमानस्य विधिस्तं योजयेत् कथम्॥२२४॥
तस्माद्वाक्यार्थविज्ञानान्नोर्ध्वं कर्मविधिर्भवेत्।
नहि ब्रह्मास्मि कर्तेति विरुद्धे भवतो धियौ॥२२५॥

श्रुतेः स्वार्थे स्वतः प्रामाण्ये फलितमाह—**तस्मादात्मेति**। तस्य वक्तव्यमध्यक्षादिना केनचित्। असति विरोधे स्वार्थे यथार्थधीहेतुत्वादित्याह—**तथार्थमिति**॥२२०॥

वाक्यस्य परोक्षसंसर्गात्मकवस्तुबोधकत्वाद् ब्रह्मात्मनश्चापरोक्षासंसर्गात्मकत्वात्तत्प्रतिपत्तये प्रसङ्ख्यानादियुक्तमेवेत्याशङ्क्याह—**इतोऽन्योऽनुभवः**। वाक्यजन्यादसंसृष्टापरोक्षानुभवादिति यावत्। आत्मनोऽसंसृष्टापरोक्षस्वाभाव्यादित्यर्थः। तत्त्वमस्यादिवाक्यादेवाखण्डापरोक्षब्रह्मात्मप्रतिपत्तिरित्यत्र प्रमाणमाह—**अविज्ञातमिति**। बुद्ध्याद्यविषयस्यासंसृष्टापरोक्षस्य प्रत्यगात्मनो वाक्यादेवापरोक्षतेत्यर्थः॥२२१॥

यदुक्तं 'चर्या नोऽशास्त्रसंवेद्या स्यादि'ति (१६) तत्राह—**त्वं पदार्थेति**॥२२२॥

संन्यासोपायस्त्वंपदार्थविवेको वाक्यार्थज्ञाने साधनं कथमित्यपेक्षायां पदार्थज्ञानस्य वाक्यार्थज्ञानस्य च क्रमं दर्शयति—**त्वमर्थमिति**॥२२३॥

पदार्थविवेकद्वारा वाक्यार्थज्ञाने सति 'नियोगोऽप्रतिपन्नत्वादि'त्यादिनोक्तमयुक्तमित्याह—**सर्वमात्मेति**॥२२४॥

वाक्यार्थज्ञानादूर्ध्वं पुंसो नियोगायोग्यत्वे फलितमाह—**तस्माद्वाक्यार्थः**। तत्र हेतुमाह—**नहीति**॥२२५॥

---

१. स वेत्ति वेद्यं न च तस्यास्ति वेत्ता (श्वेता. ३.१९)।

२. त्वंपदार्थविवेकासिद्धौ कर्मसंन्यासो हेतुः, स च सम्भवति शान्तदान्तानुशासनद्वारा।

ब्रह्मास्मीति च विद्येयं नैव कर्तेति बाध्यते।
सकामो बद्ध इत्येवं प्रमाणाभासजातया॥२२६॥
शास्त्राद् ब्रह्मास्मि नान्योऽहमिति बुद्धिर्भवेद् दृढा।
यदा युक्ता तदैवंधीर्यथा देहात्मधीरिति॥२२७॥
सभयादभयं प्राप्तस्तदर्थं यतते च यः।
स पुनः सभयं गन्तुं स्वतन्त्रश्चेन्न[1] हीच्छति॥२२८॥
यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः।
पदार्थाज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः॥२२९॥
अतः सर्वमिदं सिद्धं यत् प्रागस्माभिरीरितम्॥२३०॥

द्वयोर्विरोधस्य तुल्यत्वाद् ब्रह्मास्मीति धीरेव कर्त्तास्मीति धिया कस्मान्न बाध्यते तत्राह—**ब्रह्मास्मीति**। यस्मादियं प्रमाणवस्तुपरतन्त्रत्वाद्विद्या तस्मात्प्रमाणाभास-जन्यया कर्त्तास्मीति धिया नैव बाध्यते, किन्तु कामसहितोऽहं कर्त्ता भोक्ता बद्धोऽस्मीत्येवं प्रमाणाभासेन जातत्वाद् भ्रान्तिरेषा धीः सा तया पूर्वोक्तया ब्रह्मास्मीति विद्यया बाध्या सम्यग्धिया भ्रान्तिबाध्यस्य प्रसिद्धत्वादित्यर्थः॥२२६॥

ब्रह्मास्मीति ज्ञानस्यैव बाधकत्वं न कर्त्ताऽस्मीति ज्ञानस्येत्युक्तमेव दृष्टान्तेन स्पष्टयति—**शास्त्राद् ब्रह्मास्मि**। ब्रह्मैवाहमस्मि न तु कर्त्ता भोक्ता वा ब्रह्मणो नान्योऽहमिति बुद्धिः यदा तत्त्वमस्यादिशास्त्रादतिदृढोत्पद्यते तदा सकामो बद्धो स्मीत्येवं धीर्न युक्ता। यथा देहव्यतिरिक्तकर्तृत्वभोक्तृत्वबुद्धौ सत्यां देह एवात्मेति धीर्भवतां विरुध्यते तथा ब्रह्मास्मीति बुद्धौ कर्त्ता भोक्तास्मीति बुद्धिर्विरुद्धा न सिद्ध्यतीत्यर्थः॥२२७॥

अवगतब्रह्मात्मभावस्य नानुष्ठानं सिद्ध्यतीत्यत्र दृष्टान्तमाह—**सभयाद-भयमिति**। जिज्ञासोर्ज्ञानिनश्च क्रियाशेषत्वमुक्तन्यायादनुपपन्नमित्यर्थः॥२२८॥

यदुक्तं प्रसङ्ख्यानाभियोगेन संन्यासी न नियुक्तश्चेद्यथेष्टाचरणप्राप्तिरिति तत्राह—**यथेष्टाचरणप्राप्तिः**। न तावज्जिज्ञासोः संन्यासिनो यथेष्टचेष्टाप्राप्तिः। संन्यासविधौ शमादिविधौ न प्रत्यर्थिनि सति तदयोगात्। कर्मभिर्वेदोक्तैरीश्वरार्थैः संस्कृतस्य विशुद्धान्तःकरणस्य विहितेष्वपि कर्मसु प्रवृत्तिरहितस्य कुतो निषिद्धेषु प्रवृत्तिरित्यर्थः। किञ्च पदार्थविषयेणाज्ञानेन वाक्यार्थानुभवे प्रतिबद्धस्य विक्षिप्तस्य

---

१. भयादात्मानात्मज्ञानादुपरतो न पुनस्तदर्थं यतते।

योो हि यस्माद्विरक्तः स्यान्नासौ तस्मै[1] प्रवर्तते।
लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते॥२३१॥
क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति।
मृष्टान्नध्वस्ततृड् जानन् नामूढस्तज्जिघत्सति॥२३२॥
वेदान्तवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमम्।
उज्जहारालिवद्यो नस्तस्मै सद्गुरवे नमः॥२३३॥

वाक्यार्थानुभवमेवार्थयमानस्य त्वंपदार्थविचारपुरःसरं वाक्यार्थानुभवोपार्जने व्यग्रत्वान्न यथेष्टचेष्टा जिज्ञासोर्युज्यते। ज्ञानिनस्तु 'नैव किञ्चित् करोमी'त्यनुभवाद्भिक्षाचरणेऽपि न कर्तृत्वं कुतो यथेष्टाचरणम्? शरीरस्थितिस्तु प्रारब्धेनाज्ञानलेशकृतेन कर्मणा घटिष्यते। न च तद्वशादेव यथेष्टचेष्टाचरणं तद्धेतुकर्मारब्धो शरीरे ज्ञानस्य विरुद्धत्वादित्याह—**पदार्थज्ञानेति**॥२२९-२३३॥

॥ इत्यष्टादशं तत्त्वमसिप्रकरणम्॥१८॥

---

१. सर्वकर्मविरक्तो निषिद्धे कर्मण्यपि न प्रवर्तते।

अथैकोनविंशं तृष्णाज्वरनाशकप्रकरणम्

प्रयुज्य तृष्णाज्वरनाशकारणं चिकित्सितं ज्ञानविरागभेषजम्।
न याति[1] कामज्वरसन्निपातजां शरीरमालां शतयोगदुःखिताम्॥१॥
अहं ममेति त्वमनर्थमीहसे परार्थमिच्छन्ति तवान्य ईहितम्।
न तेऽर्थबोधो न हि मेऽस्ति चार्थिता ततश्च युक्तः शम एव ते मनः॥२॥
यतो न चान्यः परमात् सनातनात् सदैव तृप्तोऽहमतो न मेऽर्थिता।
सदैव तृप्तश्च न कामये हितं यतस्व चेतः प्रशमाय ते हितम्[2]॥३॥
षडूर्मिमालाभ्यतिवृत्त एव यः स एव चात्मा जगतश्च नः श्रुतेः।
प्रमाणतश्चापि मया प्रवेद्यते मुधैव तस्माच्च मनस्तवेहितम्॥४॥

तृष्णाज्वरनाशकप्रकरणम्

तत्त्वमसिवाक्यादेवाखण्डापरोक्षमद्वितीयं ब्रह्माहमस्मीति साक्षादवगमान्निवृत्ताज्ञानतत्कार्यः स्वतो मुक्त एव मुच्यत इत्युक्तम्। इदानीमात्ममनःसंवादव्याजेन प्रकरणान्तरं चिकिर्षुस्तत्र प्रयोजनमाह—**प्रयुज्येत्यादिना श्लोकेन**॥१॥

विशिष्टं चिकित्सितं कृत्वा शरीरमालाशतैर्योगात् सुदुःखितां विशेषणवतीं न यातीत्युक्तम्। तत्र चिकित्सनप्रकारमात्ममनःसंवादेन दर्शयति—**अहं ममेत्यादि**। भो मनस्त्वमहं ममेति व्यर्थमीहसे। अतस्तव चेष्टितं पुरुषशेषमिच्छन्ति साङ्ख्यास्तदयुक्तम्। अस्योपकारं करोमीति तव जडत्वेन बोधाभावान्मम चोदासीनत्वेनार्थिताऽभावादित्युक्तमुपजीव्य फलितमाह—**ततश्चेति**॥२॥

किमित्यात्मनो भोगापवर्गापेक्षा नास्तीत्यपेक्षायामाह—**यतो न चान्य इत्यादि**॥३॥

किमित्यात्मा मनो बोधयति तत्राह—**षडूर्मिमाला**। अशनायापिपासाशोकमोहजरामृत्यवः षडूर्मय इव तन्मालाभ्योऽभ्यतिवृत्तो योऽयं परमात्मा स एव नोऽस्माकं जगतश्चात्मा मया प्रमाणेन प्रवेद्यते। प्रमाणमेवाह—**श्रुतेरिति**।

---

१. तृष्णाज्वरनाशकारणभूतं ज्ञानविरागभेषजमवाप्य न पुनः रूपज्वरसन्निपातजां गच्छति।
२. अधिकं. पा.।

त्वयि प्रशान्ते नहि चास्ति भेदधीर्यतो जगन्मोहमुपैति मायया।
ग्रहो हि मायाप्रभवस्य कारणं ग्रहाद्विमोके नहि साऽस्ति कस्यचित्॥५॥
न मेऽस्ति मोहस्तव चेष्टितेन हि प्रबुद्धतत्त्वस्त्वसितो ह्यविक्रियः।
न पूर्वतत्त्वोत्तरभेदता हि नो वृथैव तस्माच्च मनस्तवेहितम्॥६॥
यतश्च नित्योऽहमतो न चान्यथा विकारयोगे हि भवेदनित्यता।
सदा प्रभातोऽहमतो हि चाद्वयो विकल्पितं चाप्यसदित्यवस्थितम्॥७॥
अभावरूपं त्वमसीह हे मनो निरीक्ष्यमाणे न हि युक्तितोऽस्मिता।
सतो ह्यनाशादसतोऽप्यजन्मतो द्वयं च चेतस्तव नास्तितेष्यते॥८॥

प्रमाणशब्देनानुभवो गृह्यते। चशब्देन स्मृतिरुच्यते। अपिशब्देन न्यायः समुच्चितः। जीवेश्वरयोरभेदेन जीवस्यार्थित्वाभावे फलितं निगमयति—**मुधैवेति**॥४॥

अशनायादीनामात्मसम्बन्धित्वेन प्रतीयमानानां कथमात्मधर्मत्वं वारयितुं शक्यमित्याशङ्क्य भेदधीमूलत्वाद्भेदधियश्च मनोऽनुविधायित्वादित्याह—**त्वयि प्रशान्ते**। यतो यस्याः भेदबुद्धेर्मोहमाकुलीभावं मायया मृषैवेत्यर्थः। भेदधियो व्याकुलतोत्पादहेतुत्वमन्वयव्यतिरेकाभ्यां साधयति—**ग्रहो हीत्यादिना**। ग्रहो भेदबुद्धिः। मायाप्रभावो व्याकुलतोत्पादः। सेति व्याकुलतोच्यते॥५॥

इतश्च भो मनस्त्वया वृथैव चेष्टितमित्याह—**न मेऽस्ति मोहस्तव**। असितो बन्धरहितः। पूर्वतत्त्वं पूर्वावस्था, उत्तरभेद उत्तरावस्था। तयोरुद्भवो यस्मान्न विद्यते। तस्मादविक्रियोऽहं तस्माच्च मनश्चेष्टितं व्यर्थमित्यर्थः॥६॥

नित्यत्वाच्चात्मनो नान्यथाभावोऽस्तीत्याह—**यतश्चेति**। आत्मनो नित्यत्वादन्यथाभावो विकारो नास्तीत्युक्त्वा विकाराङ्गीकारे नित्यत्वानुपपत्तिमाह—**विकारेति**। किञ्चात्मनः सर्वदा चैतन्यैकतानत्वादद्वितीयत्वमेष्टव्यमित्याह—**सदा प्रभात इति**। कार्यकारणात्मके द्वैतप्रपञ्चे जाग्रति कुतोऽद्वितीयत्वं तत्राह—**विकल्पितं चेति**। द्वैतस्य द्वैतत्वादेव चन्द्रद्वैतवन्मिथ्यात्वावगमादवस्थितमात्माद्वैतमविरुद्धमित्यर्थः॥७॥

मनसाऽऽत्मनः सद्वितीयत्वमाशङ्क्याह—**अभावरूपमिति**। युक्तितो निरीक्ष्यमाणे सति मनसो वस्तुतोऽस्तिता नास्तीत्येतदेव स्पष्टयति—**ततो हीति**। तथापि

---

२. जीवात्मपरमात्मनोर्भेदबुद्धिप्रयोजकं मनः, तस्मिन् प्रशान्ते सति भेदबुद्धिनाशः ततश्च जगन्मोहं नोपेति। 'प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्। उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्॥' (गीता. ६.२७)।

द्रष्टा च दृश्यं च तथा च दर्शनं भ्रमस्तु सर्वस्तव कल्पितो हि सः।
दृशेश्च भिन्नं न हि दृश्यमीक्ष्यते स्वपन् प्रबोधेन तथा न भिद्यते॥९॥
विकल्पना वाऽपि तथाऽद्वया भवेदवस्तुयोगात्तदलातचक्रवत्।
न शक्तिभेदोऽस्ति यतो न चाऽऽत्मनां ततोऽद्वयत्वं श्रुतितोऽवसीयते॥१०॥
मिथश्च भिन्ना यदि ते हि चेतनाः क्षयस्तु तेषां परिमाणयोगतः।
ध्रुवो भवेद्भेदवतां हि दृष्टतो जगत्क्षयश्चापि समस्तमोक्षतः॥११॥

मनसि किमायातमित्याशङ्क्याह—**द्वयं चेति**। यस्माज्जन्मनाशाख्यं द्वयं तेऽस्ति अतः सदसद्वैलक्षण्येनानिर्वाच्यत्वात्तव परमार्थसत्त्वमद्वैतविरोधि नेष्टमित्यर्थः॥८॥

द्रष्टादृश्यमित्यादिप्रपञ्चस्य प्रमाणोपलब्धत्वादसत्त्वानुपपत्तेरात्मनोऽद्वितीयत्वं न सिद्ध्यतीत्याशङ्क्याह—**द्रष्टा चेति**। कल्पितो ह्ययमिति पाठः। त्रिविधो हि प्रपञ्चो मनोविकल्पितो यस्मादसौ सर्वोऽपि भ्रान्तिसिद्धो मिथ्यैवेति नात्मन्यद्वितीये कश्चिद्विरोधोऽस्तीत्यर्थः। किञ्च यथा स्वपन् पुरुषो दृशेर्भिन्नं दृश्यं नैवेक्षते तथा प्रबोधेऽपि सतो भिन्नं दृश्यं न प्रतीयते[1]। भेदग्राहिप्रमाणस्य दुष्प्रतिपादत्वात् तेन प्रतीतिमात्रमेव द्वैतमित्याह—**दृशेश्चेति**॥९॥

विकल्पनाया द्वितीयस्याविद्यमानत्वान्नाद्वैतसिद्धिरित्याशङ्क्याह—**विकल्पना वापि**। यथा न रजतभुजङ्गादिकल्पनाऽधिष्ठानातिरेकेणान्यत्रास्ति तथेयमपि नाद्वयाधिष्ठानव्यतिरेकेण वस्तुतो भवति। तथा चावस्तुत्वात्तस्या न वस्त्वद्वैतविरोधितेत्यर्थः। कल्पनाया वस्तुत्वाभावे दृष्टान्तमाह—**तदिति**। तच्च लोके यथाऽलातस्योल्मुकस्य भ्रमतश्चक्राकारता न पृथग्वस्तु विद्यते तथा कल्पनाऽप्यद्वयाधिष्ठानव्यतिरेकेण न वस्तुत इत्यर्थः। दृष्टिः श्रुतिर्मतिरित्यादिशक्तिभेदात्प्रतिशरीरमात्मना भेदप्रतीतेश्च नाद्वयत्वमित्याशङ्क्याह—**न शक्तिभेद इति**। न हि दृष्ट्यादिशक्तीनां भेदो [2]दृष्ट्यादीनां स्वप्रकाशात्ममात्रत्वात्। न चात्मनां भिन्नत्वमौपाधिकभेदेन व्यवस्थोपपत्तेः। भेदे प्रमाणाभावात् प्रमाणविरोधाच्चेत्यर्थः॥१०॥

आगमविमुखानामात्मभेदकल्पनां प्रत्याह—**मिथश्च भिन्ना इति**। वस्तुतः परिच्छिन्नत्वादात्मनां क्षयोऽवश्यंभावीत्यत्र व्याप्तिमाह—**भेदवतामिति**। अनन्तैर्गतकल्पैरनन्तानामात्मनां मुक्तत्वादिदानीं जगत्क्षयश्च स्यात्तदा (इति) दोषान्तरमाह—**जगदिति**॥११॥

---

१. स्वप्नप्रपञ्चवज्जागरितप्रपञ्चोऽपि वृत्त्यवच्छिन्ने चैतन्येऽध्यस्तः। २. दृश्यादि।

न मेऽस्ति कश्चिन्न च सोऽस्मि कस्यचिद्यतोऽद्वयोऽहं न हि चास्ति कल्पितम्।
अकल्पितश्चास्मि पुरा प्रसिद्धितो विकल्पनाया द्वयमेव कल्पितम्।।१२।।
विकल्पना चाप्यभवे न विद्यते सदन्यदित्येवमतो न नास्तिता।
यतः प्रवृत्ता तव चापि कल्पना पुरा प्रसिद्धेर्न च तद्धि कल्पितम्।।१३।।
असद्द्वयं तेऽपि हि यद्यदीक्ष्यते न दृष्टमित्येव न चैव नास्तिता।
यतः प्रवृत्ता सदसद्विकल्पना विचारवद्वाऽपि तथाऽद्वयं च सत्।।१४।।
सदभ्युपेतं भवतोपकल्पितं विचारहेतोर्यदि तस्य नास्तिता।
विचारहानाच्च तथैव संस्थितं न चेत्तदिष्टं नितरां सदिष्यते।।१५।।

ननु तवापि जगज्जीवेश्वरादिभेदस्य विद्यमानत्वाद् दोषसाम्यमित्याशङ्क्याह— **न मेऽस्ति कश्चित्।** न च कल्पिते सति कुतोऽद्वयत्त्वमिति युक्तम्। तस्य कल्पितत्वादेव वस्तुत्वाभावस्योक्तत्वादित्याह—**नहीति**। कल्पितविभागस्य तर्कासहत्वमिष्टमेव; पारमार्थिकं वस्तु सर्वव्यवहारातीतम्। अद्वितीयत्वादित्यर्थः। द्वैतवदद्वैतस्यापि पदार्थत्वाविशेषात्कल्पितत्वं स्यादित्याशङ्क्याह—**अकल्पितश्चास्मि**। प्रागेव कल्पनायाः सिद्धत्वादात्मवस्तुनोऽकल्पितत्वात् कल्पनानन्तरोपलब्धं द्वैतमेव कल्पितमित्यर्थः।।१२।।

किञ्च सदन्यद्वेत्यादिकल्पनागोचरत्वाभावादपि नात्मनोऽस्ति कल्पितत्वं तस्य सदेकतानत्वादित्याह—**विकल्पना चापि**। अभवे जन्मविनाशादिरहिते वस्तुनीति यावत्। किञ्च भो मनस्तवापि कल्पना यतः प्रवृत्ता तदात्मवस्तु न कल्पितं तव विकल्पनाधिष्ठानत्वेन पूर्वमेव सिद्धत्वादित्याह—**यतः प्रवृत्ता**।।१३।।

इतश्चात्मवस्तुनो नासत्वं तदसत्त्वहेतोर्दृश्यत्वस्य तस्मिन्नसत्त्वादित्याह— **असद्द्वयमिति**। हे मनस्तवापि यद् यद् दृश्यं तदेव द्वयमसद्भवति। अद्वैतं त्वात्मतत्त्वं त्वया न दृष्टं इत्यनेनैव हेतुना तस्य नास्तिता न प्रतिज्ञातुं शक्यते। तस्य परमार्थसद्भावोऽभ्युपगन्तव्य इत्यर्थः। किञ्च, यतः प्रवृत्ता सदसद्विकल्पना तस्य सत्त्वेन भवितव्यं निरधिष्ठानभ्रमायोगात्। यथाविचारमन्तरेण निर्णयानुपपत्तेः सोऽभ्युपगम्यते। चशब्दादपिशब्दाच्च रज्वादिकं यथाऽधिष्ठानमिति दृष्टान्तबाहुल्यं दर्शयति। यथा च सर्पादिबाधो रज्ज्वाद्यवधिर्दृश्यते तथा सदसद्द्वयद्वैत-निषेधावधिरिष्यते। नेत्येवं निषेधादर्शनादित्याह—**यतः प्रवृत्ता**।।१४।।

किञ्च, लोके विचारोऽपि सन्मात्रे प्रतिपन्ने विशेषविषयो दृश्यते। तेन विचारसिद्ध्यर्थं सदेकं सर्वस्य सिद्धमित्याह—**सदभ्युपेतमिति**। तदेव विपक्षे

असत्समं चैव सदित्यपीति चेदनर्थवत्त्वान्नरशृङ्गतुल्यतः।
अनर्थवत्त्वं त्वसति ह्यकारणं न चैव तस्मान्न विपर्ययेऽन्यथा॥१६॥
असिद्धतश्चापि विचारकारणाद् द्वयं च तस्मात्प्रसृतं च मायया।
[१]श्रुतेः स्मृतेश्चापि तथा हि युक्तितः प्रसिद्ध्यतीत्थं न तु युज्यतेऽन्यथा॥१७॥
विकल्पनाच्चापि विधर्मकं श्रुतेः पुरा प्रसिद्धेश्च विकल्पतोऽद्वयम्।
न चेति नेतीति यथा विकल्पितो निषिद्ध्यतेऽत्राप्यविशेषसिद्धये॥१८॥

दोषोक्त्या व्यक्तीकरोति—**यदीति**। तस्य सतो नास्तिता यदि स्यात्तदा विचारहानं विषयाभावादापद्येत [२]तदापि तन्मात्रं स्थितमेव। विचारमन्तरेणासत्वानिश्चयादित्यर्थः। विचारहानं चेन्नेष्टं तर्हि विचारस्यालम्बनत्वेन साक्षित्वेन च सदेष्टव्यमित्याह—**न चेदिति**॥१५॥

यदर्थक्रियाकारि तत्सद्विपरीतमसदिति मतमनुवदति—**असत्सममिति**। विमतं सदसत्समं अर्थक्रियाशून्यत्वात्खरशृङ्गवदित्यर्थः। अर्थक्रियाशून्यत्वमसत्त्वे प्रयोजकं मानं न भवति। क्रियोत्पत्तेः पूर्वमुदासीनवस्तुदर्शनादन्योन्याश्रयाच्चेत्याह—**अनर्थवत्त्वमिति**॥१६॥

विचारहेतुत्वाद् मामया जगदुपादानत्वाच्चासिद्धो हेतुरित्याह—**असिद्धतः**। ब्रह्मणो मायया जगद्धेतुत्वमित्येवं कुतः सिद्ध्यतीत्यपेक्षायामाह—**श्रुतेः स्मृतेरिति**। युक्तिभिः प्रकृतिश्चेत्यादिभिः। ब्रह्मणो जगद्धेतुत्वं हित्वाऽन्यथा प्रधानादेर्जगद्धेतुत्वं नैव युज्यते। रचनानुपपत्त्यादिन्यायविरोधादित्याह—**न त्विति**॥१७॥

सर्वविकल्पहेतुत्वादद्वयस्य तद्युक्तं स्यात्कार्यकारणयोः सम्बन्धस्यावश्यकत्वादित्याशङ्क्याह—**विकल्पनाच्च**। विधर्मकं विरुद्धस्वभावकं वस्तुतस्तदस्पृष्टमित्यर्थः। तत्रास्थूलादिवाक्यं प्रमाणयति—**श्रुतेरिति**। विकल्पनापेक्षाया पूर्वमेवाद्वयस्य तदसंसृष्टस्य सिद्धत्वाच्च वस्तुतो विकल्पनासंस्पर्शशून्यमद्वयं सिद्ध्यतीति श्रुतिसिद्धेऽर्थे युक्तिमाह—**पुरेति**। श्रुतेः समस्तविकल्परहितमात्मतत्त्वमित्युक्तं तदेव प्रपञ्चयति न चेति। यथा सत्यज्ञानादिवाक्येन निर्विशेषं ब्रह्म बोद्ध्यते तथा वीप्सारूपेण निषेधवाक्येनास्मिन् ब्रह्मात्मनि सर्वं कल्पितं निषिद्ध्यते। सर्वस्यापि निषिद्धस्यात्मावशेषः समाप्तिरिति प्रतिपत्त्यर्थमित्यर्थः॥१८॥

---

१. आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, (तै. ३.६)।

२. अधिष्ठानाभावे विषयप्रत्ययो नं स्यात्। सद्रूपं चैतन्यमेव तत्तद्वृत्त्यवच्छिन्नत्वेनाधिष्ठानमिति। रज्ज्वाद्युपाधिभिर्न चैतन्यभेदः।

अकल्पितेऽप्येवमजेऽद्वयेऽक्षरे विकल्पयन्तः सदसच्च जन्मभिः।
स्वचित्तमायाप्रभवं च ते भवं जरां च मृत्युं च नियान्ति सन्ततम्।।१९।।

भवाभवत्वं तु न चेदवस्थितिर्न चास्य चान्यस्थिति जन्म नान्यथा।
सतो ह्यसत्त्वादसतश्च सत्त्वतो न च क्रियाकारकमित्यतोऽप्यजम्।।२०।।

अकुर्वदिष्टं यदि वाऽस्य कारकं न किञ्चिदन्यन्ननु नास्त्यकारकम्।
सतोऽविशेषादसतश्च सच्च्युतौ तुलान्तयोर्यद्वदनिश्चयान्न हि।।२१।।

यथोक्ते श्रुत्यर्थेऽपि ये विकल्पयन्ति ते महान्तमनर्थं प्राप्नुवन्तीत्याह—**अकल्पितेति**।।१९।।

किञ्च ब्रह्माजमद्वितीयमभ्युपगन्तव्यम्। जन्मनो दुर्निरूपत्वात्तस्य हि जन्मान्यदस्ति न वेति विकल्प्याद्यं प्रत्याह—**भवाभवत्वमिति**। जातस्य जन्मनो जनिराहित्यमभवत्वं न चेदिष्यते तदाऽवस्थितिर्न स्यात्तस्य भावस्यान्यो भवोऽस्तीति अनवस्था स्यादित्यर्थः। यदि पुनर्भवस्य जन्मनो नान्यो भवो जन्मास्तीत्यनवस्थासमाधिस्तदापि न जन्म सम्भवति सज्जन्मपक्षे नाशावश्यंभावे सतोऽसत्त्वापातात्। असज्जन्मपक्षे च जन्मनः सत्त्वापत्तिरूपत्वादसतः सत्त्वप्रसङ्गात्। न च स्वाभावहानमुपपद्यते निःस्वरूपत्वापत्तेरित्याह—**जन्मेत्यादिना**। जन्म नाम क्रिया धात्वर्थत्वात्। जन्मैव जायत इत्युक्ते क्रिया कारकमित्युक्तं भवति। तच्च नोपपद्यते द्वैरूप्यानुपपत्तेरेकस्येत्येतदाह—**न चेति**।।२०।।

इतश्चाजं वस्तु स्वीकर्त्तव्यमित्याह—**अकुर्वत्**। अस्य जन्मनो यत्कारकं तदकुर्वत्कुर्वद्वा? यद्यकुर्वदिष्टं तदा न किञ्चिदन्यदकारकं स्यात्, किन्तु सर्वमेव कारकं भवेत्, तदेव स्फुटयति—**नन्विति**। किं तदकुर्वत्कारकं सदसद्वा? सच्चेत् तस्य विशेषाभावात् कार्यमपि सर्वदा स्यात् न वा कदाचिदपीत्याह—**सत इति**। असच्चेदकुर्वत् कारकं तदापि तस्य विशेषाभावादुक्तदोषतादवस्थ्यमित्याह—**असतश्चेति**। ननु कारकस्याकुर्वतो यदकुर्वत्त्वं पूर्वं सदवस्थितं तस्य प्रच्युतौ सत्यां कुर्वत्त्वे सति कार्यमुत्पाद्येत तथा च कुर्वत्कारकमिति पक्षे न किञ्चिदघमिति मन्वानः शङ्कते—**सच्च्युताविति**। कारकस्य सत्त्वाभावे तद्गतस्य कुर्वत्त्वस्यापि सत्त्वायोगात् कारकत्वे कुर्वत्वे च सत्येव कार्योत्पत्तौ तुलाकोट्योः नमनोन्नमनयोरिव कार्यकारणयोर्यौगपद्यादिकं कार्यमिदं कारणमिति निश्चयायोगान्न कार्यकारणत्वसिद्धिरित्युत्तरमाह—**तुलान्तयोरिति**।।२१।।

न चेत्स इष्टः सदसद्विपर्ययः कथं भवः स्यात्सदसद्व्यवस्थितौ।
विभक्तमेतद्द्वयमप्यवस्थितं न जन्म तस्माच्च मनो हि कस्यचित्॥२२॥
अथाऽभ्युपेत्याऽपि भवं तवेच्छतो ब्रवीमि नार्थस्तव चेष्टितेन मे।
न हानवृद्धी न यतः स्वतोऽसतो भवोऽन्यतो वा यदि वाऽस्तिता तयोः॥२३॥
ध्रुवा ह्यनित्याश्च न चान्ययोगिनो मिथश्च कार्यं न च तेषु युज्यते।
अतो न कस्यापि हि किञ्चिदिष्यते स्वयं च तत्त्वं न निरुक्तिगोचरम्[1]॥२४॥

यदि कारकगतं कुर्वत्त्वं पूर्वं पश्चाद्भावि कार्यमिति क्रमभावित्वमिष्टं तदा कुर्वत्त्वस्यापि सदाभावे तत्कार्यस्यापि सदाभावित्वप्रसक्त्या कादाचित्कत्वेन कुर्वत्त्वान्तरापेक्षायामनवस्थानाच्च सत्सदेवासच्चासदेव तयोः स्वरूपविपर्यासो नोपपद्यते सर्वप्रमाणविरोधात् तथा च तयोः स्वस्यासाधारणेनाकारेणावस्थाने भवो न सम्भवीत्याह—**न चेत् स इति**। कथमित्युक्तामेवानुपपत्तिं व्यनक्ति—**विभक्तमिति**॥२२॥

इच्छतो मनसोऽपेक्षावशाज्जन्माभ्युपगमेऽपि स्वपक्षे न कश्चिद्दोषोऽस्तीत्याह—**यथाभ्युपेत्य**। कथं मनश्चेष्टितेन तवार्थो नास्ति हानेः वृद्धेर्वा सम्भवादित्याशङ्क्य न कर्मणा वर्धते नो कनीयानिति श्रुतेर्न हानिवृद्धी प्रत्यगात्मनः स्यातामित्याह—**न हानवृद्धी इति**। किञ्च हानं वृद्धिश्चैत्यस्य द्वयं, तस्यासत्त्वं सत्त्वं वा? यद्यसत्त्वं तदा तस्य स्वतोऽन्यतो वा भवो यतो न सम्भवति असत्त्वान्नरविषाणवत्। अतो नासत्त्वपक्षो युक्तिमानित्याह—**नेत्यादिना**। यदि हानं वृद्धिश्चेत्युभयोरस्तिता सत्ता स्वीक्रियते। तथापि सत्त्वादेव मनश्चेष्टितं वृथैवेत्याह—**यदीति**॥२३॥

सम्बन्धानिरूपणादपि न हानादिसम्भावना प्रत्यगात्मनोऽस्तीत्याह—**ध्रुवा ह्यनित्याः**। कूटस्थाः निर्विकारत्वान्नान्ययोगिनः। क्षणिकाश्च नान्ययोगिनः सम्बन्धकालपर्यन्तमवस्थानासम्भवात्। मिथश्च ध्रुवाविनाशिनो वा न सम्बन्धिनः, सम्बन्धस्य सम्बन्धत्वासम्बन्धत्वाभ्यां दुर्निरूपत्वादत एव न तदाश्रयं किञ्चित्कार्यं स्यादित्यर्थः। पूर्वोक्तन्यायेन सम्बन्धवैधुर्ये सर्वमपि वस्तु विशकलितं स्यादित्याह—**अत इति**। किञ्च स्वयमात्मस्वरूपतत्त्वं परमार्थरूपं निश्चयेन परमार्थवृत्त्या न शब्दगोचरतामाचरति सम्बन्धराहित्यादेवेत्याह—**स्वयं चेति**॥२४॥

१. अवेद्यस्वरूपत्वात् तत्त्वस्य।

समं तु तस्मात् सततं विभातवद् द्वयाद्विमुक्तं सदसद्विकल्पितात्।
निरीक्ष्य युक्त्या श्रुतितस्तु बुद्धिमानशेषनिर्वाणमुपैति दीपवत्।।२५।।
अवेद्यमेकं यदनन्यवेदिनां कुतार्किकाणां च सुवेद्यमन्यथा।
निरीक्ष्य चेत्थं त्वगुणग्रहोऽगुणं न याति मोहं ग्रहदोषमुक्तितः।।२६।।
अतोऽन्यथा न ग्रहनाश इष्यते विमोहबुद्धेर्ग्रह एव कारणम्।
ग्रहोऽप्यहेतुस्त्वनलस्त्वनिन्धनो यथा प्रशान्तिं परमां तथा व्रजेत्।।२७।।
विमथ्य वेदोदधितः समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः।
तथाऽमृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः।।२८।।

किञ्च प्रागुक्तनीत्या निरुक्तिगोचरत्वाभावात् द्वयात् सदसदित्येवं विकल्पिताद् व्यावृत्तमात्मतत्त्वमास्थेयम्। ततश्च निर्विशेषं तत्परमार्थस्वरूपं स्वप्रकाशत्वेनैव सिद्ध्यतीत्याह—**समं त्विति**। यस्मादेवं सर्वदोषरहितमात्मतत्त्वं तस्मात्तत्परिज्ञानान्मुक्तिरित्याह—**निरीक्ष्येति**। युक्तिर्मननं, श्रुतिः श्रवणं ताभ्यां निदिध्यासनसहिताभ्यामात्मानं निरीक्ष्य बुद्धिर्निःशेषज्ञानतत्कार्यनिवृत्त्या स्वरूपेणावतिष्ठते। यथा दीपस्तैलादिनिवृत्तौ तेजोमात्ररूपेण तिष्ठतीत्यर्थः।।२५।।

कथमात्मनिरीक्षणं विषयत्वेनाविषयत्वेन वेत्याशङ्क्याह—**अवेद्यमिति**। अन्यथा वेद्यत्वेनेत्यर्थः। इत्थमवेद्यत्वेनानन्यत्वेन वाऽऽत्मानमगुणं निरीक्ष्य स्वयमगुणग्रहो गुणेषु सत्त्वादिषु सविकारेषु ग्रहोऽभिनिवेशस्तद्रहितो मोहं नायातीत्याह—**निरीक्ष्येति**। विदुषः साक्षित्वाद्यभिमानाभावे मिथ्याज्ञानादज्ञानकार्यान्निवृत्तिं हेतुमाह—**ग्रहेति**।।२६।।

किमिति महता यत्नेनाविषयत्वेन ब्रह्मात्मनो वेदनमुच्यते तत्राह—**अतोऽन्यथा**। उक्तलक्षणाद् ब्रह्मज्ञानात् प्रकारान्तरेण ग्रहस्य मिथ्याज्ञानस्य नाशो नेष्यते चेत् तन्नाशो मा भूदित्याशङ्क्य विमोहबुद्धेराकुलीभावरूपाया ग्रह एव मिथ्याज्ञानमेव कारणं ततो ग्रहानिवृत्तौ मोक्षासिद्धिरित्याहं—**विमोहेति**। ननु ब्रह्मात्मज्ञानेन तदज्ञानमेव निवर्तते न ग्रहो मिथ्याज्ञानमविरोधादिति तत्राह—**ग्रहोऽपीति**। यथाऽग्निरनिन्धनो निवृत्तिमात्यन्तिकीं गच्छति तथा ग्रहोऽपि मिथ्याज्ञानात्मकः स्वकारणाज्ञाननिवृत्तौ हेत्वाभावादात्यन्तिकीं निवृत्तिं गच्छेत्, उपादाननिवृत्त्यैव कार्यस्यात्यन्तिकी निवृत्तिरित्यङ्गीकारादित्यर्थः।।२७।।

पद्यभागपरिसमाप्तावपि गुरून् नमस्यति—**विमथ्य यथा**। पुरा महात्मभि-

१. मिथ्याज्ञानानिवृत्तौ पुनर्मोहमुपगच्छेत्।

रक्षुद्रचित्तैः सुरैरिन्द्रादिभिर्महाब्धिर्नाम क्षीरोदधिस्ततो मथित्वा प्रसिद्धममृतं समुद्धृतं तथा वेदनामधेयादुदधेरालोड्य ज्ञानमिदममृताख्यं यैर्गुरुभिरुद्धृतं यैश्च परब्रह्म प्रत्यक्त्वेन करतलामलकवदपरोक्षमीक्षितं तेभ्यो गुरुभ्यस्त्रिविधोऽपि प्रह्वीभावो भूयादित्यर्थः॥२८॥

॥ इत्येकोनविंशतितमं तृष्णाज्वरनाशकप्रकरणम्॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्द-
पूज्यपादशिष्यभगवदानन्दज्ञानविरचिता
श्रीसहस्रीपद्यभागटीका समाप्ता॥

सत्यज्ञानानन्दपूर्णानाद्यन्तं द्वैतवर्जितम्।
ब्रह्माहमस्म्यहं ब्रह्मास्म्यसङ्गो नित्ययुक्ता॥
(मुक्तकः)

●

श्रीशङ्करभगवत्पादाचार्यविरचिता

उपदेशसाहस्री

अथ शिष्यानुशासनं नाम प्रथमं प्रकरणम्

(गद्यभागः)

अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय।।१।।

तदिदं मोक्षसाधनं ज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदम-दयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसम्पन्नाय शुचये ब्राह्मणाय

श्रीभगवदानन्दज्ञानाचार्यकृता टीका

ॐ सर्वोपनिषदर्थसारसङ्ग्राहिका गद्यपद्यात्मिका हीयमुपदेशसाहस्री। तत्र पद्यभागं प्रागुक्तया परिपाट्या परिसमाप्य[१] गद्यभागमवतारयन् भगवान् भाष्यकार-स्तावदोङ्कारश्चाथ शब्दश्चेत्यादिस्मृतिप्रामाण्यादथशब्दोच्चारणरूपं मङ्गलाचरणं कृत्वा चिकीर्षितप्रतिज्ञां प्रकरोति—**अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामः**। तत्र प्रवृत्त्यङ्गत्वेनाधिकार्याद्यनुबन्धं सूचयति—**मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय**।।१।।

तेषामुपकाराय मोक्षार्थज्ञानोपदेशप्रकारव्याख्याने स्थिते प्रथमं शिष्यानुशासन-प्रकरणं प्रारिप्सुः शिष्याय कीदृशाय विद्या वक्तव्येत्याशङ्कायामाह—**तदिदं मोक्षसाधनं ज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदमादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसम्पन्नाय शुचये ब्राह्मणाय विधिवदुपसन्नाय जातिकर्मगुणवृत्तविद्याभिजनैः परीक्षिताय शिष्याय ब्रूयात् यावद् ग्रहणं दृढीभवति**।

मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रूयादिति सम्बन्धः। साधनसाध्यादित्यादिविशेषणानि हेतुहेतुमद्भावेन सम्बध्यन्ते। पारिव्राज्यविशेषणञ्च गृहस्थादीनां मुख्याधिकारनिषेधार्थम्।

---

१. पुनः पुनरात्मतत्त्वप्रतिपादनेन दृढीकरणाय पद्यभागमुक्त्वा गद्यभागमाह।

विधिवदुपसन्नाय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय शिष्याय ब्रूयात् पुनः पुनर्यावद्ग्रहणं दृढीभवति।।२।।

श्रुतिश्च–'परीक्ष्य....तत्त्वतो ब्रह्मविद्याम्' इति। दृढगृहीता हि विद्याऽऽत्मनः श्रेयसे सन्तत्यै च भवति। विद्यासन्ततिश्च प्राण्यनुग्रहाय भवति, नौरिव नदीं तितीर्षोः। शास्त्रं च–'यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूयः' इति। अन्यथा च ज्ञानप्राप्त्यभावात् 'आचार्यवान् पुरुषो वेद'[1], 'आचार्याद्धैव विद्या

'नाविरक्ताय संसारान्नानिरस्तैषणाय च।
न चेदमव्रते देयं वेदान्तार्थप्रकाशनम्'।।

इति दर्शनात्। अद्वेष्टा सर्वभूतानां, अमानित्वमदम्भित्वमित्यादयः शास्त्रप्रसिद्धाः शिष्यगुणा। क्षत्रियादेरधिकारेऽपि मुख्यत्वाद् ब्राह्मणग्रहणम्। **विधिवदिति**। शास्त्रोक्तक्रमकथनम्। शास्त्रद्वारा विद्याधिकारः शूद्रादेर्नेति दर्शयितुं विशिनष्टि—**जातीति**। आचार्योपदेशस्य फलपर्यन्तत्वं सूचयति—**पुनः पुनर्यावद् ग्रहणं दृढीभवति**।।२।।

यथोक्तविशेषणविशिष्टोऽधिकारी ब्रह्मविद्यायामित्यत्र प्रमाणमाह—**श्रुतिश्च परीक्ष्य लोकान् तत्त्वतो ब्रह्मविद्यामिति**। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्। प्रोवाच तां तत्त्वतो ब्रह्मविद्यामित्येवं प्रकारा श्रुतिः उक्ते ब्रह्मविद्याधिकारिण्यस्तीत्यर्थः। यावद्ग्रहणं विद्याया दृढीभवति तावत्पुनः पुनराचार्यो ब्रूयादित्युक्तम्। तत्र हेतुमाह—**दृढगृहीता हि विद्याऽऽत्मनः श्रेयसे सन्तत्यै च भवति**। सन्ततिः शिष्यप्रशिष्यादिपरम्पराविच्छित्तिहानिः। तयापि सन्तत्या किं सिद्ध्यतीति तत्राह—**विद्यासन्ततिश्च प्राण्यनुग्रहाय भवति। नौरिव नदीं तितीर्षोः**। यथा नद्यां निमग्नस्य नदीं तितीर्षोः निस्तारहेतुरिष्टा नौः। तथा दुःखसमुद्रे निमग्नस्य प्राणिनः शिष्यप्रशिष्यादिलक्षणा विद्यासन्ततिरनुग्रहाय भवतीत्यर्थः। अधिकारिणः शूद्रत्वाशङ्कापरिहारार्थं जातिपरीक्षणं तस्यैव कुष्ठाद्यभावलिङ्गेन प्राक्तनं सुकृतित्वं ज्ञातव्यम्। वृतशब्दिताचारविचारेण संवादद्वारा विद्यादिनिरूपणेन च वैशिष्ट्यं द्रष्टव्यमित्यत्र प्रमाणमाह—**शास्त्रं च यद्यप्यस्मा इमामद्भि परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूयः** इति। यद्यपि विद्यागुरवे विद्यानिष्क्रयार्थमिमां पृथिवीं समुद्रपरिवेष्टितां वित्तपूर्णामेव दद्यात्तथाप्येतदेव विद्यादानं ततोऽधिकमिति शास्त्रस्थितेर्विशिष्टाधिकारिणे क्षेत्रमात्रस्यापि दातव्यत्वान्महाधनब्रह्मविद्यादाने विशिष्टाधिकार्यन्वेषणमावश्यकमिति भावः। किमित्याचार्येण ब्रह्मविद्या शिष्यमन्विष्य तस्मै

१. छान्दो. ६.१४.२।

विदिता', 'आचार्यः प्लावयिता तस्य सम्यग्ज्ञानं प्लव इहोच्यते' इत्यादिश्रुतिभ्यः, 'उपदेक्ष्यन्ति ते ज्ञानम्' इत्यादिस्मृतिभ्यश्च।।३।।

शिष्यस्य ज्ञानाग्रहणं[1] च लिङ्गैर्बुद्ध्वा तदग्रहणहेतूनधर्मलौकिकप्रमादनित्यानित्यवस्तुविवेकविषयासञ्जातदृढपूर्वश्रुतत्वलोकचिन्तावेक्षणजात्याद्यभिमानादींस्तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैरपनयेदक्रोधादिभिः अहिंसादिभिश्च यमैः, ज्ञानाविरुद्धैश्च नियमैः।।४।।

अमानित्वादिगणं[2] च ज्ञानोपायं सम्यग्ग्राहयेत्।।५।।

दीयते स्वयमेव विशिष्टस्य शिष्यस्य न्यायाद्यनुसन्धानेन विद्योदेष्यतीत्याशङ्क्याह—**अन्यथा च ज्ञानप्राप्त्यभावात्**। तथा च श्रुतिः—आचार्यवान् पुरुषो वेद। आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्। आचार्यः प्लावयता तस्य ज्ञानं प्लव इहोच्यते—इत्याद्या श्रुतिः।

स्मृतिश्च। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इत्याद्या। आचार्योपदेशमन्तरेणेति यावत्। आचार्येणैव विशिष्टाय शिष्यायोपदेष्टव्या विद्येत्यत्र श्रुतिस्मृती दर्शयति—**आचार्यवानिति**। 'उपदेक्ष्यन्ति ते ज्ञानमि'त्यादिस्मृतेश्च स्वयमेवातिसूक्ष्मार्थविषयं ज्ञानं न भवतीति प्रतिभातीत्यर्थः।।३।।

सम्प्रत्याचार्यस्य विद्योपदेशानन्तरं कृत्यान्तरमाह—**शिष्य ज्ञानाग्रहणं तल्लिङ्गैर्बुद्ध्वा अग्रहणहेतूनधर्मलौकिकप्रमादनित्यानित्यविवेकविषयासञ्जातदृढपूर्वश्रुतत्व-लोकचिन्तावेक्षणजात्याद्यभिमानादीन्, तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैरपनयेदक्रोधादिभिरहिंसादिभिश्च यमैर्ज्ञानाविरुद्धैश्च नियमैः अमानित्वादिगणं च ज्ञानोपायं सम्यक् ग्राहयेत्**।

बहिर्मुखादिलिङ्गैस्तस्य ज्ञानाग्रहणं बुद्ध्वा तदग्रहणहेतूनपनयेदिति सम्बन्धः। तानेवाग्रहणहेतूनपनेयानुदाहरति—**अधर्मेत्यादिना**। बहिर्मुखादेवाधर्मः सञ्चितः सम्भावितः। **लौकिकप्रमादः** सम्प्रति प्रतीयमानः कामचारवादभक्षणादिः इदं नित्यमिदमनित्यमिति विवेकविषयं न सञ्जातं दृढं पूर्वश्रुतत्वं, **लोकचिन्तावेक्षणं** अशास्त्रीयलोकव्यवहारानुसरणं जातिदेशपुत्रवित्तादिष्वभिमानो दम्भादयश्चाभिमानादीनिति यावत्। पूर्वोक्तानामधर्माणां प्रतिकूलाः श्रुतिस्मृत्योर्विहितास्ते के स्युर्यैरग्रहणहेतूनामपनयः स्यादित्यपेक्षायामाह—**अक्रोधादिभिरिति**। आदिशब्देनानुग्रहादयो गृह्यन्ते। अहिंसादिभिरित्यादिशब्देन ब्रह्मचर्यास्तेयादिग्रहणम्। नियमाः शौचसन्तोषादयः कृच्छ्रचान्द्रायणतीर्थयात्रादिनिवृत्त्यर्थं ज्ञानादिविरुद्धैरित्युक्तम्।।४।।

आचार्यस्य कृत्यान्तरमाह—**अमानित्वादीति**।।५।।

---

१. ज्ञेयपादार्थाग्रहणं ज्ञानाजननं वा। २. गुणं. पा.।

आचार्यश्चोहापोहग्रहणधारणशमदमदयानुग्रहादिसम्पन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तस्त्यक्तसर्वकर्मसाधनो ब्रह्मविद् ब्रह्मणि स्थितोऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहङ्कारममत्वादिदोषविवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी। पूर्वमुपदिशेत्–'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'[१] 'यत्र नान्यत्पश्यति'[२], 'आत्मैवेदं सर्वम्', 'ब्रह्मैवेदं सर्वम्', 'आत्मा वा इदमेक एवाग्र आसीत्' 'सर्वं खल्विदं ब्रह्म' इत्याद्या आत्मैक्यप्रतिपादनपराः श्रुतीः।।६।।

तस्य कृत्यं दर्शयित्वा लक्षणमाह—**आचार्यश्चोहापोहग्रहणधारणशमदमदयानुग्रहादिसम्पन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तः त्यक्तसर्वकर्मसाधनो ब्रह्मविद् ब्रह्मणि स्थितोऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहङ्कारममत्वादिदोषवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी। पूर्वमुपदिशेत्।** शिष्येणानुक्तस्यापि तदपेक्षितस्य स्वयमूहनमूहः शिष्यगतमिथ्याज्ञाननिराकरणे सामर्थ्यमपोहः। विहितबोधसामर्थ्यं ग्रहणं, उक्तस्य श्रुतस्यार्थस्याविस्मरणं धारणम्। प्रतिषिद्धविषयादन्तःकरणोपरमः शमः। तस्मादेव बाह्यकरणोपरमो दमः। दुःखिषु प्राणिष्वनुजिघृक्षा दया। तदन्तरं दुःखापनयाय यत्नोऽनुग्रहः। आदिपदेनामानित्वादयो गृह्यन्ते। लब्धागमत्वं आचार्यात् प्राप्तोपदेशत्वम्, ऐहिकामुष्मिकभोगवैतृष्ण्यमनासक्तत्वमित्याह—**दृष्टेति**। ब्रह्मवित्त्वं महावाक्यार्थाभिज्ञत्वम्। ब्रह्मणि स्थितत्त्वं वाक्यीयस्वानुभवानुरोधेन तत्रैव पर्यवसितत्वम्। अभिन्नवृत्तत्त्वमपरित्यक्तसदाचारवत्त्वं स्नानादिमत्त्वं वा। दम्भो धर्मध्वजित्वम्। कुहकं परवञ्चनम्। धनादिनिमित्तो मदो दर्पः। शाठ्यं नैष्ठुर्यम्। माया बहिरन्यथा प्रकाशनम्। मात्सर्यं गुणेषु दोषख्यापनम्। अनृतमसत्यवचनम्। आदिपदं सर्वदोषसङ्ग्रहार्थम्। विद्योपयोगमिच्छतस्तादर्थ्येन प्रथममुपदेशप्रकारं दर्शयति—**पूर्वमिति**। कथमुपदिशेदित्याशङ्कायामात्मैकत्वप्रतिपादनपरा श्रुतीः शिष्यस्याग्रे प्रथमं पठेदित्याह—सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। यत्र नान्यत्पश्यति। 'आत्मैवेदं सर्वं' 'ब्रह्मैवेदं सर्वम्'। आत्मा वा इदमेक एवाग्र आसीत्। सर्वं खल्विदं ब्रह्मेत्याद्याः। यदि यथोक्तश्रुत्युपदेशादेवोत्तमबुद्धित्वादात्मैकत्वं प्रतिपद्य कृतकृत्यः स्यात्तदा तं प्रति नास्ति वक्तव्यमित्यभिप्रेत्याधिकार्यन्तरं प्रति श्रुतिभिः स्मृतिभिश्च ब्रह्मणो लक्षणं ग्राहयेदित्याह—**आत्मैकत्वप्रतिपादनपराः श्रुतीः**।।६।।

---

१. छान्दो. ६.२.१। २. छान्दो. ७.२४.१।

उपदिश्य च ग्राहयेद् ब्रह्मणो लक्षणम्–'य आत्माऽपहतपाप्मा', 'यत्साक्षादपरोक्षाद् ब्रह्म', 'योऽशनायापिपासे', 'नेति नेति', 'अस्थूलमनणु', 'स एष नेति नेति', 'अष्टष्टं द्रष्टृ', 'विज्ञानमानन्दम्', 'सत्यं ज्ञानमनन्तम्', 'अदृश्येऽनात्म्येऽनिरुक्ते', 'स वा एष महानज आत्मा', 'अप्राणो ह्यमनाः', 'सबाह्याभ्यन्तरो ह्यजः', 'विज्ञानघन एव', 'अनन्तरमबाह्यम्', 'अन्यदेव तद्विदितादथो अविदितादधि', 'आकाशो वै नाम' इत्यादिश्रुतिभिः।।७।।

स्मृतिभिश्च–'न जायते म्रियते वा', 'नादत्ते कस्यचित्पापम्', 'यथाकाशस्थितो नित्यम्', 'क्षेत्रज्ञं चापि मां विद्धि', न सत्तन्नासदुच्यते', 'अनादित्वान्निर्गुणत्वात्' 'समं सर्वेषु भूतेषु', 'उत्तमः पुरुषस्त्वन्यः' इत्यादिभिः श्रुत्युक्तलक्षणाविरुद्धाभिः परमात्मासंसारित्वप्रतिपादनपराभिस्तस्य सर्वेणानन्यत्वप्रतिपादनपराभिश्च।।८।।

एवं श्रुतिस्मृतिभिर्गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत्–कस्त्वमसि सोम्य? इति।।९।।

उपदिश्य च ग्राहयेद् ब्रह्मणो लक्षणम्–'य आत्मापहतपाप्मा' 'यत्साक्षादपरोक्षाद् ब्रह्म' 'योऽशनापिपासे' 'नेति नेति' 'अस्थूलमनणु' 'स एष नेति नेत्यात्मा' 'अदृष्टं द्रष्टृ' 'विज्ञानमानन्दम्' 'सत्यं ज्ञानमनन्तम्' 'अदृश्येऽनात्म्ये' 'स वा एष महानज आत्मा' 'अप्राणो ह्यमनाः' 'सबाह्याभ्यन्तरो ह्यजः' 'विज्ञानघन एव' 'अनन्तरमबाह्यम्' 'अन्यदेव तद्विदितादथो अविदितात्' 'आकाशो वै नाम' इत्यादिश्रुतिभिः।।७।।

स्मृतिभिश्च–'न जायते म्रियते वा' 'नादत्ते कस्यचित्पापम्' 'यथाकाशस्थितो नित्यम्' 'क्षेत्रज्ञं चापि मां विद्धि' 'न सत्तन्नासदुच्यते' 'अनादित्वान्निर्गुणत्वात्' 'समं सर्वेषु भूतेषु' 'उत्तमः पुरुषस्त्वन्यः' इत्यादिभि श्रुत्युक्तलक्षणाविरुद्धाभिः परमात्मासंसारित्वप्रतिपादनपराभिस्तस्य सर्वेणानन्यत्वप्रतिपादनपराभिश्च। उदाहृतस्मृतीनां श्रुतिसंवादेन प्रामाण्यं सूचयति—**श्रुत्युक्तेति**।।८।।

परमात्मलक्षणपरिज्ञानवन्तं शिष्यं प्रत्याचार्यस्य कर्त्तव्यं प्रश्नं प्रथमं दर्शयति—**एवं श्रुतिस्मृतिभिः गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत् कस्त्वमसि सोम्येति**[1]।।९।।

---

१. एताभिः श्रुतिस्मृतिभिरात्मतत्त्वबोधो यदि न स्यात्तदोपायान्तरमाचार्यः परिचिन्तयति।

स यदि ब्रूयात्–ब्राह्मणपुत्रोऽदोन्वयो ब्रह्मचार्यासम्, गृहस्थो वा, इदानीमस्मि परमहंसपरिवाट् संसारसागराज्जन्ममृत्युमहाग्राहादुत्तितीर्षुरिति।।१०।।

आचार्यो ब्रूयात्–इहैव तव सोम्य मृतस्य शरीरं वयोभिरद्यते, मृद्भावं वाऽऽपद्यते। तत्र कथं संसारसागरादुत्तर्तुमिच्छसीति। नहि नद्या अवरे कूले भस्मीभूतो नद्याः पारं तरिष्यतीति[1]।।११।।

स यदि ब्रूयात्–अन्योऽहं शरीरात्। शरीरं तु जायते, म्रियते, वयोभिरद्यते, मृद्भावमापद्यते, शस्त्राग्न्यादिभिश्च विनाश्यते, व्याधिभिश्च युज्यते[2]। तस्मिन्नहं स्वकृतधर्माधर्मवशात् पक्षी नीडमिव प्रविष्टः। पुनः पुनः शरीरविनाशे धर्माधर्मवशाच्छरीरान्तरं यास्यामि, पूर्वनीडविनाशे पक्षीव नीडान्तरम्। एवमेवाहमनादौ संसारे

तत्र शिष्यस्य देहात्मत्वमाश्रित्य शङ्कामुत्थापयति—**स यदि ब्रूयात्**।

ब्राह्मणपुत्रः अदोऽन्वयः ब्रह्मचार्यासं गृहस्थो वा, इदानीमस्मि परमहंसपरिव्राट् संसारसागरात् जन्ममृत्युमहाग्राहाद् उत्तितीर्षुरिति असावन्वयो वंशो यस्य मम सोऽहं तथा।।१०।।

शरीरस्यात्मत्वे संसारसागरादुत्तितीर्षा नोपपद्यते। तस्यात्रैवान्यथाभूतस्य परलोकगमनायोग्यत्वावगमादित्याह—**आचार्यो ब्रूयात्। इहैव तव सोम्य मृतस्य शरीरं वयोभिरद्यते मृद्भावं वाऽऽपद्यते तत्र कथं संसारसागरादुत्तर्तुमिच्छसीति।** इहैवान्यथाभूतस्य नास्ति परलोकसम्भावनेत्येतद् दृष्टान्तेन स्पष्टयति—**नहि नद्या अवरे कूले भस्मीभूतो नद्याः पारं तरिष्यतीति।।११।।**

शिष्यस्तु देहातिरिक्तमात्मानमादाय शङ्कते—

स यदि ब्रूयादन्योऽहं शरीरात् शरीरन्तु जायते म्रियते वयोभिरद्यते मृद्भावं वाऽऽपद्यते शस्त्राग्न्यादिभिश्च विनाश्यते व्याधिभिश्च युज्यते। कथं तर्हि तव शरीरत्वेन प्रतिभानमित्याशङ्क्याह—**तस्मिन् अहं स्वकृतधर्माधर्मवशात् पक्षी नीडमिव प्रविष्टः।** तर्हि गृहीतदेहविनाशे पुनः शरीरान्तरं तव कथं सिध्येत्तत्राह—**पुनः पुनः शरीरविनाशे धर्माधर्मवशात् शरीरान्तरं यास्यामि पूर्वनीडविनाशे पक्षीव नीडान्तरम्। एवमेवाहमनादौ संसारे देवतिर्यङ्मनुष्यनिरयस्थानेषु स्वकृतकर्मवशादुपात्तमुपात्तं शरीरं त्यजन् नवं नवं च अन्यदुपाददानो**

---

१. तरिष्यसीति। २. व्याध्यादिभिश्च प्रयुज्यते। पा.।

देवतिर्यङ्मनुष्यनिरयस्थानेषु स्वकर्मवशादुपात्तमुपात्तं शरीरं त्यजन्, नवं नवं चान्यदुपाददानः, जन्ममरणप्रबन्धचक्रे घटीयन्त्रवत् स्वकर्मणा भ्राम्यमाणः, क्रमेणेदं शरीरमासाद्य, संसारचक्रभ्रमणादस्मान्निर्विण्णः, भगवन्तमुपसन्नोऽस्मि संसारचक्रभ्रमणप्रशमाय। तस्मान्नित्य एवाहं शरीरादन्यः—शरीराण्यागच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति।।१२।।

आचार्यो ब्रूयात्—साध्ववादीः, सम्यक् [1]पश्यसि, कथं मृषाऽवादीः—ब्राह्मणपुत्रोऽदोऽन्वयो ब्रह्मचार्यासम्, गृहस्थो वा, इदानीमस्मि परमहंसपरिव्राडिति।।१३।।

स यदि ब्रूयात्—भगवन् कथमहं मृषाऽवादिषमिति।।१४।।

तं प्रति ब्रूयादाचार्यः—यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयसंस्कारवर्जितस्यात्मनः प्रत्यभ्यज्ञासीर्ब्राह्मणपुत्रोऽदोऽन्वय इत्यादिना वाक्येनेति।।१५।।

जन्ममरणप्रबन्धचक्रे घटीयन्त्रवत् स्वकर्मणा भ्राम्यमाणः क्रमेणेदं शरीरमासाद्य संसारचक्रभ्रमणाद् अस्मान्निर्विण्णो भगवन्तमुपसन्नोऽस्मि संसारचक्रभ्रमण प्रशमायेति। तत्तत्कर्मानुसारेण तत्तच्छरीरं प्रतिपद्यमानस्य तव मदुपगमनं कथमधुना संवृत्तमित्याशङ्क्याह—**एवमिति।** इतिशब्दो यथोक्तन्यायेन शरीराव्यतिरेको मम नास्तीत्येवमर्थः। शरीरादन्यत्वे फलितमाह—**तस्मान्नित्य एवाहं शरीरादन्यः।** आत्मन्यागमापायप्रतीतौ कथं शरीरान्यत्वेन नित्यत्वमित्याशङ्क्याह—**शरीराणि आगच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति।।१२।।**

आत्मनो देहातिरिक्तत्वं शिष्योक्तमङ्गीकृत्य तस्य मिथ्यावादित्वमाह—**आचार्यो ब्रूयात् साध्ववादीः सम्यक् पश्यसि कथं मृषाऽवादीः ब्राह्मणपुत्रोऽदोऽन्वयो ब्रह्मचार्यासम्, गृहस्थो वा इदानीमस्मि परमहंसपरिव्राडिति।।१३।।**

शिष्यस्य मिथ्यावादित्वं प्रश्नप्रतिवचनाभ्यां प्रकटीकर्तुं प्रक्रमते—**स यदि ब्रूयात् कथमहं मृषाऽवादिषमिति।।१४।।**

तं प्रति ब्रूयादाचार्यो यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयसंस्कारवर्जितस्यात्मनः प्रत्यभ्यज्ञासीर्ब्राह्मणपुत्रोऽदोन्वय इत्येवमादिना वाक्येनेति।

भिन्नासु जातिष्वन्वयः संस्कारश्चोपनयनादिर्यस्य तत्तथोक्तम्। जात्यादिवर्जितस्यात्मनो जात्यादिप्रतिज्ञानान्मृषावादितेत्यर्थः।।१५।।

---

१. श्रुतिस्मृत्यादिभिः प्रतिपादितं यथोक्तलक्षणमात्मतत्त्वं वेत्सि।

स यदि पृच्छेत्–कथं भिन्नजात्यन्वयसंस्कारं शरीरं, कथं वा अहं जात्यन्वयसंस्कारवर्जितः? इति।।१६।।

आचार्यो ब्रूयात्–शृणु, सोम्य, यथेदं शरीरं त्वत्तो[1] भिन्नं भिन्नजात्यन्वयसंस्कारम्; त्वं च जात्यन्वयसंस्कारवर्जितः। इत्युक्त्वा तं स्मारयेत्–स्मर्तुमर्हसि, सोम्य परमात्मानं सर्वात्मनं यथोक्तलक्षणं श्रावितोऽसि 'सदेव सोम्येदं' इत्यादिभिः श्रुतिभिः स्मृतिभिश्च, लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च।।१७।।

लब्धपरमात्मलक्षणस्मृतये ब्रूयात्–योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतोऽशरीरः, अस्थूलादिलक्षणः, अपहतपाप्मत्वादिलक्षणश्च, सर्वैः संसारधर्मैरनागन्धितः, यत्साक्षादपरोक्षाद् ब्रह्म, य आत्मा सर्वान्तरः, अदृष्टो द्रष्टा, अश्रुतः श्रोता, अमतो मन्ता, अविज्ञातो विज्ञाता नित्यविज्ञानस्वरूपः, अनन्तरः, अबाह्यः, विज्ञानघन एव, परिपूर्ण, आकाशवत्, अनन्तशक्तिः, आत्मा सर्वस्य,

---

तत्र शिष्यस्य प्रश्नद्वयं दर्शयति—**स यदि पृच्छेत् कथं भिन्नजात्यन्वयसंस्कारं शरीरं कथं वा अहं जात्यन्वयसंस्कारवर्जित इति।।१६।।**

उत्तरप्रतिज्ञामाचार्यस्य प्रस्तौति—**आचार्यो ब्रूयात् शृणु सोम्य, यथेदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जितः।** प्रतिज्ञाद्वयं निर्वोढुमुक्तं स्मारयति—**इत्युक्त्वा तं स्मारयेत्—स्मर्तुमर्हसि सोम्य, परमात्मानं सर्वात्मानं यथोक्तलक्षणं श्रावितोऽसि 'सदेव सोम्येदम्' इत्यादिश्रुतिभिः स्मृतिभिश्च। लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च।।१७।।**

लब्धपरमात्मलक्षणस्मृतये ब्रूयात्—लब्धा परमात्मलक्षणस्य स्मृतिर्येन तस्मै शिष्याय ब्रूयात्। परमात्मनः सकाशादाकाशादिसृष्टिक्रमेण शरीरोत्पत्तिप्रकारमाह—**लब्धेत्यादिना।** परस्य स्रष्टुरा'काशो वै नामे'त्यादिनानाविधश्रुत्यवष्टम्भेन स्वरूपं निरूपयति—**योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतोऽशरीरोऽस्थूलादिलक्षणोऽपहतपाप्मत्वादिलक्षणश्च सर्वैः संसारधर्मैरनागन्धितो, 'यत्साक्षादपरोक्षाद् ब्रह्म एष त आत्मा सर्वान्तरः[2] 'अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नित्यविज्ञानस्वरूपः अनन्तरोऽबाह्यः विज्ञानघन एव परिपूर्णः आकाशवत्, अनन्तशक्तिरात्मा सर्वस्य**

---

१. अहंपदवाच्यादन्तःकरणात्। २. य आत्मा सर्वान्तरः—पा.।

अशनायादिवर्जितः, आविर्भावतिरोभाववर्जितश्च स्वात्मविलक्षणयो-र्नामरूपयोर्जगद्बीजभूतयोः स्वात्मस्थयोस्तत्त्वान्यत्वाभ्या-मनिर्वचनीययोः स्वसंवेद्ययोः सद्भावमात्रेणाचिन्त्यशक्तित्वा-द्व्याकर्ताऽव्याकृतयोः।।१८।।

ते नामरूपे अव्याकृते सती व्याक्रियमाणे तस्मादेतस्मादात्मन आकाशनामाकृती संवृत्ते। तच्चाकाशाख्यं भूतं, अनेन प्रकारेण, परमात्मनः सम्भूतं, प्रसन्नादिव सलिलान्मलमिव फेनम्। न सलिलं न च सलिलादत्यन्तं भिन्नं फेनं–सलिलव्यतिरेकेणादर्शनात्; सलिलं तु स्वच्छं, अन्यच्च फेनान्मलरूपात्। एवं परमात्मा नाम-

---

अशनायादिवर्जितः आविर्भावतिरोभाववर्जितश्च स्वात्मविलक्षणयोः नामरूपयोः जगद्बीजभूतयोः स्वात्मस्थयोः तत्त्वान्यत्वाभ्यामनिर्वचनीययोः स्वसंवेद्ययोः सद्भावमात्रेणाचिन्त्यशक्तित्वाद् व्याकर्ताऽव्याकृतयोः।

परिपूर्णत्वे दृष्टान्तमाह—**आकाशवदिति**। तस्य विचित्रकार्यहेतुत्वे हेतुमाह—**अन्तन्तेति**। सर्वस्यात्मेति सम्बन्धः। योऽसावाकाशनामा परमेश्वरो मायावी स नामरूपयोरव्याकृतयोरचिन्त्यशक्तित्वाद् व्याकर्ता आकाशो वै नाम नामरूपयो-र्निर्वहितेत्यादिश्रुतेरित्याह — **स्वात्मविलक्षणयोर्नामरूपयोर्जगद्बीजभूतयोः स्वात्मस्थयोस्तत्त्वान्यत्वाभ्यामनिर्वचनीययोः स्वसंवेद्ययोः सद्भावमात्रेणाचिन्त्य-शक्तित्वाद् व्याकर्ताऽव्याकृतयोः।।१८।।**

ते नामरूपे अव्याकृते सतो व्याक्रियमाणे तस्मादेतस्मादात्मन आकाशनामाकृती संवृत्ते। तयोः स्वातन्त्र्यं व्यावर्त्तयति—**स्वात्मस्थयोरिति**। तयोः साधकं साक्षिचैतन्यमित्याह—**स्वसंवेद्ययोरिति**। स्वगतविकारव्यतिरेकेण सन्निधिमात्रेण व्याकर्तृत्वे . हेतुमाह—**अचिन्त्येति**। अनभिव्यक्तयोर्नामरूप-शक्त्योर्यदाऽसौ कार्याकारेण निष्पादयिता तदा किं निष्पन्नं भवतीत्याशङ्क्याह—**ते नामरूपे इति**। एतेन 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इति वाक्यस्यार्थो दर्शितो भवतीत्याह—**तच्चाकाशाख्यं भूतमनेन प्रकारेण परमात्मनः सम्भूतम्**। सम्भूतशब्दप्राप्तां परिणामशङ्कां व्यावर्त्तयितुं दृष्टान्तमाह—**प्रसन्नात्सलिलान्मलमिव फेनम्। सलिलव्यतिरेकेणादर्शनात्**। सलिले दृष्टेऽपि फेनस्यादृष्टेरित्यर्थः। परमात्मनो नामरूपाभ्यां असंस्पृष्टत्वं दृष्टान्तेन साधयति—**सलिलं तु स्वच्छम् अन्यत्फेनान्मलरूपात्। एवं परमात्मा नामरूपाभ्यामन्यः फेनस्थानीयाभ्यां शुद्धः प्रसन्नस्तद्विलक्षणः**। परस्य ताभ्यामन्यत्वे नैसर्गिकेणागन्तुकेन च

रूपाभ्यामन्यः फेनस्थानीयाभ्यां, शुद्धः प्रसन्नस्तद्विलक्षणः। ते नामरूपे अव्याकृते सती व्याक्रियमाणे फेनस्थानीये आकाशनामाकृती संवृत्ते।।१९।।

ततोऽपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभावमापद्येते, ततोऽप्यग्निभावम्, अग्नेरब्भावं, ततः पृथिवीभावम्-इत्येवंक्रमेण पूर्वपूर्वभावस्योत्तरोत्तरानुप्रवेशेन पञ्च महाभूतानि पृथिव्यन्तान्युत्पन्नानि। ततः पञ्चमहाभूतगुणविशिष्टा पृथिवी। पृथिव्याश्च पञ्चात्मिकां व्रीहियवाद्या ओषधयो जायन्ते। ताभ्यो भक्षिताभ्यो लोहितं, शुक्रं च स्त्रीपुंसशरीरसम्बन्धि जायते। तदुभयमृतुकालेऽविद्याप्रयुक्तकामखजनिर्मथनोद्भूतं मन्त्रसंस्कृतगर्भाशये निषिच्यते। तत् स्वयोनिरसानुप्रवेशेन विवर्धमानं गर्भीभूतं नवमे, दशमे वा मासि जायते।।२०।।

दोषेणासंस्पर्शात्ताभ्यां जडाभ्यां विलक्षणत्वेनाजडबोधात्मत्वं सिद्धमित्याह—**शुद्ध** इति।। पूर्वस्य वाक्यस्यार्थमनूद्याकाशाद्वायुरित्यस्यार्थमाह—**ते नामरूपे अव्याकृते सतो व्याक्रियमाणे फेनस्थानीये आकाशनामाकृती संवृत्ते**।।१९।।

वायोरग्निरग्नेरापोऽद्भ्यः पृथिवीति वाक्यत्रयस्यार्थं सङ्गृह्णाति—**ततोऽपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभावमापद्येते। ततोऽप्यग्निभावम्, अग्नेरब्भावं ततः पृथिवीभावमिति**। सूक्ष्मभूतोत्पत्तिक्रमेण स्थूलभूतानामुत्पत्तिमत्र विवक्षितामुपसंहरति—**एवं क्रमेण पूर्वपूर्वस्योत्तरोरानुप्रवेशेन पञ्चभूतानि पृथिव्यन्तान्युत्पन्नानि**। उत्तरस्मिन्नुत्तरस्मिन् भूते पूर्वस्य पूर्वस्य भूतस्यानुप्रवेशेन पञ्चानां भूतानामन्तिमा पृथिवी शब्दस्पर्शरूपरसगन्धगुणविशिष्टा निष्पन्नेत्याह—**ततः पञ्चमहाभूतगुणविशिष्टा पृथिवी। पृथिव्याश्च पञ्चात्मिक्यो व्रीहियवाद्या ओषधयो जायन्ते**। पृथिव्या ओषधय इत्यस्यार्थमाह—**पृथिव्याश्चेति**। ओषधीभ्योऽन्नमित्यस्यार्थमाह—**ताभ्यो भक्षिताभ्यो लोहितं शुक्रश्च स्त्रीपुंशरीरसम्बन्धि जायते**। अन्नात् पुरुष इत्यस्यार्थं कथयति—**तदुभयमृतुकालेऽविद्याप्रयुक्तकामखजनिमन्थनोद्भूतं मन्त्रसंस्कृतं गर्भाशये निषिच्यते। तत्स्वयोनिरसानुप्रवेशेन वर्धमानं गर्भीभूतं दशमे नवमे वा मासि जायते**। अविद्याप्रयुक्तः कामखजो मन्था तस्य निर्मथनादुद्भूतम्। 'गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुक' इत्यादिमन्त्रसंस्कृतं भवतीत्याह—**तदिति**।।२०।।

तज्जातं लब्धनामाकृतिकं जातकर्मादिभिर्मन्त्रसंस्कृतं पुनः उपनयनसंस्कारयोगेन ब्रह्मचारिसंज्ञं भवति। तदेव शरीरं पत्नीसंयोगसंस्कारयोगेन गृहस्थसंज्ञं भवति। तदेव वनस्थसंस्कारेण तापससंज्ञं भवति। तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट्संज्ञं भवति। इत्येवं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं शरीरम्।।२१।।

मनश्चेन्द्रियाणि च नामरूपात्मकान्येव, 'अन्नमयं हि सोम्य मनः'[1] इत्यादिश्रुतिभ्यः।।२२।।

कथं चाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतच्छृणु—योऽसौ नामरूपयोर्व्याकर्ता नामरूपविलक्षणः, स एव नामरूपे व्याकुर्वन्-सृष्ट्वेदं शरीरं स्वयं संसारधर्मवर्जितो नामरूप इह प्रविष्टोऽन्यैरदृष्टः

एवं सृष्टिक्रममुपोद्घातरूपेणोक्त्वा यदुक्तं भिन्नजात्यन्वयसंस्कारं शरीरमिति तदिदानीं दर्शयति—**तज्जातं लब्धनामाकृतिकं जातकर्मादिसंस्कृतं पुनरुपनयनसंस्कारयोगेन ब्रह्मचारिसंज्ञं भवति। तदेव शरीरं पत्नीयोगसंस्कारयोगेन गृहस्थसंज्ञं भवति। तदेव वनस्थसंस्कारेण तापससंज्ञं भवति। तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट्संज्ञं भवति। इत्येवं त्वत्तो भिन्नं भिन्नजात्यन्वसंस्कारं शरीरम्।** भिन्नजात्यन्वयसंस्कारं शरीरमिति शेषः[2]।।२१।।

स्थूलशरीराभिमानादेवं शिष्यं व्युत्थाप्य सूक्ष्मशरीरादपि व्युत्थापयति—**मनश्चेति। मनश्चेन्द्रियाणि च नामरूपात्मकान्येव 'अन्नमयं हि सोम्य मनः' इत्यादिश्रुतिभ्यः।**

मन आदिरात्मा न भवति भौतिकत्वाद् घटवदित्यभिप्रेत्य भौतिकत्वं साधयति। 'अन्नमयं हि सोम्य मनः' इत्यादिश्रुतिभ्यः।।२२।।

द्वितीयं चोद्यमनूद्य निरस्यति—**कथं चाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतच्छृणु।** परमात्मा नामरूपयोर्व्याकर्त्ता नामरूपाभ्यां विलक्षणो नामरूपे व्याकुर्वन् व्याकृताभ्यां नामरूपाभ्यां सृष्टे शरीरे स्वयं स्रष्टा नामरूपात्मके तस्मिन् जीवभावेन प्रविष्टः सर्वैः संसारधर्मैर्जातकर्मादिभिर्वर्जितः। परस्य तदभावात्तस्यैव जीवत्वात्तस्मिन्निवास्मिन्नपि तदयोगादित्याह—**योऽसौ नामरूपयोर्व्याकर्ता नामरूपविलक्षणः स एष नामरूपे व्याकुर्वन् सृष्ट्वेदं शरीरं स्वयं संसारधर्मवर्जितो**

---

१. पूर्वं नामरूपात्मशरीराद् व्यतिरिक्तत्वमात्मनः साधितमथेन्द्रियेभ्यो व्यतिरिक्तत्वं साधयति।

२. पाञ्चभौतिकशरीरस्यैव संस्कारादयः सम्पद्यन्ते नात्मनः, अतो जात्यन्वयरहित आत्मा।

स्वयं पश्यन्, तथाऽश्रुतः शृण्वन्, अमतो मन्वानः, अविज्ञातो विजानन्, 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इत्यस्मिन्नर्थे श्रुतयः सहस्रशः–'तत्सृष्ट्वा तदेवानुप्राविशत्', 'अन्तः प्रविष्टः शास्ता जनानाम्, 'स एष इह प्रविष्टः', 'एष त आत्मा', 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत', 'एष सर्वेषु भूतेषु गूढोऽऽत्मा', 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः' 'अशरीरं शरीरेषु' इत्याद्याः।।२३।।

स्मृतयोऽपि–'आत्मैव देवताः सर्वाः', 'नवद्वारे पुरे देही', 'क्षेत्रज्ञं चापि मां विद्धि', 'समं सर्वेषु भूतेषु', 'उपद्रष्टाऽनुमन्ता च', 'उत्तमः पुरुषस्त्वन्यः', 'अशरीरं शरीरेषु' इत्याद्याः। तस्माज्जात्यन्वयसंस्कारवर्जितस्त्वमिति सिद्धम्।।२४।।

नामरूप इह प्रविष्टोऽन्यैरदृष्टः स्वयं पश्यन् तथाऽश्रुतः शृण्वन् अमतो मन्वानः अविज्ञातो विजानन् सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते, इत्येतस्मिन्नर्थे श्रुतयः सहस्रशः 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अन्तः प्रविष्टः शास्ता जनानाम्, 'स एष इह प्रविष्टः', 'एष त आत्मा', 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत', 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते' 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः, अशरीरं शरीरेष्वित्याद्याः।

परमात्मा चेदिह शरीरे नामरूपात्मके प्रविष्टस्तर्हि किमिति सर्वैर्नोपलभ्यते। नीडप्रविष्टशकुनिवदित्याशङ्क्य अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ता अविज्ञातो विज्ञातेति श्रुत्यर्थं दर्शयति—**अन्यैरिति**। तत्रैव श्रुत्यन्तरं पठति—**सर्वाणीति**। विचित्य निर्माय धीरः सर्वज्ञो नामानि च तेषां कृत्वा जीवभावमापन्नोऽभिवदन् यदास्ते यो वर्तते तं विद्वानमृतो भवतीति सम्बन्धः। परेणाव्याप्तदेशाभावात्तस्य प्रवेशो न सिद्ध्यतीत्याशङ्क्य यथा व्यापकस्याप्याकाशस्य जले प्रतिबिम्बभावेन प्रवेशोऽनुभव-सिद्धस्तथा परस्याप्यात्मनोऽविद्यातत्कार्येषु प्रतिबिम्बभाव एव प्रवेशो नानाश्रुतिस्मृतिसिद्धो नापलापमर्हतीत्याह—**अस्मिन्निति**।।२३।।

स्मृतियोऽपि—'आत्मैव देवताः सर्वा' 'नवद्वारे पुरे देही', 'क्षेत्रज्ञं चापि मां विद्धि', 'समं सर्वेषु भूतेषु', 'उपद्रष्टाऽनुमन्ता च', 'उत्तमः पुरुषस्त्वन्यः' 'अशरीरं शरीरेषु' इत्याद्याः। तस्मात् जात्यन्वयसंस्कारवर्जितस्त्वं इति सिद्धम्।

परस्यैवात्मनो जीवभावे श्रुतिस्मृतिसिद्धे फलितमाह—**तस्मात् जात्यन्वय-संस्कारवर्जितस्त्वमिति सिद्धम्**।।२४।।

स यदि ब्रूयात्–अन्य एवाहमज्ञः सुखी दुःखी बद्धः संसारी, अन्योऽसौ मद्विलक्षणोऽसंसारी देवः, तमहं बल्युपहार-नमस्कारादिभिर्वर्णाश्रमकर्मभिश्चाराध्य[1] संसारसागरादुत्तितीर्षुरस्मि-कथमहं स एव? इति।।२५।।

आचार्यो ब्रूयात्–नैवं सोम्य, प्रतिपत्तुमर्हसि–प्रतिषिद्ध-त्वाद्भेदप्रतिपत्तेः। कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह–'अन्योऽसावन्योऽहमस्मीति न स वेद', 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इत्येवमाद्याः।।२६।।

एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयन्ति[2]।।२७।।

परमात्माभेदोपदेशेन जीवस्य संसारवर्जितत्वमुक्तम्। तत्र स्वानुभवविरोधं शङ्कते—**स यदि ब्रूयात् अन्य एवाहमज्ञः सुखी दुःखी बद्धः संसारी अन्योऽसौ मद्विलक्षणः असंसारी देवस्तमहं बल्युपहारनमस्कारादिभिर्वर्णाश्रमकर्मभि-श्चाराध्य संसारसागरादुत्तितीर्षुरस्मि कथमहं स एवेति।**

कथं तर्हि तव संसारनिवृत्तिरित्याशङ्क्याह—**तमहमिति।** अभेदप्रतिपत्त्या संसारनिवृत्तिस्तु न सिद्ध्यति स्वप्रतिपत्तिविरुद्धत्वादिति निगमयति—**कथमिति।**।२५।।

जीवेश्वरयोरन्यत्वं प्रतिपत्तुमयुक्तमिति परिहरति—**आचार्यो ब्रूयात्–नैवं सोम्य, प्रतिपत्तुमर्हसि कथं प्रतिषिद्धत्वाद्भेदप्रतिपत्तेः। कथं प्रतिषिद्धा भेदप्रति-पत्तिरित्यत आह–अन्योऽसावन्योऽहमस्मीति न स वेद, ब्रह्म तं परादाद्योऽ-न्यत्रात्मनो ब्रह्म वेद, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति इत्येवमाद्याः।**

यत्तु भेदप्रतिपत्तेरुक्तं प्रतिषिद्धत्वं तत्प्रश्नद्वारा प्रकटयति—**कथं प्रतिषिद्धा भेदप्रतिपत्तिरिति** चेत्तत्राह—**अन्योऽसावन्योऽहमस्मि न स वेद'** यथा पशुः। **'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति इत्येवमाद्याः** श्रुतयो भेदप्रतिपत्तिं निषेधन्तीति सम्बन्धः।।२६।।

न केवलं भेदप्रतिपत्तिं निषेधन्ति श्रुतयः किन्त्वनर्थहेतुत्वमपि दर्शयन्तीत्याह—**एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयन्ति।।२७।।**

---

१. वर्णाश्रमकर्मफलस्यादृष्टप्रयोजकत्वात्र संसारनिवृत्तिप्रयोजकता।

२. संसारनिवृत्तिर्हि परमपुरुषार्थः स न सिद्ध्यति।

अभेदप्रतिपत्तेश्च मोक्षं दर्शयन्ति सहस्रशः। 'स आत्मा तत्त्वमसि' इति परमात्मभावं विधाय 'आचार्यवान् पुरुषो वेद' इत्युक्त्वा 'तस्य तावदेव चिरम्' इति मोक्षं दर्शयन्ति अभेदविज्ञानादेव। सत्याभिसन्धस्यातस्करस्येव दाहाद्यभावदृष्टान्तेन संसाराभावं दर्शयन्ति। भेददर्शनादसत्याभिसन्धस्य संसारगमनं दर्शयन्ति तस्करस्येव दाहादिदृष्टान्तेन 'त इह व्याघ्रो वा' इत्यादिना च।। २८।।

अभेददर्शनात् 'स स्वराड्भवति' इत्युक्त्वा, तद्विपरीतेन भेददर्शनेन संसारगमनं दर्शयन्ति-'अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति' इति प्रतिशाखम्। तस्मान्मृषैवैवमवादीः ''ब्राह्मणपुत्रोऽदोऽन्वयः संसारी परमात्मविलक्षणः'' इति।। २९।।

अभेदप्रतिपत्तेश्च मोक्षं दर्शयन्ति सहस्रशः 'स आत्मा तत्त्वमसी'ति परमात्मभावं विधाय आचार्यवान् पुरुषो वेदेत्युक्त्वा तस्य तावदेव चिरमिति मोक्षं दर्शयन्ति अभेदविज्ञानादेव सत्याभिसन्धस्यातस्करस्येव दाहाद्यभावदृष्टान्तेन संसाराभावं दर्शयन्ति। भेददर्शनादसत्याभिसन्धस्य संसारगमनं दर्शयन्ति तस्करस्येव दाहादिदृष्टान्तेन। अभेदप्रतिपत्तिरेव कर्त्तव्येत्यत्र हेतुमाह— **अभेदप्रतिपत्तेश्चेति। अभेदविज्ञानादेव सत्याभिसन्धस्यातस्करस्येव दाहाद्यभावदृष्टान्तेन संसाराभावं दर्शयन्ति।** तदात्म्यमिदं सर्वं तत्सत्यमिति श्रुतेरैकात्म्यमेव सत्यं तत्र सन्धानदार्ढ्यं यस्य तस्य संसाराभावमभेदविज्ञानादेव दर्शयन्ति। पुरुषं सौम्य हस्तगृहीतमानयन्ति इत्याद्याः श्रुतयोऽतस्करस्य तप्तपरशुग्रहणे दाहाद्यभाव दृष्टान्तेनेत्यर्थः। 'वाचारम्भरणं विकारो नामधेयमि'त्यादिश्रुतेरसत्यं मनुष्यत्वब्राह्मणत्वादि, तदभिमन्यमानस्य परमात्मभेददर्शनात् ता एव श्रुतयः संसारं दर्शयन्तीत्याह—**भेददर्शनादसत्याभिसन्धस्य संसारगमनं दर्शयन्ति तस्करस्येव दाहादिदृष्टान्तेन।** सुषुप्ते च सति सम्पद्य न विदुः सति सम्पत्स्यामह इत्यैक्यज्ञानाभावापराधेन 'त इह व्याघ्रो वा' सिंहो वेत्यादिना यद्यद्भवन्ति तदा भवन्तीति संसारगमनं दर्शयन्तीत्याह—**त इह व्याघ्रो वेत्यादिना**।।२८।।

इतश्चाभेदप्रतिपत्तिरेव कर्त्तव्येत्याह—**अभेददर्शनात् स स्वराड्भवतीत्युक्त्वा तद्विपरीतेन भेददर्शनेन संसारगमनं दर्शयन्ति-अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्तीति प्रतिशाखम्।** सर्वासु शाखास्वभेदप्रतिपत्त्या कैवल्यं सिद्ध्यतीत्युक्तत्वात्तस्मिन्नेवार्थे श्रुतीनामस्ति तात्पर्यमिति सूचयति—**प्रतिशाखमिति।** श्रुतीनामैक्ये तात्पर्ये सिद्धे फलितमाह—**तस्मात् मृषैवैवमवादीः ब्राह्मणपुत्रोऽदोऽन्वयः संसारी परमात्मविलक्षण इति**।।२९।।

तस्मात् प्रतिषिद्धत्वाद्भेददर्शनस्य, भेदविषयत्वाच्च कर्मोपादानस्य, कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादानस्य परमात्माभेदप्रतिपत्त्या प्रतिषेधः कृतो वेदितव्यः। कर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमात्माऽभेदप्रतिपत्तिविरुद्धत्वात्, संसारिणो हि कर्माणि विधीयन्ते, तत्साधनानि च यज्ञोपवीतादीनि, न परमात्मनोऽभेददर्शिनः। भेददर्शनमात्रेण च ततोऽन्यत्वम्।।३०।।

यदि कर्माणि कर्तव्यानि, न निविवर्तयिषितानि, कर्मसाधनासम्बन्धिनः कर्मनिमित्तजात्याश्रमाद्यसम्बन्धिनश्च, परमात्मन आत्मनैवाभेदप्रतिपत्तिं नावक्ष्यत्–'स आत्मा तत्त्वमसि' इत्येवमादिभिर्निश्चितरूपैर्वाक्यैः। भेदप्रतिपत्तिनिन्दां[१] च नाभ्यधास्यत्।।३१।।

परमात्मैक्यप्रतिपत्तौ च श्रुतितात्पर्ये सिद्धे सर्वकर्मतत्साधनसंन्यासोऽपि श्रुत्यभिप्रेतः सेत्स्यतीत्याह—**तस्मात् प्रतिषिद्धत्वाद्भेददर्शनस्य भेदविषयत्वाच्च कर्मोपादानस्य कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादानस्य परमात्माभेदप्रतिपत्त्या प्रतिषेधः कृतो वेदितव्यः कर्मणां तत्साधनानां च परमात्माभेदप्रतिपत्तिविरुद्धत्वात्**[२]।

विद्वद्विषयत्वान्न विद्याविरुद्धत्वेन त्याज्यत्वमित्याशङ्क्याह—**संसारिणो हि कर्माणि विधीयन्ते तत्साधनानि च यज्ञोपवीतादीनि न परमात्मनोऽभेददर्शिनः। भेददर्शनमात्रेण च ततोऽन्यत्वम्।** संसारिणोऽपि परमात्मोऽनन्यत्वात्कथं कर्मविधिरित्याशङ्क्याह—**भेददर्शनमात्रेणेति**।।३०।।

यत्तु परमात्मैक्यप्रतिपत्त्या कर्मणां तत्साधनानां च श्रुत्या प्रतिषेधः कृत इति तद्व्यतिरेकमुखेन प्रपञ्चयति—**यदि च कर्माणि कर्त्तव्यानि न निविवर्तयिषितानि कर्मसाधनासम्बन्धिनः कर्मनिमित्तजात्याश्रमाद्यसम्बन्धिनश्च परमात्मनः आत्मनैवाभेदप्रतिपत्तिं नावक्ष्यत्स आत्मा तत्त्वमसीत्येवमादिभिर्निश्चितरूपैर्वाक्यैः भेदप्रतिपत्तिनिन्दां च नाभ्यधास्यत्।** किञ्च मृत्योः स मृत्युमाप्नोतीत्यादिना भेदप्रतिपत्तिनिन्दोच्यते सा च नाभिधीयेत यदि कर्माणि तत्साधनानि च न त्याजयितुमिष्टानि अतो भेदप्रतिपत्तिनिन्दादर्शनात्तानि तित्याजयिषितानीत्याह—**भेदेति**।।३१।।

---

१. जीवात्मपरमात्मनोरभेदबोधने कर्मप्रवृत्तिर्यदि स्यात्तदा तेषां निन्दां कथं ब्रूयात्।

२. देहसंस्कारसम्पादककर्मणामात्मसाक्षात्कारेऽप्रयोजकत्वात्।

'एष नित्यो महिमा ब्राह्मणस्य', 'अनन्वागतं पुण्येनानन्वागतं पापेन', 'अत्र स्तेनोऽस्तेनः'–इत्यादिना कर्मासम्बन्धिस्वरूपत्वं कर्मनिमित्तवर्णाद्यसम्बन्धरूपतां च नाभ्यधास्यत् कर्माणि च कर्मसाधनानि च यज्ञोपवीतादीनि यद्यपरितित्याजयिषितानि तस्मात् ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा परमात्माभेद-दर्शनविरोधात्–आत्मा च पर एव प्रतिपत्तव्यो यथाश्रुत्युक्त-लक्षणः।।३२।।

स यदि ब्रूयात्–भगवन्, दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदना अशनायादिनिमित्तं च प्रत्यक्षं दुःखं मम। परश्चायमात्मा, 'अयमात्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः' सर्वसंसारधर्मविवर्जितः श्रूयते सर्वश्रुतिषु स्मृतिषु च। कथं तद्विलक्षणोऽनेकसंसारधर्मसंयुक्तः परमात्मान-मात्मत्वेन मां च संसारिणं परमात्मत्वेनाग्निमिव शीतत्वेन प्रतिपद्येय? संसारी च सन् सर्वाभ्युदयनिःश्रेयससाधनेऽधिकृतः, अभ्युदय-

---

एष नित्यो महिमा ब्राह्मणस्य अनन्वागतं पुण्येनानन्वागतं पापेन अत्र स्तेनोऽस्तेन इत्यादिना कर्मासम्बन्धिस्वरूपत्वं कर्मनिमित्तवर्णाश्रमाद्यसम्बन्ध-रूपतां च नाभ्यधास्यत् कर्माणि च कर्मसाधनानि च यज्ञोपवीतादीनि यद्यपरितित्याजयिषितानि। तस्मात् ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा परमात्माभेददर्शनविरोधात् आत्मा च पर एवेति प्रतिपत्तव्यः यथाश्रुत्युक्त-लक्षणः।

किञ्च कर्मभिरसम्बद्धत्वं कर्मनिमित्तैर्वर्णाश्रमादिभिश्चासम्बद्धत्वमात्मनोऽभिधीयते ततोऽपि कर्माणि तत्साधनानि च परित्याजयितुमिष्टानीत्याह—**'एष' इत्यादिना।** फलितं निगमयति **तस्मा ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा।** तच्छब्दार्थमेव स्फोरयति—**परमात्माऽभेददर्शनविरोधात्।** मुमुक्षुणा कर्तव्यं परमात्माभेददर्शनमेव दर्शयति—**आत्मा च पर एव प्रतिपत्तव्यो यथाश्रुत्युक्तलक्षणः।।३२।।**

जीवपरमात्मानौ भिन्नौ विरुद्धत्वात्। पयः पावकवदित्यनुमानविरोधं शङ्कते—**स यदि ब्रूयाद्भगवन् दह्यमाने च्छिद्यमाने वा देहे प्रत्यक्षा वेदना अशनायादिनिमित्तं च प्रत्यक्षं दुःखं मम। परश्चात्माऽपहपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सर्वसंसारधर्मविवर्जितः श्रूयते सर्वश्रुतिषु स्मृतिषु च। कथं तद्विलक्षणोऽनेकसंसारधर्मयुक्तः परमात्मानमात्मत्वेन मां च संसारिणं परमात्मत्वेनाग्निमिव शीतत्वेन प्रतिपद्येय।** यदुक्तं सर्वकर्मणां

निःश्रेयससाधनानि कर्माणि तत्साधनानि यज्ञोपवीतादीनि कथं परित्यजेयम्? इति।।३३।।

तं प्रति ब्रूयात्–यदवोचो दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति; तदसत्। कस्मात्? दह्यमाने च्छिद्यमान इव वृक्ष उपलब्धुरुपलभ्यमाने कर्मणि शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वाद्दाहादिसमानाश्रयैव वेदना। यत्र हि दाहश्छेदो वा क्रियते तत्रैव व्यपदिशति दाहादिवेदनां लोकः, न वेदनां दाहाद्युपलब्धरीति। कथं? क्व ते वेदनेति पृष्टे शिरसि मे वेदना, उरस्युदर इति वा, यत्र दहादिस्तत्रैव व्यपदिशति, न तूपलब्धरीति। यद्युपलब्धरि वेदना स्यात् वेदनानिमित्तं वा दाहच्छेदादि, वेदनाश्रयत्वेनोपदिशेद्दाहाद्याश्रयवत्।।३४।।

तत्साधनानां च संन्यासः सिद्ध्यतीति तत्राह—**संसारी च सन् सर्वाभ्युदय-निःश्रेयससाधनेऽधिकृतोऽभ्युदयनिःश्रेयससाधनानि कर्माणि तत्साधनानि च यज्ञोपवीतादीनि कथं परित्यजेयमिति।।३३।।**

तत्रानुमानं हेत्वसिद्ध्या दूषयितुमुपक्रमते—**तं प्रति ब्रूयात् यदवोचो दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति तदसत्। कस्मात् दह्यमाने छिद्यमान इव वृक्ष उपलब्धुरुपलभ्यमाने कर्मणि शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वात् दाहादिसमानाश्रयैव वेदना।** यथा वृक्षे दह्यमाने छिद्यमाने च दृश्यमाने तस्मिन्नेव द्रष्टुर्दृशिकर्मणि दाहछेदौ तत्प्रयुक्तक्लेशप्रतीतिश्च तत्रैव दृष्टा। तथैव देहे दह्यमाने छिद्यमाने चोपलभ्यमाने दाहादिसमानाश्रयैव दाहादिवेदना देहनिष्ठा तद्वेदनायाः शरीरे दृश्यत्वात्। अतोऽनात्मनि वेदनोपलब्धिरित्यर्थः। दाहादिवेदनाया दाहादिसमानाश्रयत्वमेव लोकव्यपदेशवशेन विशदयति—**यत्र हि दाहः छेदो वा क्रियते तत्रैव व्यपदिशति दाहादिवेदनां लोको न दाहाद्युपलब्धरीति।** तमेंव लोकव्यपदेशं प्रश्नद्वारेण प्रकटयति—**कथम्। क्व ते वेदनेति पृष्टः शिरसि मे वेदनोरस्युदर इति वा यत्र दाहादिस्तत्रैव व्यपदिशति नोपलब्धरीति।** कर्मकारणगतत्वेन वेदना अदृश्यमानत्वान्नोपलब्धुर्वेदनावत्त्व-मित्युक्तम्। तत्रैव युक्त्यन्तरमाह—**यद्युपलब्धरि वेदना स्यात्, वेदनानिमित्तं वा दाहच्छेदादि वेदनाश्रयत्वेनोपदिशेत् दाहाद्याश्रयवत्।**

तदा वेदनाश्रयत्वेनोपलब्धारमुपदिशेत्। यथा दाहाद्याश्रयं देहमुपदिशति न च तथा लोकस्य व्यपदेशो दृश्यत इत्यर्थः।।३४।।

---

१. शरीरशोधकान्येव संस्कारकर्माणि नात्मशोधकानि।

स्वयं च नोपलभ्येत, चक्षुर्गतरूपवत्। तस्माद्दाहच्छेदादिसमानाश्रयत्वेनोपलभ्यमानत्वाद्दाहादिवत्कर्मभूतैव वेदना। भावरूपत्वाच्च साश्रया तण्डुलपाकवत्। वेदनासमानाश्रय एव तत्संस्कारः स्मृतिसमानकाल एवोलभ्यमानत्वात्, वेदनाविषयः तन्निमित्तविषयश्च द्वेषोऽपि संस्कारसमानाश्रय एव। तथा चोक्तम्–

'रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत्।
गृह्यते धीश्रयं तत्स्माज्ज्ञाता शुद्धोऽभयः सदा'।।३५।।

इतोऽपि नोपलब्धृगता वेदना सिद्ध्यतीत्याह—**स्वयं च नोपलभ्येत**। यथा चक्षुर्गतं रूपं तेनैव चक्षुषा न गृह्यते। तथाऽऽत्मगता चेद्वेदना नैवात्मनोपलभ्येत। कर्तृत्वकर्मत्वयोरेकत्रानुपपत्तेरित्यर्थः। आत्मनो वेदनाश्रयत्वासम्भवमुपसंहरति—**तस्माद् दाहच्छेदादिसमानाश्रयत्वेनोपलभ्यमानत्वाद् दाहादिवत्कर्मभूतैव वेदना**। आत्मा वेदनाश्रयो न भवति, किन्तु निराश्रयैव वेदनेत्याशङ्क्य क्रियात्वात्तस्याः साश्रयत्वं, पाकादिवदित्याह—**भावरूपत्वाच्च साश्रया तण्डुलपाकवत्**। अनादिसन्ततिपतितपूर्वक्षणस्यैव वासनात्वात्तस्या न कश्चिदाश्रयोऽस्तीत्याशङ्क्याह—**वेदनासमानाश्रय एव तत्संस्कारः स्मृतिसमानकाल एवोपलभ्यमानत्वाद्वेदनाविषयस्तन्निमित्तविषयश्च द्वेषोऽपि संस्कारसमानाश्रय एव**। तत्समानाश्रयतत्संस्कारानभ्युपगमे वेदनानुसन्धानासम्भवप्रसक्तिरित्यर्थः। वेदनायाः स्वसंवेद्यत्वात्तत्संस्कारो नास्तीत्याशङ्क्याह—**स्मृतीति**। दुःखादिवेदना स्वव्यतिरिक्तसंविदो विषयः स्मृतितुल्यकाल एवोपलभ्यमानत्वात् घटादिवदित्यर्थः। यथा द्वेषस्य निराश्रयत्वं तथा संस्कारस्यापीत्याशङ्क्याह—**तन्निमित्तेति**। तस्या वेदनाया यन्निमित्तं दाहादि तद्विषयो द्वेषोऽपि संस्कारेण तुल्याश्रय एव। तस्माद् द्वेषादेरन्तःकरणनिष्ठत्वादात्मा शुद्धः सिद्ध्यतीत्यर्थः। उक्तेऽर्थे पद्यभागगतं वाक्यमुदाहरति। तथा चोक्तम्—

रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत्।
गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धोऽभयः सदा।। इति।

नीलपीतादिरूपसंस्कारेण तुल्य आधिराश्रयो ययोस्तौ रागद्वेषौ रूपसंस्कारतुल्याधी गृह्येते भयं च धीश्रयं बुद्ध्याश्रयं गृह्यते यद्यस्मात्तस्माज्ज्ञाता सदा शुद्धोऽभयश्चेत्यर्थः।।३५।।

---

१. वेदनाऽपि रागद्वेषादिवच्छरीरावच्छेदेनान्तःकरणवृत्तिरूपैव।

किमाश्रयाः पुना रूपसंस्कारादय इति? उच्यते–यत्र कामादयः। क्व पुनस्ते कामादयः? 'कामः सङ्कल्पो विचिकित्सा' इत्यादिश्रुतेर्बुद्धावेव। तत्रैव रूपादिसंस्कारादयोऽपि, 'कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदये' इति श्रुते। 'कामा येऽस्य हृदि श्रिताः', 'तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य', 'असङ्गो ह्ययम्', 'तद्वा अस्यैतदतिच्छन्दाः' इत्यादिश्रुतिशतेभ्यः; 'अविकार्योऽयमुच्यते', 'अनादित्वान्निर्गुणत्वात्' इत्यादिभ्यः–इच्छाद्वेषादि च क्षेत्रस्यैव[1] विषयस्य धर्मः, नात्मन इति–स्मृतिभ्यश्च कर्मस्थैवाशुद्धिः नात्मस्थेति।।३६।।

अतो रूपादिसंस्काराद्यशुद्धिसम्बन्धाभावान्न परस्मादात्मनो विलक्षणस्त्वमिति प्रत्यक्षादिविरोधाभावाद् युक्तं पर एवात्माऽहमिति

साधारण्येनानात्माश्रयत्वमुक्तं वेदनादीनामिदानीं प्रश्नपूर्वकं विशेषतो निर्दिशति—**किमाश्रयाः पुनः रूपसंस्कारादय इति। उच्यते। यत्र कामादयः।** कामाद्याश्रयमपि प्रश्नद्वारा श्रुत्यवष्टम्भेन स्पष्टयति—**क्व पुनस्ते कामादयः? 'कामः सङ्कल्पो विचिकित्सेत्यादि' श्रुतेः बुद्धावेव।** बुद्धावेव रूपसंस्कारादीनामवस्थिततत्वे प्रमाणमाह—**तत्रैव रूपसंस्कारादयोऽपि 'कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदयः' इति श्रुतेः। 'कामा येऽस्य हृदिश्रिता', 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य', असङ्गो ह्ययम् 'तद्वा अस्यैतदतिच्छन्दा' इत्यादिश्रुतिशतेभ्यः** हृदि बुद्धौ श्रिता आश्रिता इत्यर्थः। आत्मनः शुद्धत्वे प्रमाणमाह—**तीर्णो हीति।** हृदयस्य बुद्धेः सर्वाञ्छोकांस्तीर्णोऽतिक्रान्तो भवतीत्यर्थः। तदेतदस्यात्मनो रूपमतिच्छन्दाः। दैर्घ्यं छान्दसमतिच्छन्दा अतिकामं शुद्धानन्दत्वादित्यर्थः। अविकार्योऽयमुच्यते। अनादित्वान्निर्गुणत्वादित्यादि-स्मृतिभ्यश्चेति सम्बन्धः। श्रुतिभ्यः स्मृतिभ्यश्चात्मा शुद्धश्चेदुच्यते कस्य तर्हि धर्मोऽग्निहोत्रादिरशुद्धिर्वेत्याशङ्क्याह—**इच्छेति। नात्मन इति कर्मस्थैवाशुद्धिर्नात्मस्थेति।** न करोति न लिप्यत इत्यादिस्मृतिभ्यो भातीति सम्बन्धः।।३६।।

प्रकृतमुपसंहरति—**अतो रूपसंस्काराद्यशुद्धिसम्बन्धाभावान्न परस्मादात्मनो विलक्षणस्त्वमिति प्रत्यक्षादिविरोधाभावाद् युक्तं परमात्माहमिति प्रतिपत्तुम्।** अभेदप्रतिपत्तौ प्रमाणमाह—**'आत्मानमेवावेदहं ब्रह्मास्मि', 'एकधैवानुद्रष्टव्यम्'**

---

१. शरीरस्यैव, इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते (गीता १३.१)।

प्रतिपत्तुम्, 'तदात्मानमेवावेद् अहं ब्रह्मास्मीति', 'एकधैवाऽनुद्रष्टव्यम्', 'अहमेवाधस्तात्', 'आत्मैवाधस्तात्', 'सर्वमात्मानं पश्येत्', 'यत्र त्वस्य सर्वमात्मैव', 'इदं सर्वं यदयमात्मा', 'स एषोऽकलः', अनन्तरोऽबाह्यः 'अनन्तरमबाह्यम्', 'सबाह्याभ्यन्तरो ह्यजः', 'ब्रह्मैवेदम्', 'एतया द्वारा प्रापद्यत', 'प्रज्ञानस्य नामधेयानि', 'सत्यं ज्ञानमनन्तं ब्रह्म', 'तस्माद्वा एतस्मात्', 'तत्सृष्ट्वा तदेवानुप्राविशत्', 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी', 'अशरीरं शरीरेषु', 'न जायते म्रियते वा विपश्चित्', 'स्वप्नान्तं जागरितान्तम्', 'स म आत्मेति विद्यात्', 'यस्तु सर्वाणि भूतानि', 'तदेजति

'अहमेवाधस्तात्' आत्मैवाधस्तात् **'स एवाधस्तात् स उपरिष्टादि'ति** परोक्षत्वेन भूम्नो निर्देशात्तस्य परोक्षत्वाशङ्कां व्यावर्त्तयति—**अहमेवेति**। अहङ्कारस्यात्मत्वं वारयति—**आत्मैवेति**। अधस्तादुपरिष्टादिति परिच्छिन्नत्वं परिहृत्य पूर्णत्वमाह—**'सर्वमात्मानं पश्येत्'**। अविद्यावस्थायां कर्तृकरणादिभेदो भाति विद्यावस्थायां तद्दर्शनं नास्तीत्याह—**'यत्र त्वस्य सर्वमात्मैवाभूत्'**। ब्रह्मक्षत्रादिभेदस्यात्मव्यतिरेकेणासत्त्वं दर्शयति—**'इदं सर्वं यदयमात्मा' 'स एषोऽकलोऽमृत इति'**। जीवस्य ब्रह्मत्ववादिनीमाथर्वण-श्रुतिमुदाहरति—**'स एषोऽनन्तरोऽबाह्यः**। अन्तर्बहिर्विभागशून्यत्वमेकरसत्वं निर्दिशति—**अनन्तरमबाह्यम्**। कार्यकारणविभागवैधुर्यं कथयति—**सबाह्याभ्यन्तरो ह्यजः**। समस्तस्य वस्तुनो ब्रह्ममात्रत्वात्तदतिरेकेण न किञ्चिदस्तीति सूचयति—**ब्रह्मैवेदम्**। मूर्द्धन्यद्वारा शरीरं प्रविष्टस्य परस्यैव जीवभावान्न जीवब्रह्मभेदोऽस्तीत्याह—**'एतया द्वारा प्रापद्यत'**। यानि कानिचिन्नामानि तानि प्रज्ञानस्य ब्रह्मणो नामानीति सर्वात्मत्वं दर्शयति—**'प्रज्ञानस्य नामधेयानि भवन्ति'**। ब्रह्मविदाप्नोति परमिति सूत्रितं ब्रह्म सत्यमित्यादिना लक्षितम्। तस्माद्वा एतस्मादित्यादिना ततः सृष्टिराकाशादेरुच्यते। तत्सृष्ट्वा तदेवानुप्राविशदिति च सृष्टे जगति स्रष्टुरेवाविकृतस्य परस्य जीवभावेन प्रवेशो निर्दिश्यते। तेन जीवब्रह्मणोर्न भेदोऽस्तीत्याह—**सत्यं ज्ञानमनन्तम्। तस्माद्वा एतस्मात्'**। **'तत्सृष्ट्वा तदेवानुप्राविशत्**। तत्रैव श्रुत्यन्तरमाह—'एको देवः सर्वभूतेषु'। 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्', महान्तं विभुमात्मानं, मत्वा धीरो हर्षशोकौ जहातीति सम्बन्धः। जन्ममरणादिशून्यत्वेन कूटस्थमाह—**न जायते म्रियते वा। स्वप्नान्तं जागरितान्तम्**। स्वप्नान्तं स्वप्नस्वरूपम्। जागरितान्तं जागरस्वरूपं यः पश्यति, तं महान्तं मत्वा हर्षशोकौ जहातीति पूर्ववत्। 'स म

तन्नैजति', 'वेनस्तत्पश्यन्', 'तदेवाग्निः', 'अहं मनुरभवं सूर्यश्च', 'अन्तः प्रविष्टः शास्ता जनानाम्', 'सदेव सोम्य', 'तत्सत्यं स आत्मा तत्त्वमसि' इत्यादिश्रुतिभ्यः।।३७।।

स्मृतिभ्यश्च 'पूः प्राणिनः सर्व एव गुहाशयस्य', 'आत्मैव देवताः', 'नवद्वारे पुरे', 'समं सर्वेषु भूतेषु', 'विद्याविनयसम्पन्ने', 'अविभक्तं विभक्तेषु', 'वासुदेवः सर्वम्' इत्यादिभ्य एक एवात्मा परं ब्रह्म सर्वसंसारधर्मविनिर्मुक्तस्त्वमिति सिद्धम्।।३८।।

स यदि ब्रूयात्–यदि 'भगवन् अनन्तरोऽबाह्यः सबाह्याभ्यन्तरो ह्यजः' कृत्स्नः प्रज्ञानघन एव, सैन्धवघनवदात्मा सर्वमूर्तिभेदवर्जित आकाशवदेकरसः, किमिदं दृश्यते, श्रूयते वा, साध्यं साधनं वा साधकश्चेति श्रुतिस्मृतिलोकप्रसिद्धं वादिशतविप्रतिपत्ति-विषयमिति।।३९।।

आत्मेति विद्यात्'। 'यस्तु सर्वाणि भूतानि', 'तदेजति तन्नैजति' 'वेनस्तत्पश्यन् विश्वा भुवनानि विद्वान् यत्र विश्वं भवन्त्येकनीडमि'त्यत्र वेनो नाम कान्तिमान् परिशुद्धश्चिद्रूपेणावस्थितो विद्वान्निगद्यते। तदेवाग्निस्तद्वायुरित्यादिना सर्वात्मत्वं दर्शितम्। तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे 'अहं मनुरभवं सूर्यश्च'। 'अन्तःप्रविष्टः शास्ता जनानाम्', 'सदेव सोम्येदमग्र आसीत्'। 'तत्सत्यम् स आत्मा तत्त्वमसीत्यादिश्रुतिभ्यः।।३७।।

स्मृतिभ्यश्च–'पूः प्राणिनः सर्व एव गुहाशयस्य' 'आत्मैव देवताः'। 'नवद्वारे पुरे' 'समं सर्वेषु', 'विद्याविनयसम्पन्ने' 'अविभक्तं विभक्तेषु' वासुदेवः सर्व'मित्यादिभ्यः। सर्वप्राणिनो गुहाशयस्यात्मनः पूः पुरमित्यर्थः। श्रुतिस्मृतिसिद्धं ब्रह्मात्मैकत्वमुपसंहरति—एक एवात्मा परं ब्रह्म सर्वसंसारधर्मविनिर्मुक्तस्त्वमिति सिद्धम्।।३८।।

उक्ते ब्रह्मात्मैकत्वे लौकिकवैदिकव्यवहारविरोधमाशङ्कते—स यदि ब्रूयात्- 'यदि भगवन् अनन्तरोऽबाह्यः', 'सबाह्याभ्यन्तरो ह्यजः' 'कृत्स्नः प्रज्ञानघन एव' 'सैन्धवघनवदात्मा सर्वमूर्तिभेदविवर्जितः' आकाशवदेकरसः किमिदम्, तर्हि दृश्यते श्रूयते वा साध्यं साधनं साधकश्चेति श्रुतिस्मृतिलोकप्रसिद्धं वादिशतविप्रतिपत्तिविषय इति।।३९।।

आचार्यो ब्रूयात्–अविद्याकृतमेतद्यदिदं दृश्यते, श्रूयते वा[1], साध्यं साधनं साधकश्चेति। परमार्थतस्त्वेक एवात्मा अविद्या-दृष्टेरनेकवदवभासते–तिमिरदृष्ट्याऽनेकचन्द्रवत्। 'यत्र वा अन्यदिव स्यात्', 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति', 'मृत्योः स मृत्युमाप्नोति', 'अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्...अथ यदल्पं तन्मर्त्यम्' इति, 'वाचारम्भणं विकारो नामधेयम्', 'अनृतम्', 'अन्योऽसावन्योऽहम्' इति भेददर्शन-निन्दोपपत्तेरविद्याकृतं द्वैतम्–'एकमेवाद्वितीयम्', 'यत्रत्वस्य', 'को मोहः कः शोकः' इत्याद्येकत्वविधिश्रुतिभ्यश्चेति।।४०।।

यद्येवं, भगवन्, किमर्थं श्रुत्या साध्यसाधनादिभेद उच्यते, उत्पत्तिः प्रलयश्चेति?।।४१।।

अत्रोच्यते–अविद्यावत उपात्तशरीरादिभेदस्येष्टानिष्टयोगिनमात्मानं

पारमार्थिकब्रह्मात्मैकत्वस्याविद्याकृतव्यवहारेण विरोधो नास्तीत्याह—**आचार्यो ब्रूयात्–अविद्याकृतमेतद्यदिदं दृश्यते श्रूयते वा साध्यं साधनं साधकश्चेति परमार्थतस्त्वेक एवात्मा अविद्यादृष्टेरनेकवदाभासते। तिमिरदृष्टेरनेकचन्द्रवत्। 'यत्र वा अन्यदिव स्यात्' 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति'। 'मृत्योः स मृत्युमाप्नोति'। अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम्, अथ यदल्पं तन्मर्त्यमिति, 'वाचारम्भणं विकारो नामधेयम्'। 'अन्योऽसावन्योऽहमि'ति भेददर्शननिन्दोपपत्तेरविद्याकृतं द्वैतम्, 'एकमेवा-द्वितीयम्' 'यत्र त्वस्य', 'तत्र को मोहः कः शोकः' इत्याद्येकत्व-विधिश्रुतिभ्यश्चेति।**

द्वैतस्याविद्याकृतत्वे श्रुतीरुदाहरति—**यत्रेत्यादिना**। तत्रैव श्रुतार्थापत्तिं कथयति—**एकमेवेति**।।४०।।

भेदस्याविद्याकृतत्वे कर्मकाण्डश्रुतेरविद्यमानसाध्यसाधनादिभेदवादिन्या मिथ्यार्थत्वेनाप्रामाण्यप्रसक्तिरिति शङ्कते—**यद्येवं भगवन् किमर्थं श्रुत्या साध्यसाधनादिभेद उच्यते उत्पत्तिः प्रलयश्चेति**। सृष्टिवाक्यस्य च प्रामाण्यान्यथानुपपत्त्या भेदस्य सत्यतेत्याह—**उत्पत्तिः प्रलयश्चेति**।।४१।।

कर्मकाण्डश्रुतेः सृष्ट्यादिश्रुतेः प्रामाण्योपपत्तिं दर्शयति—**अत्रोच्यते**। तत्र

१. अवैदिकमिदं सर्वं लौकिकं दर्शनश्रवणादिकम्। अविद्याकृतं दर्शनं ब्रह्मणि न सम्भवति।

मन्यमानस्य साधनैरेवेष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानत इष्टप्राप्तिं चानिष्टपरिहारं चेच्छतः शनैस्तद्विषयमज्ञानं निवर्तयत् शास्त्रम्, न साध्यसाधनादिभेदं विधत्ते, अनिष्टरूपः संसारो हि स इति। तद्भेददृष्टिमेवाविद्यां संसारमूलमुन्मूलयति उत्पत्तिप्रलयादि एकत्वोपपत्तिप्रदशनेन।।४२।।

अविद्यायामुन्मूलितायां श्रुतिस्मृतिन्यायेभ्यः अनन्तरोऽबाह्यः सबाह्याभ्यन्तरो ह्यजः सैन्धवघनवत्प्रज्ञानघन एवैकरस आत्मा आकाशवत् परिपूर्ण इत्येवैका प्रज्ञा प्रतिष्ठिता परमार्थदर्शिनो भवति, न साध्यसाधनोत्पत्तिप्रलयादिभेदेनाशुद्धिगन्धोऽप्युपपद्यते।।४३।।

तच्चैतत्परमार्थदर्शनं प्रतिपत्तुमिच्छता वर्णाश्रमाद्यभिमानकृत-

---

कर्मकाण्डाख्यं शास्त्रं तावत्प्रसिद्धभेदानुवादेन साध्यसाधनविषयाज्ञानमनिवर्त्तयत् प्रमाणम्। मिथ्याभूतस्याप्यर्थक्रियासामर्थ्यात्र तु भेदमवबोधयति तस्यानिष्टत्वादि- **त्याह— अविद्यावत उपात्तशरीरादिभेदस्येष्टानिष्टयोगिनमात्मानं मन्यमानस्येष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानतः साधनैरेवेष्टप्राप्तिमनिष्टनिवृत्तिं चेच्छतः शनैस्तद्विषयमज्ञानं निवर्तयच्छास्त्रं न साध्यसाधनादिभेदं विधत्ते। अनिष्टरूपः संसारो हि स इति।** सम्प्रति सृष्ट्यादिवाक्यस्य तात्पर्यमाह—**तद्भेददृष्टिमेवाविद्यां संसारमूलमुन्मूलयति उत्पत्तिप्रलयादि एकत्वोपपत्ति-प्रदर्शनेन।** तज्जत्वात्तत्कृतत्वात्तत्प्रतिष्ठितत्वाच्च तन्मात्रमित्युपपत्त्यभिधानव्याजेनैकत्वे तात्पर्यादिदमपि सृष्ट्यादिवाक्यमविद्यामेवोन्मूलयतीत्यर्थः।।४२।।

अस्तु सृष्ट्यादिश्रुतेरुपदिष्टनीतितोऽविद्यानिवर्तकत्वम्। तावता किं सिध्यति तत्राह—**अविद्यायामुन्मूलितायां श्रुतिस्मृतिन्यायेभ्यः 'अनन्तरोऽबाह्यः', 'सबाह्याभ्यन्तरो ह्यजः', 'सैन्धवघनवत् प्रज्ञानघन एवैकरस आत्मा आकाशवत्परिपूर्ण' इत्येवैका प्रज्ञा प्रतिष्ठिता परमार्थदर्शिनो भवति। न साध्यसाधनोत्पत्तिप्रलयादिभेदेनाशुद्धिगन्धोऽप्युपपद्यते।।४३।।**

यत्तु सर्वकर्मसंन्यासानुपपत्तिरिति तत्राभ्युदयकामस्य यद्यपि संन्यासानुपपत्तिस्तथापि तत्त्वजिज्ञासुना संन्यासोऽवश्यं कर्त्तव्य इत्याह—**तच्चैतत्परमात्मदर्शनं प्रतिपत्तुमिच्छता वर्णाश्रमाद्यभिमानकृतपाङ्क्तरूपपुत्रवित्तलोकैषणाभ्यो**

---

१. साध्यसाधनप्रतिपादकानि शास्त्राण्यप्यविद्यावद्विषयाणि, तैश्चाविद्यानिवृत्तिमात्रं विधीयते, नात्मतत्त्वानुसन्धानम्।

पाङ्क्तरूपपुत्रवित्तलोकैषणादिभ्यो व्युत्थानं कर्तव्यं, सम्यक्प्रत्ययविरोधात्तदभिमानस्य। भेददर्शनप्रतिषेधार्थोपपत्तिश्चोपपद्यते। न ह्येकस्मिन्नात्मन्यसंसारित्वबुद्धौ शास्त्रन्यायोत्पादितायां तद्विपरीता बुद्धिर्भवति। न ह्यग्नौ शीतत्वबुद्धिः, शरीरे वाऽजरामरणबुद्धिः। तस्मादविद्याकार्यत्वात् सर्वकर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमार्थदर्शननिष्ठेन त्यागः कर्तव्यः[१]।।४४।।

व्युत्थानं कर्त्तव्यम्। सम्यक् प्रत्ययविरोधात्तदभिमानस्य। तच्चैतदिति। पञ्चभिर्यजमानजायापुत्रवित्तकर्मभिर्निर्वृत्तं पाङ्क्तम्। किञ्च यदि पुत्रवित्तादिभेदाभिमानस्य सम्यग्धीविरोधित्वं तदा मृत्योः स मृत्युमाप्नोतीत्यादिप्रतिषेधस्यार्थवत्त्वं युक्तम्। अन्यथा वैयर्थ्यप्रसङ्गात्। अतोऽवश्यं सम्यग्ज्ञानकामेन तद्विरुद्धाभिमानत्यागरूपः संन्यासः कर्त्तव्य इत्याह—**भेददर्शनप्रतिषेधार्थोपपत्तिश्च।** भेदाकारदर्शनस्य प्रतिषेधः श्रुतिषु दृश्यते। स च तत्त्वज्ञानकामेन सर्वकर्मसंन्यासे क्रियमाणे सत्युपपद्यते। तस्माज्जिज्ञासुना संन्यासः कर्त्तव्य इत्यर्थः। सम्यग्ज्ञानस्य कर्मसमुच्चितस्य मोक्षसाधनत्वान्न विहितत्यागो युक्तिमानित्याशङ्क्योपपत्तिमेव प्रकटयति—**नह्येकस्मिन्नात्मनि असंसारित्वबुद्धौ शास्त्रन्यायोत्पादितायां तद्विपरीता बुद्धिर्भवति। न ह्यग्नौ शीतबुद्धिः शरीरे वाऽजरामरणादिबुद्धिस्तस्मादविद्याकार्यत्वात् सर्वकर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमार्थदर्शननिष्ठेन त्यागः कर्तव्यः।**

विरुद्धयोः समुच्चयासम्भवं दृष्टान्तेन स्पष्टयति—**नह्यग्नाविति।** ज्ञानवतो मुक्तस्य फलात्मकः संन्यासो विधिं विनापि सिध्यति। मुमुक्षोस्तु जिज्ञासोः साधनात्मकः ससाधनः सर्वकर्मत्यागो वैधः सिद्धो भवतीति उपसंहरति—**तस्मादिति।**।।४४।।

।। इति शिष्यानुशासनं नाम प्रथमं प्रकरणम्।।१।।

●

---

१. ज्ञानिनां मुमुक्षूणाञ्च कृते शरीरसंस्कारभूतयज्ञोपवीतादीनां नावश्यकताऽस्ति। तेषामविद्याकार्यत्वाद् नह्यविद्याकार्येण विद्यां साधयितुं शक्यते।

अथ द्वितीयं कूटस्थाद्वयात्मबोधनामकमवगतिप्रकरणम्

सुखमासीनं ब्राह्मणं ब्रह्मनिष्ठं कश्चिद्ब्रह्मचारी जन्ममरणलक्षणात् संसारान्निर्विण्णो मुमुक्षुर्विधिवदुपसन्नः प्रपच्छ–भगवन्! कथमहं संसारान्मोक्षिष्ये शरीरेन्द्रियविषयवेदनावान् जागरिते दुःखमनुभवामि, तथा स्वप्नेऽनुभवामि, पुनः पुनः सुषुप्तिप्रतिपत्त्या विश्रम्य विश्रम्य जाग्रत्स्वप्नयोर्दुःखमनुभवामि–किमयमेव मम स्वभावः? किं वाऽन्यस्वभावस्य सतो नैमित्तिकः? इति। यदि अयमेव स्वभावः, न मे मोक्षाशा; स्वभावस्यावर्जनीयत्वात्। अथ नैमित्तिकः, निमित्तपरिहारे स्यान्मोक्षोपपत्तिः।।१।।

तं गुरुरुवाच–शृणु वत्स, न तवायं स्वभावः, किन्तु नैमित्तिकः।।२।।

अथ द्वितीयं कूटस्थाद्वयात्मबोधनामकमवगतिप्रकरणम्

शिष्यं देहद्वयाभिमानाद्व्युत्थाप्य ब्रह्मरूपमुपदिशता तद्विपरीतं अब्रह्मरूपमविद्याकृतमुक्तम्। इदानीं तदविद्याकृतत्वं प्रपञ्चयितुं प्रकरणान्तरमवतारयन् प्रथमं प्रश्नमुत्थापयति—**सुखमासीनं ब्राह्मणं ब्रह्मनिष्ठं कश्चिद्ब्रह्मचारी जन्ममरणलक्षणात् संसारात् निर्विण्णो मुमुक्षुर्विधिवदुपसन्नः पप्रच्छ, भगवन्! कथमहं संसारान्मोक्षिष्ये।**

नित्यमुक्तत्वादेव तव संसारसंस्पर्शाभावादनायासादेव मोक्षः स्यादित्याशङ्क्य स्वात्मन्यवस्थात्रयप्रतिपत्तेः संसारो भातीत्याह—**शरीरेन्द्रियविषयवेदनावान् जागरिते दुःखमनुभवामि तथा स्वप्नेऽनुभवामि च पुनः पुनः सुषुप्तिप्रतिपत्त्या विश्रम्य विश्रम्य** प्रतीतसंसारानुवृत्त्या कथं मुक्तिरित्याशङ्क्य विकल्पयति—**किमयमेव मम स्वभावः किं वाऽन्यस्वभावस्य सतो नैमित्तिक इति।** विकल्पद्वयेऽपि फलं कथयति—**यदि स्वभावो न मे मोक्षाशा स्वभावस्यावर्जनीयत्वात्। अथ नैमित्तिको निमित्तपरिहारात् स्यात् मोक्षोपपत्तिः**॥४५॥

एवं शिष्येणोक्ते द्वितीयं पक्षमाचार्यः स्वीकरोति—**तं गुरुरुवाच–शृणु वत्स, न तवायं स्वभावो, नैमित्तिकक**ः॥२॥

---

१. दुःखानुभवोऽविद्यानिमित्तेनोत्पद्यते, नात्मस्वभावः सुखस्वरूपत्वादात्मनः।

इत्युक्तः शिष्य उवाच–किं निमित्तम्? किं वा तस्य निवर्तकम्? को वा मम स्वभावः? यस्मिन्निमित्ते निवर्तिते नैमित्तिकाभावः रोगनिमित्तनिवृत्ताविव रोगी स्वभावं प्रतिपद्येयेति।।३।।

गुरुरुवाच–अविद्या निमित्तम्; विद्या तस्या निवर्तिका। अविद्यायां निवृत्तायां तन्निमित्ताभावान्मोक्ष्यसे जन्ममरण-लक्षणात्संसारात्, स्वप्नजाग्रद्दुःखं च नानुभविष्यसीति।।४।।

शिष्य उवाच–का सा अविद्या? किं विषया वा? विद्या च काऽविद्यानिवर्तिका यया स्वभावं प्रतिपद्येय? इति।।५।।

गुरुरुवाच–त्वं परमात्मानं सन्तमसंसारिणं संसार्यहमस्मीति विपरीतं प्रतिपद्यसे, अकर्तारं सन्तं कर्तेति, अभोक्तारं सन्तं भोक्तेति, विद्यमानं चाविद्यमानमिति–इयमविद्या[1]।।६।।

इत्युक्तः शिष्य आह। किं निमित्तम्, किं वा तस्य निवर्तकम्, को वा मम स्वभावः, यस्मिन्निमित्ते निवर्तिते नैमित्तिकाभावे रोगनिमित्तनिवृत्ताविव रोगी स्वभावं प्रतिपद्येयेति।

सप्तम्या निवर्त्यमेव विशिनष्टि—**यस्मिन्निति**। तन्निवर्तकं किमिति सम्बन्धः।।३।।

प्राप्तप्रश्नत्रयस्योत्तरमाह—**गुरुरुवाच अविद्या निमित्तम्, विद्या तस्या निवर्तिका, अविद्यायां निवृत्तायां तन्निमित्ताभावान्मोक्ष्यसे जन्ममरण-लक्षणात्संसारात्**। निमित्तं संसारस्येति शेषः। तन्निमित्ताभावादित्यत्र तच्छब्देन संसारो गृह्यते, कारणनिवृत्तौ कार्यनिवृत्तेरावश्यकत्वमभिप्रेत्याह—**स्वप्नजाग्रद्दुःखं च नानुभविष्यसीति**।।४।।

पुनरपि प्रश्नत्रयं दर्शयति—**शिष्य उवाच–का सा अविद्या किं विषया वा, विद्या च का अविद्यानिवर्त्तिका यया स्वभावं प्रतिपद्येयेति**।।५।।

तत्र कार्यद्वारेणाविद्यां दर्शयन्नात्मैव तस्या विषयस्तद्विद्यैव चात्मस्वभाव-मावेदयन्ती तन्निवर्त्तिकेत्यप्रेत्य परिहरति—**गुरुराह–त्वं परमात्मानं सन्त-मसंसारिणं संसार्यहमस्मीति विपरीतं प्रतिपद्यसे अकर्तारं सन्तं कर्तेति अभोक्तारं सन्तं भोक्तेति विद्यमानं चाविद्यमानमिति इयमविद्या**।।६।।

---

१. अविद्या हि विपरीतबुद्धिप्रवर्तिका।

शिष्य उवाच–यद्यप्यहं विद्यमानः तथाऽपि न परमात्मा, कर्तृत्वभोक्तृत्वलक्षणः संसारो मम स्वभावः, प्रत्यक्षादिभिः प्रमाणैरनुभूयमानत्वात्–नाविद्यानिमित्तः, अविद्यायाः स्वात्मविषयात्वानुपपत्तेः। अविद्या नामान्यस्मिन्नन्यधर्माध्यारोपणा–यथा प्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायाम्, यथा प्रसिद्धं पुरुषं स्थाणावध्यारोपयति, प्रसिद्धं वा स्थाणुं पुरुषे, नाप्रसिद्धं प्रसिद्धे, प्रसिद्धं वा अप्रसिद्धे। न चात्मन्यनात्मानमध्यारोपयति, आत्मनोऽप्रसिद्धत्वात्; तथाऽऽत्मानमात्मनि आत्मनोऽप्रसिद्धत्वादेव।।७।।

तं गुरुरुवाच–न, व्यभिचारात्। न हि, वत्स, प्रसिद्धं प्रसिद्ध

मिथ्याज्ञानकारणभूता अविद्येत्ययुक्तम्। मिथ्याज्ञानातिरिक्ताविद्याभावादिति मन्वानः शङ्कते—**शिष्य आह**। संसारोपादानत्वेन मिथ्याज्ञानातिरिक्ताविद्या सिद्ध्यतीत्याशङ्क्याह—**यद्यप्यहं विद्यमानस्तथापि कर्तृत्वभोक्तृत्वलक्षणः संसारो मम स्वभावः प्रत्यक्षादिप्रमाणैरनुभूयमानत्वात् नाविद्यानिमित्तः**। संसारोऽविद्याप्रयुक्तो न भवति प्रामाणिकत्वादात्मवदित्यर्थः। किञ्चात्मनि संसारश्चेदविद्यया विद्यते तर्हि तस्याः स्वात्मभूतप्रत्यगात्मविषयत्वं वक्तव्यम्। तमविषयीकृत्य तत्र संसारसाधकत्वायोगात्। न च प्रत्यगात्मविषयत्वमविद्याया युज्यते। तथा च न तत्राविद्याकृतः संसारः सिध्यतीत्याह—**अविद्यायाः स्वात्मविषयत्वानुपपत्तेः**। तामेवानुपपत्तिं दर्शयितुमविद्यास्वरूपमनुवदति—**अविद्या नामान्यस्मिन्नन्यधर्माध्यारोपणा**। सा च विषये विषयान्तरस्य भवतीत्युदाहरणाभ्यां साधयति—**यथा प्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायां यथा प्रसिद्धं पुरुषं स्थाणावध्यारोपयति प्रसिद्धं वा स्थाणु पुरुषे**। नाप्रसिद्धं प्रसिद्धे, प्रसिद्धं वा अप्रसिद्धे, शुक्तिकायामध्यारोपयतीति सम्बन्धः। पुरुष इत्यत्रापि तथैव सम्बन्धः। व्यावर्त्यमंशं दर्शयति—**नेत्यादिना**। चकारेण नञनुकृष्यते। तत्रोभयत्रापि पूर्ववदेवान्वयः। विधिप्रतिषेधाभ्यां सामान्यन्यायं प्रदर्श्यात्मानात्मनोरितरेतराध्यारोपणासिद्धिं फलितामुपन्यस्यति—**न चात्मन्यनात्मानमध्यारोपयति आत्मनोऽप्रसिद्धत्वात्। तथाऽऽत्मानमनात्मनि आत्मनोऽप्रसिद्धत्वादेव** अनात्मनि नाध्यारोपयतीति सम्बन्धः।।७।।

प्रसिद्धस्यैव प्रसिद्धान्तरे अध्यासस्तस्य संस्कारसमुत्पन्नत्वादित्युक्तम्। प्रत्याह—**तं गुरुराह–न, व्यभिचारात्**। व्यभिचारमेव स्फोरयति—**नहि वत्स,**

एवाध्यारोपयतीति नियन्तुं शक्यम्। आत्मन्यध्यारोपणदर्शनात्। गौरोऽहं कृष्णोऽहमिति देहधर्मस्याहंप्रत्ययविषये आत्मनि, अहंप्रत्ययविषयस्य चात्मनः देहेऽयमहमस्मीति।।८।।

शिष्य आह–प्रसिद्ध एव तर्ह्यात्माऽहंप्रत्ययविषयतया, देहश्चायमिति। तत्रैवं सति प्रसिद्धयोरेव देहात्मनोरितरेतराध्यारोपणा स्थाणुपुरुषयोः शुक्तिकारजतयोरिव। तत्र कं विशेषमाश्रित्य भगवतोक्तं प्रसिद्धयोरितरेतराध्यारोपणेति नियन्तुं न शक्यत इति?।।९।।

गुरुराह–शृणु सत्यं प्रसिद्धौ देहात्मानौ। न तु स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ। कथं तर्हि? नित्यमेव

प्रसिद्धं प्रसिद्ध एवाध्यारोपयतीति नियन्तुं शक्यम्। आत्मन्यध्यारोपणदर्शनात्। गौरोऽहं कृष्णोऽहमिति देहधर्मस्याहंप्रत्ययविषये आत्मन्यहंप्रत्ययविषयस्य चात्मनः देहेऽयमहमस्मीति देहस्य तद्धर्माणां च गौरादीनामहंप्रत्ययविषये तस्य च देहेऽध्यासो यथाऽनुभूयते तथाऽन्तःकरणस्य तद्धर्माणां च कर्तृत्वादीनां चिदात्मनि तस्य चैतन्यस्य चान्तःकरणे अध्यासः सिध्यति। न हि प्रमीयमाणार्थ-संस्कारोऽध्यासनिबन्धनम्। केवलव्यतिरेकाभावादित्यर्थः।।८।।

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमभिप्रेत्य शङ्कते—**शिष्य आह–प्रसिद्ध एव तर्ह्यात्मा अहंप्रत्ययविषयतया, देहश्चायमिति।** आत्मनोऽहंप्रत्ययविषयत्वेन देहस्य चेदंकारास्पदत्वेन प्रसिद्धत्वे फलितमाह—**तत्रैवं सति प्रसिद्धयोरेव देहात्मनो-रितेतराध्यारोपणा स्थाणुपुरुषयोः शुक्तिकारजतयोरिव। तत्र कं विशेषमाश्रित्य भगवतोक्तं प्रसिद्धयोरेवेतरेतराध्यारोपणेति नियन्तुं न शक्यत इति।**

दृष्टान्ते प्रसिद्धस्यैव प्रसिद्धान्तरेऽध्यारोपणेति सिद्धे सत्याचार्यवचनं मूलविकलमनादेयमापन्नमित्याह—**तत्रेति।** दार्ष्टान्तिके त्वहं विषयव्यतिरिक्तस्य चिद्धातोरप्रसिद्धत्वान्न तत्रान्तःकरणस्य तद्धर्मस्य वा कर्तृत्वादेरध्यासः सिध्यतीति भावः।।९।।

दृष्टान्तवद् दार्ष्टान्तिकोपपत्तिमुपपादयितुमुपक्रमते—**गुरुराह–शृणु, सत्यं प्रसिद्धौ देहात्मानौ, न तु स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ। कथं तर्हि नित्यमेव निरन्तराविविक्तप्रत्ययविषयतया (सर्वलोक) प्रसिद्धौ। न ह्ययं देहः अयमात्मेति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णाति यतः कश्चित्।** दृष्टान्ते देहात्मानौ सर्वलोकप्रसिद्धौ न तथा

निरन्तराविविक्तप्रत्ययविषयतया प्रसिद्धौ। न हि–अयं देहः, अयमात्मा–इति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णाति यतः कश्चित्। अत एव हि मोमुह्यते लोक आत्मानात्मविषये[1]–एवमात्मा, नैवमात्मेति इमं विशेषमाश्रित्य अवोचं नैवं नियन्तुं शक्यमिति।।१०।।

नन्वविद्याध्यारोपितं यत्र यत्, तदसत् तत्र दृष्टम्–यथा रजतं शुक्तिकायाम्, स्थाणौ पुरुषः, रज्ज्वां सर्पः, आकाशे तलमलिनत्वमित्यादि–तथा देहात्मनोरपि नित्यमेव निरन्तराविविक्त-प्रत्ययेनेतरेतराध्यारोपणा कृता स्यात्–तदितरेतरयोर्नित्यमेवासत्त्वं स्यात्–यथा शुक्तिकादिष्वविद्याध्यारोपितानां रजतादीनां नित्य-मेवात्यन्तासत्त्वम्, तद्विपरीतानां च विपरीतेषु, तद्वद्देहात्मनो-

---

चिदात्माहङ्काराविति विशेषमाशङ्क्याह—**सत्यमिति**। विविक्तत्वेन देहात्मनोरप्रसिद्धत्वे कथं प्रसिद्धिरभ्युपगम्यत इत्याशङ्क्याह—**कथमिति**। देहात्मनोरविविक्तत्वेन प्रसिद्धिमेव प्रकटयति—**नहीति**। देहात्मनोरविविक्तत्वेनैव प्रसिद्धिरित्यत्र वादिभ्रान्तिं लिङ्गत्वेन दर्शयति—**अत एव हि मोमुह्यते लोकः आत्मानात्मविषये एवमात्मा नैवमात्मेति। इमं विशेषमाश्रित्यावोचं नैवं नियन्तुं शक्यमिति**।

यद्यपि गौरोऽहमित्यादौ पदार्थद्वयं प्रतिभाति तथापि भेदविशिष्टतया न भाति अन्यथा लोकायतिकानां विवादाभावप्रसङ्गात्। अतो यथा तव भेदेनाप्रसिद्धेऽपि अहंकर्तरि गौरत्वाद्यध्यारोपः तथा ममापि चिदात्मन्यहङ्कारस्य तद्धर्माणां च कर्तृत्वादीनामध्यासो भविष्यतीति मन्वानः सन्नाह—**इतीममिति**।।१०।।

आत्मानात्मनोरितरेतराध्यासे द्वयोरपि मिथ्यात्वप्रसक्तेः शून्यवादापत्तिरिति शङ्कते—**ननु यत् यत्राविद्याध्यारोपितं तत्तत्रासद्दृष्टम्**। आरोपितस्याधिष्ठाने नास्तित्वमित्येतद् दृष्टान्तेन स्पष्टयति—**यथा रजतं शुक्तिकायां स्थाणौ पुरुषः रज्ज्वां सर्पः आकाशे तलमलिनत्वमित्यादि तथा देहात्मनोरपि नित्यमेव निरन्तराविविक्तप्रत्ययतया इतरेतराध्यारोपणा कृता स्यात् तदितरेतरयोर्नित्य-मेवासत्त्वं स्यात्**। यदीत्यध्याहारः। उक्तमेवार्थं दृष्टान्तदार्ष्टान्तिकरूपं प्रपञ्चयति—**इतरेतरयोर्नित्यमेवासत्त्वं स्यात्। यथा शुक्तिकादिष्वविद्याध्यारोपितानां रजतादीनां शुक्तिकादिषु नित्यमेवात्यन्तासत्त्वं तद्विपरीतानां च विपरीतेषु तद्वद् देहात्मनोरविद्ययैव इतरेतराध्यारोपणा कृता स्यात्। तत्रैवं सति देहात्मनोरसत्त्वं**

---

१. आत्मानात्मनोर्यदि प्रार्थक्येन प्रत्ययः स्यात्तदा मोहोऽपगच्छेत्।

रविद्ययैवेतरेतराध्यारोपणा कृता स्यात्; तत्रैवं सति देहात्मनोरसत्त्वं प्रसज्येत—तच्चानिष्टम्, वैनाशिकपक्षत्वात्। अथ तद्विपर्ययेण देह आत्मन्यविद्ययाध्यारोपितः, देहस्यात्मनि सति असत्त्वं प्रसज्यत, तच्चानिष्टम्, प्रत्यक्षादिविरोधात्। तस्माद्देहात्मानौ नाविद्ययेतरेतर-स्मिन्नध्यारोपितौ। कथं तर्हि? वंशस्तम्भवन्नित्यसंयुक्तौ।।११।।

न, अनित्यत्वपरार्थत्वप्रसङ्गात्। संहतत्वात् परार्थत्वमनित्यत्वं च वंशस्तम्भादिवदेव। किञ्च—यस्तु परैर्देहेन संहतः कल्पित आत्मा, स संहतत्वात्परार्थः। तेनाऽसंहतः परोऽन्यो नित्यः सिद्धस्तावत्।।१२।।

प्रसज्येत। तद्विपरीतानां रजतादिव्यतिरिक्तानां सर्पादीनां शुक्तिकादिविलक्षणेषु, रज्ज्वादिषु नित्यमेवात्यन्तासत्त्वमिति सम्बन्धः। कृता स्याच्चेदित्यध्याहारः। प्रसङ्गस्येष्टत्वं निराचष्टे—**तच्चानिष्टं वैनाशिकपक्षत्वादिति। अथ तद्विपर्ययेण देहः आत्मन्यविद्ययाऽध्यारोपितः देहस्यात्मनि असत्त्वं प्रसज्येत। तच्चानिष्टं प्रत्यक्षादिविरोधात्। तस्माद् देहात्मानौ नाविद्यया इतरेतरस्मिन् अध्यारोपितौ, कथं तहि वंशस्तम्भवन्नित्यसंयुक्तौ**।

तस्यांसंहतस्य देहे देहमात्रतया अध्यारोपितत्वेनासत्त्वानित्यत्वादिदोष-प्रसङ्गो न भवति। आत्मानात्मनोरितरेतराध्यारोपे शून्यवादश्चेदापद्यते तर्हि देहादावात्मारोपवैपरीत्येन देहादेरेव आत्मन्यध्यारोपः स्यात्तथा सत्यात्मनोऽसत्त्व-प्रसङ्गाभावादित्याशङ्कामनूद्य दूषयति—**अथेत्यादिना**। प्रसङ्गस्येष्टत्वं शङ्कित्वा प्रमाणविरोधेन प्रत्यादिशति—**तच्चेति**। इतरेतराध्यासस्यान्यतराध्यासस्य वाऽनुपपन्नत्वमुपपादितमुपसंहरते—**तस्मादिति**। यदीतरेतराध्यासो न घटते कथं तर्हि गौरोऽहमित्यादिसामानाधिकरण्यधीरिति शङ्कते—**कथं तर्हीति**। तत्र मीमांसको ब्रूते—**वंशेति**।।११।।

न, अनित्यत्वपारार्थ्यप्रसङ्गात् संहतत्वात् परार्थत्वमनित्यत्वं च वंशस्तम्भादिवदेव[1]**। किञ्च यस्तु परैर्देहेन संहतः कल्पित आत्मा स संहतत्वात् परार्थः तेनासंहतः परोऽन्यो नित्यः सिद्धस्तावत्**।

सिद्धान्ती तु पारिशेष्यादितरेतराध्यासं सिसाधयिषुरादौ परपक्षं प्रतिक्षिपति—**नानित्यत्वेति**। प्रसङ्गमेव प्रकटयति—**संहतत्वादिति**। इतश्चात्मा देहादिसंयुक्तो न भवतीत्याह—**किञ्चेति**। देहादिना चेदात्मा संहन्यते स तर्हि संहतत्वादासनादि-वदसंहतशेषः स्यादिति संहतविलक्षणात्मसिद्धिरित्याह—**यस्त्विति**।।१२।।

---

१. वंशस्तम्भवन्नित्यसंयोग आत्मानात्मनोरिति स्वीकारे, देहादिवदात्मनोऽप्यनित्यत्वमापद्येत।

तस्यासंहतस्य देहे देहमात्रतयाऽध्यारोपितत्वेनासत्त्वानित्यत्वादिदोषप्रसङ्गो न भवति। ननु तत्र निरात्मको देह इति वैनाशिकपक्षप्राप्तिदोषः स्यात्।।१३।।

न, स्वत एवात्मन आकाशस्येवासंहतत्वाभ्युपगमात्। सर्वेणासंहतः स चात्मेति न निरात्मको देहादिः सर्वः स्यात्। यथा चाकाशं सर्वेणासंहतमिति सर्वं न निराकाशं भवति एवम्। तस्मान्न वैनाशिकपक्षप्राप्तिदोषः स्यात्।।१४।।

यत्पुनरुक्तम्–देहस्यात्मन्यसत्त्वे प्रत्यक्षादिविरोधः स्यादिति, तन्न प्रत्यक्षादिभिरात्मनि देहस्य सत्त्वानुपलब्धेः। न ह्यात्मनि–कुण्डे बदरम्, क्षीरे सर्पिः, तिले तैलम्, भित्तौ चित्रमिव च–प्रत्यक्षादिभिर्देह उपलभ्यते। तस्मान्न प्रत्यक्षादिविरोधः।।१५।।

आत्मा चेदेवमसंहतः सिध्येत्तर्हि तस्य देहादावधिष्ठाने तन्मात्रत्वेनारोपितत्वे स्वीकृते सत्यसत्त्वादिदोषप्रसङ्गो यः शङ्क्यते स न भवत्यात्मनः संसृष्टत्वेनारोपेऽपि स्वरूपेणारोपाभावादित्यात्मनोऽसंहतत्वफलं कथयति—**तस्येति**। आत्मा परमार्थतोऽसंहतश्चेत्तर्हि देहादेर्निरात्मकत्वमिति पक्षान्तरप्रसक्तिरिति शङ्कते—**ननु च निरात्मको देह इति वैनाशिकपक्षप्राप्तिदोषः स्यात्**।।१३।।

परमार्थतः असंहतस्यापि देहादौ संसर्गाध्यासाभ्युपगमाद्देहस्य सात्मकत्वं सिध्यतीति परिहरति—**न, स्वत एवात्मन आकाशस्येवासंहतत्वाभ्युपगमात्। तदेव प्रपञ्चयति–सर्वेणासंहतः स चात्मेति न निरात्मकः देहादिः सर्वः स्याद्यथाऽऽकाशः सर्वेणासंहत इति सर्वं न निराकाशं भवति एवम्, तस्माद्वैनाशिकपक्षप्राप्तिदोषो न स्यात्**।।१४।।

देहादेरात्मन्यध्यस्तत्वेन तत्रासत्त्वे प्रमाणविरोधः स्यादिति परोदीरितमनुभाष्य दूषयति—**यत्पुनरुक्त, देहस्यात्मन्यध्यस्तत्वेनासत्त्वे प्रत्यक्षादिविरोधः स्यादिति। तन्न। प्रत्यक्षादिभिरात्मनि देहस्य सत्त्वानुपलब्धेः। नह्यात्मनि कुण्डे बदरं क्षीरे सर्पिस्तिले तैलं भित्तौ चित्रमिव च प्रत्यक्षादिभिर्देह उपलभ्यते**। अनुपलब्धिमेव साधयति नहीति। आत्मनि देहादेरप्रामाणिकत्वे फलितमाह—**तस्मान्न प्रत्यक्षादिविरोधः**।।१५।।

---

१. आत्मनो देहादिषु संसर्गाध्यासः।

कथं तर्हि प्रत्यक्षाद्यप्रसिद्धात्मनि देहाध्यारोपणा, देहे चात्मारोपणा।।१६।।

नायं दोषः स्वभावप्रसिद्धत्वादात्मनः। नहि कादाचित्कसिद्धावेवाध्यारोपणा, न नित्यसिद्धौ–इति नियन्तुं शक्यम्, आकाशे तलमलाद्यध्यारोपणदर्शनात्।।१७।।

किं भगवन्, देहात्मनोरितरेतराध्यारोपणा देहादिसङ्घातकृता अथवाऽऽत्मकृतेति?।।१८।।

गुरुरुवाच–यदि देहादिसङ्घातकृता, यदि चात्मकृता, किं तव स्यात्?।।१९।।

इत्युक्तः शिष्य आह–यद्यहं देहादिसङ्घातमात्रः, ततो

आत्मा प्रमितो वा न वा प्रमितत्वे नाधिष्ठानत्वं आरोप्यत्वं वा, प्रमितिविरोधाद् अप्रमितत्वेऽपि नाधिष्ठानत्वादि सिध्यति। अप्रतिपन्नस्य तदयोगादिति शङ्कते—**कथं तर्हि प्रत्यक्षाद्यप्रमित आत्मनि देहाध्यारोपणा देहे चात्माध्यारोपणा**।।१६।।

स्फुरणमात्रस्याधिष्ठानत्वादिप्रयोजकत्वात् प्रमाणविशेषणस्य केवलव्यतिरेकविरहिणो अकिञ्चित्करत्वादध्यासाविरोधिस्फुरणरूपेण स्वतोऽपरोक्षे चिदात्मनि देहाद्यध्यासः सिध्यतीति परिहरति—**नायं दोषः। स्वाभावसिद्धत्वादात्मनः।** शुक्त्यादौ सम्प्रयुक्ते विषये विषयान्तरस्य रजतादेरध्यासदर्शनात् कथमात्मन्यसम्प्रयुक्ते देहाद्यध्यासः स्यादित्याशङ्क्याह—**नहि कादाचित्कसिद्धावेवाध्यारोपणं न नित्यसिद्धाविति नियन्तुं शक्यम्। आकाशे तलमलाद्यध्यासदर्शनात्**।।१७।।

नीरूपद्रव्यत्वेन सर्वगतत्वेन वाऽऽकाशस्याक्षासंयोगित्वेऽपि तत्र साक्षिसिद्धे तलाद्यध्यासदर्शनान्नायं नियमोऽस्तीत्यर्थः। शुक्त्यादौ देवदत्तो रूप्यादिकमध्यस्यतीति दृष्टत्वादिहापि कश्चिदध्यासकर्त्ता वक्तव्यः स्यादिति पृच्छति—**किं भगवन् देहात्मनोरितरेतराध्यारोपणा देहादिसङ्घातकृता अथ वा आत्मकृतेति**।।१८।।

सन्देहवत्प्रयोजनस्यापि वक्तव्यत्वात्पक्षद्वयेऽपि प्रयोजनं विमृशति—**गुरुराह–यदि देहादिसङ्घातकृता आत्मकृता वा किं तव स्यात्**।।१९।।

पक्षद्वयेऽपि क्रमेण प्रयोजनं दर्शयति—**इत्युक्तः शिष्य आह–यद्यहं देहादिसङ्घातमात्रस्ततो ममाचेतनत्वात्परार्थत्वमिति न मत्कृता देहात्मनोरित-**

ममाचेतनत्वात्परार्थत्वमिति न मत्कृता देहात्मनोरितरेतराध्यारोपणा। अथाहमात्मा परोऽन्यः सङ्घातात्, चितिमत्त्वात्स्वार्थ इति मयैव चितिमताऽऽत्मन्यध्यारोपणा क्रियते सर्वानर्थबीजभूता।।२०।।

इत्युक्तो गुरुरुवाच–अनर्थबीजभूतां चेन्मिथ्याध्यारोपणां जानीषे, तां मा कार्षीस्तर्हि।।२१।।

नैव, भगवन्! शक्नोमि न कर्तुम्। अन्येन [1]केनचित्प्रयुक्तोऽहं, न स्वतन्त्र इति।।२२।।

न तर्हि अचितिमत्त्वात्स्वार्थस्त्वम्। येन प्रयुक्तोऽस्वतन्त्रः प्रवर्तसे, स चितिमान् स्वार्थः। सङ्घात एव त्वम्।।२३।।

यद्यचेतनोऽहम्, कथं सुखदुःखवेदनां भवदुक्तं च जानामि?।।२४।।

रेतराध्यारोपणा। अथाहमात्मा परोऽन्यः सङ्घाताच्चितिमत्त्वात्स्वार्थ इति मयैव चितिमताऽऽत्मन्यध्यारोपणा क्रियते। सर्वानर्थबीजभूता।

मया हीयमध्यारोपणा क्रियते तत्र मच्छब्दार्थः सङ्घातो वा ततोऽन्यो वा परमात्मेति विकल्प्य क्रमेण प्रत्याचष्टे—**यदीत्यादिना**।।२०।।

प्रत्यगात्मैव चिदेकतानः सर्वार्थानर्थबीजभूतमध्यारोपणमात्मनि करोतीत्युक्तं व्यक्तीकर्तुमाक्षिपति—**इत्युक्तो गुरुरुवाच–अनर्थबीजभूतां चेन्मिथ्याध्यारोपणां जानीषे तां मा कार्षीस्तर्हि**।।२१।।

परस्मादीश्वरात् प्रत्यगात्मनोऽन्यत्वमादाय शिष्यो ब्रूते—**नैव भगवञ्छक्नोमि न कर्तुम्। अन्येन केनचित्प्रयुक्तोऽहं न स्वतन्त्र इति**।।२२।।

अन्येन प्रयुक्तत्वे तव जडत्वादस्वातन्त्र्याद्रथशकटादिसदृशत्वात्प्रवर्त्तकस्येश्वरस्य चेतनत्वेन स्वातन्त्र्यम्। तव तु सङ्घातमात्रत्वमित्याचार्यो दर्शयति—**न तर्ह्यचितिमत्त्वात्स्वार्थस्त्वम्। येन प्रयुक्तोऽस्वतन्त्रः प्रवर्त्तसे स चितिमान् स्वार्थः। सङ्घात एव त्वम्**।।२३।।

न मम सङ्घातत्वेनाचेतनत्वं तथा सति सुखदुःखादेर्गुरूपदिष्टस्य च वेदनायोगादिति शङ्कते—**यद्यचेतनोऽहं कथं सुखदुःखवेदनां भवदुक्तं च जानामि**।।२४।।

---

१. अनर्थकेनेत्यर्थः।

गुरुरुवाच–किं सुखदुःखवेदनाया मदुक्ताच्चान्यस्त्वम्, किं वाऽनन्य एव इति।।२५।।

शिष्य उवाच–नाहं तावदन्यः। कस्मात्? यस्मात्तदुभयं कर्मभूतं घटादिकमिव जानामि। यद्यनन्योऽहम्, तेन तदुभयं न जानीयाम्, किन्तु जानामि, तस्मादन्यः। सुखदुःखवेदनाविक्रिया च स्वार्थैव प्राप्नोति, त्वदुक्तं च स्यात्, अनन्यत्वे। न च तयोः स्वार्थता युक्ता। नहि चन्दनकण्टककृते सुखदुःखे चन्दनकण्टकार्थे, घटोपयोगो वा घटार्थः। तस्मात्तद्विज्ञातुर्मम चन्दनादिकृतोऽर्थः। अहं हि ततोऽन्यः समस्तमर्थं जानामि बुद्ध्यारूढम्।।२६।।

तं गुरुरुवाच–एवं तर्हि स्वार्थस्त्वं चितिमत्त्वात्, न परेण प्रयुज्यते। नहि चितिमान् परतन्त्रः परेण प्रयुज्यते, चितिमतश्चिति-मदर्थत्वानुपपत्तेः[1], समत्वात्, प्रदीपप्रकाशयोरिव नाप्यचितिमदर्थत्वं

तत्राचार्यो गूढाभिसन्धिर्विकल्पति—**गुरुराह–किं सुखदुःखवेदनाया मदुक्ताच्चान्यस्त्वम्! किं वाऽनन्य एवेति**।।२५।।

द्वितीयं पक्षं शिष्यमुखेन दूषयति—**शिष्य आह–नाहं तावदनन्यः। कस्मात् यस्मात्तदुभयं कर्मभूतं घटादिकमिव जानामि**। तदेव व्यतिरेकमुखेन साधयति—**यद्यनन्योऽहं तेन तदुभयं न जानीयाम्, किन्तु जानामि तस्मादन्यः**। तेन सुखादिना गुरूपदिष्टेन चेति यावत्। एकत्र कर्मकर्तृत्वायोगादित्यर्थः। अन्यत्वपक्षे सुखादिविक्रिया गुरूपदिष्टं च मच्छेषः स्यात्। अनन्यत्वे तु तयोः शेषिणोऽभावात्स्वशेषत्वमापद्येयाताम्। अतश्चान्यत्वमेव युक्तमित्याह—**सुखेति**। सुखादिविक्रियाया गुरूपदिष्टस्य च स्वार्थत्वाभावो दृष्टः। तेन साधयति—**नहि चन्दनकण्टककृते सुखदुःखे चन्दनकण्टकार्थे** घटोपयोगो वा घटार्थः। तस्मात्सुखदुःखवेदनाविक्रिया च स्वार्थैव प्राप्नोति त्वदुक्तं चानन्यत्वेन च तयोः स्वार्थता युक्ता विज्ञातुम्। **मम चन्दनादिकृतोऽर्थः अहं हि ततोऽन्यः समस्तमर्थं जानामि। मद्बुद्ध्यारूढम्**।।२६।।

एवं शिष्यद्वारेणानन्यत्वपक्षं प्रतिक्षिप्यान्यत्वपक्षं स्वीकृत्याचार्यः स्वाभिप्रायं प्रकटयति—**तं गुरुराह–एवं तर्हि स्वार्थस्त्वं चितिमत्त्वान्न परेण प्रयुज्यसे**। तदेव स्फुटयति—**नहि चितिमान् परतन्त्रः परेण प्रयुज्यते**। चितिमत्त्वेऽपि परेण

---

१. यदि चितिमानपि परेण प्रयुक्तः स्यात्तदा चित्तिमत्त्वस्यानार्थक्यमापद्येत।

चितिमतो भवति, अचितिमतोऽचितिमत्त्वादेव स्वार्थसम्बन्धानुपपत्तेः नाप्यचितिमतोरन्योन्यार्थत्वं दृष्टम्। नहि काष्ठकुड्ये अन्योन्यार्थं कुर्वाते।।२७।।

ननु चितिमत्त्वे समेऽपि भृत्यस्वामिनोरन्योन्यार्थत्वं दृष्टम्।।२८।।

नैवम्, अग्नेरुष्णप्रकाशवत्तव चितिमत्त्वस्य विवक्षिततत्वात्। प्रदर्शितश्च दृष्टान्तः प्रदीपप्रकाशयोरिवेति। तत्रैवं सति, स्वबुद्ध्यारूढमेव सर्वमुपलभसे अग्न्युष्णप्रकाशतुल्येन कूटस्थानित्य-चैतन्यस्वरूपेण। यदि चैवमात्मनः सर्वदा निर्विशेषत्वमुपगच्छसि, किमित्यूचिवान् सुषुप्ते विश्रम्य विश्रम्य जाग्रत्स्वप्नयोर्दुःखमनुभवामि,

---

प्रयुक्तत्वं किं न स्यादित्याशङ्क्य किमुभयोः चितिमत्त्वं किं वाऽन्यतरस्येति विकल्प्याद्यं दूषयति—**चितिमतश्चितिमदर्थत्वानुपपत्तेः, समत्वात् प्रदीप-प्रकाशयोरिव।** द्वितीयं प्रत्याह—**नाप्यचितिमदर्थत्वं चितिमतः भवति अचितिमतः अचितिमत्त्वादेव स्वार्थत्वानुपपत्तेः।** अस्तु तर्हि द्वयोरेवार्थार्थि-नोरचितिमत्त्वं नेत्याह—**नाप्यचितिमतोरन्योन्यार्थत्वं दृष्टम्। नहि काष्ठकुड्ये अन्योन्यार्थं कुर्वाते**।।२७।।

चितिमतोः समत्वान्न शेषशेषित्वमित्यत्र व्यभिचारं शङ्कते—**ननु चितिमत्त्वे समेऽपि भृत्यस्वामिनोरन्योन्यार्थत्वं दृष्टम्**।।२८।।

भृत्यस्वामिनोः संहतत्वेन चेतनत्वाभावादचेतनमेव शरीरमन्यार्थमिष्टम्। आत्मनि पुनरग्नेरुष्णत्वादिवत् चितिमत्त्वस्य चिन्मात्रताया विवक्षितत्वान्न शेषशेषित्वोपपत्तिरित्युत्तरमाह—**नैवम्। अग्नेरुष्णप्रकाशवत् तव चितिमत्त्वस्य विवक्षितत्वात् प्रदर्शितश्च दृष्टान्तः प्रदीपप्रकाशयोरिवेति।** आत्मनश्चिद्रूपस्यापि चिदन्तरशेषत्वं स्यादित्याशङ्क्याह—**दर्शितश्चेति।** अद्वितीये चेतनेऽन्यशेषत्वरहिते सिद्धे सिद्धमस्य परमात्मत्वमिति फलितमाह—**तत्रैवं सति स्वबुद्ध्यारूढमेव सर्वमुपलभसे अग्न्युष्णप्रकाशतुल्येन कूटस्थनित्यचैतन्यस्वरूपेण।** भवत्वात्मनः सर्वदा निर्विशेषचिन्मात्रत्वेन परमात्मत्वं तथापि किं स्यादिशङ्क्याऽवस्थात्रय-सम्बन्धद्वारेण तस्मिन् दुःखानुभवाशङ्का पराकृता भवतीत्याह—**यदि चैवमात्मनः सर्वदा निर्विशेषत्वमभ्युपगच्छसि। किमित्यूचिवान् सुषुप्ते विश्रम्य विश्रम्य जाग्रत्स्वप्नयोर्दुःखमनुभवामि किमयमेव मम स्वभावः किं वा नैमित्तिक इति**

किमयमेव मम स्वभावः, किं वा न? इति च किमसौ व्यामोहोऽपगतः किं वा न?।।२९।।

इत्युक्तः शिष्य उवाच–भगवन्, अपगतस्त्वत्प्रसादाद्व्यामोहः, किन्तु मम कूटस्थतायां संशयः[१]। कथम्? शब्दादीनां स्वतः सिद्धिर्नास्ति, अचेतनत्वात्; शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषाम् प्रत्ययानामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारत्वस्य स्वतःसिद्ध्यसम्भवात्। तस्माद् बाह्याकारनिमित्तत्वं गम्यत इति बाह्याकारवच्छब्दादिसिद्धिः। तथा प्रत्ययानामप्यहंप्रत्ययालम्बन-वस्तुभेदानां संहतत्वादचैतन्योपपत्तेः। स्वार्थत्वासम्भवात् स्वरूप-

---

च। मोहमाहात्म्यादुक्ता शङ्का सावकाशेति चेत्तत्राह—**किं तेऽसौ व्यामोहोऽपगत किं वा न।।२९।।**

आत्मनश्चिन्मात्रस्य निर्विशेषस्य परमात्मत्वेनाज्ञानतत्कार्यसम्बन्धाभावस्याचार्य-वचनविचारणायां सिद्धत्वान्न मे मोहाशङ्काऽस्तीत्याह—**इत्युक्तः शिष्य आह–भगवन्नपगतो व्यामोहः त्वत्प्रसादात्।** तर्हि ममेव तवापि कृतार्थतया निरपेक्षतेत्याशङ्क्याह—**किन्तु मम कूटस्थतायां संशय इति।** कथं कूटस्थतायां संशयप्राप्तिरिति पृच्छति—**कथमिति। शब्दादीनां स्वतः सिद्धिर्नास्त्य-चेतनत्वाच्छब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषां प्रत्ययानामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारत्वस्य स्वतः सिध्यसम्भवात् बाह्याकारवच्छब्दादिसम्बन्ध-निमित्तत्वं गम्यत इति बाह्याकारवच्छब्दादिसिद्धिः।** स्वस्योपलब्धृत्वदर्शनं कूटस्थत्वानिश्चये कारणं दर्शयितुं शब्दादीनां तावत्प्रत्ययाधीनसिद्धिकत्वं दर्शयति—**शब्दादीनामिति।** जडत्वात्तेषां स्वतः सिद्ध्यभावे कुतः सिद्धिरित्या-शङ्क्याह—**शब्दादीति।** ये प्रत्यया शब्दाद्याकारास्तेऽपि बाह्यालम्बना न भवन्तीति केचित्तान् प्रत्याह—**तेषामिति।** परस्परव्यावृत्तानि शब्दस्पर्शादीनि विशेषणानि येषां तेषामिति। बाह्यः सन्नाकारो येषां शब्दादीनां तैः सम्बन्धो निमित्तं येषां तेषां भावस्तत्त्वम् तद् गम्यते। प्रत्ययानां प्रकाशमात्ररूपत्वेन तेषां स्वतः शब्दाद्याकारत्वासम्भवादर्थधियं विना च संस्कारासम्भवात्तया च बाह्याकारवन्तो ये शब्दादयस्तद्ग्राहकत्वं प्रत्ययानां सिध्यतीत्यर्थः। शब्दादिग्राहकत्वेऽपि प्रत्ययानां न स्वव्यतिरिक्तग्राहकत्वमित्याशङ्क्याह—**तथा प्रत्ययानामप्यहंप्रत्ययालम्बनवस्तु-**

---

१. चैतन्यस्य निर्विशेषत्वेऽपगतमोहः कूटस्थत्वे संशयमुत्पादयति।

व्यतिरिक्तग्राहकग्राह्यत्वेन सिद्धिः, शब्दादिवदेव। असंहतत्वे सति चैतन्यात्मकत्वात्स्वार्थोऽप्यहंप्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियावानेव, कथं कूटस्थः?–इति संशयः।।३०।।

तं गुरुरुवाच–न युक्तस्तव संशयः, यतस्तेषां प्रत्ययानां नियमेनाशेषत उपलब्धेरेवापरिणामित्वात् कूटस्थत्वसिद्धौ निश्चय-हेतुमेवाशेषचित्तप्रचारोपलब्धिं संशयहेतुमात्थ। यदि हि तव[1] परिणामित्वं स्यात्, अशेषस्वविषयचित्तप्रचारोपलब्धिर्न स्यात्, चित्तस्य स्वविषये, यथा चेन्द्रियाणां स्वविषयेषु, न च तथाऽऽत्मनस्तव स्वविषयैकदेशोपलब्धिः। अतः कूटस्थतैव तवेति।।३१।।

भेदानां संहतत्वादचैतन्योपपत्तेः, स्वार्थत्वासम्भवात्स्वरूपव्यतिरिक्तग्राहक-ग्राह्यत्वेन सिद्धिः शब्दादिवदेव। अहंप्रत्ययालम्बनं वस्त्वन्तःकरणं तस्य वृत्तिभेदानां कारकैः संहतत्वादस्वप्रकाशत्वसिद्धेः स्वातन्त्र्येण सिद्ध्ययोगादतिरिक्त-ग्राहकं प्रति ग्राह्यत्वेन सिद्धिः शब्दादिवदेव वक्तव्येत्यर्थः। सम्प्रति प्रकृतसंशयकारणं निगमयति—**असंहतत्त्वे सति चैतन्यात्मकत्वात्स्वार्थोऽहं-प्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियावान्नैव कूटस्थ इति संशयः**।।३०।।

परोक्तं संशयकारणं विरुद्धत्वेन निराकरोति—**तं गुरुराह–न युक्तस्तव संशयः**। यो हि परिणामी चित्तादिस्तस्य क्रमेण स्वविषयग्राहकत्वं कतिपयग्राहकत्वं च दृष्टं तद् व्यापकमात्मनो व्यावर्तमानं परिणामित्वमपि तस्य व्यावर्तयतीति। परोदितस्य संशयहेतोर्विरुद्धं साधयति—**यतस्तेषां प्रत्ययानां नियमेनाशेषत उपलब्धेरेवापरिणामित्वात्कूटस्थत्वसिद्धौ निश्चयहेतुमेवाशेषचित्तप्रचारोपलब्धिं संशये हेतुमात्थ**। कूटस्थनिश्चयहेतुमेवात्मनो निःशेषचित्तप्रचारोपलब्धृत्वं मोहात्त्वं संशयकारणं कथयसि। तथा च त्वदीयः संशयो युक्तो नेत्युक्तमेव व्यतिरेकद्वारा स्फोरयति—**यदि हि तव परिणामित्वं स्यात् अशेषस्वविषयचित्तप्रचारोपलब्धिर्न स्यात् चित्तस्येव स्वविषये। यथा चेन्द्रियाणां स्वविषयेषु। न च तथाऽऽत्मनः स्वविषयैकदेशोपलब्धिः**। अपर्यायेणाशेषचित्तप्रचारोपलब्धृत्वादात्मनोऽपरिणामि-त्वेन कूटस्थत्वं स्थितमिति निगमयति—**अतः कूटस्थतैव तवेति**।।३१।।

---

१. आत्मन इति।

तत्राह–उपलब्धिर्नाम धात्वर्थो विक्रियैव, उपलब्धुः कूटस्थात्मता चेति विरुद्धम्।।३२।।

न, धात्वर्थविक्रियायामुपलब्ध्युपचारात्। यो हि बौद्धः प्रत्ययः, स धात्वर्थो विक्रियात्मकः आत्मनः उपलब्ध्याभासफलावसान इत्युपलब्धिशब्देनोपचर्यते, यथा छिदिक्रिया द्वैधीभावफलावसानेति धात्वर्थत्वेनोपचर्यते तद्वत्।।३३।।

इत्युक्तः शिष्य आह–ननु भगवन्, मम कूटस्थत्वप्रतिपादनं

भूवादीनां धातूनां क्रियावाचित्वादुपलब्धेत्यत्र क्रिया प्रकृत्यर्थो भासते। प्रत्ययार्थस्तु कर्ता भासते। तथा चोपलब्धा कूटस्थश्चेति प्रकृतिप्रत्ययार्थपर्यालोचनायां विरोधः स्यादिति शङ्कते—**तत्राह–उपलब्धिर्नाम धात्वर्था विक्रियैवोपलब्धुः कूटस्थता चेति विरुद्धम्।।३२।।**

न, धात्वर्थविक्रियायामुपलब्ध्युपचारात्। यो हि बौद्धः प्रत्ययः स धात्वर्थो विक्रियात्मकः आत्मन उपलब्ध्याभासफलावसान इत्युपलब्धिशब्देनोपचर्यते। यथा छिदिक्रिया द्वैधीभावफलावसानेति धात्वर्थत्वेनोपचर्यते तद्वत्।

किमेतौ प्रकृतिप्रत्ययार्थौ मुख्यावेवाभीष्टौ किं वा गौणावपि भवतः। नाद्यः, सविता प्रकाशत इत्यादिप्रयोगदर्शनादतिव्याप्तत्वात्। द्वितीयं प्रत्याह—**नेत्यादिना।** यथा वह्निव्याप्तोऽयःपिण्डो दहतीत्युपचारेणोच्यते। तथा प्रज्ञानं ब्रह्मकूटस्थमचलं ध्रुवमित्यादिशास्त्रसिद्धेन नित्योपलब्धिस्वभावेनात्मना व्याप्तोऽहङ्कारादिरुपलभेऽहमित्युपचर्यते। तेनाऽन्यविषयेण प्रकृतिप्रत्ययव्यपदेशेन प्रकृतिप्रत्ययसाक्षिणो न विरुध्यते कूटस्थत्वमित्यर्थः। मृदादिद्रव्यस्य परिणामो घटादिद्रव्यात्मको दृष्टस्तथाऽहङ्कारद्रव्यस्य विषयपर्यन्तं सञ्चारिपरिणामो दीर्घप्रभास्थानीयो द्रव्यं स्यात्तथा च कथं तस्य क्रियात्वमुपचरितुं शक्यमित्याशङ्क्याह—**यो हीति।** यथा जले प्रतिबिम्बितः सविता तत्र प्रकाशाभासोदयहेतुस्तथैवात्मा बुद्धिवृत्तौ प्रतिबिम्बितो नित्योपलब्धिस्वभावस्तत्र प्रकाशाभासोदयहेतुर्भवति। ततश्चोपलब्ध्याभासफलावसानत्वाद् बुद्धिपरिणामस्य क्रियात्वेनोपचारः सम्भवतीत्यर्थः। उक्तमेवार्थं दृष्टान्तेन साधयति—**यथेति।।३३।।**

दृष्टान्ते वैषम्यं शङ्कते—**इत्युक्तः शिष्य आह—ननु भगवन् मम**

---

१. छिन्नं काष्ठमितिवद् उपलब्ध आत्मेति व्यवहारदर्शनान्नात्मनः कूटस्थत्वम्।

प्रत्यसमर्थो दृष्टान्तः? कथम्? छिदिः छेद्यविक्रियावसाना उपचर्यते यथा ध.त्वर्थत्वेन, तथोपलब्धिशब्दोपचरितोऽपि धात्वर्थो बौद्धः प्रत्ययः आत्मन उपलब्धिविक्रियावसानश्चेत्, नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः।।३४।।

गुरुरुवाच–सत्यमेवं स्यात्, यद्युपलब्ध्युपलब्ध्रोर्विशेषः। नित्योपलब्धिमात्र एव ह्युपलब्धा। न तु तार्किकसमय इवान्या उपलब्धिः, अन्य उपलब्धा च।।३५।।

ननूपलब्धिफलावसानो धात्वर्थः कथमिति?।।३६।।

उच्यते–शृणु। उपलब्ध्याभासफलावसान इत्युक्तम्। किं न श्रुतं तत्त्वया? न त्वात्मा विक्रियोत्पादनावसान इति मयोक्तम्।।३७।।

कूटस्थत्वप्रतिपादनं प्रत्यसमर्थो दृष्टान्तः। दृष्टान्तस्य दार्ष्टान्तिकानुगुणत्वराहित्यमेव प्रकटयति। **कथम्? छिदिःछेद्यविक्रियावसानोपचर्यते यथा धात्वर्थत्वेन, तथा उपलब्धिशब्दोपचरितोऽपि धात्वर्थो बौद्धः आत्मनः प्रत्ययः उपलब्धिविक्रियावसानश्चेन्नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः।**

दृष्टान्ते छेद्यविक्रियादर्शनादात्मन्यपिदार्ष्टान्तिके विक्रियाप्रसङ्गात् न कूटस्थत्वसिद्धिरित्यर्थः।।३४।।

दृष्टान्ते छिदिछेद्ययोरिव दार्ष्टान्तिके प्रत्यगात्मनः उपलब्धुः उपलब्धेश्च भेदाभावाद्युक्ता कूटस्थतेत्याह—**गुरुरुवाच–सत्यमेवं स्याद्यद्युपलब्ध्युपलब्ध्रोः विशेषः। नित्योपलब्धिमात्र एव ह्युपलब्धा। न तु तार्किकसमय इव अन्योऽपब्धिरन्यः उपलब्धा च**।।३५।।

आत्मैवोपलब्धिश्चेदुपलब्धिफलावसानत्वं धात्वर्थस्यायुक्तमुपलब्धेर्नित्यत्वेन फलत्वायोगादिति शङ्कते—**ननूपलब्धिफलावसानो धात्वर्थः कथमुच्यते**।।३६।।

उक्तमेव स्मारयन् परिहरति—**शृणु उपलब्ध्याभासफलावसान इत्युक्तं किं न श्रुतं त्वया? न त्वात्मा विक्रियोत्पादनावसान इति मयोक्तम्।**

छिदिर्यथा छेद्ये विकारं करोति तथाऽऽत्मन्यपि धात्वर्थो विक्रियामुत्पादयति, तत्कुतोऽस्य कूटस्थतेत्याशङ्क्यानुक्तोपलम्भान्मैवमित्याह—**नत्विति**।।३७।।

शिष्य उवाच—कथं तर्हि कूटस्थे मय्यशेषस्वविषयचित्त-प्रचारोपलब्धृत्वमित्यात्थ?।।३८।।

तं गुरुराह—सत्यमेवावोचम्, तेनैव कूटस्थतामवोचं तव।।३९।।

यद्येवं भगवन्, कूटस्थनित्योपलब्धिस्वरूपे मयि शब्दाद्याकार-बौद्धप्रत्ययेषु च मत्स्वरूपोपलब्ध्याभासफलावसानवत्सूत्पद्यमानेषु कस्त्वपराधो मम?।।४०।।

सत्यम् नास्त्यपराधः, किन्त्वविद्यामात्र[1]स्त्वपराध इति प्रागेवावोचम्।।४१।।

यदि, भगवन्, सुषुप्त इव मम विक्रिया नास्ति, कथं स्वप्नजागरिते।।४२।।

तं गुरुराह—किन्त्वनुभूयेते त्वया सन्ततम्।।४३।।

यद्यविक्रियत्वादात्मनोऽभीष्टं कूटस्थत्वं तर्हि तस्याशेषचित्तप्रचारोपलब्धृत्वं त्वयोक्तं कथं युक्तं क्रियावत्त्वमन्तरेणोपलब्धृत्वासिद्धेरिति शङ्कते—**शिष्य आह—कथं तर्हि कूटस्थे मय्यशेषचित्तप्रचारोपलब्धृत्वमित्यात्थ।।३८।।**

नित्योपलब्धिस्वभावस्यात्मनो विक्रियावत्त्वमन्तरेणैवोपचारादित्युत्तरमाह—**गुरुराह—सत्यमेवावोचं तेनैव कूटस्थतामवोचं तव।।३९।।**

आत्मन उप[2]चारादुपलब्धृत्वसिद्धेरुपपन्नं तस्य कूटस्थत्वं स्थितं यदि तर्हि तस्य वस्तुतः संसारबन्धो न सिद्ध्यति। अविक्रियत्वादिति शङ्कते—**यद्येवं भगवन्, कूटस्थनित्योपलब्धिस्वरूपे मयि शब्दाद्याकारबौद्धप्रत्ययेषु च मत्स्वरूपोपलब्ध्याभासफलावसानवत्सूत्पद्यमानेषु कस्त्वपराधो मम।।४०।।**

परमार्थतस्तव संसारसम्बन्धाभावेऽपि तत्सम्बन्धबुद्धिरविद्याकृता दुर्वरित्याह—**सत्यम्। नास्त्यपराधः किन्त्वविद्यामात्रस्त्वपराध इति प्रागेवावोचम्।।४१।।**

आत्मनि स्वप्नजागरितोपलब्धिरूपविक्रियोपलब्धेर्न कूटस्थता सुस्थितेति पुनः शङ्कते—**यदि भगवन् सुषुप्त इव मम विक्रिया नास्ति कथं स्वप्नजागरिते,** आत्मनि परमार्थतः स्वप्नजागरिते।।४२।।

उपलब्धेरसिद्धावपि प्रतीत्यनुरोधादिमे एष्टव्ये इत्याचार्यः समाचष्टे—**तं गुरुराह—किन्त्वनुभूयेते त्वया सन्ततम्।।४३।।**

---

१. अविद्यावशात्।   २. येन ज्ञानिनाऽऽत्मस्वरूपमधिगतं न संसारबन्धमुपैति।

शिष्य उवाच–बाढमनुभवामि, किन्तु विच्छिद्य, न तु सन्ततम्।।४४।।

गुरुराह–तर्हि आगन्तुके त्वेते, न तवात्मभूते। यदि तवात्मभूते, चैतन्यस्वरूपवत्स्वतः सिद्धे सन्तते एव स्याताम्। किञ्च, स्वप्नजागरिते न तवात्मभूते, व्यभिचारित्वात्, वस्त्रादिवत्। न हि यस्य यत् स्वरूपं, तत्तद्व्यभिचारि दृष्टम्। स्वप्नजागरिते तु चैतन्यमात्रत्वाद् व्यभिचरतः। सुषुप्ते चेत् स्वरूपं व्यभिचरेत् तन्नष्टं, नास्तीति बाध्यं वा स्यात्–आगन्तुकानामतद्धर्माणामुभयात्मकत्व-दर्शनात्–यथा धनवस्त्रादीनां नाशो दृष्टः, स्वप्नभ्रान्तिलब्धानां त्वभावो दृष्टः।।४५।।

नन्वेवं, भगवन्, चैतन्यस्वरूपमप्यागन्तुकं प्राप्तम्,

सन्ततमिति विशेषणममृष्यन्नाह—**बाढमनुभवामि, किन्तु विच्छिद्य विच्छिद्य न तु सन्ततम्**।।४४।।

यदि स्वप्नजागरितयोरागन्तुकत्वमभ्युपैषि। तर्हि तयोस्तथात्वे सिद्धे न ते तवात्मभूते भवितुमुत्सहेते आगन्तुकत्वादनुभूयमानत्वाच्च घटादिवत्। न च तयोरात्मसम्बन्धित्वं सम्बन्धस्य दुर्वचत्वादित्याह—तं **गुरुराह–तर्हि आगन्तुके त्वेते न तवात्मभूते**। विपक्षे तयोरागन्तुकत्वमनुभूयमानत्वं च न स्यादित्यप्रयोजकत्वं-परिहरति—**यदि तवात्मभूते चैतन्यस्वरूपवत् स्वतः सिद्धे सन्तते एव स्याताम्। किञ्च स्वप्नजागरिते न तवात्मभूते व्यभिचारित्वाद्वस्त्रादिवदित्याह। नहि यस्य यत् स्वरूपं तत् तद्व्यभिचारि दृष्टम्। स्वप्नजागरिते तु चैतन्यमात्रत्वं व्यभिचरतः। सुषुप्ते चेत् स्वरूपं व्यभिचरेत् तन्नष्टं नास्तीति वा बाध्यमेव स्यात्। आगन्तुकानामतद्धर्माणामुभयात्मकत्वदर्शनात्**। आत्मस्वरूपस्य चैतन्यस्य सुषुप्ते अव्यभिचारदर्शनात्। अव्यभिचारित्वहेतोर्व्यभिचारित्वान्न साधकत्वमित्याशङ्क्याह— **सुषुप्ते चेदिति**। आत्मनि स्वाभाविकत्वाभावेन आगन्तुकत्वमाविष्कर्तुं अतद्धर्माणामित्युक्तमुभयात्मकत्वदर्शनमुदाहरणाभ्यां स्फोरयति। **यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रान्तिलब्धानां त्वभावो दृष्टः**।।४५।।

अतिप्रसङ्गमाशङ्कते—**नन्वेवं भगवन्! चैतन्यस्य स्वरूपमप्यागन्तुकं प्राप्तं स्वप्नजागरितयोरिव सुषुप्तेऽनुपलब्धेः अचैतन्यस्वरूपो वा स्यामहम्**।

---

१. स्वप्नजागरिते यद्यात्मस्वरूपे स्यातां तदा स्वप्नप्रपञ्चस्य जागरणे, उभयोश्च सुषुप्तौ बाधो न स्यात्।

स्वप्नजागरितयोरिव सुषुप्तेऽनुपलब्धेः, अचैतन्यस्वरूपो वा स्यामहम्।।४६।।

न, पश्य। तदनुपपत्तेः। चैतन्यस्वरूपं चेदागन्तुकं पश्यसि, पश्य, नैतद्वर्षशतेनाप्युपपत्त्या कलयितुं शक्नुमो वयम्, अन्यो वाऽचैतन्योऽपि, तस्य संहतत्वात् पारार्थ्यमनेकत्वं नाशित्वं च न केनचिदुपपत्त्या वारयितुं शक्यम्—अस्वार्थस्य स्वतःसिद्ध्यभावादित्यवोचाम। चैतन्यस्वरूपस्य त्वात्मनः स्वतः सिद्धेरन्यानपेक्षत्वं न केनचिद्वारयतुं शक्यम्, अव्यभिचारात्।।४७।।

तस्यागन्तुकत्वप्राप्तौ हेतुमाह—**स्वप्नेति**। दृष्टिश्रुतिमत्यादिरूपं हि चैतन्यस्य स्वप्नजागरितशब्दाभ्यामुच्यते। तथा च ते चेन्न सुषुप्ते दृश्येते चैतन्यं तदा नास्तीत्यागन्तुकत्वं तस्य दुष्परिहरमित्यर्थः। किञ्च स्वप्नजागरिते चेदात्मनः स्वरूपभूते न भवतस्तदा चैतन्यमेव स्वरूपं न भवतीत्युक्तं स्यात्। ततश्चात्मनो जडत्वमनुमतं भवेदित्याह—**अचैतन्येति**।।४६।।

दृष्ट्यादेरौपाधिकरूपस्यागन्तुकत्वेऽपि स्वरूपचैतन्यमात्रमनागन्तुकमिति विचार्य तं विजानीहि इति सिद्धान्ती ब्रूते—**न पश्येति**। चैतन्यमात्रस्यानौपाधिकस्यागन्तुकत्वानुपपत्तिम्। उक्तेऽर्थे हेतुमाह—**तदनुपपत्तेरिति**। अनुपपत्तिमेव साधयति—**चैतन्यस्वरूपं चेदागन्तुकं पश्यसि पश्य, नैतद्वर्षशतेनाप्युपपत्त्या कलयितुं शक्नुमो वयम्**। एवं चेत्पश्यसि तर्हि पश्य पर्यालोचय, वयं तु तद्वर्षशतेनापि युक्त्या घटयितुं न शक्नुमः। तद्ग्राहकप्रमाणाभावादित्यर्थः। तर्हि कश्चित्तद्व्यतिरिक्तश्चैतन्यस्याभावं निश्चिनोतीत्याशङ्क्य स किमचेतनश्चेतनो वेति विकल्प्य आद्यं प्रत्याह—स्वभावमाकलयेत्। स चेच्चैतन्यादन्योऽचैतन्यो मूढोऽभ्युपगम्यते। सोऽपि तर्हि संहतत्वादिदोषभाक्त्वाच्चैतन्यगोचरत्वान्न तस्याभावमुद्भावयेत्। नहि चैतन्यादन्यः स्वयमपि सेद्धुमशक्नुवन् अभावं चैतन्यस्य साधयितुं शक्नोतीत्यर्थः। यदि चैतन्येनैव चैतन्यस्यागन्तुकत्वं गृह्यते तन्न। स्वस्कन्धारोहकल्पायाः स्ववृत्तेरसम्भवाद्भेदकाकारमन्तरेण च भेदायोगादित्यभिप्रेत्याह—**चैतन्यस्वरूपस्यात्मनः स्वतःसिद्धेरन्यानपेक्षत्वं न केनचिद्वारयितुं शक्यमव्यभिचारात्**। किञ्चात्मनः स्वसत्तायां चैतन्याव्यभिचारादनागन्तुकं चैतन्यमेषितव्यम्। अतश्चैतन्यादन्योऽचैतन्योऽपि। **चैतन्यादन्यस्य संहतत्वात्पारार्थ्यमनेकत्वं नाशित्वं च न केनचिदुपपत्त्या वारयितुं शक्यम्। अस्वार्थस्य स्वतः सिध्यभावादित्यवोचाम।** यच्चैतन्यमनागन्तुकं प्रागभावशून्यं वा शशशृङ्गवदित्याह—**अव्यभिचारादिति।** **'पश्यतस्तदनुपपत्ते'**रित्यादिपाठोऽपि यथोक्तरीत्या नेतव्यः।।४७।।

ननु व्यभिचारो दर्शितो मया–सुषुप्ते न पश्यामीति।।४८।।

न, व्याहतत्वात्, कथं व्याघातः? पश्यतस्तव न[1] पश्यामीति व्याहतं वचनम्। न हि कदाचिद्भगवन्, सुषुप्ते मया चैतन्यमन्यद्वा किञ्चिद् दृष्टम्। पश्यंस्तर्हि सुषुप्ते त्वम्; यस्माद् दृष्टमेव प्रतिषेधसि, न दृष्टिम्। या तव दृष्टिः, तच्चैतन्यम्[2], इति मयोक्तम्। यया त्वं विद्यमानया न किञ्चिद् दृष्टमिति प्रतिषेधसि, सा दृष्टिस्त्वच्चैतन्यम्। तर्हि सर्वत्राव्यभिचारात् कूटस्थनित्यत्वं सिद्धं स्वत एव न प्रमाणापेक्षम्। स्वतःसिद्धस्य हि प्रमातुरन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षा। या त्वन्या नित्या परिच्छित्तिरपेक्ष्यतेऽन्यस्या-

---

अव्यभिचारस्यासिद्धिमाशङ्कते—**ननु व्यभिचारो दर्शितो मया सुषुप्ते न पश्यामीति।**

अयमहमस्मीत्यात्मानमिमानि भूतानीत्यनात्मानं च सुषुप्ते न पश्यामि तेन तत्र चैतन्याभावादव्यभिचारहेतोरसिद्धिरित्यर्थः।।४८।।

सुषुप्ते न पश्यामीति वचनस्य विरुद्धत्वान्नैवं वक्तव्यमित्युत्तरमाह—**न, व्याहतत्वात्।** व्याहतिमेव प्रश्नद्वारा प्रकटयति—**कथं व्याघातः? पश्यतस्तव न पश्यामीति व्याहतं वचनम्।** पश्यतस्तवेत्येतदमृष्यन्नाह—**न कदाचिद्भगवन् सुषुप्ते मया चैतन्यमन्यद्वा किञ्चिद् दृष्टम्।** यदि सुषुप्ते न किञ्चित्पश्यसि तर्हि न किञ्चिदेतावन्तं कालं मया दृष्टमित्युत्थितस्य परामर्शानुपपत्त्या स्वरूपभूताया दृष्टेः अव्यभिचारः सिध्यतीत्याह—**पश्यंस्तर्हि सुषुप्ते त्वम्। यस्माद् दृष्टमेव प्रतिषेधसि न दृष्टिम्। या तव दृष्टिस्तच्चैतन्यमिति मयोक्तम्।** द्रष्टेति यावत्। पश्यतीति पाठेऽप्ययमेवार्थः। आत्मनः सुषुप्ते दृष्टिरस्तीत्यत्र हेतुमाह—**यस्मादिति।** सुषुप्ते दृष्टिरिष्टाऽस्तु तथापि चैतन्यं कथं सिद्धम्? तत्राह—**या तवेति।** तदेव स्पष्टयति—**यथा त्वं विद्यमानया न किञ्चित् दृष्टमिति प्रतिषेधसि सा दृष्टिस्तच्चैतन्यम्,** चैतन्यस्याव्यभिचारे दर्शितरीत्या सिद्धे तस्य कूटस्थत्वं स्वप्रकाशत्वं च सिद्धमित्याह—**तर्हि सर्वत्राव्यभिचारात् कूटस्थनित्यत्वं सिद्धं स्वत एव न प्रमाणापेक्षम्। स्वतः सिद्धस्य हि प्रमातुरन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षा। या त्वन्या नित्या परिच्छित्तिरपेक्ष्यते अन्यस्यापरिच्छित्तिरूपस्य परिच्छेदाय सा हि नित्यैव कूटस्था स्वयंज्योतिः स्वभावा।**

---

१. यथाकश्चिज्जल्पन्नाह, अद्याहं मौनोऽस्मि, तद्वत्। २. सुषुप्तेऽप्रतिषिद्धा दृष्टिरेव चैतन्यम्।

परिच्छित्तिरूपस्य परिच्छेदाय सा हि नित्यैव कूटस्था स्वयंजोतिःस्वभावा आत्मनि प्रमाणत्वे वा न तां प्रति प्रमाणापेक्षा, तत्स्वभावत्वाद् यथा प्रकाशनमुष्णत्वं वा लोहोदकादिषु परतोऽपेक्ष्यते अग्न्यादित्यादिभ्यः, अतत्स्वभावत्वात्। नाग्न्यादित्यादीनां तदपेक्षा, सदा तत्स्वभावत्वात्।।४९।।

अनित्यत्व एव प्रमा स्यात्, न नित्यत्व इति चेत्।।५०।।

न, अवगतेर्नित्यत्वानित्यत्वयोर्विशेषानुपपत्तेः—नहि अवगतेः प्रमात्वेऽनित्यावगतिः प्रमा, न नित्या इति विशेषोऽवगम्यते।।५१।।

स्वयंप्रकाशत्वे हेत्वन्तरमाह—**स्वतः सिद्धस्येति**। प्रमाता हि चिद्रूपत्वादन्यापेक्षामन्तरेण स्फुरति। असन्दिग्धस्वभावश्च निश्चितः तस्य व्यतिरिक्तं यत् प्रमेयं यदि तस्य जडस्याचिद्रूपस्य परिच्छित्तिर्निश्चितिस्तामुद्दिश्य प्रमाणापेक्षायां सत्यां चितेरन्या प्रमाणजन्या परिच्छित्तिरनित्याऽपेक्ष्यते। प्रमातुरतिरिक्तस्य प्रमेयस्यासंविद्रूपस्य निश्चयाय प्रमाणद्वारा परिच्छित्त्यपेक्षाया युक्तत्वात्। प्रमाता तु संविद्रूपत्वादसन्दिग्धः स्वतः वस्तुत्वाच्च निरपेक्षः स्फुरतीत्यर्थः। संवित्स्वभावत्वं स्फोरयति—**सा हि नित्यैव कूटस्था स्वयंज्योतिः स्वभावा आत्मनि प्रमाणत्वे प्रमातृत्वे वा न तां प्रति मानापेक्षा तत्स्वभावत्वात्**। आत्मनि बुद्धिवृत्तिप्रतिबिम्बिते प्रमाणत्वं, वृत्तिमदन्तःकरणप्रतिबिम्बिते च प्रमातृत्वं कल्प्यते। तत्रोभयत्रात्मनः स्फूर्तिं प्रति न प्रमाणापेक्षा युज्यते। स्वयं संवित्स्वभावत्वादित्यर्थः। असंवित्स्वभावस्यैव प्रमेयस्य प्रमाणापेक्षा नात्मनः संवित्स्वभावत्वे इत्यत्र दृष्टान्तमाह—**यथा प्रकाशनमुष्णत्वं वा लोहोदकादिषु परतोऽपेक्ष्यते अग्न्यादित्यादिभ्यः अतत्स्वभावत्वात्। नाग्न्यादित्यादीनां तदपेक्षा सर्वदा तत्स्वभावत्वात्।।४९।।**

नित्यैव संविदित्युक्तमाक्षिपति—**अनित्यत्व एव प्रमा स्यान्न नित्यत्वे इति चेत्।।५०।।**

चक्षुरादिप्रमाणसामग्रीप्रसूता प्रमैवावगतिरित्युच्यते। तथा च प्रमात्वप्रसिद्ध्यनुपपत्त्यैव संवित्तेरनित्यत्वं वक्तव्यमित्यर्थः।

प्रमाणाभासानां अज्ञानाश्रयणेन संवित्तिः प्रमेत्येतावतैव तद्व्यावृत्तिसिद्धेर्जन्यत्वविशेषणं व्यर्थमित्युत्तरमाह—**न, अवगतेर्नित्यत्वानित्यत्वयोर्विशेषानुपपत्तेः।**

विशेषानुपपत्तिमेव विशदयति, न च स्वमते प्रमाणत्वे, अनित्याऽवगतिः प्रमाणं भवति। नित्या न तथेति विशेषो न प्रतिभातीत्यर्थः।।५१।।

नित्यायां प्रमातुरपेक्षाभावः, अनित्यायां तु यत्नान्तरितत्वादवगतिरपेक्षत इति विशेषः स्यादिति चेत्।।५२।।

सिद्धा तर्ह्यात्मनः प्रमातुः स्वतःसिद्धिः प्रमाणनिरपेक्षतयैवेति[1]।।५३।।

अभावेऽप्यपेक्षाऽभावः, नित्यत्वादेवेति चेत्।।५४।।

न, अवगतेरेवात्मनि सद्भावादिति परिहृतमेतत्। प्रमातुश्चेत्प्रमाणापेक्षा सिद्धिः कस्य प्रमित्सा स्यात्[2]? यस्य प्रमित्सा, स एव प्रमाताऽभ्युपगम्यते। तदीया च प्रमित्सा प्रमेयविषयैव, न प्रमातृविषया, प्रमातृविषयत्वेऽनवस्थाप्रसङ्गात्प्रमातुस्तदिच्छायाश्च तस्याप्यन्यः प्रमाता तस्याप्यन्य इति। एवमेवेच्छायाः। प्रमातृविषयत्वे

तत्र पूर्ववादी विशेषं दर्शयति—**नित्यायां प्रमातुरपेक्षाभावोऽनित्यायां तु** यत्नान्तरितत्वात् अवगतिरपेक्षत इति विशेषः स्यादिति चेत्।

नित्यावगतिपक्षे प्रमातुः स्वावगतये प्रमाणापेक्षा न भवति। अनित्यायां त्ववगतौ प्रयत्नव्यवधानादवगतिसाधनमपेक्षते प्रमातेति विशेषोऽस्तीत्यर्थः।।५२।।

नित्यावगतिपक्षे प्रमाणनैरपेक्ष्यं त्वयोच्यते चेत् तर्हि सिद्धमस्मदिष्टमिति सिद्धान्तवाद्याह—**सिद्धा तर्ह्यात्मनः प्रमातुः स्वतः सिद्धिः प्रमाणनिरपेक्षतयैवेति**।।५३।।

प्रमाणनिरपेक्षत्वेन स्वतःसिद्धिमभ्यनुजानता प्रमाणाभावापेक्षाऽभ्युपगता भवति। सापि प्रमाणाभावविषयापेक्षा तवायुक्ता नित्यत्वादवगतेरिति पूर्ववाद्याह—**अभावेऽप्यपेक्षाभावो नित्यत्वादेवेति चेत्**।।५४।।

स्वभावत एवावगतेः सद्भावात्प्रमाणाभावेऽपि नापेक्षाऽस्तीत्युत्तरमाह—**न अवगतेरेवात्मनि सद्भावादिति परिहृतमेतत्**। आत्मनः स्वतस्सिद्धौ हेत्वन्तरमाह—**प्रमातुश्चेत्प्रमाणापेक्षया सिद्धिः कस्य प्रमित्सा स्यात्**। ततो व्यतिरिक्तस्यैव तद्विषया प्रमित्सा सेत्स्यतीत्याशङ्क्याह—**यस्य प्रमित्सा स एव प्रमाता अभ्युपगम्यते**। किञ्च पुत्रादिकमिष्टं वस्तु लोके प्रमातुमिष्यते। न तु प्रमातृविषया काचिदिच्छा तस्यैव सङ्गच्छते। स्वकर्तृकेच्छाकर्मत्वायोगादित्याह—**तदीया च प्रमित्सा प्रमेयविषयैव न प्रमातृविषया**। प्रमात्रन्तरकर्तृकेच्छाकर्मत्वं प्रमातु-

---

१. प्रमाणान्तरेणावेद्यत्वादात्मनः।

२. कर्तुः स्वव्यापारे स्वातन्त्र्यात्।

प्रमातुरात्मनोऽव्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः। लोके हि प्रमेयं नाम प्रमातुरिच्छास्मृतिप्रयत्नप्रमाणजन्मव्यवहितं सिद्ध्यति, नान्यथा अवगतिः प्रमेयविषया दृष्टा। न च प्रमातुः प्रमाता स्वस्य स्वयमेव केनचिद् व्यवहितः कल्पयितुं शक्यः इच्छादीनामन्यतमेनापि। स्मृतिश्च स्मर्तव्यविषया, न स्मर्तृविषया। तथेच्छाया इष्टविषयत्वमेव, नेच्छावद्विषयत्वम्। स्मर्त्रिच्छावद्विषयत्वेऽपि ह्युभयोरनवस्था पूर्ववदपरिहार्या स्यात्।।५५।।

रिष्टमित्याशङ्क्यानवस्थाद्वयप्रसङ्गान्मैवमित्याह—**प्रमातृविषयत्वेऽनवस्थाप्रसङ्गात् प्रमातुस्तदिच्छायाश्च**। तत्र प्रमात्रनवस्थां प्रकटयति—**तस्याप्यन्यः प्रमाता तस्याप्यन्य इति**। तदिच्छानवस्थां कथयति—**एवमेच्छायाः**। यदि प्रमातुरिच्छायाः प्रमातृविषयत्वं तदा तदिच्छापि प्रमात्रन्तरविषयेति प्रमात्रनवस्थावदिच्छानवस्था दुर्वारेत्यर्थः। इत्यात्मनः स्वतः सिद्धिर्वक्तव्येत्याह—**प्रमातृविषयत्वे प्रमातुरात्मनोऽव्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः**। आत्मनः सकाशात्प्रमातुरव्यवहितत्वादेव घटादिवत्प्रमेयत्वानुपपत्तेः स्वतः सिद्धिरित्येतदेव प्रपञ्चयति—**लोके हि प्रमेयं नाम प्रमातुरिच्छास्मृतिप्रयत्नप्रमाणजन्मव्यवहितं सिध्यति। नान्यथाऽवगतिः प्रमेयविषया दृष्टा। न च प्रमातुः प्रमाता स्वस्य स्वयमेव केनचिद्व्यवहितः शक्यः कल्पयितुमिच्छादीनामन्यतमेनापि**। व्यवहारभूमौ हि घटादिकं वस्तु प्रमेयत्वेन प्रसिद्धम्। प्रमाता प्रथमं जिज्ञासते। तस्य चेष्टायां सत्यां तस्मिन् विषये समीहितसाधनत्वस्मृतिरुपावर्तते। ततो याथातथ्येन तज्ज्ञाने प्रयतते। प्रयत्नानन्तरं तत्र चक्षुरादिव्यापारात् प्रमाणमुत्पद्यते। एवं प्रमातुरेतैर्व्यवहितं प्रमेयं प्रसिद्धं भवति। यथोक्तेच्छादिव्यवधानव्यतिरेकेणावगतिर्न प्रमेयविषया लोके क्वापि दृष्टा। प्रमातुश्च स्वयमेव स्वस्येच्छादीनामन्यतमेन केनचिद् व्यवहितिः नैव कल्पयितुं शक्यते। तस्मात्प्रमेयत्वायोगात्प्रमातुः स्वतः सिद्धिरेवास्थेयेत्यर्थः। किञ्च स्मृतिरिव न प्रमातृविषया भवितुमर्हतीत्याह—**स्मृतिश्च स्मर्तव्यविषया**। विपक्षे दोषमाह—**न स्मर्तृविषया। तथेच्छाया इष्टविषयत्वमेव। नेच्छावद्विषयत्वं स्मर्त्रिच्छावद्विषयत्वेऽपि ह्युभयोरनवस्था पूर्ववदपरिहार्या स्यात्**। यदि स्मृतेः स्मर्तृविषयत्वं इच्छायाश्चेच्छावद्विषयत्वम्, तदा स्मृतितद्वतोश्च प्रमात्राद्यनवस्थावदनवस्था दुर्वारा प्रसरेत्। स्मृतेः स्मर्तृविषयत्वे स्मर्तृविशेषणभूतस्मृतेरपि स्मृत्यन्तरविषयत्वादिच्छायास्तद्वद्विषयत्वे च तद्विशेषभूतेच्छाया अपि तथात्वस्य दुष्परिहरत्वादित्यर्थः।।५५।।

ननु प्रमातृविषयावगत्यनुत्पत्तौ, अनवगत एव प्रमाता स्यादिति चेत्।।५६।।

न, अवगन्तुरवगतेरवगन्तव्यविषयत्वात्, अवगन्तृविषयत्वे चानवस्था पूर्ववत् स्याद् अवगतिश्चात्मनि कूटस्थानित्यत्मज्योति-रन्यतोऽनपेक्षैव सिद्धा, अग्न्यादित्याद्युष्णप्रकाशवदिति पूर्वमेव प्रसाधितम्। अवगतेश्चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे, आत्मनः स्वार्थतानुपपत्तिः कार्यकरणसङ्घातवत् संहतत्वात् पारार्थ्यं दोषवत्त्वं चावोचाम। कथं? चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे स्मृत्या-दिव्यवधानात् सान्तरत्वम्। ततश्च तस्य चैतन्यज्योतिषः प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमात्मन्येवाभावात्, चक्षुरादीनामिव संहतत्वात्, पारार्थ्यं स्यात्। यदा च तदुत्पन्नमात्मनि विद्यते, न तदाऽऽत्मनः स्वार्थत्वम्,

---

यद्विषयावगतिरुत्पद्यते सोऽवगतो व्यवह्रियते। प्रमातरि पुनरवगतेरनुत्पत्तौ स सुषुप्तसमः स्यादिति स्वतः सिद्धत्वबाधकं शङ्कते—ननु **प्रमातृविषयावगत्यनुत्पत्तौ अनवगत एव प्रमाता स्यादिति चेत्।।५६।।**

किमेतया प्रक्रियया सुषुप्तसाम्यं परिहर्तुमवगतिविषयत्वमात्मनो विवक्ष्यते। किं वा सुषुप्तसाम्यपरिहारोऽस्य मृग्यते। तत्राद्यं दूषयति।

न अवगन्तुरवगतेरवगन्तव्यविषयत्वात्। यदि पुनरवगतेरवगन्तृविषयत्वमिष्यते तत्राह—**अवगन्तृविषयत्वेऽनवस्था पूर्ववदपरिहार्या स्यात्।** यथा पूर्वं प्रमात्राद्यनवस्थोक्ता तथाऽवगतेरवगन्तृविषयत्वे तद्विशेषणावगतेरपि तथाविधा-वगन्तृविषयत्वादवगतेरवगन्तुश्चानवस्था दुःखस्था स्यादित्यर्थः। द्वितीयं प्रत्याह—**अवगतिश्चात्मनि कूटस्थनित्यात्मज्योतिः अन्यतोऽनपेक्षैव सिद्धा अग्न्यादित्या-द्युष्णप्रकाशवदिति पूर्वमेव प्रसाधितम्। अवगतेश्चैतन्यात्मज्योतिषः स्वात्मन्य-नित्यत्वे आत्मनः स्वार्थत्वानुपपत्तिः।** न केवलं स्वार्थत्वासिद्धिः परार्थत्वं च स्यादित्याह—**कार्यकरणवत् संहतत्वात् पारार्थ्यं दोषवत्त्वं चावोचाम।** उक्तमेवार्थं प्रश्नपूर्वं समर्थयते कथम्? **चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे स्मृत्यादि-व्यवधानात् सान्तरत्वम्**[1]**। ततश्च तस्य चैतन्यज्योतिषः प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमात्मन्येवाभावात् चक्षुरादीनामिव संहतत्वात् पारार्थ्यं स्यात्।** प्रागूर्ध्वमित्य-वधिकरणप्रयुक्तं फलं कथयति—**यदा च तदुत्पन्नमात्मनि विद्यते न**

---

१. इच्छादिवृत्त्यन्तरपूर्वकत्व—रामतीर्थ।

तद्भावाभावापेक्षा ह्यात्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिः। तस्मादात्मनोऽन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धम्।।५७।।

नन्वेवं सति, असति प्रमाश्रयत्वे, कथं प्रमातुः प्रमातृत्वम्?।।५८।।

उच्यते–प्रमाया नित्यत्वेऽनित्यत्वे च रूपविशेषाभावात्। अवगतिर्हि प्रमा, तस्याः स्मृतीच्छादिपूर्विकाया अनित्यायाः कूटस्थनित्याया वा, न स्वरूपविशेषो विद्यते, यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिपूर्वकस्यानित्यस्यागतिपूर्वस्य नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो[1] दृष्टः–'तिष्ठन्ति मनुष्याः',

---

तदाऽऽत्मनः स्वार्थत्वम्। चैतन्यप्रभावापेक्षमात्मनः स्वार्थत्वम्। अनात्मनस्तु परार्थत्वं चेतनाभावापेक्षमित्युक्तमेव व्यनक्ति। **तद्भावाभावापेक्षा ह्यात्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिः।** आत्मनः स्वार्थत्वे सिद्धे फलितमाह— **तस्मादात्मनोऽन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धम्**[2]।।५७।।

आत्मनो नित्यचैतन्यज्योतिष्ट्वे प्रमातृत्वाभावान्न प्रमातृत्वव्यपदेशोपपत्तिरिति शङ्कते— **नन्वेवं सति असति प्रमाश्रयत्वे कथं प्रमातुः प्रमातृत्वमिति**।।५८।।

चैतन्यस्य कूटस्थज्योतिष्ट्वेऽपि सम्भवत्यौपचारिकं प्रमातृत्वमित्युत्तरमाह— **उच्यते—प्रमायाः नित्यत्वे अनित्यत्वे च रूपविशेषाभावात्।** तदेव विवृणोति— **अवगतिर्हि प्रमा। तस्याः स्मृतीच्छापूर्विकाया अनित्यायाः कूटस्थनित्याया वा न स्वरूपविशेषो विद्यते।** अवगतेर्नित्यत्वे अनित्यत्वे च स्वरूपविशेषाभावात् प्रमातरि व्यपदेशस्य तुल्यत्वोपपत्तिरिति दृष्टान्तेन स्पष्टयति— **यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिपूर्वकस्य अनित्यस्य अगतिपूर्वस्य नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टः। तिष्ठन्ति मनुष्यास्तिष्ठन्ति पर्वता इत्यादिः। तथा नित्यावगतिस्वरूपेऽपि प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते फलसामान्यादिति।**

धात्वर्थस्य तिष्ठत्यादेरिति सामानाधिकरण्यम्। आदिशब्देन भवत्यादि गृह्यते। तदीयं फलं गतिनिवृत्तिः सत्वमित्यादि। गत्यादीत्यादिशब्देन भवनादिग्रहणम्। घटो भवत्यात्मा भवतीत्यादि। स्वरूपत्वेन नित्यत्वेऽपि प्रमातृत्वव्यपदेशोपपत्तिरित्यत्र

---

१. गतिपूर्वकनिवृत्तिरनित्या, अगतिपूर्वकस्य च निवृत्तिर्नित्या।

२. अवेद्यत्वे सत्यपरोक्षविषयत्वादात्मनः।

'तिष्ठन्ति पर्वताः' इत्यादिः। तथा नित्यावगतिस्वरूपेऽपि, प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते, फलसामान्यादिति।।५९।।

अत्राह शिष्यः–नित्यावगतिस्वरूपस्यात्मनोऽविक्रियत्वात् कार्य-करणैरसंहत्य तक्षादीनामिव वास्यादिभिः कर्तृत्वं नोपपद्यते। असंहतस्वभावस्य च कार्यकरणोपादानेऽनवस्था प्रसज्येत्। तक्षादीनां तु कार्यकरणैर्नित्यमेव संहतत्वमिति वास्याद्युपादाने नानवस्था स्यादिति।।६०।।

इह तु असंहतस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति करणमुपादेयम्, तदुपादानमपि विक्रियैवेति तत्कर्तृत्वे करणान्तर-मुपादेयम्, तदुपादानेऽप्यन्यदिति प्रमातुः स्वातन्त्र्येऽनवस्थाऽपरिहार्या

हेतुमाह—**फलेति**। नित्यत्वे च फलस्यावगतेः समानत्वात् प्रमातृत्वव्यपदेश-स्यात्मन्यविरुद्धतेत्यर्थः।।५९।।

कूटस्थज्योतिःस्वभावत्वेऽपि प्रमातृत्वव्यपदेशमात्मन्यौपचारिकमविरुद्धमुक्त्वा कर्तृत्वासम्भवं वक्तुं चोद्यमुद्भावयति—**अत्राह–शिष्यः नित्यावगतिस्वरूप-स्यात्मनोऽविक्रियात्वात् कार्यकरणैरसंहत्य तक्षादीनामिव वास्यादिभिः कर्तृत्वं नोपपद्यते**। कार्यकरणैः संहतिमप्राप्य कर्तृत्वं नोपपद्यते चेतर्हि कार्यकरणोपादान-पूर्वककर्तृत्वं भविष्यतीत्याशङ्क्याह—**असंहतस्वभावस्य कार्यकरणोपादानेऽ-नवस्था प्रसज्यते**। कार्यकरणोपादानमपि क्रियात्वादुपादानान्तरपूर्वकं तदपि तथेत्यनवस्थाप्रसक्तिरित्यर्थः। यथा तक्षादीनां वास्यादिभिः संहतानां वास्योपादानेऽपि नानवस्था तथाऽत्रापि स्यादित्याशङ्क्याह—**तक्षादीनां तु कार्यकरणैर्नित्यमेव संहतत्वमिति** वास्याद्युपादाने नानवस्था स्यात्।।६०।।

दार्ष्टान्तिके दृष्टान्ताद्विशेषं दर्शयन्ननवस्थां व्यवस्थापयति—**इह त्वसंहतस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति करणमुपादेयम्। तदुपादानमपि विक्रियैवेति तत्कर्तृत्वे करणान्तरमुपादेयम्। तदुपादानेऽप्य-न्यदिति प्रमातुः स्वातन्त्र्येऽनवस्थाऽपरिहार्या**। स्वातन्त्र्ये कर्तृत्वे सतीत्यर्थः। एवमात्मनि शिष्येणोक्तं कर्तृत्वासम्भवमभ्युपेत्य क्रियैव धात्वर्थो नियोगो वा कार्यत्वेनावगतः स्वसिद्ध्यर्थं पुरुषं प्रेरयतीति मतान्तरमाशङ्क्य निराकरोति—**न च क्रियैवात्मानं कारयति अनिर्वर्तितायाः स्वरूपाभावात्**। पूर्वादृष्टमेवात्मानं प्राप्य तत्र कर्तृत्वं सम्पादयतीति मतान्तरमाह—**अथान्यदात्मानमुपेत्य क्रियां कारयतीति**

---

१. अचेतनं यदि चैतन्यवत् स्वतः प्रकाशं स्यात्, तदाऽऽत्मवत्, सर्वदैव भासेत।

स्यादिति। न च क्रियैवात्मानं कारयति, अनिर्वर्तितायाः स्वरूपाभावात्। अथान्यदात्मानमुपेत्य क्रियां कारयतीति चेत्–न, अन्यस्य स्वतःसिद्धत्वाविषयत्वाद्यनुपपत्तेः न ह्यात्मनोऽन्यदचेतनं वस्तु स्वप्रमाणकं दृष्टम्। शब्दादि सर्वमेवावगतिफलावसानप्रत्ययप्रमितं सिद्धं स्यात्। अवगतिश्चेदात्मनोऽन्यस्य स्यात्, सोऽप्यात्मैवासंहतः स्वार्थः स्यात् न परार्थः। न च देहेन्द्रियविषयाणां स्वार्थतामवगन्तुं शक्नुमः, अवगत्यवसानप्रत्ययापेक्षसिद्धिदर्शनात्।।६१।।

ननु देहस्यावगतौ न कश्चित्प्रत्यक्षादिप्रत्ययान्तरमपेक्षते।।६२।।

बाढम्, जाग्रत्येवं स्यात्। मृतिसुषुप्तयोस्तु देहस्यापि प्रत्यक्षादिप्रमाणापेक्षैव सिद्धिः, तथैवेन्द्रियाणाम्–बाह्या एव हि

चेत्, अदृष्टस्यात्मव्यतिरिक्तत्वान्न स्वतः सिद्धिर्घटादिवत् न चात्मत्वात्तद्वदेवाविषयत्वम्. न च ताभ्यामनात्मनस्तस्यात्मप्रेरकत्वम्। अतो न पूर्वादृष्टावष्टम्भादात्मनि कर्तृत्वसिद्धिरिति दूषयति—**न अन्यस्य स्वतः सिद्धत्वाविषयत्वाद्यनुपपत्तेः**। अदृष्टस्यानात्मनः स्वतः सिद्धत्वाभावं स्पष्टयति—**न ह्यात्मनोऽन्यदचेतनं वस्तु स्वप्रमाणकं दृष्टम्**। कथं तर्हि शब्दादेः सिद्धिस्तत्राह—**शब्दादि सर्वमेवावगतिफलावसानप्रत्ययप्रमितं सिद्धं स्यात्**। नन्वात्मव्यतिरिक्तोऽपीश्वरः सर्वज्ञः सन्नात्मप्रेरकः स्यादिति चेत्तत्राह—**अवगतिश्चेदात्मनोऽन्यस्य स्यात् सोऽप्यात्मैवासंहतः स्वार्थः स्यान्न परार्थः**। लौकिकदृष्ट्या आत्मनोऽन्यस्येश्वरस्य स्वाभाविकी चेदवगतिरिष्टा सोऽप्यस्माकमात्मैव 'अयमात्मा ब्रह्म' इति श्रुतेः। अतो न तस्मिन्नात्मप्रेरकत्वोपपत्तिरित्यर्थः। चैतन्याश्रयो देहादिरेवात्मेत्यङ्गीकारात् कथं तस्यासंहतत्वमित्याशङ्क्याह—**न च देहेन्द्रियविषयाणां स्वार्थतामवगन्तुं शक्नुमः। अवगत्यवसानप्रत्ययापेक्षसिद्धिदर्शनात्।**

यथा वह्निगतेन प्रकाशेन वह्निर्न प्रकाश्यते। तथा देहधर्मश्चेदवगतिर्न तया देहोऽवगम्येत। अवगम्यते च अतो देहो नात्मा।।६१।।

अवगत्यपेक्षासिद्धित्वमित्यत्र शङ्कते—**ननु देहस्यावगतौ न कश्चित् प्रत्यक्षादिप्रत्ययान्तरमपेक्षते।।६२।।**

तत्राधर्मङ्गीकृत्यार्धं दूषयति—**बाढम् जाग्रत्येवं स्यात् मृतिसुषुप्तयोस्तु देहस्यापि प्रत्यक्षादिप्रमाणापेक्षैव सिद्धिः तथैवेन्द्रियाणाम्**। यथा जडस्य देहस्य

---

१. यदि प्रमाणमन्तरेणापि देहस्य प्रत्ययः स्यात्, तदा सुषुप्तावपि देहप्रत्ययः स्यात्।

शब्दादयो देहेन्द्रियाकारपरिणताः—इति प्रत्यक्षादिप्रमाणापेक्षैव हि सिद्धिः। सिद्धिरिति च प्रमाणफलमवगतिमवोचाम। सा चावगतिः कूटस्था स्वयंसिद्धा आत्मज्योतिः स्वरूपेति च।।६३।।

अत्राह चोदकः—अवगतिः प्रमाणानां फलं कूटस्थनित्यात्मज्योतिःस्वरूपेति च विप्रतिषिद्धम्। इत्युक्तवन्तमाह—न विप्रतिषिद्धम्। कथं तर्हि? कूटस्था नित्यापि सती प्रत्यक्षादिप्रत्ययान्ते लक्ष्यते तादर्थ्यात्। प्रत्यक्षादिप्रत्ययस्य अनित्यत्वे, अनित्येव भवति। प्रमाणानां फलमित्युपचर्यते।।६४।।

यद्येवं भगवन्, कूटस्थनित्यावगतिरात्मज्योतिःस्वरूपैव स्वयंसिद्धा, आत्मनि प्रमाणनिरपेक्षत्वात् ततोऽन्यदचेतनं

प्रत्यक्षाद्यपेक्षा सिद्धिस्तथा इन्द्रियाणामपि जडत्वाविशेषात्तदपेक्षैव सिद्धिरित्याह—**तथेति**। किञ्च देहादिरनात्मा भौतिकत्वादुभयसम्प्रतिपन्नशब्दादिवदित्याह—**बाह्या एव हि शब्दादयो देहेन्द्रियाकारपरिणताः**। किञ्च शब्दादीनां प्रत्यक्षादि-सापेक्षसिद्धित्वात्तेषामेव देहाद्याकारपरिणतानां तदपेक्षसिद्धित्वं दृढमित्याह—**इति प्रत्यक्षादिप्रमाणापेक्षैव सिद्धिः**। ननु सिद्धिरुत्पत्तिरुच्यते। न सा प्रत्यक्षाद्यपेक्षा तत्राह—**सिद्धिरिति प्रमाणानां फलमवगतिमवोचाम**। ननु मदशक्तिवद्देहा-कारपरिणतेषु भूतेष्ववगतिरुत्पद्यत इति। न, प्रागुक्तन्यायपरास्तत्वादित्याह—**सा चावगतिः कूटस्था स्वयंसिद्धाऽऽत्मज्योतिःस्वरूपेति च** क्रियापदानुषङ्गद्योतकोऽ-न्यश्चकारः।।६३।।

कूटस्था चेदवगतिस्तर्हि फलत्वं तस्या व्याहतमिति चोदयति—**अत्राह चोदकः अवगतिः प्रमाणानां फलं कूटस्थनित्यात्मज्योतिःस्वरूपेति च विप्रतिषिद्धम्**। कूपाकाशकार्यत्ववदौपचारिकं कार्यत्वमुपेत्य फलं दर्शयति—**इत्युक्तवन्तमाह न विप्रतिषिद्धम्। कथं तर्हि कूटस्था नित्यापि सती प्रत्ययान्ते लक्ष्यते तादर्थ्यात्। प्रत्यक्षादिप्रत्ययस्यानित्यत्वे अनित्येव भवति। तेन प्रत्ययानां फलमित्युपचर्यते**।।६४।।

प्रमातृत्वं कर्तृत्वं फलत्वं च कूटस्थावगतिस्वरूपे कल्पनामात्रमित्युपपाद्याधुना बाह्यद्वैतस्यापि कल्पितत्वं चोद्यमुखेन दर्शयति—**यद्येवं भगवन्, कूटस्थनित्याव-गतिरात्मज्योतिःस्वरूपैव स्वयंसिद्धा। आत्मनि प्रमाणनिरपेक्षत्वात्। ततोऽन्यदचेतनं संहत्यकारित्वात् परार्थम्**। अवगतिविषयस्याचेतनस्य संहत्य-

---

१. अधिष्ठानमन्तरेण यथा रज्जुसर्पादीनामवगतिर्नास्ति तद्वज्जाग्रत्स्वप्नप्रपञ्चस्यापि।

संहत्यकारित्वात् परार्थम्। येन च सुखदुःखमोहहेतुप्रत्ययावगतिरूपेण पारार्थ्यं, तेनैव स्वरूपेणानात्मनोऽस्तित्वं, नान्येन रूपान्तरेण। अतो नास्तित्वमेव परमार्थतः। यथा हि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेणाभावो दृष्टः, एवं जाग्रत्स्वप्नद्वैतभावस्यापि तदवगतिव्यतिरेकेणाभावो युक्तः। एवमेव परमार्थतः भगवन्, अवगतेरात्मज्योतिषो नैरन्तर्यभावात्कूटस्थनित्यताऽद्वैतभावश्च, सर्वप्रत्ययभेदेष्वव्यभिचारात्। प्रत्ययभेदाश्चावगतिं व्यभिचरन्ति। यथा स्वप्ने नीलपीताद्याकारभेदरूपाः प्रत्ययास्तदवगतिं व्यभिचरन्तः परमार्थतो न सन्तीत्युच्यन्ते, एवं जाग्रत्यपि नीलपीतादिप्रत्ययभेदास्तामेवावगतिं व्यभिचरन्तोऽसत्यरूपा भवितुमर्हन्ति।

कारित्वेन परार्थत्वे शुक्तिरजतादिवन्मिथ्यात्वसिद्धिरित्ययुक्तम्। पुरुषस्यापि जडस्य सत्त्वरजस्तमस्साम्यात्मकप्रकृतिरूपेण परार्थस्यैव सांख्यैः सत्यत्वोपगमादित्याशङ्क्याह—**येन च सुखदुःखमोहप्रत्ययावगतिरूपेण पारार्थ्यं तेनैव स्वरूपेणानात्मनोऽस्तित्वं नान्येन रूपान्तरेणातो नास्तित्वमेव परार्थतः**। सुखस्य दुःखस्य मोहस्य च हेतवो ये प्रत्ययाः बुद्धिपरिणामास्तैरवगतेन रूपेण जडं परमार्थम्। तेनैव स्वरूपेणास्यानात्मनो दृश्यस्य द्रष्टारं प्रत्यस्तित्वं नान्येनातीन्द्रियपरिकल्पितेन। शुद्धं चिद्रूपं स्वतन्त्रं जगत्कारणमित्यादिना रूपान्तरेणास्तित्वे मानाभावात्। आगमविशेषाच्च तेन द्वैतस्य वस्तुतो नास्तित्त्वमेव द्वैतत्वात् स्वप्नद्वैतवदित्यर्थः। किञ्च विमतं तत्त्वतो नावगत्यतिरेकेणास्ति दृश्यत्वाद्रज्जुसर्पादिवदित्याह—**यथाहि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेणाभावो दृष्टः एवं जाग्रत्स्वप्नद्वैतभावस्यापि तदवगतिव्यतिरेकेणाभावो युक्तः**। किञ्च यथा द्वैतं मिथ्येति मम प्रतिभासते तथैव कूटस्थनित्यत्वमद्वितीयत्वं चावगतेर्मम प्रतिभाति स्वप्रकाशत्वादनवच्छिन्नत्वादव्यभिचारित्वाच्चेत्याह—**एवमेव भगवन्नवगतेरात्मज्योतिषो नैरन्तर्यात् कूटस्थनित्यता अद्वैतभावश्च सर्वप्रत्ययभेदेष्वव्यभिचारात्**। किञ्च विमतम् असत्यं व्यभिचारित्वत् स्वप्नवदित्याह—**प्रत्ययभेदाश्चावगतिं व्यभिचरन्ति। यथा स्वप्ने नीलपीताद्याकारभेदप्रत्ययास्तदवगतिं व्यभिचरन्तः परमार्थतो न सन्तीत्युच्यन्ते। एवं जाग्रत्यपि नीलपीतादिप्रत्ययभेदास्तामेवावगतिं व्यभिचरन्तो असत्यरूपा भवितुमर्हन्ति**। तेन द्वैतस्य मिथ्यात्वे दृश्यत्वं व्यभिचारित्वं च कारणमुक्तम्। तदवगतेरपि तुल्यमिति तस्मिन्मिथ्यात्वप्रसक्तिरित्याशङ्क्याह—**तस्याश्चावगतेरन्योऽवगन्ता नास्तीति न स्वेन रूपेण स्वयमुपादातुं हातुं वा शक्यते। अन्यस्य चाभावात्।**

तस्याश्चावगतेरन्योऽवगन्ता नास्तीति न स्वेन स्वरूपेण स्वयमुपादातुं हातुं वा शक्यते, अन्यस्य चाभावात्।।६५।।

तथैवेति। एषाऽविद्या, यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणः। तस्या अविद्याया विद्या निवर्तिका। इत्येवं त्वमभयं प्राप्तोऽसि। नातः परं जाग्रत्स्वप्नदुःखमनुभविष्यसि। संसारदुखान्मुक्तोऽसीति[1]।।६६।।

ओमिति।।६७।।

तथैवेति। एषाऽविद्या। स्वेन स्वस्य कर्मकर्तृत्वविरोधेन हानोपादानायोगश्चेत्, अन्येनैव तर्हि स्वस्य हानोपादाने स्यातां विरोधादित्याशङ्क्याह—**अन्यस्य चेति**।।६५।।

अद्वितीयस्य प्रत्यगात्मनः सच्चिदानन्दैकतानस्य परमार्थत्वं द्वैतप्रपञ्चस्य तु मिथ्यात्वमित्येवं शिष्येणोक्तम्। गुरुणा चाभ्यनुज्ञाते विपरीतप्रथा कथमित्याशङ्क्याह—**एषेति**। विद्याऽभावं व्यवच्छेत्तुं विशिनष्टि—**यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणः**। अविद्यायास्तर्हि कुतो निवृत्तिरित्याशङ्क्याह—**तस्या अविद्यायाः विद्या निवर्त्तिका**। सा च विद्या तवोक्तप्रकारेण संवृत्तेति कृतकृत्यस्त्वमित्याह—**इत्येवं त्वमभयं प्राप्तोऽसि**। विद्योत्पत्तेरूर्ध्वमभयप्राप्तिं व्यक्तीकरोति—**नातः परं जाग्रत्स्वप्नदुःखमनुभविष्यसि। संसारदुःखान्मुक्तोऽसीति**।।६६।।

ओमिति। शिष्योऽपि यथोक्तं यथावद् गृहीत्वा कृतकृत्यत्वमनुजानाति।।६७।।

।। इति द्वितीयं कूटस्थाद्वयात्मबोधनामकमवगतिप्रकरणम् ।।२।।

---

१. अविद्यायां निवृत्तौ सुखदुःखात्मकप्रपञ्चाभावात्।

अथ तृतीयं परिसङ्ख्यानप्रकरणम्[1]

मुमुक्षूणामुपात्तपुण्यापुण्यक्षपणपराणामपूर्वानुपचयार्थिनां परिसंख्यानमिदमुच्यते–अविद्याहेतवो दोषा वाङ्मनःकायप्रवृत्तिहेतवः; प्रवृत्तेश्चेष्टानिष्टमिश्रफलानि कर्माण्युपचीयन्त इति तन्मोक्षार्थम्।।१।।

तत्र शब्दस्पर्शरूपरसगन्धानां विषयाणां श्रोत्रादिग्राह्यत्वात्, स्वात्मनि परेषु वा विज्ञानाभावः, तेषामेव परिणतानां यथा लोष्ठादीनाम्। श्रोत्रादिद्वारैश्च ज्ञायन्ते। येन च ज्ञायन्ते, स विज्ञातृत्वादतज्जातीयः। ते हि शब्दादयोऽन्योन्यसंसर्गित्वाज्जन्म-

---

अथ तृतीयं परिसङ्ख्यानप्रकरणम्

विधिरहितपूर्वोक्तविद्यासम्पन्नस्य कृतकृत्यस्य विधितो न किञ्चिदनुष्ठेयमिति प्रतिष्ठापितम्। सम्प्रति येषामपरोक्षं वाक्यार्थज्ञानं स्फुटतरपदार्थज्ञानविरहितत्वान्न सम्पद्यते तेषामनुष्ठेयशेषं दर्शयति—**मुमुक्षूणामुपात्तपुण्यापुण्यक्षपणपराणामपूर्वानुपचयार्थिनां परिसंख्यानमिदमुच्यते**। परिसंख्यानं वक्ष्यमाणमनुचिन्तनम्; तस्य फलमाह—**अविद्याहेतवो दोषा वाङ्मनःकायप्रवृत्तिहेतवः; प्रवृत्तेश्चेष्टानिष्टमिश्रफलानि कर्माणि उपचीयन्त इति तन्मोक्षार्थम्**। तन्मोक्षार्थमित्यत्र तच्छब्देनाविद्यादयो गृह्यन्ते।।१।।

परिसंख्यानं च कुर्वता प्रथममात्मानात्मविवेचनं कर्त्तव्यमित्याह—**तत्र शब्दस्पर्शरूपरसगन्धानां विषयाणां श्रोत्रादिग्राह्यत्वात् स्वात्मनि परेषु वा विज्ञानाभावः तेषामेव परिणतानां यथा लोष्ठादीनाम्। श्रोत्रादिद्वारैश्च ज्ञायन्ते। येन च ज्ञायन्ते स ज्ञातृत्वादतज्जातीयः**। यथा बाह्यानां शब्दादीनां लोष्ठादिसदृशानां ज्ञानाभावो दृष्टस्तथा तेषामेव शब्दादीनां देहाकारपरिणतानां स्वपरविषयविज्ञानाभावो विज्ञायते। दैहिकाः शब्दादयः स्वपरज्ञानशून्याः शब्दादित्वात् बाह्यशब्दादिवदित्यर्थः। देहस्यानात्मत्वमुक्त्वा तद्विलक्षणमात्मानमनुमातुमारभते। **श्रोत्रादीत्यादिना**। वैलक्षण्यमेव स्फुटयति—**ते हि शब्दादयोऽन्योन्यसंसर्गित्वात् जन्मवृद्धिविपरिणामापक्षयनाशसंयोग-वियोगा-**

---

१. मोक्षप्रतिबन्धकदोषाणां परिसंख्यानं गणना यस्मिन् प्रकरणे तत् परिसंख्यानप्रकरणम्।

वृद्धिविपरिणामापक्षयनाशसंयोगाविर्भावतिरोभावविकारविकारिक्षेत्र-बीजाद्यनेकधर्माणः, सामान्येन च सुखदुःखाद्यनेककर्माणः। तद्विज्ञातृत्वादेव स विज्ञाता सर्वशब्दादिधर्मविलक्षणः।।२।।

तत्र शब्दादिभिरुपलभ्यमानैः पीड्यमानो विद्वानेवं परिसञ्चक्षीत।।३।।

शब्दस्तु ध्वनिसामान्यमात्रेण, विशेषधर्मैर्वा षड्जादिभिःप्रियैः स्तुत्यादिभिरिष्टैरनिष्टैश्चासत्यबीभत्सपरिभवाक्रोशादिभिर्वचनैर्वा मां दृक्स्वभावमसंसर्गिणमविक्रियमचलमनिधनमभयमत्यन्तसूक्ष्मविषयं गोचरीकृत्य, स्प्रष्टुं नैवार्हति, असंसर्गित्वादेव मम। अत एव न

विर्भावतिरोभावविकारविकारिक्षेत्रबीजाद्यनेकधर्माणः सामान्येन च सुखदुःखाद्यनेककर्माणः। तद्विज्ञातृत्वादेव तद्विज्ञाता सर्वशब्दादिधर्मविलक्षणः। जन्मादिविकारैः शरीरस्य विकारे सति देहबीजपुण्याद्यनेकधर्माणस्ते शब्दादयो भवन्ति। तथा विशेषरूपेण केचन शब्दादयः सुखहेतवो जायन्ते। केचन दुःखहेतव सम्पद्यन्ते। सामान्येन चान्तःकरणाद्यनेकधर्मवन्तो भवन्ति। तद्विज्ञातृत्वादेवात्मा तद्धर्मविलक्षणः सिध्यतीत्यर्थः। दैहिकाः शब्दादयः स्वविजातीयग्राह्याः ग्राह्यात्वाद् घटवदित्या-त्मानात्मविवेको दर्शितः।।२।।

सम्प्रति परिसंख्यानप्रकारं दर्शयितुं प्रक्रमते—**तत्र शब्दादिभिरुपलभ्यमानैः पीड्यमानो विद्वानेवं परिसञ्चक्षीत।।३।।**

शब्देन दृश्यमानेन सामान्येन सामान्यात्मना विशेषात्मना च पीड्यमानस्य विदुषस्तद्विषये प्रथममनुचिन्तनप्रकारं दर्शयति—**शब्दस्तु ध्वनिसामान्यमात्रेण वा विशेषधर्मैर्वा षड्जादिभिः प्रियैः स्तुत्यादिभिर्वेष्टैरनिष्टैश्चासत्यवीभत्स-परिभवाक्रोशादिवचनैर्वा मां दृक्स्वभावममसंसर्गिणमविक्रियमचलमनिधन-मभयमत्यन्तसूक्ष्ममविषयं गोचरीकृत्य स्प्रष्टुं नैवार्हति। असंसर्गित्वादेव मम। अत एव न शब्दनिमित्ता हानिर्वृद्धिर्वा। अतो मां किं करिष्यति स्तुतिनिन्दादिप्रियाप्रियलक्षणः शब्दः।** विशेषधर्माणामेव प्रियाप्रियभेदेन द्वैविध्य-मादर्शयति—**प्रियैरिति।** अनिष्टानप्रियानपि शब्दविशेषानुदाहरति—**असत्येति।** वृद्धानां सभायां वक्तुमयोग्यं स्त्रीवर्णनाद्यसभ्यम्। वीभत्सं जुगुप्सितं सर्वैरिव सद्भिर्विगर्हितम्। परिभवस्तिरस्कारप्रयोगः। आक्रोशस्त्वधिक्षेपप्रभेदः। अन्यान्यपि परिहासादिवचनान्यादिशब्देन गृह्यन्ते यथोक्तैः विशेषैरात्मानं पीडयितुं शब्दो न

शब्दनिमित्ता हानिर्वृद्धिर्वा। अतो मां किं करिष्यति स्तुतिनिन्दादिप्रियाप्रियत्वादिलक्षणः शब्दः?[१] अविवेकिनं हि शब्दमात्मत्वेन गतं प्रियः शब्दो वर्धयेत्, अप्रियश्च क्षपयेत्, अविवेकित्वात्। न तु मम विवेकिनो बालाग्रमात्रमपि कर्तुमुत्सहत इति। एवमेव स्पर्शसामान्येन तद्विशेषैश्च शीतोष्णमृदुकर्कशादि-ज्वरोदरशूलादिलक्षणैश्चाप्रियैः प्रियैश्च कैश्चिच्छरीरसमवायिभि-र्बाह्यागन्तुकनिमित्तैश्च न मम काचिद्विक्रिया वृद्धिहानिलक्षणा अस्पर्शत्वात् क्रियते, व्योम्न इव मुष्टिघातादिभिः। तथा रूपसामान्येन तद्विशेषैश्च प्रियाप्रियैः स्त्रीव्यञ्जनादिलक्षणैररूपत्वान्न मम काचिद्धानिर्वृद्धिर्वा क्रियते। तथा रससामान्येन तद्विशेषैश्च प्रियाप्रियैः

शक्नोतीत्यत्र विदुषो विवेकातिरेकं हेतुमाह—**दृक्स्वभावमिति**। असङ्ग-त्वाच्चात्मनस्तत्र शब्दसंस्पर्शो नास्तीत्याह—**अविक्रियमिति**। स्पन्दशून्यत्वाच्च न तत्रास्ति शब्दनिमित्ता क्रियेत्याह—**अचलमिति**। जननमरणविरहितत्वाच्च तत्र शब्दनिमित्तं कार्यं नास्तीत्याह—**अनिधनमिति**। अविद्यातत्कार्यसंस्पर्शा-भावाच्चात्मनि शब्दवैफल्यमित्याह। उभयविधेन्द्रियाग्राह्यत्वाच्च तत्र शब्दस्या-प्रवृत्तिरित्याह—**अत्यन्तसूक्ष्ममिति**। किञ्च विषये शब्दप्रवृत्तिरुपलभ्यते आत्मा च प्रत्यक्त्वादविषयस्तत्र कुतः शब्दप्रवृत्तिरित्याह—**अविषयमिति**। असंसर्गित्वं पूर्वोक्तसर्वविशेषणोपलक्षणम्। यथोक्तात्मविद्यावति विदुषि शब्दस्यासंस्पर्शे सिद्धे फलितमाह—**अत इति**। यदि विदुषि हानिवृद्धिहेतुत्वासिद्धेः शब्दो न किञ्चित् करोति। तर्हि कुत्रास्य सावाकाशत्वमित्याशङ्क्याह—**अविवेकिनं हि शब्दमात्मत्वेन गतं प्रियः शब्दो वर्द्धयेत्। अप्रियश्च क्षपयेदविवेकित्वात्। न मम विवेकिनो बालाग्रमात्रमपि कर्त्तुमुत्सहत इति**। पूर्वोक्तमेव स्पष्टार्थं व्यावर्त्यत्वेन कीर्त्तयति—**न त्विति**। इतिशब्दस्तु परिसञ्चक्षीतेति पूर्वत्र सम्बद्ध्यते। शब्दे सामान्यविशेषात्मनि दर्शितं न्यायं स्पर्शरूपरसगन्धेष्वपि तथाविधेष्वतिदिशति—**एवमेव स्पर्शसामान्येन तद्विशेषैश्च शीतोष्णमृदुकर्कशज्वरोदरशूलादिलक्षणैरप्रियैः प्रियैश्च कैश्चित् शरीरसमवायिभिर्बाह्यागन्तुकनिमित्तैश्च न मे काचिद्विक्रिया वृद्धिहानिलक्षणा क्रियते। अस्पर्शत्वाद्व्योम्न इव मुष्टिघातादिभिः, तथा रूपसामान्येन तद्विशेषैश्च प्रियाप्रियैः स्त्रीव्यञ्जनादिलक्षणैररूपत्वान्न काचिन्मम हानिर्वृद्धिर्वा क्रियते। तथा रससामान्येन तद्विशेषैश्च प्रियाप्रियैर्मधुराम्ललवणतिक्त-**

---

१. विषयेषु प्राधान्येनादौ पठितं शब्दं निराकुर्वन्नाह न. शब्दजन्यसुखदुःखादीनां संसर्ग आत्मनि।

मधुराम्ललवणकटुतिक्तकषायैर्मूढबुद्धिभिः परिगृहीतैः अरसात्मकस्य मम न काचिद्धानिर्वृद्धिर्वा क्रियते। तथा गन्धसामान्येन तद्विशेषैश्च प्रियाप्रियैः पुष्पाद्यनुलेपनादिलक्षणैरगन्धात्मकस्य न मम काचिद्धानिर्वृद्धिर्वा क्रियते,[१] 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' इति श्रुतेः।।४।।

किञ्च–य एव बाह्याः शब्दादयः, ते शरीराकारेण संस्थिताः तद्ग्राहकैश्च श्रोत्राद्याकारैः, अन्तःकरणद्वयतद्विषयाकारेण च, अन्योन्यसंसर्गित्वात् संहत्वाच्च सर्वक्रियासु। तत्रैवं सति विदुषो न मम कश्चिच्छत्रुर्मित्रमुदासीनो वाऽस्ति। तत्र यदि कश्चिन्मिथ्याज्ञानाभिमानेन प्रियमप्रियं वा प्रयुयुङ्क्षेत् क्रियाफललक्षणं तन्मृषैव प्रयुयुङ्क्षति सः, तस्याविषयत्वाद् मम,[२] 'अव्यक्तोऽयमचिन्त्योऽयम्'

कटुकषायैर्मूढबुद्धिपरिगृहीतैररसात्मकस्य मम न काचिद्धानिर्वृद्धिर्वा क्रियते। तथा गन्धसामान्येन तद्विशेषैश्च प्रियाप्रियैः पुष्पानुलेपनादिलक्षणैरगन्धात्मकस्य न मम काचिद्धानिर्वृद्धिर्वा क्रियते। प्रियाः शरीरसमवायिनः स्पर्शाश्चन्दनपङ्कस्पर्शो धर्मकाले शिशिरतरस्पर्शश्चेत्येवमादयो बाह्यान्यागन्तुकानि निमित्तानि येषां चन्दनपङ्कादीनां अस्पर्शत्वादिति च्छेदः। रसादिविशेषाणां कथं प्रियाप्रियत्वं तत्राह—**मधुरेति**। अस्पर्शत्वादिविशेषणानि कथमात्मनि सिद्धानीत्याशङ्क्याह— **'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदि'ति श्रुतेः।** नित्यमिति विशेषणं प्रत्येकं सम्बद्ध्यते।।४।।

शब्दस्पर्शरूपरसगन्धैः सामान्यविशेषरूपैर्न हानिर्वृद्धिर्वाऽऽत्मनोऽस्तीत्यतस्तैरनभिभवमनुचिन्तनीयमभिधाय शब्दत्वाद्यनभिभवमनुचिन्तनीयमुपन्यस्यति— **किञ्च य एव बाह्याः शब्दादयस्ते शरीराकारेण संस्थितास्तद्ग्राहकैश्च श्रोत्राद्याकारैरन्तःकरणद्वयतद्विषयाकारेण चान्योऽन्यसंसर्गित्वात् संहतत्वाच्च सर्वक्रियासु**। सर्वशब्दाद्यात्मकानि भूतानि बाह्यानि शरीराकारेण तत्तदर्थग्राहकश्रोत्राद्याकारैर्बुद्धिर्मनश्चेत्यन्तःकरणरूपेण तद्विषयसुखाद्याकारेण च परिणमन्ते। तेषामन्योन्यसंसर्गित्वात् सर्वव्यापारेषु च संहतत्वात्। तथा च शब्दत्वादिप्रयुक्तानात्मनो हानिर्वृद्धिर्वाऽस्तीत्यर्थः। प्रदर्शितप्रकारेण भूतभौतिकानामेव सक्रियत्वे सति

---

१. यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभम्।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते।। (गीता २.१५)।

१. अविद्याविषयभूता बाह्यशब्दस्पर्शादयस्तत्त्वविदं न व्यथयन्ति।

इति स्मृतेः। तथा सर्वेषां पञ्चानामपि भूतानामविकार्यः, अविषयत्वात् 'अच्छेद्योऽयमदाह्योऽयम्' इति स्मृतेः। याऽपि शरीरेन्द्रियसंस्थान-मात्रमुपलक्ष्य, मद्भक्तानां विपरीतानां च प्रियाप्रियादिप्रयुयुक्षा, तज्जा च धर्माधर्मादिप्राप्तिः, तेषामेव, न तु मय्यजरेऽमृतेऽभये। 'नैनं कृताकृते तपतः', 'न कर्मणा वर्धते नो कनीयान्', 'सबाह्याभ्यन्तरो ह्यजः', 'न लिप्यते लोकदुःखेन बाह्यः' इत्यादिश्रुतिभ्यः।

साक्षिणो मम निर्विकारस्य न कश्चिन्मित्रादिरस्तीति चिन्तयेदित्याह—**तत्रैवं सति विदुषो न मम कश्चिच्छत्रुर्मित्रं उदासीनो वाऽस्ति**। तथापि यदि मिथ्याज्ञानमात्रेण मयि प्रियमप्रियं वा क्रियाफललक्षणं प्रयोक्तुमिच्छेत्। तन्मृषैवासौ प्रयुङ्क्ते तदविषयत्वान्ममेति चिन्तयेदित्याह—**यदि मिथ्याज्ञानाभिमानेन प्रियमप्रियं वा प्रयुयुङ्क्षेत् क्रियाफललक्षणं तन्मृषैव प्रयुयुङ्क्षति सः। तस्याविषयत्वान्मम** 'अव्यक्तोऽयमचिन्त्योऽयमि'त्यादिश्रुतेः। आत्मनो बहिरन्तरिन्द्रियाविषयत्वान्न शत्रुत्वं मित्रत्वं वाऽस्तीत्यत्र प्रमाणमाह—**'अव्यक्तोऽयमिति**। अपरं चिन्तनीयं सप्रमाणं कथयति—**तथा सर्वेषां पञ्चानामपि भूतानामविकार्योऽविषयत्वात्। अच्छेद्योऽयमदाह्योऽयमित्यादिस्मृतेः**। ननु विद्यावन्तं पुरुषमुपलभ्य तवात्र केचिदनुरागमाचरन्तस्तव प्रियं प्रयोक्तुमिच्छन्तस्तत्कृतं धर्मं सुखं च प्राप्नुवन्ति अप्रियं प्रयुञ्जानास्तत्कृतमधर्मं दुःखञ्च प्रतिपद्यन्ते। तथा च भक्तेषु धर्मादिहेतुत्वादभक्तेष्वधर्मादिहेतुत्वाद् विदुषोऽपि धर्मादिद्वारा वृद्धिहानी स्यातामिति चेन्नेत्याह—**याऽपि शरीरेन्द्रियसंस्थानमात्रमुपलक्ष्य मद्भक्तानां विपरीतानां च प्रियाप्रियादिप्रयुयुक्षा तत्कृतधर्माधर्मादिप्राप्तिश्च सा तेषामेव, न तु मय्यजरेऽमरेऽमृतेऽभये 'नैनं कृताकृते तपतः' न कर्मणा वर्द्धते नो कनीयान्'। 'स बाह्याभ्यन्तरो ह्यजः'। 'न लिप्यते लोकदुःखेन बाह्यः'। 'यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते' इत्यादि श्रुतिभ्यः**। प्रियाप्रियादित्यादिशब्दादुदासीनत्वमुच्यते। श्रुतिस्मृतिभ्यो विदुषि धर्मादेस्तत्फलस्य वा न प्राप्तिरिति पूर्वेण सम्बन्धः। किञ्च यदि कश्चिदनात्मा नाम पदार्थः स्यात् तदा तत्कृतं प्रियमप्रियं वा सम्भाव्येत। न त्वनात्मास्ति सर्वात्मत्वान्ममेत्यनुसन्दध्यादित्याह—**अनात्मवस्तुनश्चासत्त्वादिति परमो हेतुः**। परमत्वमबाधितत्वं हेतुस्तत्कृतप्रियाप्रिययोः अप्राप्ताविति शेषः। [१]'विरोधश्चात्मनोऽद्वयत्वविषयाणि द्वयस्यासत्त्वार्थानि चोपनिषद्वाक्यानि

---

१. विरोधे चेतिर्यत् समीचीनम् विरोधो नास्त्येव, अद्वयत्वाद् यदि विरोधः प्रतिभासेत तदेत्यर्थः।

अनात्मवस्तुनश्चाऽसत्त्वं परमो हेतुः आत्मनश्चाद्वयत्वे, द्वयस्यासत्त्वात्, यानि सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितव्यानीति।।५।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पूज्यपादकृतौ
सकलवेदोपनिषत्सारोपदेशसाहस्त्रां
गद्यभागः सम्पूर्णः।।

पौनःपुन्येनालोचयितव्यानीत्याह—**आत्मानश्चाद्वयत्वविषयाणि द्वयस्यासत्त्वार्थानि सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितव्यानि**। अभ्यासो ग्रन्थस्य गद्यपद्यात्मनः समाप्त्यर्थः।।५।।

।।इति तृतीयं परिसंख्यानप्रकरणं समाप्तम्।।

उपदेशसहस्त्रीयं गद्यपद्यमयी मया।
व्याकृता व्याकृताप्यन्यैर्मन्दानुग्रहसिद्धये।।
व्याक्रियासत्क्रिया सेयं कुर्वती शर्म निर्मलम्।
कृतीनां कृतविद्यानामाश्रिता पुरुषोत्तमम्।।

।। इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्य-
श्रीमद्भगवदानन्दज्ञानकृतश्रीसहस्त्रीटीका सम्पूर्णा।।
।। शुभमस्तु।।

भगवत्पादप्रशस्तिः

१. नमाम्यभोगिपरिवारसम्पदं
निरस्तभूतिमनुमार्धविग्रहम्।
अनुग्रमुन्मृदितकाललाञ्छनं
विना विनायकमपूर्वशङ्करम्।।

पद्मपादाचार्याः

२. आशैलादुदयात्तथास्तगिरितो भास्वद्यशोरश्मिभिः
व्याप्तं विश्वमनन्धकारमभवद्यस्य स्म शिष्यैरिदम्।
आराद् ज्ञानगभस्तिभिः प्रतिहतश्चन्द्रायते भास्करः
तस्मै शङ्करभानवे तनुमनोवाग्भिर्नमः स्यात्सदा।।

३. यत्प्रज्ञोदधियुक्तिशब्दनखजश्रद्धैकसन्नेत्रक-
स्थैर्यस्तम्भमुमुक्षुदुःखितकृपायत्नोत्थबोधामृतम्।
पीत्वा जन्ममृतिप्रवाहविधुरा मोक्षं ययुर्मोक्षिणः
तं वन्देऽत्रिकुलप्रसूतममलं वेधोऽभिधं मद्गुरुम्।।

सुरेश्वराचार्याः

४. येषां धीसूर्यदीप्त्या प्रतिहतिमगमन्नाशमेकान्ततो ये
ध्वान्तं स्वान्तस्य हेतुर्जननमरणसन्तानदोलाधिरूढेः।
येषां पादौ प्रपन्नाः श्रुतिशमविनयैः भूषिताः शिष्यसङ्घाः
सद्यो मुक्ताः स्थितास्तान् यतिवरमहितान् यावदायुर्नमामि।।

त्रोटकाचार्याः

५. अद्वैतार्णवपूर्णचन्द्रमभिदा पद्माटवीभास्करं
विद्वत्कोटिसमर्चिताङ्घ्रियुगलं प्रद्वेषिकक्षानलम्।
हृद्याभेद्यसमस्तवेदजनितप्रोद्यद्विवेकाङ्कुरं
स्विद्यद्वागमृतं परात्परगुरुं श्रीशङ्करं तं भजे।।

आनन्दगिरयः

उपदेशसाहस्रीश्लोकानुक्रमणिका

अ	पृ.सं.
अकल्पितेऽप्येवमजे	१६०
अकार्यशेषमात्मानं	४८
अकालत्वाददेशत्वात्	५२
अकुर्वदिष्टं यदि	१६०
अकुर्वन् सर्वकृच्छुद्धः	१०२
अक्रियत्वेऽपि तादात्म्यं	१२२
अचक्षुष्कादिशास्त्रोक्तं	४०
अचक्षुष्ट्वान्न दृष्टिर्मे	३८
अजोऽमरश्चैव तथा	२६
अजोऽहं चामरोऽमृत्युः	९९
अज्ञानं कल्पनामूलं	७२
अज्ञानं तस्य मूलं	३
अज्ञासिषमिदं मां च	१३३
अतः सर्वमिदं सिद्धं	१४३
अतोऽन्यथा न ग्रहो	१६२
अत्यरेचयदित्युक्तो	६
अथाभ्युपेत्यापि	१६१
अदृशिर्दृशिरूपेण	१२२
अदृश्योऽपि यथा राहुः	९३
अदृष्टं द्रष्टृविज्ञातं	६४
अद्रष्टुर्नैव चान्धस्य	१३५
अध्यक्षः स्वयमस्त्येव	१३२
अध्यक्षस्य दृशेः कीदृक्	१३८
अध्यक्षस्य पृथक्सिद्धौ	१३०
अध्यक्षस्य समीपे तु	१२०

	पृ.सं.
अध्यक्षस्य समीपे स्यात्	१२९
अध्यक्षस्यापि सिद्धिः स्यात्	१३४
अध्यक्षेण कृता दृष्टिः	१३८
अध्यक्षोऽहमिति ज्ञानं	१३९
अनवस्थान्तरत्वाच्च	८२
अनादितो निर्गुणतो	२७
अनित्या सा विशुद्धेति	३९
अनुभूतेः किमन्यस्मिन्	१३६
अनेकजन्मान्तर	८५
अन्यच्चेत्सदहंग्राह	१२७
अन्यदृष्टिः शरीरस्थः	९८
अन्यदृष्टिस्त्वविग्रा स्यात्	८७
अन्योन्यापेक्षया तेषां	१२४
अन्वयव्यतिरेकाभ्यां पदार्थः	१४६
अन्वयव्यतिरेकोक्तिः	१४४
अन्वयव्यतिरेकौ हि	१२५
अन्वयी ग्राहकस्तेषां	१२०
अपायोद्भूतिहीनाभिः	९८
अपि निन्दोपपत्तेश्च	८४
अपेक्षा यदि भिन्नेऽपि	७४
अपोहो यदि भिन्नानां	१३७
अप्राणस्य न कर्मास्ति	३८
अप्राणस्याऽमनस्कस्य	५१
अप्राप्यैव निवर्तन्ते	६२
अबद्धचक्षुषो नास्ति	९३

	पृ.सं.
अभावरूपं त्वमसीह	१५६
अभिन्नोऽपि हि बुद्ध्यात्मा	१३६
अभियुक्तप्रसिद्धिश्चेत्	११८
अमनस्कस्य का चिन्ता	५२
अमनस्कस्य शुद्धस्य	४०
अमूर्तमूर्तानि च	५४
अमृतं चाभयं नार्तं	३२
अमृतत्वं श्रुतं यस्मात्	७
अर्थी दुःखी च यः श्रोता	१२१
अलुप्ता त्वात्मनो दृष्टिः	३६
अवगत्या हि संव्याप्तः	१३०
अवस्थान्तरमप्येवं	८३
अविकल्पं तदस्त्येव	७१
अविक्रियत्वेऽपि	१२२
अविद्यया भावनया	२७
अविद्याप्रभवं सर्वं	९०
अविद्याबद्धचक्षुष्ट्वात्	१४३
अविद्यामात्र एवातः	११५
अविविच्योभयं वक्ति	१२१
अविवेकात्पराभावं	२०
अवेद्यमेक यदनन्य	१६२
अशनायादिनिर्मुक्तः	१४९
अशनायादिनिर्मुक्त्यै	१२७
अशनायाद्यतिक्रान्तं	४६
अशब्दादित्वतो नास्य	९३
असत्समं चैव	१५९
असदेतत्ततो युक्तं	८९
असद्वयं तेऽपि हि	१५८
असमाधिं न पश्यामि	५१
असिद्धितश्चापि	१५९

	पृ.सं.
अस्ति तावत्स्वयं नाम	७५
अस्पर्शत्वाददेहत्वात्	१४१
अस्पर्शत्वान्न मे	३९
अस्पर्शोऽपि यथा स्पर्शं	१४१
अहं कर्ता ममेदं	५
अहं कर्त्रात्मनि न्यस्तं	११०
अहङ्कारादिसन्तानः	११२
अहङ्कृत्यात्मनिर्भासः	११२
अहङ्क्रियाद्या हि	५३
अहंधीरिदमात्मोत्था	९
अहं निर्मुक्त इत्येव	१५१
अहं परं ब्रह्म	२८
अहं प्रत्ययबीजं यत्	१३
अहं ब्रह्मास्मि कर्ता च	३०
अहं ब्रह्मास्मि सर्वोऽस्मि	४१
अहं ममेति त्वमनर्थं	१५५
अहं ममेत्येषणं	५३
अहं ममैको न	२१
अहं शब्दस्य निष्ठा या	१२६
अहमज्ञासिषं चेदं	१३३
अहमित्यात्मधीर्या च	५०
अहमेव च भूतेषु	१००
अहमेव सदात्मज्ञः	१०१
आ	
आत्मज्ञस्यापि यस्य	४७
आत्मनीह यथाध्यासः	१०९
आत्मनो ग्रहणे चापि	१३३
आत्मनोऽन्यस्य चेत्	११
आत्मप्रत्यायिका ह्येषा	१०३
आत्मबुद्धिमनश्चक्षु	७२

	पृ.सं.
आत्मबुद्धिमनश्चक्षु	६३
आत्मरूपविधेः कार्यं	९६
आत्मलाभः परो लाभः	७८
आत्मलाभात्परो नान्यः	८७
आत्माग्नेरिन्धना बुद्धिः	६०
आत्मा ज्ञेयः परो	८६
आत्मानं सर्वभूतस्थं	५१
आत्माभासस्तु तिङ्वाच्यः	११६
आत्माभासापरिज्ञानात्	११५
आत्माभासाश्रयश्चात्मा	११५
आत्माभासाश्रयाश्चैवं	११४
आत्माभासो यथाहंकृत्	१११
आत्मार्थत्वाच्च सर्वस्य	७८
आत्मार्थोऽपि हि यो लाभः	८७
आत्मा ह्यात्मीय इत्येष	४८
आत्मैकः सर्वभूतेषु	५८
आदर्शमुखसामान्यं	११८
आदर्शस्तु यदाभासो	१२०
आदर्शानुविधायित्वं	११९
आधारस्याप्यसत्त्वाच्च	७४
आधिभेदाद्यथा भेदो	१३१
आपेषात्प्रतिबुद्धस्य	३१
आभासस्तदभावश्च	१२२
आभासे परिणामश्चेत्	१२९
आभासी यत्र तत्रैव	१११
आरब्धस्य फले ह्येते	१४
आलोकस्थो घटो यद्वत्	१३९
इ	
इतरेतरहेतुत्वे	७९
इति प्रणुन्ना द्रव्यवादं	८४

	पृ.सं.
इति प्रश्नानुरूपं यत्	१५१
इतीदमुक्तं परमार्थं	२८
इतोऽन्योऽनुभवः कश्चित्	१५२
इत्येतद्यावदज्ञानं	४०
इत्येवं प्रतिपत्तिः स्यात्	१२८
इत्येवं सर्वदात्मानं	४२
इदं तु सत्यं मम	२७
इदं पूर्वमिदं पश्चात्	१४३
इदं रहस्यं परमं	८५
इदं वनमतिक्रम्य	१०
इदमंशोऽहमित्यत्र	१८
इहैव घटते प्रश्नो	१५१
ई	
ईक्षितृत्वं स्वतः सिद्धं	२९
ईश्वरत्वेन किं तस्य	५०
ईश्वरश्चेदनात्मा स्यात्	११
उ	
उत्पाद्याप्यविकार्याणि	९७
उपलब्धिः स्वयंज्योतिः	११०
ए	
एतावद्ध्यमृतत्वं न	२९
एतेनैवात्मनाऽऽत्मानो	७१
एवं तत्त्वमसीत्यस्य	१४७
एवं विज्ञातवाक्यार्थे	१२६
एवं शास्त्रानुमानाभ्यां	३७
क	
करणं कर्म कर्ता च	४५
कर्ता दुःख्यहमस्तीति	१५०
कर्ताध्यक्षः सदस्मीति	१२१
कर्ता भोक्तेति यच्छास्त्र-	१०६

	पृ.सं.
कर्तृकर्मफलाभावात्	४८
कर्तृत्वं कारकापेक्षं	३७
कर्त्रा चेदहमित्येवं	१४०
कर्मकार्यस्त्वनित्यः स्यात्	८८
कर्मस्वात्मा स्वतन्त्रश्चेत्	५८
कर्माणि देहयोगार्थं	२
कर्मेप्सिततमत्वात्स	१३१
कल्प्योपाधिभिरेवैतत्	८९
किमन्यद्ग्राहयेत्कश्चित्	१३२
किं सदेवाहमस्मीति	१२७
कुण्डल्यहमिति ह्येतत्	१४१
कूटस्थेऽपि फलं योग्यं	१२८
कृतकृत्यश्च सिद्धश्च	४३
कृपणास्तेऽन्यथैवातो	१०१
कृष्णलादौ प्रमाजन्म	१४७
कृष्णायो लोहिताभासम्	१२३
कृष्यादिवत्फलार्थत्वात्	७
केवलां मनसो वृत्तिं	९४
कोशादिव विनिष्कृष्टः	३१
क्रियोत्पत्तौ विनाशित्वं	८०
क्षणवाच्योऽपि योऽर्थः	१३७
क्षणिकं हि तदत्यर्थं	७३
क्षीरात्सर्पिर्यथोद्धृत्य	९९
क्षुधया पीड्यमानोऽपि	१५४
ख	
खमिवैकरसा ज्ञप्तिः	५९
ग	
गन्तव्यं च तथा नैव	५२
गुणानां समभावस्य	६८

घ	पृ.सं.
घटादिरूपं यदि	५४
घ्राणादीदि तदर्थाश्च	६८
च	
चक्षुर्युक्ता धियो वृत्तिः	९४
चक्षुर्वत्कर्मकर्तृत्वं	७०
चितिः स्वरूपे स्वतः	२१
चित्तं चेतनमित्येतत्	१२३
चित्ते ह्यादर्शवद्यस्मात्	९१
चिन्मात्रज्योतिषा सर्वाः	४५
चिन्मात्रज्योतिषो नित्यं	५२
चेतनस्त्वं कथं देहः	१३२
चेतनोऽचेतनो वाऽपि	६२
चेष्टितं च यतो मिथ्या	१०७
चैतन्यं सर्वगं सर्वं	१
चैतन्यप्रतिबिम्बेन	१६
चैतन्यभास्यतामहः	१६
चैतन्याभासता बुद्धेः	११६
छ	
छायाक्रान्तेर्निषेधोऽयं	११४
छित्त्वा त्यक्तेन हस्तेन	१७
ज	
जनिमज्ज्ञानविज्ञेयं	२४
जन्ममृत्युप्रवाहेषु	६६
जाग्रतश्च तथा भेदो	९०
जाग्रत्स्वप्नौ तयोर्बीजं	७२
जातिकर्मादिमत्त्वाद्धि	१११
जात्यादीन् सम्परित्यज्य	५८
जिघत्सा वा पिपासा	३६
जीवश्चेत्परमात्मानं	१०१

	पृ.सं.
ज्ञातता स्वात्मलाभो वा	१३५
ज्ञाताऽयत्नोऽपि तद्वज्ज्ञः	६५
ज्ञातुर्ज्ञातिर्हि नित्योक्ता	२४
ज्ञातुर्ज्ञेयः परो ह्यात्मा	४७
ज्ञातैवात्मा सदा ग्राह्यो	१७
ज्ञातैवाहमविज्ञेयः	३६
ज्ञानं ज्ञेयं तथा ज्ञाता	१०४
ज्ञानज्ञेयादिवादेऽतः	१३५
ज्ञानयत्नाद्यनेकत्वं	७०
ज्ञानेनैव विशेष्यत्वात्	८१
ज्ञानैकार्थपरत्वात्तं	८८
ज्ञैकदेशो विकारो वा	११२
ज्योतिषो द्योतकत्वेऽपि	७१
त	
तं च मूढं च यद्यन्यं	३४
तत्त्वमस्यादिवाक्येषु	१४४
तत्त्वमोस्तुल्यनोडार्थं	१४७
तत्रैवं सम्भवत्यर्थे	१४५
तत्रैवं सति बुद्धीर्ज्ञः	६१
तथा ध्रुवफला विद्या	४
तथान्येन्द्रिययुक्ता	३९
तथान्येषां च भिन्नत्वात्	८१
तथाऽविक्रियरूपत्वात्	७७
तथैव चेतनाभासं	१२३
तदप्यस्त्विति चेत्तन्न	१२४
तदा तु दृश्यते दुःखं	१४२
तदेवैकं त्रिधा ज्ञेयं	९२
तद्विज्ञानाय युक्त्यादि	१५०
तस्माज्ज्ञाभासबुद्धीनां	११९
तस्मात्त्यक्तेन हस्तेन	१७

	पृ.सं.
तस्मादज्ञानहानाय	७
तस्मादनुभवायैव	१०८
तस्मादाद्यन्तमध्येषु	१४८
तस्माद्भ्रान्तिरतोऽन्या हि	८३
तस्माद्वाक्यार्थविज्ञानात्	१५२
तस्मान्नीलं तथा पीतं	१३८
तापान्तत्वादनित्यत्वात्	९७
तुल्यकालसमुद्भूतौ	७५
त्वं कुरु त्वं तदेवेति	३४
त्वंपदार्थविवेकाय	१५२
त्वंसतोस्तुल्यनीडत्वात्	१४२
त्वमर्थं प्रत्यगात्मानं	१५२
त्वमित्यध्यक्षनिष्ठश्चेत्	१२१
त्वयि प्रशान्ते न हि	१५६
द	
दक्षिणाक्षि प्रधानेषु	६१
दग्धैवमुष्णः सत्तायां	६५
ददतश्चात्मनो ज्ञानं	१०४
दशमस्त्वमसीत्येवं	१४३
दशमस्त्वमसीत्येवं	१४२
दशमस्य नवात्मत्व-	३२
दशाहाशौचकार्याणां	९६
दाहच्छेदविनाशेषु	१४०
दुःखित्वात्प्रत्यगात्मत्वं	१४७
दुःखीस्याद्दुःख्यहंमानात्	७०
दुःख्यस्मीति सति ज्ञाने	१४५
दृशिरूपे सदा नित्ये	३५
दृशिरेवानुभूयेत	१४९
दृशिस्तु शुद्धोऽहम्	२६
दृशिस्वरूपं गगनोपमं	२६

	पृ.सं.	न	पृ.सं.
दृशिस्वरूपेण हि	५३	न कश्चिच्चेष्यते धर्मः	१३६
दृशेश्छाया यदारूढा	३४	न चास्ति शब्दादिः	५३
दृश्यत्वादहमित्येष	६०	न चेत्स इष्टः	१६१
दृष्टं चापि यथा रूपं	८९	न चेद्भूयः प्रसूयेत	६
दृष्टं जागरितं विद्यात्	९१	न ततोऽमृतताऽऽशास्ति	३२
दृष्टं हित्वा स्मृतिं तस्मिन्	६३	न तस्यैवान्यतोऽपेक्षा	६४
दृष्टवच्चेत्प्ररोहः स्यात्	१३	न दृशेरविकारित्वात्	११५
दृष्टिः श्रुतिर्मतिर्ज्ञातिः	४९	न दृष्टिर्लुप्यते द्रष्टुः	६०
दृष्टिः स्पृष्टिः श्रुतिर्घ्रातिः	९७	ननु कर्म तथा नित्यं	४
दृष्ट्वा बाह्यं निमील्याथ	९८	ननु ध्रुवफला विद्या	४
देहलिङ्गात्मना कार्या	३२	नन्वेवं दृशिसङ्क्रान्तिः	१२३
देहात्मज्ञानवज्ज्ञानं	१४	न प्रकाश्यं यथोष्णत्वं	८०
देहात्मबुद्ध्यपेक्षत्वात्	३६	न प्रियाप्रिय इत्युक्तेः	५७
देहादावभिमानोत्थो	१४०	न बाह्यं मध्यतो वाऽन्तः	१०१
देहाद्यारम्भसामर्थ्यात्	१३	न बुद्धेरवबोधोऽस्ति	११६
देहाद्यैरविशेषेण	५	न बुद्धेर्बुद्धिवाच्यत्वं	११७
देहाभिमानिनो दुःखं	३४	न मेऽस्ति कश्चिन्न च	१५८
देहेऽहंप्रत्ययो यद्वत्	११९	न मेऽस्ति मोहस्तव	१५६
द्रष्टा च दृश्यं च	१५७	न मे हेयं न चादेयं	४२
द्रष्टुश्चान्यद्भवेद्दृश्यं	५७	न येषामेक एवात्मा	११७
द्रष्टृदृश्यत्वसम्बन्धः	१२२	नवबुद्ध्यपहाराद्धि	१४३
दृष्टृ श्रोतृ तथा मन्तृ	४८	न सच्चाहं न चासच्च	४१
द्वयोरेवेति चेत्तन्न	११३	न स्मरेत्यात्मनो ह्यात्मा	४७
ध		न स्वयं स्वस्य नान्यश्च	१०३
धर्माधर्मफलैर्योगः	३०	न हस्ती न तदारूढो	९३
धर्माधर्मविनिर्मुक्तं	१०२	न हि दीपान्तरापेक्षा	९५
धर्माधर्मौ ततोऽज्ञस्य	३	न हि सिद्धस्य कर्तव्यं	१५०
धीरेवार्थस्वरूपा हि	४५	न हीह लाभोऽभ्यधिकः	८५
ध्यायतीत्यविकारित्वं	९४	नात्माभासत्वसिद्धिश्चेत्	१३०
ध्रुवा ह्यनित्याश्च न	१६१	नाद्राक्षमहमित्यस्मिन्	१२५

	पृ.सं.
नानयोर्द्व्याश्रयत्वं च	११६
नान्यदन्यद्भवेद्यस्मात्	५६
नान्येन ज्योतिषा कार्यं	६४
नाप्यतो भावशब्देन	११७
नामजात्यादयो यद्वत्	१३७
नामरूपक्रियाभ्योऽन्यो	३०
नामादिभ्यः परे भूम्नि	१००
नाहोरात्रे यथा सूर्ये	६६
नित्यमुक्तः सदेवास्मि	१०५
नित्यमुक्तत्वविज्ञानं	१४६
नित्यमुक्तस्य शुद्धस्य	३८
निमीलोन्मीलने स्थाने	७२
नियोगोऽप्रतिपन्नत्वात्	१०७
निर्गुणं निष्क्रियं नित्यं	१०२
निर्दुःखवाचिना योगात्	१४२
निर्दुःखोऽतीतदेहेषु	१०८
निर्दुःखो निष्क्रियोऽकामः	१५१
निवृत्ता सा कथं भूयः	६
निश्चयार्था भवेद्बुद्धिः	६९
नेति नेतीति देहादीन्	५
नेति नेत्यादिशास्त्रेभ्यः	१०१
नैकारकसाध्यत्वात्	७
नैतदेवं रहस्यानां	१०९
नैतद्देयमशान्ताय	१०४
नैवं स्वप्ने पृथक्सिद्धिः	१३०
नौस्थस्य प्रातिलोम्येन	१५
प	
पदवाक्यप्रमाणज्ञैः	८६
परलोकभयं यस्य	५०
परस्य देहे न यथा	८५
पारगस्तु यथा नद्याः	४७

	पृ.सं.
पार्थिवः कठिनो घातः	६८
पुत्रदुःखं यथाध्यस्तं	१०९
पूर्वं स्यात्प्रत्ययव्याप्तिः	१३९
पूर्वदेहपरित्यागे	९६
पूर्वबुद्धिमबाधित्वा	९
पूर्वोक्तं यत्तमोबीजं	९९
पृष्टमाकाङ्क्षितं वाच्यं	१५१
प्रकाशस्थं यथा देहं	३३
प्रकृतिप्रत्ययार्थौ यौ	११६
प्रज्ञाप्राणानुकार्यात्मा	५१
प्रतिबन्धविहीनत्वात्	१२७
प्रतिलोममिदं सर्वं	१२५
प्रतिषिद्धेदमंशो ज्ञः	३५
प्रतिषेद्धुमशक्यत्वात्	९
प्रत्यक्षमनुमानं वा	१३७
प्रत्यक्षादीनि बाधेरन्	१४५
प्रत्यगात्मन आत्मत्वं	१४६
प्रत्ययी प्रत्ययश्चैव	१२८
प्रत्यवायस्तु तस्यैव	७
प्रथनं ग्रहणं सिद्धिः	१३१
प्रधानस्य च पारार्थ्यं	८०
प्रबोधरूपं मनसो	५४
प्रबोधेन यथा स्वाप्नं	१४६
प्रमथ्य वज्रोपम	१०५
प्रयुज्य तृष्णाज्वर	१५५
प्रशान्तचित्ताय	८५
प्रसन्ने विमले व्योम्नि	५०
प्रसिद्धिर्मूढलोकस्य	११८
प्रागेवैतद्विधेः कर्म	९५
प्राणाद्येवं त्रिकं हित्वा	९८

	पृ.सं.
प्राप्तश्चेत्प्रतिषिध्येत	११०
प्रामाण्येऽपि स्मृते:	१३३
फ	
फलान्तं चानुभूतं यत्	५६
फले च हेतौ च	२२
ब	
बन्धं मोक्षं च सर्वं	१०३
बाध्यते प्रत्ययेनेह	१४०
बाह्याकारत्वतो ज्ञप्ते:	७४
बिलात्सर्पस्य निर्याणे	६५
बीजं चैकं यथा भिन्नं	९२
बुद्धिस्थश्चलतीवात्मा	१५
बुद्धीनां विषयो दु:खं	१४८
बुद्धेः कर्तृत्वमध्यस्य	११८
बुद्धेस्तु प्रत्ययास्तस्मात्	१२०
बुद्धौ चेत्तत्कृत: कश्चित्	१२९
बुद्धौ दृश्यं भवेद्बुद्धौ	२०
बुद्ध्यर्थान्याहुरेतानि	६८
बुद्ध्यादीनामनात्मत्वं	४६
बुद्ध्यादौ सत्युपाधौ	५०
बुद्ध्यारूढं सदा सर्वं	१९
बुद्ध्यारूढं सदा सर्वं	१९
बुभुत्सोर्यदि चान्यत्र	१२
बोधस्यात्मस्वरूपत्वात्	८३
बोधात्मज्योतिषा दीप्ता	८२
बौद्धैस्तु प्रत्ययैरेवं	११९
ब्रह्मा दाशरथेर्यद्वत्	१२६
ब्रह्माद्या: स्थावरान्ता ये	२३
ब्रह्मास्मीति च विज्ञेयं	१५३

भ	पृ.सं.
भवाभवत्वं तु न	१६०
भानोर्बिम्बं यथा चौष्ण्यं	९४
भारूपत्वाद्यथा भानो:	१००
भिक्षामटन् यथा स्वप्ने	४४
भिद्यते हृदयग्रन्थि:	६७
भूतदोषैः सदास्पृष्टं	२४
भूतिर्येषां क्रिया सैव	१३६
भेदाभावेऽप्यभावस्य	१३७
भेदोऽभेदस्तथा चैकं	४२
म	
मच्चैतन्यावभास्यत्वां	२४
मणौ प्रकाश्यते यद्वत्	२०
मदन्य: सर्वभूतेषु	४१
मनसश्चेन्द्रियाणां च	९१
मनोबुद्धीन्द्रियाणां च	६१
मनोवृत्तं मनश्चैव	२९
ममात्मास्य त आत्मेति	४२
ममाहङ्कारयत्नेच्छा:	४९
ममाहं चेत्यतोऽविद्या	९६
ममाहमित्येतदपोह्य	६७
ममेदं द्वयमप्येतत्	१२४
ममेदं प्रत्ययौ ज्ञेयौ	१२४
ममेदमित्थं च तथे	२८
महाराजादयो लोका	३१
माधुर्यादि च यत्कार्यं	११४
मानसे तु गृहे व्यक्त:	६१
मानस्यस्तद्वदन्यस्य	३९
मायाहस्तिनमारुह्य	९२
मिथश्च भिन्ना यदि	१६७

	पृ.सं.
मिथ्याध्यासनिषेधार्थं	११
मुखादन्यो मुखाभासः	१११
मुखाभासो य आदर्शे	११२
मुखेन व्यपदेशात्स	११३
मूढया मूढ इत्येवं	३९
मूत्राशङ्को यथोदङ्को	१५
मूषासिक्तं यथा ताम्रं	४४
मृषाध्यासस्तु यत्र स्यात्	७५
मोक्षस्तन्नाश एव स्यात्	८३
मोक्षोऽवस्थान्तरं यस्य	७७
य	
य आत्मा नेति नेतीति	४६
यतश्च नित्योऽहमतो	१५६
यतो न चान्यः पर	१५५
यतोऽभूत्वा भवेद्यच्च	६५
यत्कामस्तत्क्रतुर्भूत्वा	९६
यत्र यस्यावभासस्तु	११८
यत्स्थस्तापो रवेर्देहे	३५
यथात्मबुद्धिचाराणां	१९
यथानुभूयते तृप्तिः	१४८
यथान्यत्वेऽपि तादात्म्यं	४९
यथा विद्या तथा कर्म	४
यथा विशुद्धं गगनं	५४
यथा सर्वान्तरं व्योम	३७
यथा ह्यन्यशरीरेषु	५९
यथेष्टाचरणप्राप्तिः	१५३
यथोक्तं ब्रह्म यो वेद	६६
यदद्वयं ज्ञानमतीव	२८
यदा नित्येषु वाक्येषु	१४४
यदाभासेन संव्याप्तः	१३१

	पृ.सं.
यदायं कल्पयेद्भेदं	९०
यदाहं कर्तुरात्मत्वं	११७
यदेव दृश्यते लोके	३३
यद्धर्मा यः पदार्थो	७१
यद्येवं नान्यदृश्यस्ते	१२०
यद्वाक्सूर्यांशुसम्पात	८६
यन्मनास्तन्मयोऽन्यत्वे	४९
यस्माद्भीताः प्रवर्तन्ते	९९
यस्मिन् देवाश्च वेदाश्च	५३
या तु स्यान्मानसी	३९
या माहारजनाद्यास्ता	३१
यावान् स्यादिदमंशो यः	१८
युगपत्समवेतत्वं	८१
येन वेत्ति स वेदः स्यात्	८९
येन स्वप्नगतो वक्ति	८९
येनात्मना विलीयन्ते	१०५
येनाधिगम्यतेऽभावः	७६
यो वेदालुप्तदृष्टित्वं	३६
योऽहंकर्तारमात्मानं	४९
र	
रज्जुसर्पो यथा रज्ज्वा	११५
रहस्यं सर्ववेदानां	१०४
रागद्वेषक्षयाभावे	३
राजवत् साक्षिमात्रत्वात्	१०२
राहोः प्रागेव वस्तुत्वं	११३
रूपवत्त्वाद्यसत्त्वान्न	२५
रूपसंस्कारतुल्याधी	५९
रूपस्मृत्यन्धकारार्थाः	६३
रूपादीनां यथान्यः स्यात्	१३८

व	पृ.सं.
वाक्यार्थप्रत्ययी कश्चित्	१०८
वाक्यार्थो व्यज्यते चैवं	१४४
वाक्ये तत्त्वमसीत्यस्मिन्	१४७
वाक्ये हि	१४३
वाचारंभणमात्रत्वात्	१००
वाचारंभणशास्त्राच्च	७६
वाच्यभेदात्तु तद्भेद:	८८
वाय्वादीनां यथोत्पत्ते:	२३
वासुदेवो यथाश्वत्थे	५८
विकल्पना चाप्यभवे	१५८
विकल्पनाच्चापि	१५९
विकल्पना वापि तथा	१५७
विकल्पोद्भवतोऽसत्त्वं	७६
विकारित्वमशुद्धत्वं	१९
विक्षेपो नास्ति तस्मान्मे	४०
विज्ञातुर्नैव विज्ञाता	३६
विज्ञातेर्यस्तु विज्ञाता	३५
विदिताविदिताभ्यां	६६
विद्यया तारिता: स्मो यै:	१०४
विद्याया: प्रतिकूलं हि	४
विद्याविद्ये श्रुतिप्रोक्ते	९१
विद्यैवाज्ञानहांनाय	३
विमथ्य वेदोदधित:	१६२
विमुच्य मायामय	२१
विराड्वैश्वानरो बाह्य:	१००
विरुद्धत्वादत: शक्यं	५
विविच्यास्मात् स्वमात्मानं	६३
विवेकात्मधिया दु:खं	१४१
विशुद्धिश्चात एवास्य	७७

	पृ.सं.
विशेषणमिदं सर्वं	१७
विशेषो मुक्तबद्धानां	७९
विषयग्रहणं यस्य	१३९
विषयत्वं विकारित्वं	९५
विषया वासना वापि	६१
वेदान्तवाक्यपुष्पेभ्यो	१५४
वेदार्थो निश्चितो ह्येष	४३
व्यक्ति: स्यादप्रकाशस्य	६५
व्यञ्जकत्वं तदेवास्या	४५
व्यञ्जकस्तु यथाऽऽलोक:	६९
व्यञ्जको वा यथाऽऽलोको	४४
व्यवधानाद्धि पारोक्ष्यं	९५
व्यस्तं नाहं समस्तं वा	६०
व्यापकं सर्वतो व्योम	६२
व्याप्तुमिष्टं च यत्कर्तु:	१३४
व्योमवत् सर्वभूतस्थो	३०
व्रणस्नाय्वोरभावेन	५८
श	
शक्त्यलोपात्सुषुप्ते ज्ञ:	९४
शब्दादीनामभावश्च	४०
शब्दाद्वाऽनुमितेर्वापि	१३४
शब्दानामयथार्थत्वे	११८
शब्देनैव प्रमाणेन	१३२
शरीरबुद्धीन्द्रिय	२७
शरीरबुद्ध्योर्यदि	५४
शरीरेन्द्रियसङ्घात:	६९
शान्तं प्राज्ञं तथा मुक्तं	९७
शान्तेश्चायत्नसिद्धत्वात्	७४
शारीरादि तप: कुर्यात्	९१

	पृ.सं.
शारीरा पृथिवी तावत्	२३
शास्त्रप्रामाण्यतो ज्ञेया	१०६
शास्त्रयुक्तिविहीनत्वात्	८४
शास्त्रस्यानतिशङ्क्यत्वात्	१००
शास्त्राद्ब्रह्मास्मि नान्योऽहं	१५३
शास्त्रानर्थक्यमेव स्यात्	५२
शिरोदुःखादिनात्मानं	७०
शून्यतापि न युक्तैवं	७१
श्रद्धाभक्ती पुरस्कृत्य	८४
श्रुतमात्रेण चेन्न स्यात्	१२६
श्रुतानुमानजन्मानौ	१०८
श्रुतेः स्वात्मनि नाशङ्का	१५१
श्रोतुः स्यादुपदेशश्चेत्	१२९
श्रोतृश्रोतव्ययोर्भेदो	१४९
ष	
षडूर्मिमालाभ्यतिवृत्त	१५५
स	
सङ्कल्पाध्यवसायौ	७३
सङ्घातो वास्मि भूतानां	६०
सन्निधौ सर्वदा तस्य	११०
सम्बन्धग्रहणं शास्त्रात्	१२२
सम्बन्धानुपपत्तेश्च	८०
सम्भाव्यो गोचरे शब्दः	११०
संयोगस्याप्यनित्यत्वात्	७७
संवादमेतं यदि	२२
संसारिणां कथा त्वास्तां	११२
संसारी च स इत्येक	११२
संसारो वस्तु संस्तेषां	११५
सकामः सक्रियोऽसिद्ध-	१५१

	पृ.सं.
सकृदुक्तं न गृह्णाति	१०७
स गुरुस्तारयेद्युक्तं	९७
स चोक्तस्तन्निभत्वं प्राक्	१३८
सत्तामात्रे प्रकाशस्य	६५
सत्यं ज्ञानमनन्तं च	९९
सत्यमेवमनात्मार्थ	१४८
सदभ्युपेतं भवतोप	१५८
सदसत्सदसच्चेति	७६
सदसीति फलं चोक्त्वा	१०८
सदस्मीति च विज्ञानं	१०७
सदस्मीति धियोऽभावे	१२४
सदस्मीति प्रमाणोत्था	१०६
सदा च भूतेषु समोऽहं	२७
सदा च भूतेषु समोऽस्मि	२१
सदेरुपनिपूर्वस्य	८
सदेव त्वमसीत्युक्ते	१०७
सदेवेत्यादिवाक्येभ्यः	१४६
सद्ब्रह्माहं करोमीति	१०६
सबाह्याभ्यन्तरे शुद्धे	४६
सबाह्याभ्यन्तरोऽजीर्णो	९५
सभयादभयं प्राप्तः	१५३
समं तु तस्मात्सततं	१६२
समस्तं सर्वगं शान्तं	६३
समाधिर्वाऽसमाधिर्वा	४१
समापय्य क्रियाः सर्वा	२
समाप्तेस्तर्हि दुःखस्य	१४६
सम्यक्संशयमिथ्योक्तः	१३१
सर्वज्ञोऽप्यत एव	६२
सर्वप्रत्ययसाक्षित्वात्	६०
सर्वप्रत्ययसाक्षी ज्ञः	६४

	पृ.सं.
सर्वमात्मेति वाक्यार्थे	१५२
सर्वमूर्तिवियुक्तं यत्	४१
सर्वस्यात्माऽहमेवेति	१०१
सर्वेषां मनसो वृत्तं	२९
साक्षादेव स विज्ञेय:	९३
सादित्यं हि जगत्प्राण:	४७
सिद्धादेवाहमित्यस्मात्	१०५
सिद्धि: स्यात्स्वात्मलाभश्चेत्	१३५
सिद्धे दु:खित्व इष्टं	१४१
सिद्धो मोक्षस्त्वमित्येतत्	१५०
सिद्धो मोक्षोऽहमित्येवं	१५०
सुखादेर्नात्मधर्मत्वं	८१
सुषुप्तजाग्रत्स्वपतश्च	२६
सुषुप्तवज्जाग्रति	२८
सुषुप्त्याख्यं तमोऽज्ञानं	९२
सूक्ष्मताव्यापिते ज्ञेये	२३
सूक्ष्मैकागोचरेभ्यश्च	८२
सेतुं सर्वव्यवस्थानां	१०२
सेत्स्यतीत्येव चेत्तत्स्यात्	१४९
सोऽध्यासो नेति नेतीति	१०९
सोपाधिश्चैवमात्मोक्तो	६२
स्थानावच्छेददृष्टि:	७३
स्थावरं जंगमं चैव	४८
स्थितो दीपो यथाऽयत्न:	६९
स्पष्टत्वं कर्मकर्त्रादि:	१३५

	पृष्ठ
स्मरतो दृश्यते दृष्टं	५६
स्यान्मालाऽपरिहार्या तु	८२
स्वप्न: सत्यो यथाऽऽबोधात्	३०
स्वप्नस्मृत्योर्घटादेर्हि	४४
स्वप्ने तद्वत्प्रबोधे यो	९०
स्वप्ने दु:ख्यहमध्यासं	१४५
स्वभावशुद्धे गगने	५५
स्वयंज्योतिर्न हि द्रष्टु:	१२६
स्वयं लब्धस्वभावत्वात्	८७
स्वयंवेद्यत्वपर्याय:	१४८
स्वयमेवावभास्यन्ते	११९
स्वरूपं चात्मनो ज्ञानं	१२०
स्वरूपत्वात्र सर्वस्य	७८
स्वरूपस्यानिमित्तत्वात्	७८
स्वरूपाव्यवधानाभ्यां	६४
स्वलक्षणावधिर्नाश:	१३६
स्वसाक्षिकं ज्ञानं	८४
स्वाकारान्यावभासं	७३
स्वात्मबुद्धिमपेक्ष्यासौ	५७
स्वार्थस्य ह्यप्रहाणेन	१४२
ह	
हन्त तर्हि न मुख्यार्थो	११७
हित्वा जात्यादिसम्बन्धान्	१०२
हूयन्ते तु हवींषीति	६१

अवतरणसूचनिका

अकुर्वन् विहितं कर्म	मनु.स्मृ. ११.४४
अकृत्स्नो हि सः प्राणन्नेव प्राणः	बृ.उ. १.४.७
अक्षऽयं ह वै चातुर्मास्ययाजिनः	शत.ब्रा. २.६.३.१
अग्ने. नय सुपथा	ई.उ. १८; बृ.उ. ५.१५.१; तै.ब्रा. २.८.२
अचक्षुष्कमश्रोत्रमवागमनः	बृ.उ. ३.८.८
अच्छेद्योऽयमदाह्योऽयम्	भ.गी. २.२४
अजरोऽमरोऽमृतः	बृ.उ. ४.४.२५
अजायमानो बहुधा जायते	तै.आ. ३.१३
अजो नित्यः शाश्वतोऽयं पुराणः	कठ.उ. २.१८. भ.गी. २.२०
अज्ञश्चाश्रद्दधानश्च	भ.गी. ४.४०
अतोऽन्यदार्तम्	बृ.उ. ३.४.२; ३.५.१; ३.७.२३,
अत्र स्तेनोऽस्तेनो भवति	बृ.उ. ४.३.२२
अत्रायं पुरुषः स्वयंज्योतिः	बृ.उ. ४.३.९,१४
अथ परा यया तदक्षरं	मु.उ. १.१.५
अथ य आत्मा स सेतुः	छा.उ. ८.४.१-२
अथ य एतदक्षरं गार्गि	बृ.उ. ३.८.१०
अथ येऽन्यथाऽतो विदुः	छा.उ. ७.२५.२
अथ योऽन्यां देवतामुपास्ते	बृ.उ. १.४.१०
अथ सोऽभयं गतो भवति	तै.उ. २.७
अथास्मिन् प्राण एवैकधा भवति	कौ.उ. ३.३,४,२०
अथो खल्वाहुः काममय एवायं पुरुषः	बृ.उ. ४.४.५
अदृश्येऽनात्म्येऽनिरुक्ते	तै.उ. २.७
अदृष्टं द्रष्टृश्रुतं श्रोतृ	बृ.उ. ३.८.११
अदृष्टो. द्रष्टा	बृ.उ. ३.७.२३
अद्वेष्टा सर्वभूतानां	भ.गी. १२:१३
अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः	सू.सं. ४.२.८

अनन्तरमबाह्यम्	बृ.उ. २.५.१९; ३.८.८
अनन्वागतं पुण्येन	बृ.उ. ४.३.२२
अनादित्वान्निर्गुणत्वात्	भ.गी. १३.३१
अनिष्टमिष्टं मिश्रं च त्रिविधं	भ.गी. १८.१२
अनीशया शोचति मुह्यमानः	मु.उ. ३.१.२, श्वे.उ. ४.७
अनुद्वेगकरं वाक्यं	भ.गी. १७.१५
अनृतम्	छा.उ. ७.२.१, ७.७.१; तै.उ. २.६
अनृतेन हि प्रत्यूढाः	छा.उ. ८.३.२
अनेजदेकं मनसो जवीयः	ई.उ. ४
अनेन जीवेनात्मनानुप्रविश्य	छा.उ. ६.३.२, ३
अन्तःप्रविष्टं कर्तारमेतम्	तै.आ. ३.११
अन्तःप्रविष्टः शास्ता जनानाम्	तै.आ. ३.११
अन्नमयं हि सोम्य मनः	छा.उ. ६.५.४
अन्यत्र धर्मादन्यत्राधर्मात्	कठ.उ. २.१४
अन्यदेव तद्विदितादथो	के.उ. १.३
अन्योऽसावन्योऽहमस्मीति न स वेद	बृ.उ. १.४.१०
अपूर्वमनपरमनन्तरं	बृ.उ. २.५.१९
अप्राणो ह्यमनाः	मु.उ. २.१.२
अभयं प्रतिष्ठां विन्दते	तै.उ. २.७
अमानित्वमदम्भित्वम्	भ.गी. १३.७
अमृतत्वस्य तु नाशाऽस्ति	बृ.उ. २.४.२; ४.५.३
अमौनं च मौनं च निर्विद्याऽथ ब्राह्मणः	बृ.उ. ३.५.१
अयमात्मा ब्रह्म	बृ.उ. २.५.१९
अविकार्योऽयमुच्यते	भ.गी. २.२५
अविज्ञातं विज्ञातृ	बृ.उ. ३.८.११
अविद्यया मृत्युं तीर्त्वा	ई.उ. ११, मै.उ. ७.९
अविद्यायामन्तरे वर्तमानाः	मु.उ. १.२.८, कठ.
अविभक्तं विभक्तेषु	भ.गी. १८.२०
अव्यक्तोऽयमचिन्त्योऽयम्	भ.गी. २.२५
अशब्दमस्पर्शमरूपं	कठ.उ. ३.१५, नृ.उ. ९, मुक्ति.उ. २.७२

अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः	छा.उ. ८.१२.१
अशरीरं शरीरेषु	सूत.सं. २.११.६७, कठ.उ. २.२२
असङ्गो ह्ययं पुरुषः	बृ.उ. ४.३.१५.१६
असुराणां ह्येषोपनिषत्	छा.उ. ८.८.५
अस्थूलमनणु	बृ.उ. ३.८.८
अहमात्मा गुडाकेश	भ.गी. १०.२०
अहमेवाधस्तात्	छा.उ. ७.२५.१
अहं ब्रह्माऽस्मि	बृ.उ. १.४.१०
अहं मनुरभव सूर्यश्च	बृ.उ. १.४.१०
अहं विश्वं भुवनमभ्यभवा३म्	तै.उ. ३.१०, नृ.पू. २.४
आकाशो वै नाम	छा.उ. ८.१४.१
आचार्यवान् पुरुषो वेद	छा.उ. ६.१४.२
आचार्याद्धैव विद्या विदिता	छा.उ. ४.९.३
आत्मनि खल्वरे दृष्टे श्रुते मते	बृ.उ. ४.५.६
आत्मन्येव आत्मानं पश्येत्	शत.ब्रा. १४.६.२.२८,
आत्मन्येव आत्मानं पश्यति	बृ.उ. ४.४.२३
आत्मलाभान्न परं विद्यते	आप.ध. १.२२.२
आत्मापहतपाप्मा विजरो	छा.उ. ८.१.५, मै.उ. ७.७
आत्मा वा अरे द्रष्टव्यः	बृ.उ. २.४.५, ४.५.६
आत्मा वा इदमेक एवाग्र आसीत्	ऐ.उ. १.१.
आत्मा ह्येषां स भवति	बृ.उ. १.४.१०
आत्मेति तूपगच्छन्ति ग्राहयन्ति च	ब्र.सू. ४.१.३
आत्मैव देवताः सर्वाः	मनु-स्मृ. १२.११९
आत्मैवाधस्तात्	छा.उ. ७.२५.२
आत्मैवास्य ज्योतिः	बृ.उ. ४.३.६
आत्मैवेदं सर्वम्	छा.उ. ७.२५.२
आनन्दं ब्रह्मणो विद्वान्	तै.उ. २.४.९
आनन्दरूपममृतं यद्विभाति	मु.उ. २.२.७
आवृत्तिः असकृदुपदेशात्	ब्र.सू. ४.१.१
इच्छा द्वेषः सुखं दुःखं	भ.गी. १३.६

इदं सर्वं यदयमात्मा बृ.उ. २.४.६, ४.५.७
इन्द्रं मित्रं वरुणमग्निमाहुरथो ऋ.सं. १.१६४.४६
इन्द्रो मायाभिः पुरुरूप ईयते ऋ.सं. ६.४७.१८, शत.ब्रा. १४.५.५.१९,
बृ.उ. २.५.१९, जैमि.उ.ब्रा. १.४४.१
उक्तानुशासनासि मैत्रेयि बृ.उ. ४.५.१५
उत्तमः पुरुषस्त्वन्यः भ.गी. १५.१७
उदरमन्तरं कुरुते तै.उ. २.७
उपजीव्यविरोधस्यायुक्तत्वम् पृ. १२५
उपदेक्ष्यन्ति ते ज्ञानम् भ.गी. ४.३४
उपद्रष्टानुमन्ता च भ.गी. १३.२२
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ब्रह्मबि.उ. १२
एकधैवानुद्रष्टव्यम् बृ.उ. ४.४.२०
एकं सद्विप्रा बहुधा वदन्ति ऋ.सं. १.१६४.४६
एकं सन्तं बहुधा कल्पयन्ति ऋ.सं. १०,११४.५
एकस्तथा सर्वभूतान्तरात्मा कठ.उ. ५.९, १०.११
एको देव. सर्वभूतेषु गूढः सर्वव्यापी श्वे.उ. ६.११
एको देवो बहुधा निविष्टः तै.आ. ३.१४
एको वशी सर्वभूतान्तरात्मा कठ.उ. ५.१२
एतद्ध स्म वै तत्पूर्वे बृ.उ. ४.४.२२
एतत्सर्वं मन एव बृ.उ. १.५.३
एतमेव प्रव्राजिनो बृ.उ. ४.४.२२
एतया द्वारा प्रापद्यत ऐ.उ. ३.१२
एतं वै तमात्मानं बृ.उ. ३.५.१
एतस्मिन्नु खल्वक्षरे बृ.उ. ३.८.११
एतस्य वा अक्षरस्य प्रशासने गार्गि बृ.उ. ३.८.९
एतस्यैवानन्दस्यान्यानि भूतानि बृ.उ. ४.३.३२
एवमेवैष एतत्प्राणान् गृहीत्वा बृ.उ. २.१.१८
एवंविदि पापं कर्म न श्लिष्यते छा.उ. ४.१४.३
एष त आत्मान्तर्याम्यमृतः बृ.उ. ३.७.३
एष नित्यो महिमा ब्राह्मणस्य बृ.उ. ४.४.२३

एष म आत्मान्तर्हृदये अणीयान्	छा.उ. ३.१४.३
एष म आत्मान्तर्हृदये एतद्ब्रह्म	छा.उ. ३.१४.४
एष सर्वेषु भूतेषु गूढोऽत्मा	कठ.उ. ३.१२
एषोऽस्य परमो लोकः	बृ.उ. ४.३.३२
ओतश्च प्रोतश्च	बृ.उ. ३.८.११
ओमित्येवं ध्यायथ आत्मानम्	मु.उ. २.२.५
कर्मणा पितृलोकः	बृ.उ. १.५.१६
कर्मणा बध्यते जन्तुः	शा.प. २४३.७
कर्मणैव हि संसिद्धिमास्थिता	भ.गी. ३.२०
कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च	बृ.उ. ३.८.७
कस्मिन्नु रूपाणि प्रतिष्ठितानि	बृ.उ. ३.९.२०
कामः सङ्कल्पो विचिकित्सा-	बृ.उ. १.५.३
कामा येऽस्य हृदि स्थिताः	बृ.उ. ४.४.७, कठ.उ. ६.१४
किंगोत्रो नु सोम्यासि	छा.उ. ४.४.४
किमहं साधु नांकरवम्	तै.उ. २.९
किमु तद्ब्रह्मावेत्	बृ.उ. १.४.९
कृत्स्नः प्रज्ञानघन एव	बृ.उ. ४.५.१३
केनेषितं पतति प्रेषितं मनः	के.उ. १.१
कोन्वेनं जनयेत्पुनः	बृ.उ. ३.९.२८
को मोहः कः शोकः	ई.उ. ७
क्षत्रं तं परादात्	बृ.उ. २.४.६
क्षीयन्ते चास्य कर्माणि	मु.उ. २.२.८
क्षेत्रज्ञं चापि मां विद्धि	भ.गी. १३.२
गतिसामान्यात्	ब्र.सू. १.१.११
चत्वारिंशत् संस्काराः	गौ.ध.सू. ८.१४.२२
ज्ञानाग्निः सर्वकर्माणि	भ.गी. ४.३७
ज्ञात्वा कर्म समाचरेत्	(?)[1]
ज्ञानेन तु तदज्ञानं	भ.गी. ५.१६
ज्योतिषां ज्योतिः	मु.उ. २.२.९

१. 'बुद्ध्वा कर्माणि यत् कामयेत, तदारभेत'—आप.ध. २.२१.५।

त इह व्याघ्रो वा	छा.उ. ६.९.३; ६.१०.२
तत्र को मोह: क: शोक:	ई.उ. ७
तत्रैकाग्रं मन: कृत्वा	भ.गी. ६.१२
तत्त्वमसि	छा.उ. ६.८.७
तत्सत्यं, स आत्मा तत्त्वमसि	छा.उ. ६.८.७
तत्सृष्ट्वा तदेवानुप्राविशत्	तै.उ. २.६
तदात्मानमेवावेत्	बृ.उ. १.४.१०
तदेजति तन्नैजति	ई.उ. ५
तदेतत्प्रेय: पुत्रात् प्रेयो वित्तात्	बृ.उ. १.४.८
तदेतद्ब्रह्मापूर्वमनपरम्	बृ.उ. २.५.१९
तदेव ब्रह्म त्वं विद्धि	के.उ. ४.५.६.७.८
तदेवाग्नि:	महाना.उ. १.७
तद्देवा ज्योतिषां ज्योति:	बृ.उ. ४.४.१६
तद्धावतोऽन्यानत्येति तिष्ठत्	ई.उ. ४
तद्धास्य विजज्ञौ	छां.उ. ६.७.६; ६.१६.३
तद्धैतत्पश्यन् ऋषिर्वामदेव: प्रतिपेदे	बृ.उ. १.४.१०
तद्ब्रह्म तदमृतं स आत्मा	छा.उ. ८.१४.१
तद्यथेह कर्मजितो लोक: क्षीयते	छा.उ. ८.१.६
तद्यदपां शर आसीत्	बृ.उ. १.२.२
तद्वा अस्यैतदतिच्छन्दा:	बृ.उ. ४.३.२१
तद्विज्ञानाथ स गुरुमेवाभिगच्छेत्	मु.उ. १.२.१२
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया	भ.गी. ४.३४
तन्मनो दिशं दिशं पतित्वा	छा.उ. ६.८.२
तमेव विदित्वातिमृत्युमेति	श्वे.उ. ३.८; ६.१५
तमेवं विद्वानमृत इह भवति	तै.आ. ३.१.३
तं पाणिनाऽऽपेषं बोधयाञ्चकार	बृ.उ. २.१.१५
तरति शोकमात्मवित्	छा.उ. ७.१.३
तस्मात्कर्म न कुर्वन्ति यतय:	शा.प. २४३.७
तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम:	मु.उ. ३.१.१०
तस्मादेषां तन्न प्रियं	बृ.उ. १.४.१०

तस्माद्वा एतस्मात् तै.उ. २.१
तस्य तावदेव चिरम् छा.उ. ६.१४.२
तस्य भासा सर्वमिदं विभाति तं पाणिना कठ.उ. ५.१५, श्वे.उ. ६.१४, मु.बृ. २.१
तस्य सर्वेषु लोकेषु कामचारो भवति छा.उ. ७.२५.२ इत्यादौ
तस्य हं न देवाश्च नाभूत्या ईशते बृ.उ. १.४.१०
तस्य हैतस्य पुरुषस्य रूपं बृ.उ. २.३.६
तस्याभिध्यानाद्योजनात् श्वे.उ. १.१०
तानि वा एतान्यवराणि तपांसि महाना.उ. २१.२
तान् ह स ऋषिरुवाच प्र.उ. १.२
तीर्णो हि तदा सर्वाच्छोकान् बृ.उ. ४.३.२२
त्यज धर्ममधर्मं च शा.प. ३२९.४०, ३३१,४४
त्याग एव हि सर्वेषां पश्य-पृ. १२०.९.टि.
त्रिसन्ध्यादौ स्नानमाचरेत् अरु.उ. २
दहरोऽस्मिन्नन्तराकाशे छा.उ. ८.१.१.,२
दिव्यो ह्यमूर्तः पुरुषः मु.उ. २.१.२
दृष्ट्वैव पुण्यं च पापं च बृ.उ. ४.३.१५-१७.३४
देवद्विजगुरुप्राज्ञपूजनम् भ.गी. १७.१४
देवर्त्विक्स्नातकाचार्यराज्ञां या.स्मृ.आचा. ६.१५२
देवैरत्रापि विचिकित्सितं पुरा कठ.उ. १.२१-२२
द्वाविमो पुरुषौ लोके भ.गी. १५.१६
द्वा सुपर्णा सयुजा श्वे.उ. ४.६, मु.उ. ३.१.१
द्वितीयाद्वै भयं भवति बृ.उ. १.४.२
द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च बृ.उ. २.३.१, मै.उ. ६.३.१५
धर्मेण पापमपनुदति महाना.उ. २२.१
ध्यायतीव लेलायतीव बृ.उ. ४.३.७
न कर्मणा न प्रजया महाना.उ. १०.५., कै.उ. २
न कर्मणा वर्धते नो कनीयान् बृ.उ. ४.४.२३ (माध्यन्दिनपाठः)
न कर्म लिप्यते नरे ई.उ. २
न चक्षुषा गृह्यते नापि वाचा मु.उ. ३.१.८

न चेदिहावेदीन्महती विनष्टिः के.उ. १३
न जायते म्रियते वा विपश्चित् कठ.उ. २.१८., भ.गी. २.२०
न जीवो म्रियते छा.उ. ६.११.३
न तत्र रथा न रथयोगाः बृ.उ. ४.२:१०
न तदश्नाति किञ्चन बृ.उ. ३.८.८
न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तम् बृ.उ. ४.३.२३-३०
न दृष्टेर्द्रष्टारं पश्येः बृ.उ. ३.४.२
न बिभेति कुतश्चन तै.उ. २.४.९
न लिप्यते लोकदुःखेन बाह्यः कठ.उ. ५.११
नवद्वारे पुरे देही भ.गी. ५.१३
न वै सशरीरस्य सतः छा.उ. ८.१२.१
न सत्तन्नासदुच्यते भ.गी. १३.१२
न हा वा आत्मा उदेति न निम्लोचति छा.उ. ३.११.३
न हि कश्चित्क्षणमपि भ.गी. ३.५
नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते बृ.उ. ४.३.२३
न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते बृ.उ. ४.३.३०
नाक्रमेत्कामतच्छायां गुर्वादेः मनु.स्मृ. ४.१३०
नादत्ते कस्यचित्पापं भ.गी. ५.१५
नान्तरिक्षे न दिव्यग्निश्चेतव्यः तै.सं. ५.२.७
नान्यदतोऽस्ति द्रष्टृ बृ.उ. ३.८.११
नान्यः पन्था विद्यते अयनाय तै.आ. ३.१३; श्वे.उ. ३.८; ६.१५
नाप्रशान्ताय दातव्यं श्वे.उ. ६.२२
नाविरक्ताय संसारात् नै.सि. ४.७१
नाविरतो दुश्चरितान्नाशान्तो कठ.उ. २४
नासतो विद्यते भावः भ.गी. २.१६
नित्यतृप्तः भ.गी. ४.२०
नित्यतृप्तो निरञ्जनः श्रुतिः (?)
नित्यं विभुं सर्वगतं सुसूक्ष्मम् मु.उ. १.१.६
निरञ्जनः परमं साम्यमुपैति मु.उ. ३.१.३
निष्कलं निष्क्रियं शान्तम् श्वे.उ. ६.१९

नीहारेण प्रावृता जल्प्या तै.सं. ४.६.२
नेति नेति बृ.उ. २.३.६
नेदं यदिदमुपासते के.उ. ४-८
नेह नानास्ति किचन बृ.उ. ४.४.१९, कठ.उ. ४.११
नैनं कृताकृते तपतः बृ.उ. ४.४.२२
नैनेन किञ्चनानावृतं नैनेन किंचनासंवृतम् बृ.उ. २.५.१८
न्यास इति ब्रह्मा महाना.उ. २१.२
न्यास एवात्यरेचयत् महाना.उ. २१.२
पराञ्चि खानि कठ.उ. ४.१
परीक्ष्य तत्त्वतो ब्रह्मविद्याम् मु.उ. १.२.१२-१३
परीक्ष्य लोकान् कर्मचितान् मु.उ. १.२.१२-१३
परेऽव्यये सर्व एकीभवन्ति मु.उ. ३.२.७
पश्यन् वै तन्न पश्यति बृ.उ. ४.३.२३
पादोऽस्य विश्वा भूतानि तै.आ. ३.१२
पुण्यो वै पुण्येन कर्मणा भवति बृ.उ. ३.२.१३
पुरुषं सोम्योत हस्तगृहीतमामयन्ति छा.उ. ६.१६.१
पुरुषान्न परं किञ्चित् सा काष्ठा कठ.उ. ३.११
पूः प्राणिनः सर्व एव गुहाशयस्य आपस्तम्बीयाध्यात्मपटले ४
पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् जै.सू. ६.५.५४
प्रज्ञानघन एव बृ.उ. ४.५.१३
प्रज्ञानं ब्रह्म ऐ.उ. ५.३
प्रज्ञानस्य नामधेयानि ऐ.उ. ५.२
प्रपञ्चोपशमोऽद्वयः गौ.का. २.३५
प्रयाजे कृष्णलं जुहोति तै.सं. २.३.२.३
प्राण इति होवाच छा.उ. १.११.५
प्राणायामान् षडाचरेत् मनु.स्मृ. ६.६९
प्राणाय्याय वाऽन्तेवासिने नान्यस्मै छा.उ. ३.११.५
प्राणोऽस्मि प्रज्ञात्मा कौ.उ. ३.२
बीजान्यग्न्युपदग्धानि वन.प. २००.११०
बुद्धेः स्यादपराधोऽयं तै.उ.वा. २.९.५५

बृहन्पाण्डरवास: सोम राजन्	बृ.उ. २.१.१५, कौ.उ. ४.१९
ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद	बृ.उ. २.४.६;४.५.७
ब्रह्म पुच्छं प्रतिष्ठा	तै.उ. २.५
ब्रह्म वा इदमग्र आसीत्	बृ.उ. १.४.१०-११
ब्रह्मविदाप्नोति परम्	तै.उ. १.१
ब्रह्म वेद ब्रह्मैव भवति	मु.उ. ३.२.९
ब्रह्मैव सन् ब्रह्माप्येति	बृ.उ. ४.४.६, तै.आ. २.२; नृ.उ. ५
ब्रह्मैवेदं विश्वमिदं वरिष्ठम्	मु.उ. २.२.११
ब्रह्मैवेदं सर्वं	नृ.उ. ७
ब्राह्मणो निर्वेदमायात्	मु.उ. १.२.१२
भयादस्याग्निस्तपति	कठ.उ. ६.३
भर्ता सन् भ्रियमाणो विभर्ति	तै.आ. ३.१४
भिद्यते हृदयग्रन्थि:	मु.उ. २.२.८
भीषाऽस्माद्वात: पवते	तै.उ. २.८
भोक्तेत्याहुर्मनीषिण	कठ.उ. ३.४
मनसश्चेन्द्रियाणां च	मौक्षधर्मे.२५०.४.,वनप.२६०.२५
मन:प्रसाद: सौम्यत्वं	भ.गी. १७.१६
मन्तव्य:	बृ.उ. २.४.५, ४.५.६
मम माया दुरत्यया	भ.गी. ७.१४
ममैवांशो जीवलोके	भ.गी. १५.७
मयाऽध्यक्षेण प्रकृति: सूयते	भ.गी. ९.१०
मय्येव सकलं जातं	कै.उ. १९
मर्त्य: स्विन्मृत्युना वृक्ण:	बृ.उ. ३.९.२८
महद्भूतमनन्तमपारं	बृ.उ. २.४.१२
मातृमान् पितृमानाचार्यवान्	बृ.उ. ४.१.२-७
मामेव ये प्रपद्यन्ते	भ.गी. ७.१४
मायां तू प्रकृतिं विद्यात्	श्वे.उ ४.१०
मृत्तिकेत्येव सत्यम्	छा.उ. ६.१.४
मृत्यो: स मृत्युमाप्नोति	बृ.उ. ४.४.१९, कठ.उ. ४.१०
य आत्माऽपहतपाप्मा	छा.उ. ८.७.१, ३

य एष सुप्तेषु जागर्ति	कठ.उ. ५.८
यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा	तै.आ. २.१
यतो वाचो निवर्तन्ते	तै.उ. २.९
यत्कृतकं तदनित्यम्	पृ. २७३
यत्र त्वस्य सर्वमात्मैव	बृ.उ. ४.५.१५
यत्र नान्यत्पश्यति नान्यच्छृणोति	छा.उ. ७.२४.१
यत्र वा अन्यदिव स्यात् यत्र हि द्वैतमिव भवति	बृ.उ. २.४.१४, ४.५.१५
यत्रान्यत्पश्यत्यन्यच्छृणोति	छा.उ. ७.२४.१
यत्रैकाग्रता तत्राविशेषात्	ब्र.सू. ४.१.११
यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमय:	बृ.उ. २.१.१६-१७
यत्साक्षादपरोक्षाद्ब्रह्म	बृ.उ. ३.४.१-२, ३.५.१
यथाकाशस्थितो नित्यम्	भ.गी. ९.६
यथाक्रतुरस्मिंल्लोके पुरुषो भवति	छा.उ. ३.१४.१
यथा च तक्षोभयथा	ब्र.सू. २.३.४०
यथा पशुरेवं स देवानाम्	बृ.उ. १.४.१०
यथा सकृद्विद्युत्तम	बृ.उ. २.३.६
यथा सर्वगतं सौक्ष्म्यात्	भ.गी. १३.३२
यथोदकं शुद्धे शुद्धमासिक्तं	कठ.उ. ४.१४
यदा चर्मवदाकाशं	श्वे.उ. ६.२०
यदा सर्वे प्रमुच्यन्ते	बृ.उ. ४.४.७, कठ.उ. ६.१४
यदा ह्येवैष एतस्मिन्नदृश्ये	तै.उ. २.७
यदि मन्यसे सुवेदेति दभ्रमेवापि	के.उ. २.१
यदेव विद्यया करोति	छा.उ. १.१.१०
यदैतमनुपश्यत्यात्मानं	बृ.उ. ४.४.१५
यद्वै तन्न पश्यति	बृ.उ. ४.३.२३
यं यं वापि स्मरन् भावं	भ.गी. ८.६
यस्तु सर्वाणि भूतानि	ई.उ. ६
यस्त्वात्मरतिरेव स्यात्	भ.गी. ३.१७
यस्त्वेवं ब्राह्मणो विद्यात्	तै.आ. ३.१३
यतश्चोदेति सूर्य:	बृ.उ. १.५.२३

यस्मात्क्षरमतीतोऽहं भ.गी. १५.१८
यस्मिन्द्यौ पृथिवी च मु.उ. २.२.५
यस्य देवे परा भक्तिः श्वे.उ. ६.२३
यस्य नाहंकृतो भावः भ.गी. १८.१७
यस्य सर्वाणि भूतानि शरीरं बृ.उ. ३.७.१६
यस्यामतं तस्य मतं यस्य न वेद सः के.उ. २.३
यः सर्वेषु भूतेषु तिष्ठन् बृ.उ. ३.७.१५
यावज्जीवश्रुतय. =
'यावज्जीवमग्निहोत्रं जुहोति'
'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत्' } श्रुति[1]
'यावज्जीवमग्निहोत्रं जुहुयात्'
या वेदबाह्याः स्मृतयः मनुस्मृ. १२.९५, सूत सं. २.१४.८
येनाक्षरं पुरुषं वेद मु.उ. १.२.१३
योऽयं विज्ञानमय प्राणेषु बृ.उ. ४.३.७, ४.४.२२
यो वेद निहितं गुहायां परमे व्योमन् तै.उ. २.१
योऽशनायापिपासे बृ.उ. ३.५.१
रसविद्धमयः स्वर्णम् सू.स. ४.३९.३०
रूपं रूपं प्रतिरूपो बभूव बृ.उ. २.५.१९, कठ.उ. ५.९.१०
लब्धरूपे क्वचित्किञ्चित् ब्र.सि. २.२
वासुदेवः सर्वम् भ.गी. ७.१९
विज्ञानघन एव बृ.उ. २.४.१२
विज्ञानमानन्दम् बृ.उ. ३.९.२८
विद्ययाऽमृतमश्नुते ई.उ. ११, मै.उ. ७.९
विद्यां चाविद्यां च ई.उ. ११
विमुक्तश्च विमुच्यते कठ.उ. ५.१
वृष्णीनां वासुदेवोऽस्मि भ.गी. १०.३७
वेदाहमेतं पुरुषं महान्तम् तै.आ. ३.१३

१. 'बह्वृचब्राह्मणे श्रूयते'—इति शाबरभाष्ये (२.४.१) प्रथमे द्वे धृते, तथैव जैं.न्या.मा. विस्तरे। पराशरसंहितायां (आचारकाण्डे पृ. ५१) 'तदाह जाबालि.' इत्यनेन 'यदि गृह्यमेव कामयेत्, तदा यावज्जीवमग्निहोत्रं जुहुयात्' इति वचनं धृतम्।

वेदैश्च सर्वैरहमेव वेद्यः	भ.गी. १५.१५
विद्याविनयसम्पन्ने	भ.गी. ५.१८
वेनस्तत्पश्यन्	महाना.उ. २.३
शतं शुक्राणि यत्रैकं भवन्ति	तै.आ. ३.११
शुद्धमपापविद्धम्	ई.उ. ८
शौचसन्तोषतपःस्वाध्यायेश्वर	यो.सू. २.३२
श्रद्धया परया तप्तं	भ.गी. १७.१७
षद्लृ विशरणगत्यवसादनेषु	धातुपा. १.८७९
स आत्मा तत्त्वमसि	छा.उ. ६.८.७, इत्यादौ नवकृत्त्व
स एतमेव सीमानं विदार्य	ऐ.उ. ३.१२
स एष इह प्रविष्टः	बृ.उ. १.४.७
स एष नेति नेति	बृ.उ. ३.९.२६, इत्यादौ
स एषोऽकलः	प्र.उ. ६.५
सकृद्विभातो ह्येवैष ब्रह्मलोकः	छा.उ. ८.४.२
सङ्कल्पपूर्वकमभूद्रघुनन्दनस्य	सं.शारो. २.१८२
स तु तत्पदमाप्नोति	कठ.उ. ३.८
सत्यं ज्ञानमनन्तं ब्रह्म	तै.उ. २.१
सत्यं परं परं सत्यम्	महाना.उ. २१.२
सत्यं वद। धर्मं चर।	तै.उ. २.१
सत्यस्य सत्यम्	बृ.उ. २.१.२०, मै.उ. ६.३२
सदेव सोम्येदमग्र आसीत्	छा.उ. ६.२.१
स पर्यगाच्छुक्रमकायं	ई.उ. ८
सबाह्याभ्यन्तरो ह्यजः	मु.उ. २.१.२
स ब्राह्मणः	बृ.उ. ३.८.१०
स भगवः कस्मिन् प्रतिष्ठितः	छा.उ. ७.२४.१
स म आत्मेति विद्यात्	कौ.उ. ३.८
समं सर्वेषु भूतेषु	भ.गी. १३.२७
स यत्रैतत्स्वप्नया चरति	बृ.उ. २.१.१८
स तथा तत्र न दाह्येत	छा.उ. ६.१६.३
स यश्चायं पुरुषे	तै.उ. २.८.३.१०

संयोगरूपचोदना	जै.स. २.४.९
सर्व एत आत्मानो व्युच्चरन्ति	बृ.उ. २.१.२०
सर्वं खल्विदं ब्रह्म	छा.उ. ३.१४.१
सर्वं तं परादात्	बृ.उ. ४.५.७
सर्वमात्मानं पश्येत्	बृ.उ. ४.४.२३, पश्य., पृ. ४०, टि.५
सर्वाणि रूपाणि विचित्य धीरः	तै.आ. ३.१२.७
सर्वे वेदा यत्पदमामनन्ति	कठ.उ. २.१५
सर्वे वेदा यत्रैकं भवन्ति	तै.आ. ३.११.१
सर्वेऽस्मै देवा बलिमावहन्ति	तै.उ. १.५
सलिल एको द्रष्टाऽद्वैतो भवति	बृ.उ. ४.३.३२
स वा एष आत्मा	छा.उ. ८.३.३
स वा एष महानज आत्मा	बृ.उ. ४.४.२२.२४, २५
स समानः सन्नुभौ लोकावनुसञ्चरति	बृ.उ. ४.३.७
स स्वराड् भवति	छा.उ. ७.२५.२
स हि कर्ता	बृ.उ. ४.३.१०
साक्षी चेता केवलो निर्गुणश्च	श्वे.उ. ६.११
सेयं देवतैक्षत	छा.उ. ६.३.२
सोऽश्नुते सर्वान् कामान्	तै.उ. २.१
स्वप्नान्तं जागरितान्तम्	कठ.उ. ४.४
स्वाध्यायाध्ययनविधिः	तै.आ. २.१५.७, शत.ब्रा. ११.५.६.७
हिरण्मयेन पात्रेण	ई.उ. १५, बृ.उ. ५.१५.१, मैं.उ. ६.३५
हिरण्यदा अमृतत्वं भजन्ते	ऋ.सं. १०,१०८.२
हिंसानुग्रहयोरनारंभी	गौ.ध.सू. ३.२४-२५
हृद्यन्तर्ज्योतिः पुरुषः	बृ.उ. ४.३.७

मन्त्रराजः

ॐ नमः शिवाय

श्रीमत्पद्मपादाचार्यविरचितः

मन्त्रराजप्रकाशः

त्यागो हि नमसो वाच्य आनन्दः प्रकृतेस्तथा।
फलं प्रत्ययवाच्यं स्यात् त्याज्यं पत्रफलादिकम्।।१।।

त्यजामीदमिदं सर्वं चतुर्णामिह सिद्धये।
अथवा नमसो वाच्यः प्रणामो दैन्यलब्धये।।२।।

दैन्यं सेवा तया ज्ञप्तिः सिद्धिः सर्वस्य वस्तुनः।
नमामि देवदेवेशं सकामोऽकाम एव वा।।३।।

नञा निषिध्यते भावविकृतिर्जगदात्मनः।
मसनं देवदेवेश नेह नानाऽस्ति शब्दतः।।४।।

अयेति गमयेत्यर्थे तस्माच्छुद्धोऽस्मि नित्यशः।
प्रणामो देहगेहादेरभिमानस्य नाशनम्।।५।।

शिवो ब्रह्मादिरूपस्स्याच्छक्तिभिस्तिसृभिस्सह।
अथवा तुर्यमेव स्यान्निर्गुणं ब्रह्मतत्परम्।।६।।

नमसो नमने शक्तिर्नमनं ध्यानमेव च।
ङेऽन्तात्तादात्म्यसम्बन्धः कथ्यते प्रत्यगात्मनोः।।७।।

अहं शिवः शिवोऽहं च मन्ये वेदान्तनिष्ठया।
इत्येवं नम इत्युक्तं वेदैः शास्त्रैश्च सर्वशः।।८।।

●

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतं मे गोपाय